2·3

The Kārikāvalī-Muktāvalī-Dinakarī

with the Commentary Rājīvollāsa

by

Mahāmahopādhyāya - Śāstrakalpadruma

Śrī N.S. Ramanuja Tatacharya

PART - II

Upamāna-Khaṇḍa, Śabda-Khaṇḍa and Guṇa-Khaṇḍa

Edited by

N.Veezhinathan

(Disciple of Śrī N.S. Ramanuja Tatacharya)

Sri Sri Sri

Mahalakshmi-Mathrubhutheswarar Trust

Chennai

2014

શ્રી મહામહોપાધ્યાયેભ્યઃ
રાષ્ટ્રપતિ પ્રશસ્તિ પુરસ્કૃતેભ્યઃ
અનવરત ન્યાયશાસ્ત્ર પાઠનનિરતેભ્યઃ
વિદ્વદ્વરેણ્યેભ્યઃ
શ્રી આચાર્ય વસિષ્ઠ ત્રિપાઠિ ગુરુભ્યઃ
ભક્ત્યા સંપ્રદીયતે ॥

By, શ્રી ઉત્તરાદિમઠઃ કાશિ
પં કૃષ્ણાચાર્ય કાશી
યદુપતિ આચાર્ય કાશિ

The
Kārikāvalī-Muktāvalī-Dinakarī
with the Commentary
Rājīvollāsa

by

Mahāmahopādhyāya - Śāstrakalpadruma

Śrī N.S. Ramanuja Tatacharya

The Kārikāvalī-Muktāvalī-Dinakarī with the Commentary Rājīvollāsa

by

Mahāmahopādhyāya - Śāstrakalpadruma

Śrī N.S. Ramanuja Tatacharya

Part - II

Upamāna-Khaṇḍa, Śabda-Khaṇḍa and Guṇa-Khaṇḍa

Edited by

N. Veezhinathan

(Disciple of Śrī N. S. Ramanuja Tatacharya)

Sri Sri Sri

Mahalakshmi-Mathrubhutheswarar Trust

Chennai

2014

First Edition: 2014

Copies: 1000

Price: 1200 / -

Published by:
Sri Sri Sri Mahalakshmi Mathrubhutheswarar Trust
[S S S M M Trust (Regd)]
New No. 23, First Street,
South Gopalapuram, Chennai - 600 086.
Email:
sssmmtrust@gmail.com
Websites:
www.manimantapam.org

Printed at:
Elango Achukoodam,
Mylapore, Chennai-600 004.
Phone: 91-44-2499 1821
Cell: 9884184061

This Volume is Reverentially Dedicated

To

Jagadguru

Śrīmacchandraśekharendra Sarasvatī

Bhagavatpūjyapādāḥ

The Mirror of Grace

and

The Majesty Divine

On

The Auspicious Occasion

of

The Diamond Jubilee


of

The Ascension to the Śrī Kāñcī Kāmakoṭi Pīṭha

by

Jagadguru

Śrīmad-Jayendra Sarasvatī Bhagavatpūjyapādāḥ



PREFACE

The present Volume comprises the three sections, viz., the *Upamāna-Khaṇḍa*, the *Śabda-Khaṇḍa*, and the *Guṇa-Khaṇḍa* of the *Kārikāvalī-Muktāvalī-Dinakarī* with the Commentary, *Rājīvollāsa*.

To my Guru, Tediyur Śrī Krishnamurthy Sastriyar, who initiated me into the Sanskrit language in my early childhood and to whom I owe my knowledge of Sanskrit, I offer my salutations. I am endlessly thankful to Śrī N. Subramanian, Śrī K. Vedamurthy, Śrī S. Narayanaswami, Śrī K. Sethuraman *alias* Ramesh, and other fellow devotees for sponsoring the publication of this work under the auspices of The Sri Sri Sri Mahalakshmi Mathrubhutheswarar Trust functioning from Gopalapuram in Chennai. This Trust is engaged in the sublime task of constructing a *Maṇi-maṇṭapa* at the Oririkkai village near Kāñcīpuram as a humble expression of the deep sense of gratitude of the devotees towards our Jagadguru Śrī Śrī Candraśekharendra Sarasvatī Bhagavat-pūjyapādāḥ.

I record my eternal gratitude to Dr. Śrī S. Yejnasubramanian of New Jersey for his generous offer of financial assistance towards this publication. I am overwhelmed by his splendid munificence. His warmhearted readiness to give and his magnanimity, I shall treasure up in my heart for ever.

To Prof. K. V. Ramakrishnamacharyulu, Former Vice-Chancellor, Jagadguru Ramanandacharya Rajasthan Sanskrit University, to Prof. G. Srinivasu of the Sri Chandrasekharendra Sarasvati Viswa Mahavidyalaya, Kanchipuram, to Dr. T. V. Vasudevan, Dr. K. S. Balasubramaniam, and Śrī S. N. Krishna of the Kuppuswamy Sastri Research Institute, Chennai, and to Dr. V. M. Ananthanarayanan, Professor of Sanskrit, National College, Tiruchirapalli, I express my grateful thanks for helping me with great warmth and affection in identifying many of the passages referred to in the text.

To Dr. M. Raghu, Librarian, The Madras Sanskrit College, I am extremely grateful for the courteous help rendered by him during the preparation of this work.

To Dr. C. Murugan, Assistant Professor, Department of Sanskrit, University of Madras, I am grateful for typesetting the whole work. To Śrī M.S. Maniyavan of the Elango Achukhoodam, Chennai, I am thankful for his kind co-operation and neat execution of this work.

Chennai
July 30, 2014.

N. Veezhinathan

UPAMĀNA-KHAṆḌA
ŚABDA-KHAṆḌA
GUṆA-KHAṆḌA

विषयानुक्रमणिका ।।

(राजीवोल्लासयुता कारिकावली-मुक्तावली-दिनकरी)

।। उपमानखण्डः ।।

।। शब्दखण्डः ।।

।। गुणखण्डः ।।

* * *

।। श्रीः ।।

श्रितसकलजनानां रक्षणे जागरूकं
शुभविविधगुणानामाकारं श्रीनिवासम् ।
श्रुतिशिरसि विदीप्तं साधुभिः सेव्यमानं
वृषगिरिमधिरूढं भक्तिभूम्ना नमामि ।।

।। श्रीरस्तु ।।

श्रीगुरुचरणारविन्दाभ्यां नमः।।

।। कारिकावली-मुक्तावली-दिनकरी ।।

श्रीरामानुजताताचार्यविरचितया

राजीवोल्लासव्याख्यया

समलङ्कृता ।।

।। उपमानखण्डः ।।

कारिकावली

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीः गवादीनां या स्यात्, सा कारणं मतम् ।। ७९ ।।
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरूपमाफलम् ।। ८० ।।

मुक्तावली

उपमितिं व्युत्पादयति – ग्रामीणस्य इति । यत्र आरण्यकेन केनचित् ग्रामीणाय उक्तं ''गोसदृशः गवयपदवाच्यः'' इति, पश्चात् ग्रामीणेन क्वचित् अरण्यादौ गवयः दृष्टः, तत्र गोसादृश्यज्ञानं यत् जातं तत् उपमितिकरणम्; तदनन्तरं ''गोसदृशः गवयपदवाच्यः'' इति अतिदेशवाक्यार्थस्मरणं यत् जायते तदेव व्यापारः ; तदनन्तरं ''गवयः गवयपदवाच्यः'' इति ज्ञानं यत् जायते

तत् उपमितिः । न तु ''अयं गवयपदवाच्यः'' इति उपमितिः, गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ।।

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्याम् उपमानखण्डः ।।

दिनकरी

अवसरसङ्गतिम् अभिप्रेत्य आह – **उपमितिम्** इति । **तत्र** – गवये । **सादृश्यज्ञानं** – सादृश्यप्रत्यक्षम् । **तत् उपमितिकरणम्** इति । **नवीनमतेन** एतत् ।।

''अतिदेशवाक्यार्थशाब्दबोधः करणम्, अतिदेशवाक्यार्थस्मरणं व्यापारः, सादृश्यविशिष्टपिण्डदर्शनं सहकारि'' इति सांप्रदायिकमतं तु ''सहकारितया आवश्यकसादृश्यविशिष्टपिण्डदर्शनस्यैव करणत्वं युक्तम्'' इति उपेक्षितम् ।।

स्मरणं यत् जायत इति । सादृश्यविशिष्टपिण्डदर्शनस्य उद्बोधकविधया तादृशवाक्यार्थस्मारकत्वात् इति भावः ।।

।। राजीवोल्लासः ।।

श्रीवेङ्कटाचलाधीशं रमावासं दयानिधिम् ।
नत्वोपमानखण्डस्य व्याख्यां कर्तुं समारभे ।।

अवसरसङ्गतिम् इति । अनुमाननिरूपणानन्तरम् उपमाननिरूपणे अवसरः सङ्गतिः। अवसरो नाम प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्या अनन्तर-वक्तव्यत्वम् । प्रकृते च अनुमानोपमानयोः द्वयोरपि प्रत्यक्षोपजीवक-त्वमस्ति । अनुमानस्य व्याप्तिप्रत्यक्षोपजीवकत्वात् उपमानस्य सादृश्यप्रत्यक्षोप-जीवकत्वाच्च । तथापि अनुमानस्य बहुवादिसंमतत्वेन निरसनीयाल्पवादि-

विप्रतिपत्तिकत्वेन च सुप्रसिद्धतया अनुमाने एव प्रायशः व्युत्पित्सोः प्रथमतः जिज्ञासा जायत इति सा जिज्ञासा उपमाननिरूपणस्य प्रतिबन्धिका । अनुमाननिरूपणेन तस्याः जिज्ञासायाः निवृत्तौ प्रतिबन्धकनिवृत्या उपमानस्य अवश्यवक्तव्यत्वम् इति अवसरसङ्गत्या अनुमाननिरूपणानन्तरं उपमाननिरूपणम् इति भावः ।।

नवीनमतेन एतत् इति । गोसादृश्यविशिष्टपिण्डदर्शनं करणम् । ''गोसदृशो गवयपदवाच्यः'' इति आरण्यकोक्तातिदेशवाक्यार्थस्मरणं व्यापारः । ''गवयो गवयपदवाच्यः'' इति ज्ञानम् उपमितिः इति **नवीनानां** मतम् ।।

सांप्रदायिकमतम् उपन्यस्य तदुपेक्षायां निमित्तम् आह– **अतिदेशवाक्यार्थशाब्दबोध** इति । आरण्यकेन उक्तं यत् ''गोसदृशो गवयपदवाच्यः'' इति अतिदेशवाक्यं तच्छ्रवणजन्यः ग्रामीणस्य जायमानः तद्वाक्यार्थविषयकशाब्दबोधः करणम् । तदनन्तरं अरण्यं गतस्य ग्रामीणस्य गोसादृश्यविशिष्टपिण्डदर्शनेन अतिदेशवाक्यार्थस्मरणं यत् जायते तत् व्यापारः । गोसादृश्यविशिष्टपिण्डदर्शनं सहकारिकारणम् इति **प्राचीनानां मतम्** । तन्मते सहकारिकारणतया स्वीकृतं गोसादृश्यविशिष्टपिण्डदर्शनमेव करणं भवितुमर्हति । न तु व्यवहितः अतिदेशवाक्यार्थशाब्दबोधः इत्याशयेन तन्मतं उपेक्षितमिति भावः ।।

अतिदेशवाक्यार्थस्मरणं व्यापार इति । न च– अतिदेशवाक्यार्थशाब्दबोधानन्तरं गोसादृश्यविशिष्टपिण्डदर्शनं, तदनन्तरमेव अतिदेशवाक्यार्थस्मरणम् इति कथं तस्य व्यापारत्वम् ? सादृश्यविशिष्टपिण्डदर्शनव्यवहितत्वात्– इति वाच्यम् ।।

प्राचीनमते तज्जन्यजन्यस्यापि व्यापारत्वोपगमात् इति भावः ।।

ननु एवं **प्राच्यमते** उद्बोधकान्तरवशात् यत्र अतिदेशवाक्यार्थस्मरणम्,

तत्र सादृश्यविशिष्टपिण्डदर्शनं विनापि उपमितिप्रसङ्गः इति, अत आह – **सादृश्यविशिष्टपिण्डदर्शनं सहकारि इति** । एवं च उद्बोधकान्तरवशात् अतिदेशवाक्यार्थस्मरणस्थलेऽपि सादृश्यविशिष्टपिण्डदर्शनं सहकारिकारणतया अपेक्षितम् । अतः न तद्विना उपमितिः इति भावः ।।

प्राचीनमतोपेक्षायां बीजम् आह – **सहकारितया इति । युक्तम् इति** । अवश्यापेक्षितस्य सादृश्यविशिष्टपिण्डदर्शनस्यैव करणत्वे संभवति तदतिरिक्तस्य अतिदेशवाक्यार्थशाब्दबोधस्य करणत्वकल्पने गौरवात् प्राचीनमतम् उपेक्षितम् इति भावः ।।

ननु **नव्यमते** सादृश्यविशिष्टपिण्डदर्शनम् उपमितिकरणम्, अतिदेश-वाक्यार्थस्मरणं व्यापारः इत्येतत् न सङ्गच्छते । स्मरणस्य स्वसमानप्रकारकानु-भवजन्यत्वनियमात् सादृश्यविशिष्टपिण्डदर्शनजन्यत्वाभावेन तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारलक्षणाभावात् इति आशङ्कां निरस्यति – **सादृश्यविशिष्ट इति** । तथा च अतिदेशवाक्यार्थस्मरणस्य तत्समानप्रकारक-पूर्वोत्पन्नातिदेशवाक्यजन्यशाब्दबोधात्मकानुभवजन्यत्वेऽपि स्मरणजनकसंस्कारोद्बोध-कतया सादृश्यविशिष्टपिण्डदर्शनस्यापि कारणत्वम् अस्ति इति स्मरणव्यापारकस्य तस्य करणत्वम् उपपद्यत एव इति भावः ।।

दिनकरी

तदेव व्यापार इति । एतेन – सादृश्यविशिष्टपिण्डदर्शनोत्तरं यत्र अति-देशवाक्यार्थबोधः, तत्र अतिदेशवाक्यार्थस्मरणापेक्षाभावात् न अतिदेशवाक्यार्थ-स्मृतिव्यापारकं सादृश्यविशिष्टपिण्डदर्शनं करणम्; किन्तु सादृश्यज्ञानमात्रं करणम्, विशेषणज्ञानविधया तज्जन्यम् अतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्टपिण्डदर्शनं च द्वयं व्यापारः इति **कस्यचिन्मतं प्रत्युक्तम्** । यत्र सादृश्यविशिष्टपिण्डदर्शनोत्तरम्

अतिदेशवाक्यार्थशाब्दबोधः, तत्र उपमित्यनभ्युपगमात् । किन्तु तदुत्तरं पुनः सादृश्यविशिष्टपिण्डदर्शनं, ततः अतिदेशवाक्यार्थस्मरणं, तदुत्तरमेव उपमितिः इति भावः ।।

राजीवोल्लासः

एतेन इति । अतिदेशवाक्यार्थस्मरणव्यापारकस्य गोसादृश्यविशिष्ट-पिण्डदर्शनस्यैव उपमितिकरणत्वोपवर्णनेन इत्यर्थः । **"कस्यचिन्मतं प्रत्युक्तम्"** इत्यनेन अन्वयः । यत्र सादृश्यविशिष्टपिण्डदर्शनं प्रथमतः, तदनन्तरं "गोसदृशः गवयः" इत्यतिदेशवाक्यजन्यशाब्दबोधः, तदनन्तरं "गवयः गवयपदवाच्यः" इति ज्ञानम्, तत्र अतिदेशवाक्यार्थविषयकानुभवस्य सत्त्वेन तद्विषयकस्मरणापेक्षाया अभावात् अतिदेशवाक्यार्थस्मरणव्यापारकं सादृश्यविशिष्टपिण्डदर्शनं करणम् इति वक्तुं न शक्यते । किन्तु सादृश्यज्ञानमात्रं– गवयत्वावच्छिन्नविशेष्यकत्वरहितं सादृश्यरूपविशेषणज्ञानं करणम्। तज्जन्यं गोसादृश्यविशिष्टगवयपिण्डदर्शनम्, अतिदेशवाक्यार्थज्ञानं अनुभवस्मरणसाधारणं च उभयं व्यापारः – उभयोरपि विशेषणज्ञानविधया सादृश्यज्ञानजन्यत्वात् व्यापारलक्षणसत्त्वात् – इति **कस्यचिन्मतम्** निरस्तम् । सादृश्यविशिष्टपिण्डदर्शनोत्तरं यत्र अतिदेशवाक्यार्थ-शाब्दबोधः, तत्र उपमितेरेव अनङ्गीकारात् । ननु एवं तादृशस्थले उपमितेः अनुभवसिद्धायाः अपलापप्रसङ्गः इति, अत आह – **किन्तु** इति । तादृशस्थले पुनरपि सादृश्यविशिष्टपिण्डदर्शनम्, ततः अतिदेशवाक्यार्थस्मरणं तदुत्तरमेव उपमितिः इति स्वीकारात् क्षणद्वयविलम्बेन उपमितेः उपपादनसंभवात् न अनुभवापलापापत्तिः इति भावः । तथा च उपमितिकारण-स्मृतिकारण-शाब्दबोधस्य अन्यथासिद्धत्वात् न व्यापारत्वम्, क्षणद्वयविलम्बादिकल्पनागौरवं तु फलमुखत्वात् न दोषाय इति भावः ।।

दिनकरी

गवयः गवयपदवाच्यः इति ज्ञानं यत् जायत इति । एतेन – उपमितिः न प्रमित्यन्तरम्, किन्तु शाब्दबोधात्मिकैव । ''गोसदृशः गवयः'' इत्यत्र सदृश-पदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहस्य ''गोसदृशः गवपपदवाच्यः'' इत्याकारकस्यैव उपमितिस्वरूपत्वात् इति – अपास्तम् । **गवयत्वावच्छेदेन** गवयपदवाच्यत्वविषयिण्या उपमितेः गवयपदजन्यगवयत्वविशिष्टोपस्थितिं विना शाब्दबोधरूपत्वासंभवात् इति ।।

राजीवोल्लासः

एतेन इति । ''गवयो गवयपदवाच्यः'' इत्याकारकं गवयत्वावच्छिन्न-विशेष्यकगवयपदवाच्यत्वप्रकारकज्ञानम् उपमितिः इति कथनेन उपमितिः न प्रमित्यन्तरम् इति मतं निरस्तम् इत्यर्थः । तथा हि – ''गोसदृशो गवयपदवाच्यः'' इति अतिदेशवाक्यजन्यः यः गोसदृशत्वावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारक-शाब्दबोधः सैव उपमितिः, न तु शाब्दबोधातिरिक्तप्रमित्यन्तरम् । न च – एवं गोसादृश्यस्यैव गवयपदवाच्यतावच्छेदकत्वम् उपमितिविषयः, न तु गवयत्वस्य इति – वाच्यम् । इष्टत्वात् इति **केषांचिन्मतम्** । तत् वक्ष्यमाणयुक्त्या अपास्तम् इत्यर्थः । अपाकरणयुक्तिम् आह – **गवयत्वावच्छेदेन** इति । गवयत्वावच्छिन्ने गवयपदवाच्यत्वज्ञानमेव उपमितिः, न तु गोसादृश्या-वच्छिन्ने । गवयत्वावच्छिन्ने गवयपदवाच्यत्वप्रकारकोपमितिश्च गवयपदाधीन-गवयत्वविशिष्टोपस्थितिं विना शाब्दबोधात्मिका भवितुं न अर्हति । तदवच्छिन्नविशेष्यकशाब्दबोधे तदवच्छिन्नविषयकपदवृत्तिज्ञानजन्योपस्थितेः कारणत्वात् ''गोसदृशो गवयपदवाच्यः'' इत्यतिदेशवाक्ये च गवयत्वावच्छिन्न-वाचकपदाभावात्। अतः ''गवयो गवयपदवाच्यः'' इति उपमितिः शाब्दबोधाति-रिक्ता प्रमितिः इति भावः ।।

दिनकरी

न च – गोसादृश्यस्य गवयत्वस्य च प्रत्यक्षेण उपस्थितौ कथं गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिः, न तु सादृश्यावच्छेदेन इति – वाच्यम् । **उपस्थितेः तौल्येऽपि** गवयत्वजात्यपेक्षया गोसादृश्यस्य गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वोपमितेः अनुदयात् गवयपदात् **गवयत्वप्रकारक**-शाब्दबोधानुपपत्तेश्च । तत्प्रकारकशाब्दबोधे तदवच्छेदेन शक्तिग्रहस्य हेतुत्वात् ।।

राजीवोल्लासः

ननु गवयत्वावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकज्ञानमेव उपमितिः, न तु गोसादृश्यावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकज्ञानम्, इत्यत्रैव विनिगमकाभावात् उपमितेः प्रमित्यन्तरत्वं कथं सिद्ध्येत् इत्याशयेन शङ्कते – **न च गोसादृश्यस्य** इति । समाधत्ते – **उपस्थितेः तौल्येऽपि** इति । यद्यपि गोसादृश्यं गवयत्वं च प्रत्यक्षेण उपस्थितम्, तथापि ''गवयत्वजात्यपेक्षया गोसादृश्यं गुरु'' इत्याकारकस्य गौरवज्ञानस्य प्रतिबन्धकस्य सद्भावेन गोसादृश्ये गवयपदवाच्यतावच्छेदकत्वावगाहिनी उपमितिः न जायते । किन्तु गवयत्वे गवयपदवाच्यतावच्छेदकत्वावगाहिनी ''गवयो गवयपदवाच्यः'' इत्याकारिकैव उपमितिः जायते । तस्याश्च पूर्वोक्तरीत्या शाब्दबोधरूपत्वासंभवात् प्रमित्यन्तरत्वम् आवश्यकम् इति भावः ।।

ननु प्रत्यक्षेण गवयत्वोपस्थित्यनन्तरं गौरवज्ञानेन प्रतिबन्धात् गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वज्ञानासंभवेऽपि गवयत्वप्रत्यक्षात् पूर्वमेव अतिदेशवाक्यात् गोसादृश्यावच्छिन्नविशेष्यकशाब्दबोधोत्पत्तौ बाधकाभावः इति, अत आह – **गवयत्वप्रकारक** इति । ''अत्र अरण्ये गवयः अस्ति'' इति वाक्यश्रवणानन्तरं गवयत्वप्रकारकशाब्दबोधः अनुभूयते । तादृशशाब्दबोधं प्रति गवयत्वावच्छिन्ने

गवयपदशक्तिज्ञानं कारणम् । तद्धर्मप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नविशेष्यक-शक्तिज्ञानस्य हेतुत्वात् । तादृशं च शक्तिज्ञानम् उपमितेः गवयत्वावच्छिन्ने गवयपदवाच्यत्वप्रकारकत्वे घटते । उपमितेरेव शक्तिज्ञानविधया गवयत्वप्रकारक-शाब्दबोधहेतुत्वसंभवात् । अन्यथा **"शक्तिग्रहं व्याकरणोपमान"** इत्यादिना उपमानात् शक्तिग्रहः इत्यस्य उदाहरणमेव न लभ्येत ।।

दिनकरी

न च – **द्रव्यत्वविशिष्टे** सादृश्यज्ञानात् गवयत्वावच्छेदेन गवयपदवाच्यत्वो-पमितेः अनुदयात् तद्धर्मविशिष्टे सादृश्यज्ञानं तद्धर्मावच्छेदेन उपमितिजनकं वाच्यम् । तथा च यदा गवयत्वादिजात्यनुपस्थितिः, तदा सादृश्यस्य संस्थानादिगुरुधर्मविशिष्टे ग्रहात् तदवच्छेदेन गवयादिपदवाच्यत्वोपमित्यापत्तिः इति – वाच्यम् । **इष्टापत्तेः** । तस्याः भ्रमत्वेन तादृशगुरुधर्मावच्छेदेन गवयादिपदवाच्यत्वासाधकत्वात् इति ।।

राजीवोल्लासः

ननु अस्तु गवयवपदात् गवयत्वप्रकारकशाब्दबोधोपपत्तये "गवयो गवयपदवाच्यः" इत्याकारकशक्तिग्रहरूपोपमित्या गवयत्वस्य गवयपदवाच्यता-वच्छेदकत्वसिद्धिः। तथापि "गोसदृशो गवयः" इत्यतिदेशवाक्यात् गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वप्रकारकशाब्दबोधः न जायते, गोसादृश्यस्य गवयत्वापेक्षया गुरुत्वेन शक्यतावच्छेदकत्वासंभवात् । किन्तु गोसादृश्याश्रये गवयपद-वाच्यत्वप्रकारकः गोसादृश्ये गवयपदवाच्यत्वानवगाहिशाब्दबोध एव जायत इति यदुक्तं तत्र प्रमाणं नास्ति । प्रत्यक्षेण गवयत्वोपस्थितेः पूर्वं प्रतिबन्धकगौरव-ज्ञानविरहेण अतिदेशवाक्यात् गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वप्रकारक-शाब्दबोधोत्पत्तौ बाधकाभावात् । न च – गवयत्वावच्छिन्ने गवयपदवाच्यत्वा-वगाहिज्ञानसमामग्र्येव गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वावगाहिशाब्दाबोधोत्पत्तौ

बाधिका इति – वाच्यम् । गवयत्वावच्छिन्ने गवयपदवाच्यत्वावगाहिज्ञानस्य हि गवयत्वावच्छिन्नधर्मिकगोसादृश्यज्ञानं "गवयो गोसदृशः" इत्याकारकं कारणम् । तच्च ज्ञानं प्रत्यक्षेण गवयत्वोपस्थितेः पूर्वं न संभवति इति तादृशज्ञानघटितायाः "गवयत्वावच्छिन्नो गवयपदवाच्यः" इत्याकारकोपमितिसामग्र्याः असंभवात् । तथा च गवयत्वोपस्थितेः पूर्वं गवयत्वावच्छिन्ने गवयपदवाच्यत्वावगाहिज्ञानसामग्रीरूपस्य बाधकस्य अभावात् अतिदेशवाक्यात् गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वावगाहिशाब्दबोधः संभवत्येव। एवं च तादृशशाब्दबोधबलात् गोसादृश्यस्यापि गवयपदवाच्यतावच्छेदकत्वसिद्धिः निष्प्रत्यूहा इत्याशयेन शङ्कते – न च द्रव्यत्वविशिष्टे इति । समाधत्ते – इष्टापत्तेः इति । "गोसदृशो गवयपदवाच्यः" इति अतिदेशवाक्यात् "गोसादृश्यावच्छिन्नः गवयपदवाच्यः" इति शाब्दबोधोत्पत्तावपि सः शाब्दबोधः गोसादृश्ये गवयपदवाच्यतावच्छेदकत्वांशे भ्रमरूपः । तदानीं गोसादृश्ये गुरुत्वज्ञानाभावेऽपि वस्तुतः गुरोः तस्य गवयपदवाच्यतानवच्छेदकत्वात्, अनवच्छेदके तत्र अवच्छेदकत्वावगाहिज्ञानस्य तदभाववति तत्प्रकारकत्वेन भ्रमत्वावश्यंभावात्। तथा च भ्रमात्मकतादृशज्ञानेन गोसादृश्यस्य गवयपदवाच्यतावच्छेदकत्वं न सिद्ध्यति । भ्रमस्य विषयासाधकत्वात् इति भावः ।।

दिनकरी

इदम् उपलक्षणम् । वैधर्म्यविशिष्टपिण्डदर्शनं करणम्, "जलादिविधर्मगुणवती पृथिवी" इति अतिदेशवाक्यार्थस्मृतिः व्यापारः, पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलम् इत्यपि बोध्यम् ।

ननु उपमानस्य प्रमाणान्तरत्वे मानाभावः । न च प्रत्यक्षादिप्रमितिविजातीयप्रमितिकरणत्वात् तस्य प्रमाणान्तरत्वम् । उपमितेः प्रत्यक्षादिप्रमितितः विजा-

तीयत्वाभावात् इति चेत्, न । चक्षुरादिव्यापारविगमेऽपि उपमितेः उत्पादेन चाक्षुषत्वाद्यसंभवात् । न वा मानसत्वम्, मानसोत्तरमनुत्पद्यमानाया ''उपमिनोमि'' इति प्रतीतेः विषयत्वात्, उपमित्यनन्तरं ''साक्षात्करोमि'' इति प्रतीतेः अनुदयेन तत्र प्रत्यक्षसत्त्वे प्रमाणाभावाच्च । अन्यथा अनुमितेरपि मानसत्वापत्तेः । नापि अनुमितिः, व्याप्त्यादि ज्ञानं विनापि उदयात् । न शाब्दम्, पदज्ञानाजन्यत्वात् । न स्मृतिः, अननुभूतार्थस्य स्मरणायोगात् इति संक्षेपः ।।

इति श्रीभारद्वाजकुलाम्वुधिपूर्णचन्द्रवालकृष्णभट्टात्मजमहादेवभट्टविरिचिते मुक्तावलीप्रकाशे उपमानखण्डः समाप्तः ।।

राजीवोल्लासः

सादृश्यविशिष्टपिण्डदर्शनमिव वैधर्म्यविशिष्टपिण्डदर्शनमपि क्वचित् उपमितौ करणम्। अत्र ''जलादिवैधर्म्यवती पृथिवीपदवाच्या'' इति अतिदेशवाक्यार्थस्मरणं व्यापारः । ''पृथिवी पृथिवीपदवाच्या'' इति उपमितिः इत्याह – **इदम् उपलक्षणम्** इति ।।

ननु न उपमानस्य प्रमाणान्तरत्वम् । ''गवयः गवयपदवाच्यः'' इति उपमितिस्थानाभिषिक्तस्य गवयांशे लौकिकस्य गवयपदवाच्यत्वांशे अलौकिकस्य चाक्षुषस्यैव उपगमसंभवात् ।।

न च – चक्षुर्व्यापारोपरमेऽपि अतिदेशवाक्यार्थस्मरणेन उपमितिदर्शनात् न तत्र चाक्षुषत्वसंभवः इति – वाच्यम् । एवमपि अलौकिकमानसप्रत्यक्षत्वसंभवेन उपमितेः विजातीयप्रमितित्वे मानाभावात् इति आशङ्क्य ''उपमिनोमि'' इति अनुव्यवसायसाक्षिकीं विलक्षणप्रमितिं व्यवस्थाप्य तत्करणत्वेन उपमानस्य प्रमाणान्तरत्वं व्यवस्थापयति – **ननु** इत्यादि । **''साक्षात्करोमि'' इति प्रतीतेः अनुदयेन** इति ।।

ननु लौकिकविषयतैव साक्षात्कारत्वव्यञ्जिका, मनसस्तु बहिर्विषये लौकिकसन्निकर्षाभावेन लौकिकविषयत्वाभावात् उपमितेः मानसप्रत्यक्षत्वेऽपि तदुत्तरं न ''साक्षात्करोमि'' इति प्रतीतिसंभवः, व्यञ्जकाभावात्। अन्यथा स्वर्गविषयकालौकिकमानसोत्तरमपि ''स्वर्गं साक्षात्करोमि'' इति प्रतीत्यापत्तेः। इत्थं च ''उपमिनोमि'' इति प्रतीतेरपि सादृश्यज्ञानोत्तरमानसमेव विषयः अस्तु, न तु विजातीयप्रमितिः इति अस्वरसात् आह – **अन्यथा** इति। **अनुमितेरपि** इति। व्याप्तिज्ञानोत्तरमानसस्यैव ''अनुमिनोमि'' इति प्रतीतिविषयत्वसंभवात् इति भावः। तथा च ''अनुमिनोमि'' इति अनुव्यवसायविषयीभूता अनुमितिः यथा प्रमित्यन्तरम्, तथा ''उपमिनोमि'' इति विलक्षणानुव्यवसायविषयीभूता उपमितिरपि इति भावः ।।

ननु ''गवयः गवयपदवाच्यः, गोसदृशत्वात्, यन्नैवं तन्नैवम्'' इति व्यतिरेक्यनुमितिरूपैव उपमितिः अस्तु। ''उपमिनोमि'' इति प्रतीतेरपि शक्तिविधेयकानुमितिरेव विषयः अस्तु इति आशङ्कां निराचष्टे - **नापि** इति। **संक्षेप** इति। ''न अनुमिनोमि'', ''न शृणोमि'', ''न स्मरामि'', किन्तु ''उपमिनोमि'' इति प्रतीतेरपि प्रमित्यन्तरमेव उपमितिरिति भावः इति तरङ्गिणीकाराः ।।

।। शुभं भूयात् ।।

दिनकर्युपमानस्य राजीवोल्लासनामिका ।
रामानुजकृता व्याख्या सरला समपूर्यत ।।

इति श्रीरामानुजताताचार्यविरचिते
दिनकरीयव्याख्याने
राजीवोल्लासे उपमानखण्डः ।।

।। श्रीरस्तु ।।

।। अथ शब्दखण्डः ।।

कारिकावली

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ।। ८१ ।।

मुक्तावली

शाब्दबोधप्रकारं दर्शयति – पदज्ञानं तु इति । न तु ज्ञायमानं पदं करणम् । पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात् । पदार्थधीः इति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः । तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात् समवायसंबन्धेन आकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः ।।

वृत्तिश्च शक्तिलक्षणान्यतरसंबन्धः । अत्रैव शक्तिज्ञानस्य उपयोगः । पूर्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्संबन्धेन तत्स्मरणानुत्पत्तेः । पदज्ञानं हि संबन्धिज्ञानविधया अर्थस्मारकम् ।।

दिनकरी

उपजीव्योपजीवकभावसङ्गतिम् अभिप्रेत्य आह मूले पदज्ञानं तु इति । ''एव'' कारार्थकस्य मूलस्थ ''तु'' शब्दस्य व्यवच्छेद्यं स्पष्टयति – मुक्तावल्याम् न तु ज्ञायमानम् इति । ''मौनिश्लोकादौ'' इति ''आदि'' ना द्वित्वादिबोधकविजातीयहस्तचेष्टादेः सङ्ग्रहः । अन्यथा – पदार्थज्ञानमात्रस्य व्यापारत्वे ।

तत्रापि – पदजन्यपदार्थोपस्थिताविति । घटकत्वं सप्तम्यर्थः । अन्यथा – वृत्त्या इत्यस्य अनुपादाने ।।

ननु वृत्तिः यदि शक्तिः तदा गङ्गापदात् तीरादेः बोधः न स्यात् । तत्र शक्त्या पदजन्यतीरोपस्थितेः अभावात्, अत आह – वृत्तिश्च इति । अन्यतरसंबन्धः – अन्यतरात्मकः संबन्धः । अत्रैव – पदजन्यपदार्थोपस्थितावेव ।।

राजीवोल्लासः

श्रीवेङ्कटाचलाधीशं रमावासं दयानिधिम् ।
प्रणम्य शब्दखण्डस्य व्याख्यां कर्तुं समारभे ।।

उपमाननिरूपणानन्तरं शब्दनिरूपणे मूले सङ्गतेः अनुक्तत्वात् आह– उपजीव्योपजीवकभाव इति । अतिदेशवाक्यजन्यशाब्दबोधस्यैव उपमानत्वम् इति प्राचीनमते ''अर्थं बुद्ध्वा शब्दरचना'' इति न्यायात् शब्दस्य अर्थज्ञानजन्यत्वेन अतिदेशवाक्यजन्यशाब्दबोधस्य अर्थज्ञानविधया ''गोसदृशो गवयः'' इति शब्दप्रयोगहेतुत्वात् तादृशशब्दस्य उपमानजन्यत्वम् अस्ति इति शब्दोपमानयोः प्रमाणयोः स्वरूपतः उपजीव्योपजीवकभावः । शक्तिज्ञानात्मकोपमितिजन्यत्वात् शाब्दबोधस्य प्रमित्योः शाब्दबोधोपमित्योः उपजीव्योपजीवकभावः। सादृश्यज्ञानमेव उपमानम् इति नवीनमते शक्तिज्ञानात्मकोपमितिद्वारा शाब्दबोधस्य उपमानोपजीवकत्वम् अस्ति । शाब्दबोधनिष्ठस्य उपमानकार्यत्वस्य स्वाश्रयकरणत्वरूपपरंपरासंबन्धेन शब्दनिष्ठत्वम् अस्ति इति शब्दोपमानयोः उपजीव्योपजीवकभावः इति केचित् आहुः । वस्तुतस्तु सादृश्यज्ञानात्मकोपमानजन्यत्वं साक्षात्संबन्धेनैव उपमितौ अस्ति । उपमितिश्च ''गवयो गवयपदवाच्यः'' इत्याकारकशक्तिज्ञानरूपा पदमपि विषयीकरोति । तथा च उपमितेः पदज्ञानविधया शाब्दबोधरूपप्रमितिकरणत्वेन

शब्दप्रमाणरूपत्वात्, उपमानस्य शब्दप्रमाणस्य च स्वरूपतः साक्षादेव उपजीव्योपजीवकभावः संभवति ।।

ननु अतिदेशवाक्यजन्यशाब्दबोधस्य उपमानत्वमिति **प्राचीनमते** पूर्वोक्तरीत्या तस्य शब्दजन्यत्वेन शब्दनिरूपणानन्तरमेव उपमानं कुतो न निरूपितम् इति चेत्, न – यत् यदनन्तरं निरूप्यते, तत् तत्सङ्गतम् इत्येव व्याप्तिः । न तु यत् यत्सङ्गतं तत् तदनन्तरं निरूपणीयम् इति नियमः । अतः उपमाननिरूपणानन्तरं शब्दनिरूपणेऽपि न क्षतिः इत्याशयात् ।।

मूले शाब्दबोधप्रकारम् इति । शाब्दबोधोत्पत्तिप्रकारम् इत्यर्थः । शाब्दबोधोत्पत्तिसामग्रीम् इति यावत् । **दिनकर्यां एवकारार्थकस्य** इति । **''पदज्ञानं तु करणम्''** इति **कारिकास्थस्य** ''तु'' शब्दस्य ''एव'' कारस्य योऽर्थः अवधारणं स एवार्थः । तथा च पदज्ञानमेव करणम् इति कारिकार्थः । तेन पदस्य शाब्दबोधकरणत्वं व्यवच्छेद्यम् इति स्पष्टीकरोति **मुक्तावल्याम्** इत्यर्थः । एवकारस्य अर्थः अर्थः यस्य इति मध्यमपदलोपी बहुव्रीहिसमासः । एवकारार्थबोधकस्य इति फलितोऽर्थः । **मौनिश्लोकादौ** इति । मौनिकर्तृकवाक्यबोधकलिप्यादौ इत्यर्थः । ''आदि'' पदेन द्वित्वादिबोधकविजातीयहस्तचेष्टादेः सङ्ग्रहः । तथा च मौनिश्लोकस्थले विजातीयहस्तचेष्टास्थले च शब्दोच्चारणाभावेन श्रूयमाणस्य पदस्य अभावात् पदस्य शाब्दबोधकरणत्वमते लिपिहस्तचेष्टादितः शाब्दबोधो न स्यात् । **''पदज्ञानं करणम्''** इत्युक्ते तु लिप्या हस्तचेष्टया च सङ्केतितस्य पदस्य ज्ञानात् शाब्दबोधः संभवति इति भावः ।।

पदार्थज्ञानमात्रस्य व्यापारत्वे इति । श्रवणादिरूपं पदज्ञानं करणम् । पदजन्यपदार्थस्मरणं व्यापारः । शाब्दबोधः फलम् । **अन्यथा** इति

ग्रन्थेन पदजन्यत्वनिवेशस्य, ज्ञानम् इत्यनुक्त्वा स्मरणम् इत्युक्तेश्च प्रयोजनम् उच्यते । तथा च पदार्थज्ञानं यदि व्यापारः स्यात्, तदानीं पदज्ञानवतः पुरुषस्य इन्द्रियजन्यं प्रत्यक्षात्मकं पदार्थज्ञानम् अस्ति चेत् शाब्दबोधः स्यात् । पदज्ञानरूपकरणस्य पदार्थज्ञानरूपव्यापारस्य च सत्त्वात् । पदजन्यत्वनिवेशे तु इन्द्रियजन्यत्वात् उक्तज्ञानस्य पदजन्यत्वविरहात् न व्यापारत्वम् । एवं स्मरणरूपत्वाभावाच्च न व्यापारत्वम् ॥

पदजन्येत्यस्य पदज्ञानजन्येत्यर्थः । **पदज्ञानवतः** इत्यनेन करणसत्त्वं बोधितम् । **प्रत्यक्षादिना** इत्यत्र ''आदि''पदेन अनुमानपरिग्रहः । न च – पदार्थस्मरणं व्यापारः इत्युक्त्यैव प्रत्यक्षादिजन्यज्ञानस्य वारयितुं शक्यत्वात् पदज्ञानजन्येति विशेषणं किमर्थम् इति – वाच्यम् । **प्रत्यक्षादिना** – इति ''आदि''पदेन पदज्ञानभिन्नस्य स्मरणजनकसंस्कारोद्बोधकस्यापि ग्रहणसंभवेन यत्र पदज्ञानभिन्नोद्बोधकाधीनपदार्थस्मृतिः तत्रापि शाब्दबोधः स्यात् । तद्वारणाय पदज्ञानजन्यत्वनिवेशः । एवं च पदज्ञानं ''एकसंबन्धिज्ञानं अपरसम्बन्धिस्मारकम्'' इति रीत्या पदार्थस्मृतिं जनयति । यथा संबद्धयोः हस्तिहस्तिपकयोः मध्ये एकस्य – हस्तिनः दर्शनेन तत्संबद्धस्य – हस्तिपकस्य स्मरणं भवति, एवं वृत्त्याख्यसंबन्धवतोः पदतदर्थयोः मध्ये एकस्य पदस्य ज्ञानेन तत्संबद्धस्य अर्थस्य स्मृतिः भवति । ततः स्मृतार्थसंसर्गावगाही शाब्दबोधः भवति इति क्रमः अत्र विवक्षितः । एवं च **दिनकरीस्थ ''पदार्थज्ञानमात्रस्य''** इत्यत्र ''मात्र'' पदेन स्मरणस्य पदज्ञानजन्यत्वस्य च व्यवच्छेदः अभिप्रेतः । यद्यपि प्रत्यक्षादिजन्यघटादिरूपार्थज्ञाने पदज्ञानजन्यत्वाभावात् तज्जन्यत्वघटितव्यापारत्वमेव न संभवति इति ततः शाब्दबोधापत्तिः कथम् इति शङ्का भवति, तथापि यत्र चक्षुरादीन्द्रियेण ''घटपदबोध्योऽयं घटः'' इत्याकारकं घटांशे लौकिकम्, घटपदांशे ज्ञानलक्षणाप्रत्यासत्तिजन्यम् अलौकिकं च प्रत्यक्षं जातम्, तस्य ज्ञानलक्षणा-

सन्निकर्षविधया पदज्ञानजन्यत्वम् अस्ति इति व्यापारत्वं संभवति । ततः शाब्दबोधापत्तिवारणाय पदार्थस्मरणं व्यापारः इत्युक्तम् ।।

ननु यत्र उद्बोधकान्तरवशात् पदार्थस्मरणं जातम्, तत्र पदज्ञानं नास्ति चेत् करणाभावादेव न शाब्दबोधापत्तिः। पदज्ञानमस्ति चेत् ततः एव पदार्थस्मृतिसंभवेन उद्बोधकान्तरस्य न उपयोगः इति चेत्, न – यस्य अर्थशक्तत्वरूपेण पदविषयकं ज्ञानं नास्ति, किन्तु पदस्वरूपविषयकज्ञानं वर्तते, तस्य तादृशज्ञानात् पदार्थस्मरणं न भवितुम् अर्हति इति उद्बोधकान्तरवशादेव पदार्थस्मृतिः भवति। पदज्ञानरूपं करणं च अस्ति इति शाब्दबोधापत्तिः। तद्वारणाय पदार्थस्मरणे पदज्ञानजन्यत्वनिवेशः । उद्बोधकान्तराधीनपदार्थस्मृतेः पदज्ञानजन्यत्वाभावात् न तस्याः व्यापारत्वम् इति ।।

ननु तथापि उद्बोधकान्तराधीनस्मृतेः पदज्ञानजन्यत्वाभावेन व्यापारत्वमेव नास्ति इति ततः शाब्दबोधोत्पत्यसंभवात् पदार्थस्मरणं व्यापार इत्युक्तावपि न दोष इति चेत् – अत्र उच्यते – ''घटपदवदाकाशम्'' इत्याकारकघटपदत्वविशिष्ट-घटपदवैशिष्ट्यावगाहिमानसप्रत्यक्षस्यापि विशेषणतावच्छेदकप्रकारकज्ञानविधया ''इदं घटपदम्'' इत्याकारकघटपदत्वप्रकारकज्ञानजन्यतया, घटपदलिङ्गज्ञान-जन्याकाशपक्षकविभुत्वविधेयकानुमितेरपि लिङ्गज्ञानविधया, घटपदत्वप्रकार-कज्ञानजन्यतया घटपदविषयकानुभवजन्यघटपदविषयकस्मृतेरपि अनुभवविधया घटपदत्वप्रकारकज्ञानजन्यतया च उक्तज्ञानानां व्यापारत्वसंभवेन तादृशज्ञानविषय-भूतानां आकाशविभुत्वघटपदादीनां संसर्गावगाहिशाब्दबोधापत्तिवारणाय पदार्थज्ञाने पदज्ञानजन्यत्वविशेषणस्य आवश्यकत्वात् ।।

न च – पदार्थस्मृतेः साक्षात्पदज्ञानजन्यत्वविवक्षणात् पदविषयकस्मृतेश्च संस्कारद्वारा पदानुभवरूपज्ञानजन्यत्वेऽपि साक्षात्पदज्ञानजन्यत्वस्यैव व्यापारत्व-

घटकत्वेन तदभावात् न उक्तापत्तिः इति – वाच्यम् । तथा सति पदज्ञानस्यापि सिद्धान्तिमते वृत्तिज्ञानद्वारैव अर्थस्मारकत्वेन साक्षाज्जन्यत्वघटितव्यापारत्वाभावात् "**द्वारं तत्र पदार्थधीः**" इति मूलविरोधापत्तेः । तस्मात् साक्षात्परंपरासाधारण-जन्यत्वघटितव्यापारत्वस्यैव मूलकाराभिप्रेततया उक्तघटपदानुभवजन्यघटपदस्मृति-मादाय तच्छाब्दबोधापत्तिवारकतया पदज्ञानजन्यत्वविशेषणस्य आवश्य-कत्वात् । न च – तथापि पदज्ञानजन्यत्वविशेषणेऽपि उक्तपदानुभवजन्यपदस्मृतेरपि तादृशव्यापारतया तदुत्तरं तच्छाब्दबोधापत्तिः दुर्वारैव इति– वाच्यम् । पदज्ञान-जन्यत्वस्य उद्बोधकविधया पदज्ञाननिष्ठकारणतानिरूपितकार्यत्वरूपस्यैव निवेशात् । उक्तपदस्मृतौ तु पदानुभवस्य अनुभवत्वेन हेतुत्वेऽपि उद्बोधकविधया हेतुत्वाभावात् तस्याः तादृशपदार्थस्मृतिरूपत्वाभावेन न उक्तापत्त्य-वकाश इति ।।

घटकत्वम् इति । पदजन्यपदार्थोपस्थितिघटकं पदजन्यत्वं वृत्तिरूपसंबन्ध-सहकारेण बोध्यम् इति **मूलार्थो** बोध्य इति भावः । तथा च वृत्तिरूपसंबन्धज्ञान-सहकृतपदज्ञानजन्यपदार्थस्मरणं व्यापारः इत्युक्तं भवति ।।

ननु वृत्तिरूपसंबन्धज्ञानस्य पदज्ञानसहकारित्वं कथम् इति चेत्, इत्थम् – एकसंबन्धिज्ञानम् अपरसंबन्धिस्मारकम् इति रीत्या पदज्ञानात् यत् पदार्थस्मरणं जायते, तत् पदपदार्थयोः वृत्तिरूपसंबन्धज्ञाने सत्येव भवितुम् अर्हति । न तु पदज्ञानमात्रात्। हस्तिहस्तिपकयोः संबन्धाज्ञाने हस्तिपकदर्शनेऽपि हस्तिनः अस्मरणात् संबन्धज्ञानस्य संबन्धिज्ञानसहकारित्वम् आवश्यकमिति । एवं च **पदजन्यपदार्थस्मरणम्** इति **मूले**ऽपि पदजन्येत्यस्य पदज्ञानजन्येत्येव अर्थः । एकसंबन्धिज्ञानस्यैव अपरसंबन्धिस्मारकत्वात् इति ।।

मूले घटादिपदात् इति । घटादिपदज्ञानात् इत्यर्थः । **समवायसंबन्धेन**

इति । घटादिपदस्य आकाशस्य च समवायसंबन्धज्ञानेन इत्यर्थः । **आकाशस्मरणे इति** । घटादिपदं समवायसंबन्धेन आकाशे वर्तते इति घटपदाकाशयोः समवायसंबन्धसंबन्धित्वात् एकसंबन्धिज्ञानस्य अपरसंबन्धिस्मारकतया घटादिपदं आकाशस्यापि स्मारकम् । तथा च पदज्ञानजन्यत्वमात्रनिवेशे ''घटोऽस्ति'' इति श्रवणानन्तरं एकसंबन्धिज्ञानविधया घटपदज्ञानात् आकाशस्मरणे सति ''अस्तितावान् घटः आकाशश्च'' इति शाब्दबोधः स्यात् । वृत्या पदजन्यत्वनिवेशे तु घटपदस्य आकाशे वृत्तिविरहात् वृत्तिरूपसंबन्धसंबन्धिज्ञानविधया घटपदज्ञानस्य आकाशस्मारकत्वाभावात् न आकाशः शाब्दबोधविषय इति भावः ।।

अन्यतरसंबन्धः इत्यत्र न षष्ठीतत्पुरुषः, अपि तु अन्यतरश्चासौ संबन्ध इति कर्मधारयः ।।

दिनकर्याम् – तीरोपस्थितेः अभावात् इति । गङ्गापदशक्यप्रवाहसंबन्धस्य तीरे गृहीतत्वादेव गङ्गापदेन प्रवाहोपस्थित्यनन्तरं तीरोपस्थितिसंभवेन तीरे गङ्गापदशक्त्यकल्पनात् शक्त्या पदजन्यतीरोपस्थित्यभावात् गङ्गापदात् तीरादेः बोधो न स्यात् इत्यर्थः ।।

वृत्तिश्च शक्तिलक्षणान्यतरसंबन्ध इत्युक्तौ तु तीरस्मृतेः शक्त्या गङ्गापदज्ञान-जन्यत्वाभावेऽपि लक्षणया गङ्गापदज्ञानजन्यत्वात् न गङ्गापदात् तीरबोधानुपपत्तिः इति भावः ।।

पदजन्यपदार्थोपस्थितावेव इति । ''एव'' कारेण शाब्दबोधव्यवच्छेदः । शक्तिज्ञानस्य पदजन्यपदार्थोपस्थितावेव उपयोगः – कारणत्वं, न तु शाब्दबोधे । शक्तिज्ञानाभावे शक्यसंबन्धरूपलक्षणाग्रहस्यापि असंभवेन पदपदार्थयोः संबन्धज्ञानाभावात् पदज्ञानेन शाब्दबोधप्रयोजकीभूतपदार्थस्मरणोत्पादनासंभवात् । यत्र पदज्ञानानन्तरं शक्यार्थस्मृतिः भवति, तत्र शक्तिरूपसंबन्धज्ञानाभावे

संबन्धिपदज्ञानात् अर्थोपस्थितिः न भवति इति शक्तिज्ञानं पदज्ञानस्य सहकारि । यत्र पदज्ञानानन्तरं लक्ष्यार्थस्य स्मरणं, तत्र पदस्य अर्थस्य च यः संबन्धः शक्यार्थसंबन्धरूपः तज्ज्ञानं विना लक्ष्यार्थस्मरणं न संभवति । अतः लक्षणाख्यसंबन्धज्ञानमपि सहकारि । परन्तु पदात् शक्यार्थे स्मृते सत्येव शक्यसंबन्धरूपलक्षणाज्ञानं भवति इति लक्षणाज्ञानात् पूर्वं शक्तिज्ञानं अपेक्षितं भवति । तथा च लाक्षणिकपदात् लक्ष्यार्थोपस्थितावपि शक्तिज्ञानस्य कारणत्वमस्ति इत्याशयेन **कारिकायां ''शक्तिधीः सहकारिणी''** इति उक्तम् । **मुक्तावल्यां** च **अत्रैव** शक्तिज्ञानस्योपयोगः इत्युक्तम् ।।

।। पदशक्तिविचारः ।।

मुक्तावली

शक्तिश्च पदेन सह पदार्थस्य संबन्धः । सा च **''अस्माच्छब्दात्** अयमर्थो बोद्धव्यः'' इति ईश्वरेच्छारूपा । **आधुनिके नाम्नि** शक्तिः अस्त्येव । ''एकादशे अहनि पिता नाम कुर्यात्'' इति ईश्वरेच्छायाः सत्त्वात् । **आधुनिकसङ्केतिते तु न शक्तिः इति संप्रदायः** ।।

नव्यास्तु – **ईश्वरेच्छा न शक्तिः**, किन्तु इच्छैव । तेन आधुनिकसङ्केतितेऽपि शक्तिः अस्त्येव इति – आहुः ।।

दिनकरी

सा च इति । **यद्यपि** – ईश्वरेच्छायाः ऐक्यात् ''घटशब्दात् घटः बोद्धव्यः'' इति ईश्वरेच्छा पटेऽपि अस्ति इति अतिप्रसङ्गः, एवं गङ्गापदजन्यबोधविषयत्व–प्रकारकेच्छायाः तीरेऽपि सत्त्वात् शक्त्यैव तीरबोधोपपत्तेः लक्षणोच्छेदापत्तिः –

तथापि गङ्गापदवाच्यत्वव्यवहारस्य तीरेऽभावात्, गङ्गादिपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन ईश्वरेच्छैव गङ्गादिपदानां शक्तिः। तीरादिनिष्ठविशेष्यतायाः गङ्गादिपदजन्यबोधविषयत्वप्रकारतानिरूपितत्वेऽपि न तस्याः तादृशविषयतात्वेन तादृशप्रकारतानिरूपितत्वम्, अपि तु शुद्धविषयतात्वेन इति न अतिप्रसङ्गः, न वा लक्षणोच्छेद इति ॥

आधुनिके नाम्नि – आधुनिकैः पित्रादिभिः एकादशे अहनि सङ्केतिते नाम्नि। इति **ईश्वरेच्छाया इति**। एकादशाहकालीनपित्रुच्चारणविषयनामत्वेन सामान्यरूपेण इत्यर्थः। **आधुनिकसङ्केतिते तु** – आधुनिकमात्रसङ्केतिते नदीवृद्ध्यादिपदे तु।

संप्रदायमते अस्वरसं हृदि निधाय **नवीनमतं** दर्शयति – **नव्यास्तु इति**। **न शक्तिः इति**। **तथा सति** आधुनिकसङ्केतितात् नद्यादिपदात् शाब्दबोधो न स्यात् इति भावः। **मतद्वयेऽपि** अपभ्रंशात्मकगगर्यादिपदे शक्तिभ्रमादेव बोधः इति अवधेयम् ॥

राजीवोल्लासः

मूले शक्तिश्च इति। शक्तिरपि इत्यर्थः। तथा च शक्तिः लक्षणा च पदेन सह पदार्थस्य संबन्धः इत्यर्थः। तत्र शक्तेः अतिरिक्तपदार्थत्वम् अभ्युपगच्छतां **मीमांसकानां** मतं निरसितुं तत्स्वरूपं दर्शयति – **सा च** इति। शक्तिः च इत्यर्थः। अवधारणार्थकः "च" शब्दः **ईश्वरेच्छारूपा** इत्यनन्तरं योज्यः। तथा च शक्तिः ईश्वरेच्छारूपैव न अतिरिक्ता, गौरवात् इति भावः। **अस्माच्छब्दात्** इति। एतत्पदज्ञानात् इत्यर्थः। जन्यत्वं पञ्चम्यर्थः। तस्य धात्वर्थे बोधेऽन्वयः। तव्यप्रत्ययस्य विषयताश्रयोऽर्थः। तथा च "एतत्पदजन्यबोधविषयताश्रयः अयमर्थः" इत्याकारकेश्वरेच्छा शक्तिः। एतदर्थविशेष्यक-एतत्पदजन्यबोधविषयत्वप्रकारक-ईश्वरेच्छाशक्तिः इति यावत् ॥

अत्र शङ्कते – **दिनकर्याम् यद्यपि** इत्यादिना । तत्तत्पदजन्यबोधविषयत्व-प्रकारक-तत्तदर्थविशेष्यक-ईश्वरेच्छायाः शक्तित्वे सा इच्छा ईश्वरनिष्ठा पदे वा अर्थे वा विषयतासंबन्धेनैव वर्तते इति वक्तव्यम् । घटपदजन्य-बोधविषयत्वप्रकारकेश्वरेच्छा विशेष्यतासंबन्धेन घटरूपेऽर्थे वर्तते । ईश्वरेच्छायाः एकत्वात् तस्याम् इच्छायां घटपदजन्यबोधविषयत्वं पटपदजन्यबोधविषयत्वं च प्रकारः । घटः पटश्च विशेष्यः। तथा च घटपदजन्यबोधविषयत्वप्रकारकेश्वरेच्छायाः विशेष्यतासंबन्धेन पटेऽपि सत्त्वात् पटेऽपि घटपदशक्त्यापत्तिः । ''घटपदात् घटो बोद्धव्यः, पटपदात् पटो बोद्धव्यः'' इत्यादि समूहालम्बनरूपायाः एकस्या एव इच्छाव्यक्तेः ईश्वरे अङ्गीकरणीयतया तस्याश्च विशेष्यतासंबन्धेन पटेऽपि सत्त्वात् पटस्यापि घटपदशक्यत्वप्रसङ्गः ।।

एवं गङ्गापदजन्यबोधविषयत्वप्रकारकेश्वरेच्छायाः विशेष्यतासंबन्धेन प्रवाहवृत्तित्ववत् सर्वविशेष्यकेश्वरेच्छायां तीरस्यापि विशेष्यत्वात् गङ्गापदजन्य-बोधविषयत्वप्रकारकेश्वरेच्छायाः विशेष्यतासंबन्धेन तीरेऽपि सत्त्वात् तीरस्यापि गङ्गापदशक्यतया शक्त्यैव गङ्गापदात् तीरबोधोपपत्तेः लक्षणाख्यवृत्तेः अनावश्यकत्वात् लक्षणायाः उच्छेदप्रसङ्गः ।।

तथापि इति । यदि विशेष्यतासंबन्धेन घटपदवाच्यत्वप्रकारकेश्वरेच्छावत्त्वं घटपदवाच्यत्वम्, तदा पटेऽपि तेन संबन्धेन तादृशेच्छावत्त्वसत्त्वात् ''पटः घटपदवाच्यः'' इति प्रामाणिकः व्यवहारः स्यात् । एवं गङ्गापदजन्यबोधविषयत्व-प्रकारकेश्वरेच्छायाः विशेष्यतासंबन्धेन तीरे सत्त्वात् ''तीरं गङ्गापदवाच्यम्'' इति प्रामाणिकव्यवहारः स्यात् । यतः तथा प्रामाणिकानां व्यवहारो न भवति, अतः एवं परिष्करणीयम् । तत्तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारता-निरूपितविशेष्यतासंबन्धेन ईश्वरेच्छावत्त्वम् तत्तत्पदशक्यत्वम् इति । सर्वविषयिण्याम्

ईश्वरेच्छायां घटपटादेः सर्वस्य विशेष्यत्वेऽपि घटपदजन्यबोधविषयतात्वावच्छिन्न-प्रकारतानिरूपितेश्वरेच्छीयविशेष्यता पटे नास्ति । "घटपदजन्यबोधविषयः घटो भवतु" इत्येवं घटांशे एव घटपदजन्यबोधविषयत्वस्य ईश्वरेच्छया अवगाहनात् घटपदजन्यबोधविषयतात्वावच्छिन्नबोधविषयत्वनिष्ठ प्रकारतानिरूपितविशेष्यता-संबन्धेन इच्छायाः घटे एव सत्त्वात् घटस्यैव घटपदशक्यत्वं न तु पटादेः । एवं "तीरं गङ्गापदजन्यबोधविषयः भवतु" इत्याकारकत्वं ईश्वरेच्छायां नास्तीति गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतायाः तीरेऽभावात् तेन संबन्धेन ईश्वरेच्छावत्त्वं तीरे नास्ति इति तीरस्य न गङ्गापदशक्यत्वम् । अतः शक्त्या तीरबोधासंभवात् लक्षणा स्वीकरणीया इति भावः ।।

ननु तत्तत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन ईश्वरेच्छा शक्तिः इत्येव उच्यताम् । प्रकारतायां तत्तत्पदजन्यबोधविषयतात्वावच्छिन्नत्वं किमर्थं निवेशनीयम् इत्याशङ्क्य आह – **तीरादिनिष्ठविशेष्यताया** इति। अयमाशयः – तीरादौ गङ्गापदवाच्यत्वव्यवहाराभावेन "गङ्गापदजन्यबोधविषयः तीरं भवतु" इत्याकारकता ईश्वरेच्छायां न अङ्गीक्रियते। अपि तु "विषयता गङ्गापदजन्यबोधीया भवतु, तीरं विषयतावद्भवतु" इत्येवं विशकलिततया विषयतात्वेनैव गङ्गापदजन्यबोधविषयतायाः तीरे भगवदिच्छायां अवगाहनात् । उक्तेच्छायां विषयतात्वेन रूपेण गङ्गापदजन्यबोधविषयत्वस्यापि तीरांशे प्रकारत्वात् गङ्गापदजन्यबोधविषयत्वनिष्ठा या विषयतात्वावच्छिन्ना प्रकारता तन्निरूपित-विशेष्यतासंबन्धेन ईश्वरेच्छावत्त्वस्य तीरे सत्त्वात् तीरस्य गङ्गापदशक्यत्वं स्यात् । तद्वारणाय प्रकारतायां तत्तत्पदजन्यबोधविषयतात्वावच्छिन्नत्वस्य निवेशः । तीरे विषयतात्वावच्छिन्नगङ्गापदजन्यबोधविषयत्वनिष्ठप्रकारता-निरूपितविशेष्यतासत्त्वेऽपि गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपित-विशेष्यताविरहात्, तेन संबन्धेन तीरस्य ईश्वरेच्छावत्त्वं नास्ति इति तीरादौ

गङ्गापदशक्यत्वाभावात् तीरादिविषयकशाब्दबोधनिर्वाहाय लक्षणाङ्गीकारोऽपि आवश्यक इति ।।

अत्र इदं अवधेयम् – ननु शक्त्या यत्र पदार्थबोधः भवति तत्रैव ईश्वरेच्छायाः आवश्यकता । लक्षणया यत्र बोधः तत्र न ईश्वरेच्छायाः आवश्यकत्वम् । शक्यसंबन्धमात्रस्यैव अपेक्षिततत्वात् । तथा च "गङ्गापदजन्यः बोधः भवतु, बोधविषयः तीरं भवतु" इत्याद्याकारकेच्छाकल्पनं मुधा । तीरस्य गङ्गापदवाच्यत्वं तु प्रागुक्तप्रकारेणैव वार्यते । वाच्यार्थप्रवाहसंबन्धमात्रेण तीरस्य गङ्गापदलक्ष्यत्वोपपत्तेः इति चेत्, न -

कार्यसामान्यं प्रति ईश्वरेच्छायाः कारणत्वात् गङ्गापदात् तीरविषयकबोधं प्रत्यपि ईश्वरेच्छा कारणम् इति वक्तव्यम् । तत्र किमाकारा ईश्वरेच्छा कारणम् इति जिज्ञासायां तीरादौ गङ्गापदवाच्यत्वव्यवहाराभावात् उक्तविशकलितभानवती ईश्वरेच्छैव कारणम् इति अवश्यवक्तव्यत्वात् इति भावः इति बालप्रिया ।।

ननु आधुनिकसङ्केतिते तु न शक्तिः इति वक्ष्यमाणमूलग्रन्थविरुद्धं **आधुनिके नाम्नि शक्तिरस्त्येव इति मूलम्** इति आशङ्क्य **आधुनिके नाम्नि** इत्यस्य नामविशेषपरताम् आह – **आधुनिकैः** इत्यादि ।।

ईश्वरेच्छायाः शक्तित्वे पुत्रादौ पित्रादिसङ्केतितदेवदत्तादिनाम्नि शक्तिः न स्यात्, भगवदिच्छायाः तत्र अभावात् इत्याशङ्क्य "देवदत्तादिपदजन्यबोधविषयः अयं भवतु" इत्येवं विशिष्य तत्र ईश्वरेच्छायाः अभावेऽपि "एकादशाहकालीनपित्रुच्चारणविषयनामजन्यबोधविषयः पित्रादिसङ्केतितविशेष्यः भवतु" इति ईश्वरेच्छायाः "एकादशे अहनि पिता नाम कुर्यात्" इति श्रुतिप्रतिपन्नायाः सत्त्वात् आधुनिके नाम्न्यपि शक्तिरस्त्येव इति भावः ।।

ननु एवमपि आधुनिकसङ्केतिते तु न शक्तिः इति मूलम् असङ्गतम् । आधुनिकैः पित्रादिभिः एकादशे अहनि सङ्केतिते नाम्नि शक्तिस्वीकारात् इत्यतः मात्रपदं पूरयित्वा व्याचष्टे – **आधुनिकमात्र** इति । ''मात्र''शब्देन ईश्वरव्यावृत्तिः । पित्रादिसङ्केतिते देवदत्तादिनाम्नि सामान्यरूपेण ईश्वरसङ्केतोऽपि अस्ति । विशेषरूपेण पित्रादिसङ्केतोऽपि वर्तते । पाणिन्यादिसङ्केतिते नदीवृद्ध्यादिपदे तु ईश्वरेच्छाविरहात् न शक्तिः इति **प्राचीनमतम्** । एतन्मते शक्तिभ्रमादेव नदीवृद्ध्यादिपदात् शाब्दबोधः वक्तव्यः ।।

अस्वरसं प्रकटयति – **तथा सति** इति । आधुनिकमात्रसङ्केतिते नदीवृद्ध्यादिपदे यदि शक्तिः न स्यात्, तर्हि नदीवृद्ध्यादिपदात् सङ्केतितार्थ-विषयकशाब्दबोधः न स्यात् । अतः इच्छैव शक्तिः इति स्वीकृत्य आधुनिकसङ्केतितेऽपि शक्तिः उपपादनीया इति **नवीनानां मतम्** ।।

मतद्वयेऽपि इति । प्राचीनमते नवीनमते च अपभ्रंशात् गगर्यादिपदात् शक्तिभ्रमादेव शाब्दबोधः । अपभ्रंशस्य असाधुशब्दतया तत्र शक्त्यनङ्गीकारात्। गगरीपदं घटपदस्य अपभ्रंशः । न च – अपभ्रंशेऽपि शक्तिः अस्तु, किं बाधकम् इति – वाच्यम्। यज्ञे अपभ्रंशोच्चारणस्य ''नापभाषित वै'' इति श्रुत्या निषेधेन तस्य साधुपदत्वानङ्गीकारस्य आवश्यकत्वात् । अपभ्रंशस्यापि साधुपदत्वे तदुच्चारणस्य पापाजनकत्वेन निषेधानुपपत्तेः ।।

इदम् अत्र अवधेयम् – यदि केनचित् आधुनिकेन ''गगरी'' इत्यादिपदं नदीवृद्ध्यादिपदवत् अर्थविशेषे परिभाष्यते तर्हि तस्मिन्नर्थे तत्पदं नव्यमते शक्यमेव। अतः आधुनिकसङ्केतः परिभाषा इति शक्तिवादे गदाधरभट्टाचार्यैः परिभाषाया अपि वृत्तित्वं स्वीकृतम् ।।

।। शक्तिग्रहोपायनिरूपणम् ।।

मुक्तावली

शक्तिग्रहस्तु व्याकरणादितः । तथा हि–

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।।

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहः व्याकरणात् भवति । क्वचित् सति बाधके त्यज्यते । यथा वैयाकरणैः आख्यातस्य कर्तरि शक्तिः उच्यते । ''चैत्रः पचति'' इत्यादौ कर्त्रा सह चैत्रस्य अभेदान्वयः । तच्च गौरवात् त्यज्यते । किन्तु कृतौ शक्तिः लाघवात् । कृतिः चैत्रादौ प्रकारीभूय भासते ।।

न च – कर्तुः अनभिधानात् चैत्रपदोत्तरं तृतीया स्यात् इति – वाच्यम् । कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् । संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः । ''कर्मत्वादि'' इत्यस्य इतरविशेषणत्वेन तात्पर्याविषयत्वम् अर्थः । तेन ''चैत्र इव मैत्रो गच्छति'' इत्यादौ न चैत्रे संख्यान्वयः ।।

यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्वारणाय ''प्रथमान्त'' इति । यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः । तेन ''चैत्र इव मैत्रो गच्छति'' इत्यत्र चैत्रादेर्वारणम् । ''स्तोकं पचति'' इत्यादौ स्तोकादेर्वारणाय द्वितीयदलम् । तस्य द्वितीयान्तपदोपस्थाप्यत्वात् वारणम् इति ।।

दिनकरी

व्याकरणात् इति । ''भू सत्तायाम्'', ''वर्तमाने लट्'' इत्यादि व्याकरणात् इत्यर्थः । लाघवात् इति । कृतित्वजातेः लक्ष्यतावच्छेदकत्वे लाघवात् इत्यर्थः । न च कर्तुः अनभिधानात् इति । ''अनभिहित'' इत्यधिकारीयेण ''कर्तृकरणयोः

तृतीया'' इत्यनेन अनभिहितकर्तरि तृतीयाविधानात् इति भावः । तत्र – तृतीयायाम् । तन्त्रत्वात् – प्रयोजकत्वात् ।।

ननु कर्तृसंख्याभिधान एव **किं प्रयोजकम्** इति आशङ्क्य तत्प्रयोजकं दर्शयति– **संख्याभिधान** इति । ''चैत्रः पचति तण्डुल'' इत्यादौ कर्मत्वादिलाक्षणिक-प्रथमान्तपदोपस्थाप्यतण्डुलादिव्युदासाय आह – **कर्मत्वाद्यनवरुद्ध** इति ।।

ननु **''चैत्र इव मैत्रो गच्छति''** इत्यत्र आख्यातेन एकवचनत्वरूपेण उक्तायाः संख्यायाः चैत्रे अन्वयः स्यात्, कर्मत्वाद्यनवरुद्धत्वात् प्रथमान्त-पदोपस्थाप्यत्वाच्च । किञ्च ''पक्वमन्नं भुज्यत'' इत्यादौ अन्नादौ संख्यान्वयानुपपत्तिः । पाककर्मत्वस्य अन्ने अन्वयेन कर्मत्वाद्यनवरुद्धत्वाभावात् इति, अत आह – **कर्मत्वादि** इत्यस्य इति । **तथा च** कर्मत्वादिपदम् इतरपरम्, अनवरुद्धत्वं च विशेषणतया अविवक्षितत्वम् ।।

वस्तुतस्तु इतरस्यापि न विवक्षा । **अविशेषणत्वमात्रस्य** विवक्षितत्वात् । **अविशेषणत्वं** प्रकारताशून्यत्वम्; तस्य च शाब्दबोधात् पूर्वं चैत्रादावपि सत्त्वात् ''चैत्र इव मैत्रो गच्छति'' इत्यादौ चैत्रेऽपि संख्यान्वयापत्तिः ।।

न च – ''चैत्रीयं सादृश्यम्'' इति अवान्तरवाक्यार्थबोधस्य पूर्वं सत्त्वात् कथम् अविशेषणत्वं चैत्रस्य इति – वाच्यम् । यत्र खलेकपोतन्यायेन बोधः, तत्र ''चैत्रीयं सादृश्यम्'' इति अवान्तरवाक्यार्थबोधस्य पूर्वम् अभावात् । अतः विशेषणत्वतात्पर्याविषयत्वपर्यन्तानुधावनम् ।।

न च – ''चैत्र एव पचति'', ''चैत्रः चैत्रं पश्यति'' इत्यादौ ''एव''कारार्थेऽन्यस्मिन् कर्मत्वादौ च चैत्रस्य विशेषणत्वात् कथं तत्र संख्यान्वय इति – वाच्यम् । **विशेषणत्वमात्रेण** तात्पर्याविषयत्वस्य विवक्षितत्वात् । **चैत्रस्य** उक्तस्थले विशेषणत्वमुख्यविशेष्यत्वाभ्यां तात्पर्यविषयत्वात् तत्र

संख्यान्वयोपपत्तिः । **यदि च** "चैत्र इव मैत्र" इत्यादौ चैत्रादेः यदा न विशेषणत्वतात्पर्यविषयत्वम्, तदा चैत्रेऽपि संख्यान्वयापत्तिः ।।

न च – शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वात् न एवम् इति – वाच्यम् । नानार्थातिरिक्तस्थले शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वे मानाभावात् इति उच्यते, **तदा विशेषणत्वमात्रप्रयोजकप्रथमान्ततत्तत्पदानुपस्थाप्यत्वं** बोध्यम् ।।

न विशेषणत्वे तात्पर्यम् – न विशेषणत्वमात्रे तात्पर्यम् । तथा च "तण्डुलं पचति" इत्यादौ यदि विशेषणत्वमुख्यविशेष्यत्वाभ्यां तण्डुलबोधे तात्पर्यम्, तत्र तण्डुले संख्यान्वयवारणाय "प्रथमान्त" इत्यादि इति भावः ।।

इदम् उपलक्षणम् । "चैत्रेण सुप्यते" इत्यादौ धात्वर्थस्वापादौ संख्यान्वयवारणाय प्रथमान्तपदोपस्थाप्यत्वस्य आवश्यकत्वात् ।।

द्वितीयदलस्य प्रकारान्तरेण प्रयोजनं वक्तुम् अन्यथा **प्रथमदलार्थम्** आह – **यद्वा** इति । **चैत्रादेः वारणम्** इति । तस्य सादृश्ये विशेषणत्वात् इति भावः । **द्वितीयान्तपदोपस्थाप्यत्वात्** इति । प्रथमान्तपदोपस्थाप्यत्वाभावात् इत्यर्थः । अत्र कल्पे "चैत्र एव पचति" इत्यदौ चैत्रे संख्यान्वयोपपादनं सुधीभिः विभावनीयम् ।।

राजीवोल्लासः

मूले **शक्तिग्रह** इत्यादि । अर्थविशेषे शक्तिनिश्चयः व्याकरणादितः भवति। सत्ताद्यर्थे भ्वादिधातोः, वर्तमानाद्यर्थे लडादिप्रत्ययस्य, समुच्चयाद्यर्थे चादिनिपातस्य, एकत्वाद्यर्थे स्वादिप्रत्ययस्य च शक्तिग्रहः, "भू सत्तायाम्", "वर्तमाने लट्" इत्यादिव्याकरणात् भवति । क्वचित् सति बाधके वैयाकरणैः तत्तत्पदशक्यत्वेन व्यवह्रियमाणोऽर्थः अस्माभिः त्यज्यते । यथा वैयाकरणैः आख्यातस्य कर्तरि शक्तिः उच्यते । चैत्रपदात् चैत्रस्य उपस्थितिः, पच् धातोः पाकस्य, आख्यातात्

कर्तुः । धात्वर्थस्य पाकस्य निरुपितत्वसंबधेन प्रातिपदिकार्थस्य चैत्रस्य च आख्यातार्थे कर्तरि अभेदसंबन्धेन अन्वयः । चैत्राभिन्नः पाककर्ता इति बोधः । तच्च कर्तुः आख्यातशक्यत्वं च गौरवात् – गौरवरूपात् बाधकात् अस्माभिः त्यज्यते। कृतिमतः कर्तुः आख्यातशक्यत्वे कृतिः शक्यतावच्छेदिका स्यात् । प्रयत्नरूपा च कृतिः पुरुषभेदेन विषयभेदेन च भिन्ना इति अनन्तकृतीनां आख्यातशक्यतावच्छेदकत्वं वक्तव्यम् इति गौरवम् । अतः लाघवात् कृतौ आख्यातस्य शक्तिः । शक्यतावच्छेदकं कृतित्वं जातिरूपं एकम् इति लाघवम् । कृतिश्च प्रथमान्तार्थे आश्रयतासंबन्धेन प्रकारतया भासते । धात्वर्थस्य कृतौ अनुकूलतासंबन्धेन अन्वयः । ''पाकानुकूल कृतिमान् चैत्रः'' इति बोधः ।।

कृतित्वजातेः इति । किंचिदविशेषितस्य एकस्य कृतित्वस्य शक्यता-वच्छेदकत्वे लाघवम्, कृतित्वविशिष्टानाम् अनन्तकृतीनां शक्यतावच्छेदकत्वे गौरवम् । जातेरेव स्वरूपतः भानाभ्युपगमेन कृतेः स्वरूपतः शक्यतावच्छेदकत्वा-संभवात् इति भावः ।।

नवीनैः वैयाकरणैस्तु आश्रयमात्रे एव कर्तृकर्माख्यातयोः शक्तिः स्वीक्रियते, कृत्यादिव्यापरफलयोः धातुनैव लाभात् । आश्रयत्वं च अखण्डोपाधिः इति तन्मते न गौरवम् । परन्तु ''लः कर्तरि'' इत्यादि मूलभूतसूत्रविरोध एव ।।

न च – ''कर्तरि'' इत्यस्य ''आश्रय'' इत्येव अर्थः इति – वाच्यम् । तथा सति ''स्वतन्त्रः कर्ता'' इति सूत्रकृत्परिभाषायाः वैयर्थ्या-पत्तेः । स्वशास्त्रे यत्र कर्तृपदप्रयोगः तत्र अयमर्थः इति ज्ञापयितुमेव परि-भाषादरात् । स्वातन्त्र्यं च कारकान्तरव्यापारानधीनव्यापारवत्त्वम् । तच्च अतिगुरुभूतमेव । इत्थं च ''**फलव्यापारयोः धातुः आश्रये तु तिङः स्मृताः**'' इति कारिकापि सूत्रविरुद्धैव ।।

किंच कर्तृपदस्य लक्षणया एव आश्रयार्थकत्वं वाच्यम् । कृतिमतः एव तस्य मुख्यार्थत्वात् । तथा च वरं तदपेक्षया कृतौ एव लक्षणाकल्पनम् । आश्रयत्वस्य अखण्डोपाधिरूपत्वे मानाभावात्, आधारतारूपस्य तस्य स्वरूप-संबन्धरूपत्वेन अननुगतत्वात् इति मन्तव्यम् इति **तरङ्गिणीकाराः** ।।

''अनभिहित'' इत्यधिकारीयेण इति । आख्यातस्य कर्तृवाचकत्वम् अनङ्गीकृत्य कृतिवाचकत्वाङ्गीकारे ''चैत्रः पचति'' इत्यत्र चैत्रपदोत्तरं तृतीयाविभक्तिः स्यात् । ''अनभिहिते'' इत्यधिकारान्तर्गतेन ''कर्तृकरणयोः तृतीया'' इति सूत्रेण तिङ्-कृत्-तद्धितसमासैः अनभिहिते कर्तरि तृतीया स्यात् इति तृतीयाविभक्तेः विधानात् । ''गच्छति'' इत्यत्र तिङा नैयायिकमते कृतेरेव अभिधानेन कर्तुः अनभिधानात् इति आशङ्काग्रन्थस्य तात्पर्यम् ।।

कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् इति समाधानम् । तिङादिभिः कर्तृगतसंख्यायाः अनभिधानं कर्तृवाचकपदोत्तरं तृतीयाविभक्तौ प्रयोजकम् । ''चैत्रः पचति'' इत्यत्र तिङा कर्तुः अनभिधानेऽपि कर्तृगत-एकत्वसंख्यायाः अभिहितत्वात् न चैत्रपदोत्तरं तृतीया । **किं प्रयोजकम्** इति । ''चैत्रः तण्डुलं पचति'' इत्यादौ चैत्रगतसंख्यैव आख्यातेन अभिधीयते, नं तु तण्डुलादिगता इत्यत्र, एवं ''चैत्रेण पच्यते तण्डुलः'' इत्यत्र तण्डुलगतसंख्यैव अभिधीयते, न तु चैत्रगतसंख्या इत्यत्र च नियामकाभावे सति ''चैत्रः तण्डुलं पचति'' इत्यादौ तण्डुलगतसंख्याया अपि अभिधानसंभवेन तण्डुलपदोत्तरं द्वितीया न स्यात् । एवं ''चैत्रेण पच्यते तण्डुलः'' इत्यादावपि चैत्रगतसंख्यायाः अभिधानसंभवेन चैत्रपदोत्तरं तृतीया न स्यात् इत्याशङ्कायां कर्तृगतसंख्याभिधानस्य **प्रयोजकं दर्शयति** इत्यर्थः ।।

मूले संख्याभिधानयोग्यश्च इति । आख्यातार्थसंख्याप्रकारकबोध-विशेष्यताधिकरणं च इत्यर्थः । **कर्मत्वाद्यनवरुद्ध** इति । कर्मत्वादौ विशेषणत्वेन अविवक्षितः – अनन्वितः इति यावत् । ''आदि''ना करणत्वादिपरिग्रहः । **प्रथमान्तपदोपस्थाप्य** इति । प्रथमान्तपदजन्योपस्थितिविषयः इत्यर्थः । तथा च कर्मत्वादौ विशेषणत्वेन अनन्वितः प्रथमान्तपदजन्योपस्थितिविषयश्च यः भवति सः आख्यातार्थसंख्याप्रकारकबोधविशेष्यः इत्यर्थः । ''चैत्रः पचति'' इत्यादौ चैत्रः प्रथमाविभक्त्यन्तपदजन्योपस्थितिविषयः । कर्मत्वादिना अनन्वितश्च । अतः एव सः आख्यातार्थसंख्याप्रकारकबोधविशेष्यो भवति । ''चैत्रः तण्डुलं पचति'' इत्यत्र तण्डुलः द्वितीयार्थकर्मत्वे अन्वितः । द्वितीयान्तपदोपस्थाप्यश्च इति आख्यातार्थसंख्याप्रकारकबोधविशेष्यो न भवति । एवं च ''अनभिहिते कर्तरि करणे च तृतीया'' इत्यस्य आख्यातार्थसंख्या-प्रकारकबोधविशेष्यत्वानधिकरणकर्तृकरणवाचकपदात् तृतीया भवति इत्यर्थः । ''अनभिहिते कर्मणि द्वितीया'' इत्यस्य आख्यातार्थसंख्याप्रकारकबोधविशेष्यत्वा-नधिकरणकर्मवाचकपदात् द्वितीया भवति इति अर्थः ।।

व्याख्यायां चैत्रः पचति इति । प्रथमान्तपदोपस्थाप्ये आख्यातार्थ-संख्यान्वयः इति स्वीकारे ''चैत्रः पचति तण्डुलः'' इति वाक्ये तण्डुलपदोत्तरं विद्यमानायाः प्रथमायाः कर्मत्वादौ लक्षणया प्रयोगात् तत्रापि प्रथमान्तपदोपस्थाप्यत्वं तण्डुलस्य अस्ति इति तत्र तिङर्थसंख्यायाः अन्वयः स्यात् । तद्वारणाय कर्मत्वाद्यनवरुद्धः इत्युक्तम् । तत्र तण्डुलस्य प्रथमालक्ष्यार्थकर्मत्वविशेषणत्वात् कर्मत्वाद्यनवरुद्धत्वं नास्ति इति न आख्यातार्थसंख्यायाः अन्वयः इत्यर्थः ।।

ननु चैत्र इव इत्यादि । कर्मत्वाद्यनवरुद्धत्वं यदि द्वितीयादिकारकविभक्त्यर्थ-कर्मत्वाद्यविशेषणत्वम्, तदा ''चैत्र इव मैत्रो गच्छति'' इत्यत्र इवार्थे सादृश्ये

चैत्रस्य प्रतियोगितासंबन्धेन अन्वयः । सादृश्यस्य आश्रयतासंबन्धेन मैत्रे अन्वयः । आख्यातार्थकृतेः एकत्वसंख्यायाश्च मैत्रेऽन्वयः । ''चैत्रप्रतियोगिकसादृश्यवान् मैत्रः गमनानुकूलकृतिमान् एकत्वाश्रयश्च'' इति बोधः इष्यते । तत्र मैत्रे यथा आख्यातार्थसंख्यायाः अन्वयः, तथा चैत्रस्यापि प्रथमान्तपदोपस्थाप्यत्वात् कर्मत्वाद्यविशेषणत्वाच्च चैत्रेऽपि संख्यान्वयः स्यात् । यदि तु कर्मत्वाद्यनवरुद्धत्वं कर्मत्वाद्यनन्वितत्वं तथापि उक्तस्थले चैत्रस्य कर्मत्वाद्यनन्वितत्वात् तत्र संख्यान्वयापत्तिः । एवं अस्मिन् पक्षे ''पक्वमन्नं भुज्यते'' इत्यत्र प्रथमान्तपदोपस्थाप्ये अन्ने आख्यातार्थसंख्यान्वयः इष्टः; स च न स्यात् । आख्यातार्थस्य कर्मत्वस्य, ''पक्वम्'' इत्यत्र क्तप्रत्ययार्थस्य कर्मत्वस्य च अन्नेऽन्वयेन पाककर्मान्नं भोजनकर्म एकं च इति शाब्दबोधात्, अन्नस्य पाककर्मत्वेन अन्वितत्वात् । अतः कर्मत्वाद्यनवरुद्धत्वं परिष्करोति **मूलकार** इति भावः ।।

तथा च इति । ''कर्मत्वाद्यनवरुद्ध'' इत्यत्र कर्मत्वपदम् इतरपरम्, अनवरुद्धत्वं च विशेषणतया अविवक्षितत्वम् । एवं च इतरविशेषणतया अविवक्षिते – तात्पर्याविषये – प्रथमान्तपदोपस्थाप्ये आख्यातार्थसंख्यान्वयः इति फलितम् । ''चैत्र इव मैत्रो गच्छति'' इत्यत्र चैत्रस्य ''इव'' शब्दार्थसादृश्यविशेषणतया विवक्षितत्वात् इतरविशेषणतया अविवक्षितत्वं नास्ति इति न तत्र आख्यातार्थसंख्यायाः अन्वयः । ''पक्वमन्नं भुज्यत'' इत्यत्र पाकनिरूपितकर्मत्वं प्रति अन्नस्य विशेष्यतया विवक्षितत्वात् इतरविशेषणतया अविवक्षितत्वम् अस्ति इति तत्र आख्यातार्थसंख्यान्वयः उपपद्यते ।।

ननु इतरार्थककर्मत्वादिपदं व्यर्थम् । विशेषणत्वेन अविवक्षितत्वार्थकस्य अनवरुद्धपदस्य उपादानेनैव सामञ्जस्यात् इति अस्वरसात् कर्मत्वाद्यनवरुद्धत्वम्

इति समुदायस्यैव विशेषणत्वेन तात्पर्याविषयत्वपरत्वम् आह – **वस्तुतस्तु** इति । **अविशेषणत्वमात्रस्य** इति । विशेषणत्वेन तात्पर्याविषयत्वमात्रस्य इत्यर्थः । ''मात्र''पदेन इतरविशेषणत्वव्यवच्छेदः । ननु अविशेषणत्वमात्रमेव अस्तु । अविशेषणत्वं च विशेषणताशून्यत्वम् । तावतैव पूर्वोक्तदोषद्वयवारण-संभवात् । किं विशेषणतया तात्पर्याविषयत्वपर्यन्तनिवेशेन इत्याशङ्क्य तथा निवेशस्य प्रयोजनम् आह – **अविशेषणत्वम्** इत्यादिना । अविशेषणत्वं नाम प्रकारताशून्यत्वम् । प्रकारता च ज्ञानम् आदायैव भवति । ''चैत्र इव मैत्रो गच्छति'' इत्यादौ शाब्दबोधात् पूर्वं चैत्रे प्रकारताशून्यत्वसत्त्वात् तत्र आख्यातार्थसंख्यान्वयापत्तिः ।।

न च – आख्यातार्थसंख्यान्वयबोधात् पूर्वं ''चैत्र इव'' इति अवान्तरवाक्यार्थबोधस्य प्रतियोगितासंबन्धेन ''चैत्रविशिष्टं सादृश्यम्'' इत्याकारकस्य सत्त्वात् तादृशावान्तरवाक्यार्थबोधीयसादृश्यनिरूपितप्रकारतायाः चैत्रे सत्त्वात् प्रकारताशून्यत्वरूपस्य अविशेषणत्वस्य अभावात् कथं तत्र संख्यान्वयः इति–वाच्यम् ।।

यत्र खले कपोतन्यायेन शाब्दबोधः, तत्र अवान्तरवाक्यार्थबोधपूर्वकस्य महावाक्यार्थबोधस्य अनङ्गीकारात् अवान्तरवाक्यार्थबोधम् आदाय चैत्रे प्रकारताया वक्तुम् अशक्यतया प्रकारताशून्यत्वरूपस्य अविशेषणत्वस्य सत्त्वात् चैत्रे आख्यातार्थसंख्याप्रकारकबोधापत्तिः । तद्वारणाय विशेषणत्वेन तात्पर्याविषयत्वपर्यन्तं निवेशनीयम् । चैत्रस्य तु सादृश्यविशेषणत्वेन तात्पर्यविषयत्वात् न तत्र संख्यान्वय इति भावः ।।

अत्र शङ्कते – **न च चैत्र एव पचति** इति । विशेषणत्वेन तात्पर्याविषयत्वे सति प्रथमान्तपदोपस्थाप्ये आख्यातार्थसंख्यान्वय इति स्वीकारेऽपि ''चैत्र एव

पचति'' इत्यत्र चैत्रे आख्यातार्थसंख्यान्वयः न स्यात् । तथा हि – अत्र ''एव''कारः अन्ययोगव्यवच्छेदार्थकः । अन्यत्ववान् – योगः (संबन्धः) – व्यवच्छेदः (अभावः) इति त्रितयं ''एव'' कारस्य अर्थः । अन्यत्ववतः एकदेशे अन्यत्वे चैत्रस्य प्रतियोगितासंबन्धेन अन्वयः । धात्वर्थपाकस्य आख्यातार्थकृतौ अनुकूलतासंबन्धेन अन्वयः । कृतेः ''एव''कारार्थे योगे प्रतियोगितासंबन्धेन अन्वयः । योगस्य ''एव''कारार्थे व्यवच्छेदे प्रतियोगितासंबन्धेन अन्वयः । व्यवच्छेदस्य आश्रयतासंबन्धेन अन्यत्ववति अन्वयः । एवं आख्यातार्थकृतेः एकत्वसंख्यायाश्च आश्रयतासंबन्धेन चैत्रे अन्वयः । ''चैत्रप्रतियोगिक-अन्यत्ववान् (चैत्रान्यः) पाकानुकूलकृतिप्रतियोगिक-संबन्धप्रतियोगिकाभाववान् (पाकानुकूलकृत्यभाववान्), चैत्रः पाकानुकूलकृत्याश्रयः एकत्वाश्रयश्च'' इति ''चैत्र एव पचति'' इति वाक्यात् शाब्दबोधः । अत्र चैत्रस्य ''एव''कारार्थे अन्यत्वे विशेषणत्वेन तात्पर्यविषयत्वात् – विशेषणत्वेन तात्पर्याविषयत्वविरहात् तत्र संख्यान्वयानुपपत्तिः इत्येको दोषः ।।

एवं ''चैत्रः चैत्रं पश्यति'' इत्यत्र द्वितीयार्थकर्मत्वे चैत्रस्य आधेयतासंबन्धेन अन्वयः । कर्मत्वस्य निरूपकतासंबन्धेन ''दृश्'' धात्वर्थे दर्शनेऽन्वयः । आख्यातस्य आश्रयत्वम् एकत्वम् अर्थः । आश्रयत्वे निरूपकत्वसंबन्धेन दर्शनस्य अन्वयः । आश्रयत्वस्य च एकत्वस्य च प्रथमान्तार्थे चैत्रे आश्रयतासंबन्धेन अन्वयः । चैत्रनिष्ठकर्मतानिरूपकदर्शननिरूपिताश्रयतावान् एकश्च चैत्रः इति शाब्दबोधः इष्यते । तत्र चैत्रस्य द्वितीयार्थकर्मत्वविशेषणतया तात्पर्यविषयत्वात् विशेषणतया तात्पर्याविषयत्वविरहात् कथं तत्र आख्यातार्थसंख्यान्वयः ।।

समाधत्ते – **विशेषणत्वमात्रेण** इति । ''कर्मत्वाद्यनवरुद्ध'' इत्यनेन विशेषणत्वमात्रेण तात्पर्याविषयः इत्यर्थो विवक्षितः । विशेषणत्वमात्रेण

तात्पर्याविषयत्वं च विशेषणत्वमात्रेण तात्पर्यविषयत्वस्य अभावः । ''मात्रेण'' इत्यस्य विषयत्वे अन्यवयात् । विशेषणत्वमात्रेण तात्पर्यविषयत्वं च मुख्यविशेष्यत्वेन तात्पर्याविषयत्वे सति विशेषणत्वेन तात्पर्यविषयत्वम् । एवं च मुख्यविशेष्यत्वेन तात्पर्याविषयत्वे सति विशेषणत्वेन तात्पर्यविषयत्वस्य अभावः यत्र वर्तते, तत्र आख्यातार्थसंख्यान्वय इति नियमः । ''चैत्र एव पचति'' इत्यत्र चैत्रस्य ''एव''कारार्थान्यत्वे विशेषणतया आख्यातार्थकृति-विशेष्यतया च तात्पर्यविषयत्वात् विशेषणत्वमात्रेण तात्पर्यविषयत्वस्य अभावः अस्ति इति चैत्रे आख्यातार्थसंख्यान्वयोपपत्तिः ।।

एवं ''चैत्रः चैत्रं पश्यति'' इत्यत्र चैत्रस्य द्वितीयार्थकर्मत्वविशेषणतया आख्यातार्थाश्रयत्वविशेष्यतया च तात्पर्यविषयत्वात् विशेषणत्वमात्रेण तात्पर्यविषयत्वाभावसत्त्वात् चैत्रे आख्यातार्थसंख्यान्वयोपपत्तिः ।।

ननु नानार्थकसैन्धवादिपदात् कदाचित् लवणस्यैव कदाचित् अश्वस्यैव बोधः इति नियमनिर्वाहाय तादृशस्थले एव तात्पर्यज्ञानस्य हेतुत्वम्, न तु सर्वत्र । एकार्थकपदस्थले तद्धेतुत्वकल्पने बीजाभावात् । एवं च ''चैत्र इव'' इत्यादौ, चैत्रादेः इवार्थे यदा न विशेषणत्वे तात्पर्यम्, तदा चैत्रादौ संख्यान्वयः स्यात् इति आशङ्कते – **यदि च** इत्यादिना इति **तरङ्गिणीकाराः** ।।

तदा विशेषणत्वमात्र इति । विशेषणत्वमात्रप्रयोजकं यत् प्रथमान्तं पदं तदनुपस्थाप्यत्वम् अविशेषणत्वपदेन विवक्षितम् । विशेषणत्वमात्रप्रयोजक-प्रथमान्तपदोपस्थाप्यं यद्यत् तत्तद्भिन्नत्वम् इति फलितोऽर्थः । तत्तत्पदार्थनिष्ठशाब्द-बोधीयविषयतायां तत्तत्पदं प्रयोजकं भवति । तत्तत्पदाभावे तत्तत्पदार्थस्य शाब्दबोधविषयत्वाभावात् । ''चैत्र इव मैत्रः गच्छति'' इत्यत्र प्रथमान्तं चैत्रपदं तद्वाक्यजन्यशाब्दबोधीयचैत्रनिष्ठप्रकारताख्यविशेषणतायां प्रयोजकम् ।

तथा च विशेषणत्वप्रयोजकप्रथमान्तपदोपस्थाप्यत्वात् चैत्रस्य तद्भिन्नत्वं नास्तीति न तत्र संख्यान्वयः । मैत्रे तद्भिन्नत्वसत्त्वात् तत्र संख्यान्वयः । ''चैत्र एव पचति'' इत्यत्र प्रथमान्तस्य चैत्रपदस्य चैत्रनिष्ठं यत् शाब्दबोधीय – एवकारार्थ-निरूपितविशेषणत्वं तत्प्रयोजकत्ववत्, शाब्दबोधीय – आख्यातार्थकृतिनिरू-पितचैत्रनिष्ठविशेष्यत्वप्रयोजकत्वमपि अस्तीति विशेषणत्वमात्रप्रयोजकप्रथमान्तपदं न एतद्वाक्यस्थचैत्रपदम् । किन्तु ''चैत्र इव मैत्रः गच्छति'' इति वाक्यस्थं चैत्रपदम् । तदुपस्थाप्यभिन्नत्वं एतद्वाक्यस्थचैत्रपदोपस्थाप्यचैत्रेऽस्तीति तत्र आख्यातार्थसंख्यान्वयोपपत्तिः ।।

विशेषणत्वमात्रप्रयोजकत्वं च मुख्यविशेष्यत्वाप्रयोजकत्वे सति विशेषणत्वप्रयोजकत्वम् । ''चैत्रः चैत्रं पश्यति'' इत्यादौ प्रथमान्तं चैत्रपदं विशेष्यत्वप्रयोजकत्वात् विशेषणत्वमात्रप्रयोजकं न भवति । अतः विशेषणत्वमात्र-प्रयोजकं प्रथमान्तपदं ''चैत्र इव मैत्रः गच्छति'' इति वाक्यस्थं चैत्रपदम् । तदनुपस्थाप्यत्वं एतद्वाक्यस्थचैत्रपदोपस्थाप्ये चैत्रे अस्तीति तत्र आख्यातार्थ-संख्यान्वयोपपत्तिः ।।

ननु एवम् अपि चैत्रपदभेदेऽपि तदुपस्थाप्यव्यक्तेः एकत्वात् ''चैत्र इव मैत्रः'' इत्यादौ विशेषणत्वमात्रप्रयोजकप्रथमान्तचैत्रपदोपस्थाप्य-चैत्राभिन्नत्वं ''चैत्रः पचति''इति वाक्यस्थचैत्रपदोपस्थाप्यचैत्रे नास्तीति कथं तत्र संख्यान्वयः स्यात् इति चेत्, न – आख्यातार्थसंख्यानिष्ठ–प्रकारतानिरूपितस्वनिरूपित-विशेष्यताप्रयोजकोपस्थितीयविशेष्यतात्वसंबन्धेन शाब्दबोधं प्रति स्वनिरूपित-विशेष्यतात्वसंबन्धेन मुख्यविशेष्यताप्रयोजकप्रथमान्तपदजन्योपस्थितिः प्रयोजिका । अथ वा आख्यातार्थसंख्या निष्ठप्रकारतानिरूपितविशेष्यता-प्रयोजकपदत्वसंबन्धेन शाब्दबोधं प्रति मुख्यविशेष्यताप्रयोजकप्रथमान्तताप्रयोजिका इत्यत्र तात्पर्यात् । वस्तुतस्तु मुख्यविशेष्यत्वाप्रयोजकत्वे सति विशेषणत्वप्रयोजकं

यद्यत् प्रथमान्तपदं तद्भिन्नपदोपस्थाप्यत्वं विवक्षितम् । अतः न कोऽपि दोषः ।।

मूले यत्र कर्मादौ इति । प्रथमान्तपदोपस्थाप्यत्वानुपादाने विशेषणत्वमात्रेण तात्पर्याविषये आख्यातार्थसंख्यान्वयः इति स्वीकारे "तण्डुलं पचति" इत्यादौ तण्डुलस्य द्वितायार्थकर्मत्वं प्रति विशेषणतया, आख्यातार्थं प्रति विशेष्यतया च तात्पर्ये सति "तण्डुलकर्मकपाकानुकूलव्यापारवान् तण्डुलः" इति शाब्दबोधविवक्षायां विशेषणत्वमात्रेण तात्पर्याविषयत्वम् अस्तीति तण्डुले आख्याता-र्थसंख्यान्वयवारणाय प्रथमान्तपदोपस्थाप्यत्वनिवेशः । तत्र तण्डुलस्य द्वितीयान्त-पदोपस्थाप्यत्वात् न संख्यान्वयः इति तात्पर्यम् ।।

ननु "तण्डुलं पचति" इत्यत्र यदा उक्तबोधे तात्पर्यं तदा तण्डुलेऽपि आख्यातार्थसंख्यान्वये इष्टापत्तिरेव इति यदि ब्रूयात्, तदा स्थलान्तरे प्रथमान्तपदो-पस्थाप्यत्वस्य प्रयोजनं दर्शयति – **इदम् उपलक्षणम्** इति । "चैत्रेण सुप्यते" इत्यादौ भावाख्यातस्थले धात्वर्थविशेष्यकबोधस्य स्वीकारात् धात्वर्थस्य स्वापस्य विशेषणत्वेन तात्पर्याविषयत्वसत्त्वात् तत्र आख्यातार्थसंख्यान्वयवारणाय प्रथमान्तपदोपस्थाप्यत्वनिवेशः ।।

प्रथमदलार्थम् इति । कर्मत्वाद्यनवरुद्धत्वदलार्थम् इत्यर्थः । धात्वर्थातिरिक्ता-विशेषणत्वे सति प्रथमान्तपदोपस्थाप्ये आख्यातार्थसंख्यान्वयः । "चैत्र इव मैत्रः गच्छति" इत्यत्र प्रथमान्तपदोपस्थाप्ये चैत्रे संख्यान्वयवारणाय सत्यन्त-निवेशः । चैत्रस्य धात्वर्थातिरिक्त-इवार्थसादृश्यविशेषणत्वात् तत्र न संख्यान्वयः । "स्तोकं पचति" इत्यादौ द्वितीयान्तपदोपस्थाप्यस्य स्तोकपदार्थस्य धात्वर्थमात्रे अभेदसंबन्धेन विशेषणतया धात्वर्थातिरिक्ताविशेषणत्वम् अस्तीति तत्र संख्यान्वयवारणाय द्वितीयदलम् – प्रथमान्तपदोपस्थाप्यत्वदलम् ।।

विभावनीयम् इति । धात्वर्थातिरिक्तविशेषणत्वमात्रेण तात्पर्याविषयत्वमेव कर्मत्वाद्यनवरुद्धत्वम् एतत्कल्पेऽपि विवक्षणीयम् इति भावः ।।

दिनकरी

इदं तु अवधेयम् – संख्यान्वयबोधं प्रति न स्वातन्त्र्येण प्रथमान्तपदोपस्थाप्यत्वं हेतुः । आख्यातेन भावनानवगाहिसंख्यान्वयबोधस्य कुत्रापि अजननात् । संख्यान्वयबोधत्वव्यापकभावनान्वयबोधत्वावच्छिन्नहेतुभूततादृश-प्रथमान्तपदोपस्थाप्यत्वरूपकारणविरहेणैव प्रथमान्तपदानुपस्थाप्ये संख्यान्वयापत्त्य-संभवात् ।।

न च निरुक्तप्रथमान्तपदोपस्थाप्यत्वस्य जन्यतावच्छेदकं संख्यान्वयबोधत्वं भावनान्वयबोधत्वं वा इत्यत्र विनिगमनाविरहः । संख्यान्वयम् अविषयीकृत्यापि भावनान्वयबोधस्य अनुभवसिद्धतया भावनान्वयबोधत्वस्य जन्यतावच्छेदकत्वावश्य-कत्वेन संख्यान्वयबोधत्वस्य तथात्वे मानाभावात् ।।

राजीवोल्लासः

इदं तु अवधेयम् इत्यादि । एतावता आख्यातार्थसंख्यान्वयः कर्मत्वाद्यनवरुद्धे प्रथमान्तपदोपस्थाप्ये भवति इत्युक्तम् । तेन च विशेष्यतासंबन्धेन आख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति प्रथमान्तपदोपस्थाप्यत्वं हेतुः इति लभ्यते । भावनान्वयबोधं प्रति प्रथमान्तपदोपस्थाप्यत्वं हेतुः इति यः कार्यकारणभावः तदपेक्षया पार्थक्येन संख्यान्वयबोधं प्रति प्रथमान्तपदोपस्थाप्यत्वस्य हेतुत्वं नास्तीति निरूप्यते । आख्यातेन भावनाम् अविषयीकृत्य संख्याप्रकारकबोधः कुत्रापि न जायते । भावना नाम मुख्यभाक्तसाधारणं कर्तृत्वम् । मुख्यं कर्तृत्वं च कृतिमत्वरूपम्, गौणं कर्तृत्वं च आश्रयत्वप्रतियोगित्वादिकम् । ''चैत्रः

पचति'' इत्यादौ ''चैत्रः पाकानुकूलकृतिमान् एकत्वाश्रयश्च'' इति कृतिरूपभावनां विषयीकृत्यैव एकत्वादिसंख्याप्रकारकशाब्दबोधस्य जायमानत्वात् । एवं च संख्याप्रकारकशाब्दबोधत्वव्यापकं भावनाप्रकारकशाब्दबोधत्वम् इति लभ्यते । व्याप्यधर्मावच्छिन्ने जननीये व्यापकधर्मावच्छिन्नसामग्री अपेक्ष्यते इति नियमः । आख्यातार्थभावनाप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति प्रथमान्त-पदोपस्थाप्यत्वं हेतुरिति कार्यकारणभावः आवश्यकः । भावनायाः प्रथमान्तपदो-पस्थाप्ये एव अन्वयात् । एवञ्च व्याप्यसंख्याप्रकारकबोधत्वावच्छिन्ने जननीये व्यापकभावनाप्रकारकबोधत्वावच्छिन्नसामग्र्यन्तर्गतस्य प्रथमान्तपदोपस्थाप्यत्वस्य अपेक्षितत्वात् प्रथमान्तपदानुपस्थाप्ये प्रथमान्तपदोपस्थाप्यत्वरूपहेत्वभावादेव संख्यान्वयापत्यसंभवात् संख्याप्रकारकशाब्दबोधं प्रति प्रथमान्तपदोपस्थाप्यत्वं न पृथक् हेतुः इति भावः ।।

न च निरुक्त इति । संख्यान्वयबोधं प्रति प्रथमान्तपदोपस्थाप्यत्वं कारणं वा भावनान्वयबोधं प्रति कारणं वा इत्यत्र विनिगमकं नास्तीति शङ्का । समाधानं तु – आख्यातार्थसंख्याम् अविषयीकृत्यापि आख्यातार्थ-भावनाप्रकारकशाब्दबोधः ''दाराः सन्ति'' इत्यादौ भवति । नित्यबहुवचनान्तदार-शब्दार्थे आख्यातार्थबहुत्वसंख्यायाः बाधितत्वात् । अतः तत्र बहुत्वसंख्याम् अविषयीकृत्य आख्यातार्थाश्रयत्वप्रकारकशाब्दबोधः ''पत्नी सत्ताश्रयः'' इत्याकारकः स्वीक्रियते । भावनामविषयीकृत्य तु संख्याप्रकारकबोधः कुत्रापि न जायते । अतः संख्याविषयकशाब्दबोधत्वापेक्षया भावनाप्रकारकशाब्दबोधत्वस्य व्यापकत्वात् तस्यैव जन्यतावच्छेदकत्वं स्वीकृत्य तदवच्छिन्नं प्रत्येव प्रथमान्तपदोपस्थाप्यत्वं हेतुः इति स्वीक्रियते । स च हेतुः संख्याप्रकारकबोधं प्रत्यपि पूर्वोक्तरीत्या अपेक्षित इति प्रथमान्तपदानुपस्थाप्ये न आख्यातार्थसंख्यान्वयापत्तिः इति ।।

तथा च ''लः कर्तरि'' इत्यत्रापि कर्तृपदस्य भावप्रधाननिर्देशत्वात् कर्तृत्वमेव अर्थः । कर्तृत्वं च क्रियानुकूलकृतिमत्त्वं मुख्यम्, गौणं च क्रियानुकूलव्यापारवत्त्वम् आश्रयत्वं वा । ''नश्यति'' इत्यादौ प्रतियोगित्वमपि इत्यपि बोध्यम् । एवं च ''अनभिहिते'' इत्यधिकारीय''कर्तृकरणयोः तृतीया''इत्यादावपि कर्तृत्वकरणत्वयोः इत्यादिरेवार्थः । यत्र कर्मत्वं करणत्वं च अभिहितं तत्र प्रथमैव, न द्वितीयातृतीये । ''कर्मणि द्वितीया'' इति तद्विधायकसूत्राणाम् अनभिहिताधिकारस्थत्वात् । प्रातिपदिकार्थस्य मुख्यविशेष्यत्वविवक्षायां संबोधने लकाराद्यभिहितकर्तृत्वाद्याश्रये प्रथमाया एव विधानात् । एतेन – आख्यातेन तद्गतसंख्यानभिधानस्यैव तद्बोधकपदोत्तरतृतीयाप्रयोजकत्वे ''दाराः सन्ति'' इत्यादौ आख्यातेन दारेषु बहुत्वस्य बाधितत्वेन अबोधनात् ''दारैः'' इति तृतीयापत्तिः इत्यपि प्रत्युक्तम् इत्यपि विभावनीयम् इति **तरङ्गिणीकाराः** ।।

मुक्तावली

एवं व्यापारेऽपि न शक्तिः, गौरवात् । ''रथो गच्छति'' इत्यादौ व्यापारे **आश्रयत्वे वा लक्षणा । ''जानाति'' इत्यादौ आश्रयत्वे, ''नश्यति'' इत्यादौ तु प्रतियोगित्वे [निरूढ] लक्षणा ।।**

दिनकरी

लकारसामान्यस्य व्यापारोऽर्थः इति **मीमांसकमतं** दूषयति – **गौरवात्** इति । जन्यत्वादिघटितस्य व्यापारत्वस्य कृतित्वजात्यपेक्षया गुरुत्वात् इति भावः ।।

ननु आख्यातस्य न यत्नार्थकत्वम्, ''रथो गच्छति'' इत्यादौ तदभावेऽपि आख्यातपदप्रयोगात्, अत आह – **रथ** इति । ''रथो गच्छति'' इत्यत्र गमनानुकूलव्यापारस्य न बोधः, किंतु गमनाश्रयत्वस्यैव इति नवीनमतम् आश्रित्य आह – **आश्रयत्वे वा** इति । **लक्षणा** - **निरूढलक्षणा** । क्वचित्

तथैव पाठः । 'चक्षुः जानाति'' इत्यादौ व्यापारे जनकत्वे वा लक्षणास्वीकारात् ''जानाति'' इत्यादौ आख्यातस्य आश्रयत्वे लक्षणानियमो न संभवति इति, अत आह – अदौ इति । ''आदि''ना ''इच्छति'', ''यतते'' इत्यादेः सङ्ग्रहः ।

इदम् अत्र बोध्यम् – ''तण्डुलं पचति चैत्रः'' इत्यादौ कर्मत्वं द्वितीयार्थः । तत्र तण्डुलस्य आधेयतया अन्वयः । **कर्मत्वस्य पाके, पाकस्य आख्यातार्थकृतौ, तस्याः चैत्रे** इति ''**तण्डुलकर्मक**पाकानुकूलकृतिमान् चैत्रः'' इति बोधः ।।

''चैत्रेण पच्यते तण्डुलः'' इत्यत्र कृतिः तृतीयार्थः तस्याम् आधेयतया चैत्रादेः अन्वयः, **तस्याश्च धात्वर्थपाके, तस्य आत्मनेपदार्थफले,** तस्य च आश्रयता-संबन्धेन तण्डुले, इति ''चैत्रवृत्तिकृतिजन्यपाकजन्यफलाश्रयः तण्डुलः'' इति अन्वयबोधः । **कृतां तु कर्ता कर्म च अर्थः** । ''चैत्रः पक्ता'', ''तण्डुलः पक्वः'' इत्यादौ अभेदान्वयानुरोधात् नामार्थयोः भेदान्वयबोधस्य अव्युत्पन्नत्वात् इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

जन्यत्वादिघटितस्य इति । तज्जन्यत्वे सति तज्जन्यजनकत्वरूपस्य व्यापारत्वस्य कृतित्वजात्यपेक्षया गुरुत्वात् इति भावः । **तदभावेऽपि** इति । रथस्य अचेनत्वेन यत्नाभावेऽपि इत्यर्थः । **गमनानुकूलव्यापारस्य** इति । उत्तरदेश-संयोगानुकूलक्रिया गमधात्वर्थः, तदाश्रयत्वमेव ''रथो गच्छति'' इत्यादौ रथे प्रतीयते । न तु तादृशक्रियानुकूलाश्वादिसंयुक्तरज्वादिसंयोगवत्त्वमिति भावः इति तरङ्गिणीकाराः । **निरूढलक्षणा** – अनादितात्पर्यविषयलक्षणा इत्यर्थः ।।

ननु ''जानाति'' इत्यादौ आश्रयत्वे लक्षणा इति **मूलम्** असंगतम् । ''चैत्रो जानाति'' इत्यादौ चैत्रे ज्ञानाश्रयत्वबोधसंभवेऽपि ''चक्षुर्जानाति''

इत्यादौ चक्षुषः ज्ञानाश्रयत्वबाधात् ज्ञानाश्रयत्वबोधासंभवात् इत्याशङ्क्य एतदर्थमेव **मूले "जानाति" इत्यादौ** इति "आदि"पदमुपात्तम्। "आदि" पदेन च "चैत्रः इच्छति, यतते" इत्यादेः सङ्ग्रहः । तत्र इच्छाकृत्याद्याश्रयत्वस्यैव बोधात् आश्रयत्वे लक्षणा इति मूलस्य सङ्गतिः । "चक्षुर्जानाति" इत्यत्र तु तिङः व्यापारे जनकत्वे वा लक्षणा । व्यापारश्च चक्षुर्विषयसंयोगरूपः सन्निकर्षः । तत्र धात्वर्थस्य ज्ञानस्य जनकत्वसंबन्धेन अन्वयः । व्यापारस्य आश्रयतासंबन्धेन चक्षुषि अन्वयः । चक्षुः ज्ञानजनकविषयसंयोगाश्रयः इति बोधः । अथ वा तिङः जनकत्वे लक्षणा । तत्र धात्वर्थस्य ज्ञानस्य निरूपितत्वसंबन्धेन अन्वयः । जनकत्वस्य आश्रयतासंबन्धेन चक्षुषि अन्वयः । चक्षुः ज्ञाननिरूपितजनकत्वाश्रयः इति बोधः इत्याशयेन आह – **चक्षुः जानाति इत्यादौ** इत्यादिना । वस्तुतस्तु "मनः इच्छति", "चेतो नलं कामयते" इत्यादिप्रयोगात् अत्रापि जनकत्वे लक्षणा इति न इयम् अवतारिका समञ्जसा इति शङ्का भवति । अत्र समाधानम् – चक्षुरादिवत् मनसः ज्ञानकारणत्वेऽपि इच्छादौ आत्ममनस्संयोगकारणतयैव निर्वाहात् न तत्र मनसः हेतुत्वम् । इत्थं च "मनः इच्छति" इत्यादौ मनःपदम् आत्मपरम् इत्याशयः **दिनकरीकाराणाम्** इति **सुबोधिनीकाराः** ।।

एतावता आख्यातार्थः कः इति निर्णीतम् । इदानीम् आख्यातसमभिव्याहृत-सुबन्तपदघटितवाक्यजन्यं शाब्दबोधं शिष्यव्युत्पादनार्थं सोदाहरणं प्रदर्शयति – **इदम् अत्र बोध्यम्** इत्यादिना । **कर्मत्वस्य पाके** इति । निरूपकतासंबन्धेन इति शेषः । **पाकस्य आख्यातार्थकृतौ** इति । अनुकूलतासंबन्धेन इति शेषः । **तस्याः चैत्रे** इति । आश्रयतासंबन्धेन इति शेषः । पाको नाम विक्लित्यनुकूलः अधिश्रयण-अधःश्रयणादिरूपो व्यापारः । **तण्डुलकर्मक** इत्यादि । तण्डुलनिष्ठकर्मतानिरूपकविक्लित्यनुकूलव्यापारानुकूलकृत्याश्रयः चैत्रः

इत्यर्थः । **तस्याश्च धात्वर्थपाके** इति । जन्यत्वसंबन्धेन इति शेषः । **तस्या आत्मनेपदार्थफले** इति । जन्यत्वसंबन्धेन इति शेषः । फलं च विक्लित्तिः ।।

कृताम् इति । कृत्प्रत्ययानाम् इत्यर्थः । **अर्थ** इति । न तु कर्तृत्वं कर्मत्वं वा इति शेषः । ''चैत्रः पक्ता'' इत्यत्र ''पच्'' धातोः कर्तरि ''तृच्''-प्रत्ययः । अतः तृचः कर्ता अर्थः । कर्ता नाम कृतिमान् । तदेकदेशकृतौ धात्वर्थपाकस्य अनुकूलतासंबन्धेन अन्वयः । तृजर्थस्य कर्तुः अभेदसंबन्धेन प्रथमान्तार्थे चैत्रे अन्वयः । तथा च पाकानुकूलकृतिमदभिन्नः चैत्रः इति बोधः । ''तण्डुलः पक्वः'' इत्यत्र ''पच्'' धातोः कर्मणि ''क्त'' प्रत्यये पक्वः इति रूपम् । क्तप्रत्ययस्य ''कर्म'' अर्थः । फलाश्रयः कर्म । तदेकदेशफले धात्वर्थस्य पाकस्य जन्यत्वसंबन्धेन अन्वयः । फलाश्रयस्य अभेदसंबन्धेन तण्डुलेऽन्वयः । तथा च पाकजन्यफलाश्रयाभिन्नः तण्डुल इति अन्वयबोधः ।।

ननु ''चैत्रः पचति'', ''तण्डुलः पच्यते'' इत्यादौ आख्यातस्य कर्तृत्व-कर्मत्वार्थकत्ववत् ''चैत्रः पक्ता'', ''तण्डुलः पक्वः'' इत्यादौ ''कृत्'' प्रत्ययस्य कर्तृत्व-कर्मत्वार्थकत्वं कुतः न अङ्गीक्रियते इति आशङ्क्य आह – **नामार्थयोः** इति । निपातातिरिक्तनामार्थयोः भेदेन अन्वयः न भवति इति नियमः । ''भेदेन'' इत्यस्य अभेदातिरिक्तसंबन्धेन इत्यर्थः । प्रकृते ''तृच्'' प्रत्ययस्य कर्तृत्वं यद्यर्थः, तदा तस्य आश्रयत्वसंबन्धेन चैत्रे अन्वयः वक्तव्यः । तृजन्तं तु नाम – प्रातिपदिकम्, ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसंज्ञाविधानात् । एवं च तृजन्तार्थस्य पाककर्तृत्वस्य नामार्थतया तस्य अपरनामार्थे चैत्रे अभेदातिरिक्तेन आश्रयत्वसंबन्धेन अन्वये पूर्वोक्तनियमभङ्गात् तृचः कर्ता अर्थः इति स्वीकृत्य तस्य अभेदेन चैत्रे अन्वयः उक्तः । एवं ''तण्डुलः पक्वः'' इत्यत्रापि बोध्यम् ।।

''घटो नास्ति'' इत्यादौ नामार्थस्य घटस्य नञर्थे अभावे प्रतियोगित्वसंबन्धेन अभेदातिरिक्तेन अन्वयस्वीकारात् निपातातिरिक्तनामार्थयोः इत्युक्तम् । न च – नामार्थयोः भेदसंबन्धेनापि अन्वयोऽस्तु । का क्षतिः इति – वाच्यम्। तथा सति ''भूतलं घटः'' इति वाक्यस्यापि प्रामाण्यापत्तेः । आधेयत्वसंबन्धेन भूतलस्य घटे अन्वयेन ''भूतलवृत्तिः घटः'' इति वाक्यार्थस्य अबाधादिति भावः ।।

मुक्तावली

उपमानात् यथा शक्तिग्रहः तथोक्तम् ।।

दिनकरी

तथा उक्तम् इति । उपमाननिरूपणावसरे इति शेषः ।।

मुक्तावली

एवं कोशादपि **शक्तिग्रहः** । सति बाधके क्वचित् त्यज्यते । यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः **कोशेन व्युत्पादिता**, तथापि **लाघवात्** नीलादावेव शक्तिः, **नीलादिविशिष्टे तु लक्षणा** ।।

दिनकरी

शक्तिग्रह इति । भवति इति शेषः । **कोशेन व्युत्पादिता** इति । ''गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति'' इति कोशस्य उभयत्र शक्तिग्राहकत्वात् इति भावः । **लाघवात्** इति । नीलादिमत्त्वापेक्षया नीलत्वादिजातेः लघुतया शक्यतावच्छेदकत्वात् इति भावः । **नीलादिविशिष्टे तु लक्षणा** इति । ''गुणवचनात् मतुपः लुगिष्टः'' इति स्मरणात् लुप्तेन मतुपैव विशिष्टार्थबोधसंभवे अलं लक्षणया इत्यपि वदन्ति ।।

राजीवोल्लासः

गुणे शुक्लादय इति । शुक्लादयः शब्दाः गुणवाचकाः पुँल्लिङ्गा भवन्ति। गुणिवाचकास्तु शुक्लादयः शब्दाः गुणिनः यल्लिङ्गं तल्लिङ्गाः भवन्ति। यथा पटस्य शुक्लः, शुक्लः पटः, शुक्लं वस्त्रम् इत्यादि । ''गुणे'' इत्यत्र ''तद्वति'' इत्यत्र च सप्तम्याः वाचकत्वम् अर्थः । नीलादिमत्त्वापेक्षया इति । नीलपीतादिरूपापेक्षया इत्यर्थः । लघुतया इति । नीलरूपादौ शक्तिस्वीकारे नीलत्वादिजातिः शक्यतावच्छेदिका इति लाघवम् । नीलरूपादिविशिष्टे शक्तिस्वीकारे तु अनन्तानां नीलादिरूपाणां शक्यतावच्छेदकत्वे गौरवम् इति भावः । गुणवचनात् इति । गुणवाचकात् नीलादिशब्दात् ''तदस्य अस्ति'' इति अर्थे विहितस्य मतुपः लोपो व्याकरणप्रणेतृणां इष्टः इति ''गुणवचनात् मतुपो लुगिष्टः'' इति वार्तिकस्य अर्थः । मतुपैव इति । ''यः शिष्यते सः लुप्यमानार्थाभिधायी'' इति न्यायात् मतुपः लोपेऽपि नीलादिशब्दस्य नीलादिविशिष्टार्थकत्वात् इति भावः ।।

अत्र च ''नीलः घटः अस्ति'' इत्यादौ सर्वत्रैव शाब्दबोधात्पूर्वं लुप्तमतुबर्थक-प्रत्ययकल्पनाम् अपेक्ष्य नीलादिरूपविशिष्टे नीलादिपदानां लक्षणाकल्पनमेव ज्यायः । किं च अस्मृतमतुपः पुरुषस्य शाब्दबोधानुपपत्तिः । अनुभूयते च तादृशानुपूर्वीज्ञानात् मतुपः अस्मरणेऽपि शाब्दबोधः इति अस्वरसः ''अपि'', ''वदन्ति'' पदाभ्यां सूचितः इति तरङ्गिणीकाराः ।।

मुक्तावली

एवम् आप्तवाक्यादपि । यथा ''कोकिलः पिकशब्दवाच्यः'' इत्यादिशब्दात् पिकादिशब्दानां कोकिले शक्तिग्रहः ।।

एवं व्यवहारादपि । यथा प्रयोजकवृद्धेन ''घटम् आनय'' इत्युक्तं, तच्छ्रुत्वा प्रयोज्यवृद्धेन घटः आनीतः, तदवधार्य पार्श्वस्थः बालः घटानयनरूपं कार्यं ''घटम् आनय'' इति शब्दप्रयोज्यम् इति अवधारयति । ततश्च ''घटं नय'', ''गाम् आनय'' इत्यादिवाक्यात् आवापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति । इत्थं च भूतले ''नीलो घटः'' इत्यादिशब्दात् न शाब्दबोधः । घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात्, कार्यताबोधं प्रति च लिङादीनां सामर्थ्यात् तदभावात् न शाब्दबोधः इति केचित् ।।

तन्न । प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात् तस्य परित्यागौचित्यात् । अत एव ''चैत्र पुत्रस्ते जातः'', ''कन्या ते गर्भिणी'' इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषात् शाब्दबोधं निर्णीय तद्धेतुतया तं शब्दम् अवधारयति । तथा च व्यभिचारात् न कार्यान्विते शक्तिः । न च तत्र ''तं पश्य'' इत्यादिशब्दान्तरम् अध्याहार्यम्, मानाभावात्, ''चैत्र! पुत्रस्ते जातः'', ''मृतश्च'' इत्यादौ तदभावाच्च ।।

दिनकरी

तत् – घटानयनम् । ननु व्यवहारेण आनयनादिना अनुमितघटानयनादिधर्मिक-कार्यताज्ञाने पदानां कारणत्वं लाघवात् पदत्वावच्छेदेनैव गृहीतम् । एवं च साक्षात् परंपरया वा कार्यत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रति, पदत्वेन कारणता इति कार्यकारणभावः पर्यवसितः । इयमेव कार्यत्वान्विते पदानाम् आनुभाविकी शक्तिः ।।

एवं च कार्यत्वान्वितविषयकशाब्दत्वव्यापकीभूतकार्यताविषयक-शाब्दत्वावच्छिन्नजनककार्यतावाचकलिङादिपदाभावात् कथं कोशादितः शक्तिग्रहः?

इति प्रभाकराक्षेपं तन्मंतदूषणेन दूषयितुं तन्मतसिद्धमर्थं प्रदर्शयति – **इत्थं च** इत्यादिना । एतेन स्मारकशक्तिप्रसङ्गे आनुभाविकशक्तिप्रदर्शनम् अनुचितम् इति आशङ्का निरस्ता ।।

ननु **"भूतले नीलो घटः"** इत्यादितः कार्यताविषयकबोधापत्तिः । तत्र तादृशपदानां सामर्थ्यावधारणात् इति त्वयैव उक्तत्वात् इति, अत आह – **कार्यताबोधं प्रति च इत्यादौ । सामर्थ्यात् तदभावात्** इति । कार्यताबोधं प्रति लिङादिपदानां स्वजन्यकार्यत्वोपस्थितिद्वारा हेतुत्वम् । घटादिपदानां कार्यत्वानुभवं प्रति हेतुत्वेऽपि घटादिपदेषु कार्यत्वस्मारकशक्त्यभावेन स्मारकशक्त्या कार्यत्वोपस्थापकलिङादिपदाभावात् न "भूतले घटः" इत्यादितः शाब्दबोधः इति भावः ।।

लाघवेन इति । कार्यत्वान्वितघटशाब्दत्वापेक्षया घटशाब्दत्वस्य कार्यतावच्छेदकत्वे लाघवेन इत्यर्थः । **अत एव** – कार्यत्वाविषयकबोधं प्रति पदानां हेतुत्वादेवं । **तत्कारणत्वेन** – सुखदुःखयोः कारणत्वेन । **तद्धेतुतया** – तादृशशाब्दबोधहेतुतया । **व्यभिचारात्** इति । घटादिपदैः कार्यताविषयक एव बोधः जन्यते इति नियमे व्यभिचारात् इत्यर्थः । कार्यत्वाविषयकबोधस्य "चैत्र! पुत्रस्ते जातः" इत्यादिपदैः जननात् इति भावः । **अध्याहार्यम्** इति । तथा च तत्रापि लोडादिजन्यकार्यत्वोपस्थितेः सत्त्वेन कार्यताविषयकबोधस्यैव उत्पादात् न तादृशनियमे व्यभिचारः इति भावः । **तदभावाच्च** इति । "तं पश्य" इत्यादि कार्यताबोधकपदाध्याहारासंभवाच्च इत्यर्थः ।।

राजीवोल्लासः

कार्यान्विते घटादिपदानां शक्तिः इति प्रभाकरमतोपन्यासपूर्वकं **इत्थं च** इत्यादिना मूले तेषां मतं निष्कृष्य अनूदितम् । तं ग्रन्थम् अवतारयति –

ननु व्यवहारेण इति । व्यवहारो नाम प्रवृत्तिः । ''घटम् आनय'' इति प्रयोजकवृद्धप्रयुक्तवाक्यश्रवणानन्तरं घटानयने प्रयोज्यवृद्धस्य या प्रवृत्तिः सा व्यवहार इत्युच्यते । अयं व्यवहारोऽपि शक्तिग्रहस्य हेतुः भवति । तथा हि – प्रयोज्यवृद्धकृतं घटानयनं दृष्ट्वा ''इदं घटानयनं कृतिद्वारा कार्यताज्ञानजन्यम्, चेष्टात्वात्, मच्चेष्टावत्'' इति, ''अयं प्रयोज्यवृद्धः घटानयनधर्मिककार्यताज्ञानवान्, स्वानुकूलकृतिमत्त्वसंबन्धेन घटानयनवत्त्वात्, यः स्वानुकूलकृतिमत्त्वसंबन्धेन यत्क्रियावान् सः तद्धर्मिककार्यताज्ञानवान्, यथाऽहम्'' इति वा अनुमानेन कार्यताज्ञानं पार्श्वस्थः जानाति । तदनन्तरं प्रयोज्यवृद्धस्य ''कार्यताज्ञानं पदज्ञानजन्यम्, पदज्ञानान्वयव्यतिरेकशालित्वात्'' इत्यनुमानेन ''घटम् आनय'' इति वाक्यघटकपदानां कार्यताज्ञानहेतुत्वं पार्श्वस्थः जानाति । एवञ्च साक्षाद्वा परंपरया वा कार्यत्वान्वितविषयकशाब्दबोधत्वावच्छिन्नं प्रति पदत्वावच्छिन्नं कारणम् इति कार्यकारणभावः पर्यवस्यति । साक्षात् कार्यत्वान्वितः धात्वर्थः । धात्वर्थद्वारा कार्यत्वान्वितः प्रातिपादिकाद्यर्थः । ''घटमानय'' इति वाक्यजन्यशाब्दबोधे आनयनरूपकार्यान्वितघटस्य भानात् कार्यस्य च भानात् पदानां कार्यत्वान्वितार्थे शक्तिरिति शक्तिनिर्णयः भवति इति यावत् । पदानां कार्यत्वान्वितविषयकशाब्दबोधत्वावच्छिन्नं प्रति कारणत्वं शक्तिं विना न संभवति इति पदानां कार्यत्वान्विते शक्तिः सिद्ध्यति । इयं च शक्तिः कार्यत्वान्वितार्थ-विषयकशाब्दबोधात्मकानुभवहेतुत्वात् आनुभाविकी शक्तिः इत्युच्यते । **प्राभाकराणां मते** शक्तिः द्विविधा – स्मारिका आनुभाविकी च इति । तत्र स्मारिका शक्तिः घटादिपदानां कार्यत्वानन्विते घटादौ । आनुभाविकी शक्तिस्तु कार्यत्वान्वित-घटादौ । एवं च घंटादिपदात् स्मारकशक्त्या कार्यत्वांनन्वितानां घटादिपदार्थानां स्मरणं जायते । तदनन्तरं घटादिपदनिष्ठया आनुभाविकशक्त्या कार्यत्वान्वित-विषयकशाब्दबोधो जायते इति स्वीक्रियते । कार्यत्वम् अविषयीकृत्य कार्यत्वान्वित-

घटादिविषयकशाब्दबोधो न जायते। अतः कार्यत्वान्वितविषयकशाब्दबोधत्वं प्रति कार्यताविषयकशाब्दबोधत्वं व्यापकम् । कार्यताविषयकशाब्दत्वावच्छिन्नं प्रति कार्यतावाचकलिङ्गादिपदं कारणम् । एवं च लिङादिपदघटितवाक्यादेव कार्यत्वान्वितघटादिविषयकशाब्दबोधोऽपि भवितुम् अर्हति । व्याप्यधर्मावच्छिन्ने जननीये व्यापकधर्मावच्छिन्नसामग्र्याः अपेक्षितत्वात् । तथा च लिङाद्यघटितात् वाक्यात् शाब्दबोधो न भवति इति कथं कोशादितः शाब्दबोधात्मकः शक्तिग्रहः इति **प्राभाकराणाम्** आक्षेपः । अयं च आक्षेपः **प्राभाकरमतदूषणेनैव** समधातुं शक्यते इत्याशयेन तन्मतं दूषयति । प्रथमतः तन्मतसिद्धं अर्थं प्रदर्शयति – इत्थं च इत्यादिना इति भावः । ननु प्रवृत्तेः कार्यताज्ञानपूर्वकत्वेन घटानयने प्रवृत्त्या अनुमितस्य कार्यताज्ञानस्य ''घटमानय'' इति शब्दजन्यत्वात्, लिङादेः कार्यत्वान्वितक्रियाशक्तत्वग्रहेऽपि कार्यत्वान्वितघटादिशक्तत्वं घटादिपदानां कथं गृह्यते इत्याशङ्क्य **मूले आवापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति** इत्युक्तम् । तस्य अयमाशयः – ''घटमानय'' इति लिङाद्यन्तशब्देन सह घटपदस्य प्रयोगे कार्यत्वान्वितघटः बुद्ध्यते । घटपदस्य उद्वापेन तत्स्थाने गोपदस्य प्रयोगे कार्यत्वान्वितघटः न बुद्ध्यते। अतः अन्वयव्यतिरेकरूपाभ्यां घटपदावापोद्वापाभ्यां घटपदस्य कार्यत्वान्वितघटे शक्तिग्रहः इति । ''घटपदम् आनयान्वितघटे शक्तम्, लक्षणाग्रहाजन्यशक्तिभ्रमाजन्यानयान्वितघटविषयक-शाब्दधीजनकत्वात्'' इत्यनुमानेन घटादिपदस्य आनयनाद्यन्वितघटादौ शक्तिं गृह्णाति इति तात्पर्यम् ।।

एतेन इति । उक्तरीत्या एतद्ग्रन्थस्य अवतारणेन इत्यर्थः । **स्मारकशक्तिप्रसङ्गे** इति । स्मारकशक्तिग्राहकत्वेनैव व्याकरणादीनां प्रकृतग्रन्थे उपन्यस्तत्वात् इति भावः ।।

ननु भूतले नीलो घट इत्यादित इति । यदि साक्षाद्वा परंपरया वा कार्यत्वान्वितार्थे एव पदानां शक्तिः, तर्हि ''भूतले नीलो घटः'' इतिकार्यतावाचक-लिङादिपदरहितादपि वाक्यात् कार्यताविषयकशाब्दबोधापत्तिः । सर्वेषामपि पदानां कार्यत्वविशिष्टवाचकत्वात् इत्याशङ्क्य घटादिपदानां कार्यत्वविशिष्ट-कार्यान्वितार्थे शक्तिस्वीकारेऽपि सा शक्तिः कार्यत्वविशिष्टानुभवहेतुभूता शक्तिः । घटपदेषु विद्यमाना सा स्मारकशक्तिश्च कार्यत्वानन्वितघटादि-विषयिणी । अत्र स्मारकशक्त्या उपस्थितानां घटादीनां कार्यत्वस्य च अन्वयबोधः भवतीति स्वीकारात् स्मारकशक्त्या कार्यत्वोपस्थापकस्य लिङादिपदस्य अभावात् ''भूतले नीलो घटः'' इत्यादिवाक्यात् न शाब्दबोधः इति समाधत्ते इति भावः । इत्थं च **प्राभाकरमते** कार्यत्वान्वितार्थविषयकानुभवशक्तानां अपि घटादिपदानां स्मारकशक्त्या कार्यत्वस्मृतिजनकलिङादिघटितक्रियापदसत्त्वे एव कार्यत्वान्वितार्थविषयकशाब्दबोधजनकत्वम् । तैरपि स्मारकशक्त्या स्मृतानामेव नामार्थानां कार्यस्य च अन्वयबोधस्वीकारात् इति फलितम् ।।

कार्यत्वान्वित इत्यादि । वृद्धव्यवहारात् आदौ कार्यत्वान्वितघटविषयक-शाब्दबोधत्वापेक्षया घटविषयकशाब्दत्वम् लघु इत्याकारकलाघवज्ञानात्पूर्वं कार्यत्वान्वितघटादौ घटादिपदानां शक्त्यवधारणेऽपि लाघवज्ञानानन्तरं कार्यत्वान्वित-घटादौ शक्तेः परित्यक्तुम् उचितत्वात् इत्यर्थः । **मुक्तावल्याम् व्यभिचारात्** इति । अन्वयव्यभिचारात् इत्यर्थः ।।

मूले परित्यागौचित्यात् इति । घटादिपदानां कार्यत्वान्वितघटादौ प्रथमं शक्तिग्रहेऽपि उत्तरकाले कार्यत्वान्वितघटविषयकशाब्दत्वापेक्षया घटविषयक-शाब्दत्वं लघु इत्याकारकलाघवज्ञानसहकृतमनसा ''घटादिपदं घटादिमात्रशक्तम्'' इत्याकारकस्य अप्रामाण्यज्ञानानास्कन्दितस्य मानसप्रत्यक्षस्य उदयेन

पूर्वोक्तवृद्धव्यवहारहेतुकायां "घटादिपदं कार्यत्वान्वितघटादिशक्तम्" इत्याकारकानुमितौ अप्रामाण्यग्रहसंभवात् कार्यत्वान्वितघटत्वस्य न शक्यतावच्छेदकत्वनिश्चयः । वस्तुतस्तु कार्यत्वानन्वितेऽप्यर्थे पदानां शक्तिग्रहः सिद्धार्थपरवाक्येषु बहुलं दृश्यते । एवं शिशूनां मातापित्रादिकृतात् शब्दविशेषोच्चारणसहितार्थविशेषाभिमुखाङ्गुलिनिर्देशात् कार्यत्वानन्वितेष्वपि अर्थेषु आद्यशक्तिग्रहस्य दर्शनात् प्राथमिकव्युत्पत्तिरपि कार्यत्वान्वितेषु अर्थेष्वेव इति नियमो निर्निबन्धनः ।।

मुक्तावली

इत्थं च लाघवात् अन्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिम् अवधारयति ।।

दिनकरी

भट्टमतं प्रक्षिपन् स्वमतम् उपसंहरति – **इत्थं च** इति । **लाघवात्** इति । अन्वितघटे शक्तिकल्पनापेक्षया घटमात्रे तत्कल्पने लाघवात् इत्यर्थः ।।

राजीवोल्लासः

भट्टमतं प्रक्षिपन् इति । तं मतं निरस्यन् इत्यर्थः । इत्थं हि तन्मतम् – शाब्दबोधे पदादनुपस्थितस्य अर्थस्य भानोपगमे "घटः अस्ति" इत्यादौ पटविषयकशाब्दबोधापत्त्या पदात् उपस्थितः अर्थ एव शाब्दबोधे भासते इति नियमः स्वीकार्यः । तथा च पदार्थद्वयसंसर्गस्य पदानुपस्थाप्यत्वे पदोपस्थितार्थ एव भासते इति नियमभङ्गः स्यात् इति इतरान्विते अर्थे पदानां शक्तिः । तथा च अन्वयरूपस्य संसर्गस्यापि पदशक्त्यैव भानम् । तत्र च इतरत् – पदार्थान्तरम् तदन्विते तत्प्रतियोगिकसंसर्गविशिष्टे घटादिपदानां शक्तिः इत्यर्थः । तत्र इतरस्य समभिव्याहृतपदान्तरादेव लाभात् न तदन्तर्भावेण

घटादिपदानां शक्तिः । किन्तु इतरप्रतियोगिकत्वोपलक्षिततत्तत्संसर्गविशिष्टघटादावेव शक्तिः । तथा च अन्विते शक्तिः इति फलितम् । तथा च **भाट्टमते**ऽपि अन्वितघटादावेव पदानाम् आनुभाविकी शक्तिः, स्मारकशक्तिस्तु अनन्वितघटादौ इति उभयमतसंमतम् । कार्यत्वान्विते आनुभाविकी शक्तिः इति **प्राभाकराः** । कार्यत्वं परित्यज्य अन्विते शक्तिः इति **भाट्टाः** इत्येव अनयोः भेदः ।।

इदं **भट्टमतमपि** अयुक्तम् । अन्वितघटत्वापेक्षया घटत्वस्य लघुत्वेन अन्वितघटत्वस्य शक्यतावच्छेदकत्वायोगात् इति तात्पर्यम् ।।

न च – एवं पदानुपस्थितस्य संसर्गस्यापि शाब्दबोधविषयत्वाङ्गीकारे "घटोऽस्ति" इति वाक्यात् पटविषयकशाब्दबोधापत्तिः इति – वाच्यम् । संसर्गभिन्नविषयकशाब्दबोधं प्रत्येव पदजन्योपस्थितेः हेतुत्वात् । तेन संसर्गभिन्नस्य प्रकारविशेष्यमर्यादया पदानुपस्थितस्य भानं न संभवति । संसर्गस्य तु पदानुपस्थितस्यापि पदद्वयसमभिव्याहाररूपाकाङ्क्षावशात् शाब्दबोधे भानं संभवति इति **नैयायिकानां** मतम् ।।

मुक्तावली

एवं वाक्यशेषादपि शक्तिग्रहः । यथा "यवमयः चरुर्भवति" इत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः, कङ्गौ तु म्लेच्छानाम् । तत्र हि "अथ अन्या ओषधयः म्लायन्ते, अथ एते मोदमानाः तिष्ठन्ति" ।।

वसन्ते सर्वसस्यानां जायते पत्रशातनम् ।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ।।

इति वाक्यशेषात् दीर्घशूके शक्तिः निर्णीयते, कङ्गौ तु शक्तिभ्रमात् प्रयोगः । नानाशक्तिकल्पने गौरवात् । हर्यादिपदे तु विनिगमकाभावात् नाना-शक्तिल्पनम् ।।

दिनकरी

यवपदस्य इत्यस्य देहलीदीपन्यायेन अन्वयः । तत्र हि तादृशद्विविधव्यवहारेण कङ्गौ दीर्घशूके वा यवपदस्य शक्तिः इति सन्देहे सति यवपदस्य इति **वाक्यशेषात् दीर्घशूके शक्तिः निर्णीयते इत्यन्वयः** ।।

ननु अस्तु यवपदस्य वाक्यशेषात् दीर्घशूके शक्तिः, कङ्गावपि शक्तिसत्त्वे बाधकाभावः इति, अत आह – **नानाशक्ति** इति । कथं तर्हि हर्यादिपदे नानाशक्तिकल्पना इति, अत आह – **हर्यादिपदे तु** इति । **विनिगमकाभावात्** इति । तत्र कोशस्य उभयत्र तुल्यत्वात् । प्रकृते च **वाक्यशेषस्यैव** विनिगमकत्वात् इति भावः ।।

मुक्तावली

एवं विवरणादपि शक्तिग्रहः । विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम् । यथा ''घटः अस्ति'' इत्यस्य ''कलशः अस्ति'' इत्यनेन विवरणात् घटपदस्य कलशे शक्तिग्रहः । एवं ''पचति'' इत्यस्य ''पाकं करोति'' इत्यनेन विवरणात् **आख्यातस्य यत्नार्थकत्वं** कल्प्यते ।।

दीनकरी

आख्यातस्य यत्नार्थकत्वम् इति । न च – विवरणस्य कथं शक्तिग्राहकत्वम्? तद्वाचकपदाभावात् इति – वाच्यम् । ''आख्यातं यत्नत्वविशिष्टे शक्तम्, यत्नत्वविशिष्टशक्तकरोतिप्रतिपादितार्थप्रतिपादकत्वात्'' इत्यनुमानविधया तस्य शक्तिग्राहकत्वात् ।।

मुक्तावली

एवं प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः । यथा ''इह सहकारतरौ मधुरं पिकः रौति'' इत्यादौ पिकशब्दस्य कोकिले शक्तिग्रह इति ।।

दिनकरी

प्रसिद्धपदस्य इति । प्रसिद्धार्थकपदस्य इत्यर्थः । तिङर्थधर्मिणि नामार्थान्वयस्य अव्युत्पन्नतया नेदं शक्तिग्रहस्य उदाहरणम् इति तु न । ''यो यः शूद्रस्य पचति द्विजः अन्नं स अतिनिन्दितः'' इत्यादौ तिङर्थधर्मिणि तथान्वयदर्शनेन तादृशनियमस्य असिद्धेः ।।

राजीवोल्लासः

देहलीदीपन्यायेन इति । देहलीस्थः दीपः भवनान्तर्बहिस्थविश्ववस्तु–प्रकाशकत्वेन संबध्नाति । तथा ''यवपदस्य'' इति षष्ठ्यन्तपदमपि पूर्ववाक्यस्थ–''शक्तिग्रहे'' उत्तरवाक्यस्थ ''प्रयोगे'' तदनन्तरवाक्यस्थे ''शक्तिर्निर्णीयते'' इत्यत्र च अन्वेति । **तत्र हि** इति । ''यवमयश्चरुर्भवति'' इति वाक्ये हि इत्यर्थः । **वाक्यशेषस्यैव** इति । ननु वाक्यशेषात् अस्माभिः यवपदस्य दीर्घशूकविशिष्टे अनादितात्पर्यमेव अवधार्यते, न तु यवपदं तत्र शक्तमिति । तत् कथम् अस्य शक्तिग्राहकत्वम् इति चेत्, न – अनादितात्पर्यस्य शक्तिनिरूढलक्षणान्यतरव्याप्यत्वात्, प्रकृते च अनुपपत्तिप्रतिसन्धानं विनापि बोधात् ''यवपदं दीर्घशूकविशिष्टे शक्तम्, अलाक्षणिकत्वे सति तदर्थे अनादितात्पर्यविषयत्वात्'' इति अनुमानेन तत्र शक्तिसिद्धेः ।।

तद्वाचकपदाभावात् इति । विवरणवाक्ये शक्तिवाचकपदाभावात् विवरणं कथं शक्तिग्राहकं इति प्रश्नः । **मूले प्रसिद्धपदस्य सान्निध्यात्** इति । ज्ञातार्थकपदस्य कोकिलादिनिष्ठासाधारणधर्मवाचकपदेन सह उच्चरितत्वज्ञानात् इत्यर्थः । ''सहकारतरौ'' इत्यत्र सप्तम्याः अवच्छेद्यत्वम् अर्थः । तस्य धात्वर्थे शब्दे अन्वयः । तथा च ''सहकारतर्ववच्छेद्यमधुराभिन्न-शब्दानुकूलकृतिमान् पिकः'' इति बोधः । मधुरशब्दानुकूलकृतेः गायकविशेषसाधारणत्वेन

पिकासाधारणधर्मत्वाभावात् सहकारतरौ इत्युक्तम् । गायकपुरुषविशेषकर्तृकगानस्य सहकारतर्ववच्छेद्यत्वाभावात् तद्वारणम् । काकाद्युच्चरितशब्दस्यापि सहकारतर्ववच्छेद्य-त्वात् तद्वारणाय माधुर्यविशिष्टाभिन्नत्वं धात्वर्थविशेषणम् । तथा च ''सहकारतरौ'' इत्यादिवाक्यजन्यशाब्दबोधोत्तरं ''एतादृशासाधारणधर्मविशिष्टः कोकिलः पिकशब्दवाच्यः, सहकारतरौ मधुररावकर्तृत्वात्'' इत्यनुमानात् तादृशनिश्चयसहकृतात् मानसप्रत्यक्षाद्वा पिकशब्दस्य कोकिले शक्तिग्रह इति भावः ॥

ननु ''इह सहकारतरौ मधुरं पिको रौति'' इति वाक्ये तिङः कर्त्रर्थकत्वे तिङर्थस्य कर्तुः पिकशब्दार्थे अभेदेनान्वये च सत्येव पिकशब्दरहितवाक्यभागस्य कोकिलवृत्तिः यः असाधारणधर्मः तद्विशिष्टार्थबोधकत्वं भवितुम् अर्हति । तिङश्च कृतौ शक्ततया कर्तृरूपधर्मिबोधकत्वमेव नास्ति । अत्रत्यतिङः लक्षणया कर्तृबोधकत्वेऽपि तस्य नामार्थे पिके अभेदसंबन्धेन अन्वयः न संभवति । नामार्थस्यैव अपरनामार्थे एव अभेदेनान्वयः, न तु धात्वर्थस्य प्रत्ययार्थस्य वा इति व्युत्पत्तेः इति आशङ्क्य तिङर्थस्य धर्मिणः नामार्थे अभेदेन अन्वयः क्वचित् दृश्यते । अतः तिङर्थस्य नामार्थे अभेदेन न अन्वयः इति नियमः अप्रामाणिकः इत्याशयेन समाधत्ते – तिङर्थधर्मिणि इति । लक्षणया तिङ्बोध्ये कर्तरि इत्यर्थः । तथान्वयदर्शनेन इति । ''शूद्रस्य अन्नं पचति यो यो द्विजः, सः अतिनिन्दितः'' इति योजनाम् अनुचिन्त्य तिङर्थस्य कर्तुः अभेदसंबन्धेन नामार्थे द्विजे अन्वय इति उक्तम् ॥

वस्तुतस्तु तिङर्थधर्मिणि नामार्थान्वयः अव्युत्पन्न एव । अन्यथा ''पश्यन् गमनकर्ता'' इत्यर्थे ''पश्यति गच्छन्'' इति, ''हन्ता दण्ड्यः'' इत्यर्थे '' हन्ति दण्ड्यः'' इति च प्रयोगापत्तेः । तथा च प्रसिद्धपदसान्निध्यात् शक्तिग्रहस्य उदाहरणान्तरम् अन्वेष्टव्यम् ॥

।। जातिशक्तिवादः ।।

मुक्तावली

जातौ एव शक्तिः, न तु व्यक्तौ; व्यभिचारात् आनन्त्याच्च । व्यक्तिं विना जातिभानस्य असंभवात् व्यक्तेरपि भानम् इति केचित् । तन्न । शक्तिं विना व्यक्तिभानानुपपत्तेः ।।।

न च व्यक्तौ लक्षणा । अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात् । न च व्यक्तिशक्तौ आनन्त्यम् । सकलव्यक्तौ एकस्या एव शक्तेः स्वीकारात् । न च अननुगमः । गोत्वादेरेव अनुगमकत्वात् ।।

दिनकरी

प्रसङ्गात् परमतनिराकरणपूर्वकं स्वमते जात्यादिविशिष्टे शक्तिं व्यवस्थापयितुं मीमांसकमतम् आह – जातौ एव इति । जातिविशिष्टे शक्तिस्वीकारे जातावपि शक्तिग्रहस्य आवश्यकता, ''न अगृहीत''–विशेषणन्यायात् । तथा च जातावेव शक्तिः, लाघवात् । तदुक्तम् – ''विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिः विशेषणे इति'' इति भावः ।।

यस्यां कस्यांचिद्व्यक्तौ शक्तिः, सर्वासु वा इति विकल्प्य आद्ये दोषम् आह – व्यभिचारात् इति । अगृहीतशक्तिकव्यक्तावपि शाब्दबोधोदयेन तत्र शक्तिज्ञानाभावात् व्यभिचार एव इति भावः ।।

द्वितीये तमाह – आनन्त्यात् इति । व्यक्तिभेदेन शक्तिभेदात् शक्त्यानन्त्यं स्यात् इत्यर्थः ।।

असंभवात् इति । जातिभासकसामग्र्या एव व्यक्तिभासकत्वात् इति भावः । इदमेव कथम् इति चेत्, व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधे

जातिविषयकशक्तिज्ञानत्वेन हेतुत्वात् । **न च** – तादृशबोधे व्यक्तिशक्तिज्ञानत्वेन हेतुत्वम् उपगम्य व्यक्तावेव शक्तिः किं न अङ्गीक्रियते इति – वाच्यम् । तथा सति शक्त्यानन्त्यादिदोषप्रसङ्गात् इति ।।

शक्तिं विना इति । **पदजन्यपदार्थोपस्थितेः** शाब्दबोधं प्रति हेतुतया व्यक्तिशक्तिं विना तद्भानानिर्वाहात् इति भावः । **लक्षणा इति ।** **तावतैव** वृत्त्या पदजन्यपदार्थोपस्थितेः निर्वाहात् इति भावः । **अनुपपत्तिप्रतिसन्धानं विनापि इति ।** **''गामानय''** इत्यादौ गोत्वजातेः आनयनान्वयानुपपत्त्या गोपदस्य गवि लक्षणास्वीकारेऽपि ''गौः अस्ति'' इत्यादौ गोत्वजातेः अस्तित्वाद्यन्वयानुपपत्तेः लक्षणाबीजस्य अभावेन लक्षणायाः स्वीकर्तुम् अशक्यत्वात् इति भावः ।।

स्वमते पूर्वोक्तदोषम् आशङ्क्य वारयति – **न च** इत्यादिना । **एकस्या इति ।** ईश्वरेच्छारूपायाः तस्याः एकत्वात् ।।

न च अननुगम इति । **गोव्यक्तीनाम् अननुगततया** विषयतासंबन्धेन शक्तिज्ञानकारणतायाम् **अवच्छेदकत्वासंभव** इत्यर्थः । **गोत्वादेरेव इति ।** तथा च गोशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुत्वात् न उक्तदोष इति भावः ।।

राजीवोल्लासः

प्रसङ्गात् इति । प्रसङ्गसङ्गतेः इत्यर्थः । **न अगृहीत** इति । ''न अगृहीतविशेषणा बुद्धिः विशिष्टेषु उपजायते'' इति न्यायः । अगृहीतं अविषयीकृतं विशेषणं यया इति व्युत्पत्या विशेषणाविषयिणी बुद्धिः विशिष्टेषु न उपजायते – विशिष्टविषयिणी न भवतीत्यर्थः । ''विशिष्टेषु'' इत्यत्र सप्तम्याः विषयत्वार्थकत्वात् । तथा च जातिविशिष्टायां व्यक्तौ शक्तिग्रहस्वीकारे जातावपि शक्तिग्रहः आवश्यकः । विशिष्टबुद्धेः विशेषणविषयकत्वनियमात् । एवं च

उभयत्र व्यक्तौ जातौ च शक्तिकल्पनापेक्षया जातावेव शक्तिः कल्पनीया, लाघवात् । तदुक्तम् – ''विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे'' इति । अभिधा – पदशक्तिः विशेष्यं न गच्छेत् – न प्राप्नोति । कुत इति आकाङ्क्षायाम् आह – क्षीण इति । ''क्षीणशक्तिर्विशेषणे'' इत्यनन्तरं यतः इति पूरणीयम् । तथा च यतः विशेषणं प्राप्य पदशक्तिः क्षीणसामर्थ्या भवति, अतः विशेष्यं न अभिधा गच्छेत्– न प्राप्नुयात् इति पर्यवसितार्थः । वक्ष्यमाणरीत्या विशेषणशक्तात् पदादेव विशिष्टविषयकशाब्दबोधोत्पत्तौ विशेष्यांशे शक्तिकल्पने बीजाभावात् इति भावः । एवं च घटत्वविशिष्टनानाघटेषु शक्तिकल्पनाम् अपेक्ष्य एकस्मिन् घटत्वे शक्तिकल्पने लाघवात् घटादिपदानां घटत्वादिजातावेव शक्तिः इति **मीमांसकाः** । **मीमांसकैरेव** व्यक्तौ शक्तिस्वीकारे व्यभिचारात् आनन्त्यात् इति दोषद्वयम् उक्तम् । तत् उपपादयति – **यस्यां कस्यांचिद्व्यक्तौ** इत्यादिना । घटादिपदानां व्यक्तौ शक्तिस्वीकारे किं यस्यां कस्यांचिद्व्यक्तौ शक्तिः, उत सर्वासु व्यक्तिषु इति विकल्पे आद्यपक्षे दोषः **व्यभिचारात्** इति । यस्यां व्यक्तौ घटपदस्य शक्तिः गृहीता तदतिरिक्तव्यक्तेरपि घटपदश्रवणेन शाब्दबोधः जायते, तादृशव्यक्तौ शक्तिज्ञानरूपकारणं विनापि शाब्दबोधोत्पत्या व्यतिरेकव्यभिचार इति भावः । एतदुक्तं भवति – तद्विषयक-शाब्दबोधं प्रति तद्विशेष्यकशक्तिज्ञानमेव हेतुः इति वक्तव्यम् । अन्यथा घटादिपदात् पटादिशाब्दबोधापत्तेः । तथा च एकघटव्यक्तावेव घटपदशक्तिस्वीकारे अगृहीतशक्तिकस्य घटान्तरस्यापि शाब्दबोधोत्पत्या तादृशकार्यकारणभावे व्यतिरेकव्यभिचार इति । सर्वासु घटव्यक्तिषु घटपदस्य शक्तिः इति द्वितीयकल्पे व्यक्तीनाम् आनन्त्येन व्यक्तिभेदेन शक्तिभेदात् शक्त्यानन्त्यम् इति दोषः ।।

व्यक्तौ शक्त्यभावे शाब्दबोधे व्यक्तिभानासंभवः इत्याशङ्कायां **व्यक्तिं विना जातिभानस्य असंभवात् व्यक्तेरपि भानम् इति मूले** उक्तम् । तन्न

सङ्गच्छते – यत्र गोत्वमुख्यविशेष्यकस्मरणं तत्र व्यक्तिं विनापि जातिभानसंभवात् व्यक्तिभासकसामग्रीं विना शाब्दबोधे व्यक्तिभानासंभवाच्च इत्यतः **मूलं** व्याचष्टे – **जातिभासकसामग्र्या एव** इति । जातिविशेष्यकशक्तिज्ञानमेव शाब्दबोधे जातिभासकम् । तदेव व्यक्तेरपि भासकम् इति भावः ।।

ननु जातिविषयकशक्तिज्ञानस्य कार्यतावच्छेदकं जातिविषयकशाब्दत्वमेव। एवं च कथं जातिविशेष्यकशक्तिज्ञानं जातेः भासकम् व्यक्तिभासकं स्यात् इत्याशङ्क्य समाधत्ते– **इदमेव कथम् इति चेत्** इति । जातिभासकसामग्र्याः व्यक्तिभासकत्वं कथम् ? इत्यर्थः । **व्यक्तिविशेष्यक** इति । व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधं प्रति जातिविषयकशक्तिज्ञानं कारणम् इति कार्यकारणभावः स्वीक्रियते । तेन जातिविषयकशक्तिज्ञानस्य व्यक्तिविशेष्यकत्वमपि कार्यतावच्छेदकमिति जातिविशेष्यकशक्तिज्ञानात् व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधः भवितुम् अर्हति इति भावः । **न च तादृशबोधे** इति । व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधं प्रति व्यक्तिविशेष्यकशक्तिज्ञानं कारणम् इति स्वीकृत्य गवादिपदानां व्यक्तावेव शक्तिरस्तु, न तु जातौ इति न च वाच्यम् । तथा सति सकलव्यक्तिषु शक्तिस्वीकारे व्यक्तीनाम् आनन्त्येन शक्तीनाम् आनन्त्यं स्यात् । एकस्यां व्यक्तौ शक्तिस्वीकारे व्यक्त्यन्तरविषयकशाब्दबोधः न स्यात् इति पूर्वोक्तदोषप्रसङ्गात् एकस्यां जातौ शक्तिं स्वीकृत्य जातिविशेष्यकशक्तिज्ञानं व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधे कारणम् इति स्वीकृत्य व्यक्तिजात्योः उभयोः शाब्दबोधे भानं वक्तव्यम् इति भावः ।।

जातौ शक्तिस्वीकारे **शक्तिं विना व्यक्तिभानानुपपत्तेः** इति **मीमांसकमते** दूषणम् उक्तं **मूले** । ताम् अनुपपत्तिमेव उपपादयति – **पदजन्यपदार्थोपस्थितेः** इति । तद्विषयकशाब्दबोधं प्रति तद्विषयकपदजन्योपस्थितेः हेतुतया गोपदस्य

गोत्वजातेश्च शक्तिरूपसंबन्धग्रहेण गोपदरूप-एकसंबन्धिज्ञानात् जातिरूपस्य संबन्ध्यन्तरस्यैव स्मरणं भवति, न तु व्यक्तेः इति पदजन्यव्यक्तिविषयकस्मरणाभावेन व्यक्तिविषयकशाब्दबोधासंभवात् व्यक्तौ शक्तिः अवश्यं स्वीकरणीयमा । तथा सति शक्तिरूपसंबन्धेन गोपदात् व्यक्तेरपि स्मरणं भवति इति व्यक्तेः शाब्दबोधे भानं निर्वहति इति भावः ।।

एतदुपरि पदस्य व्यक्तौ शक्त्यभावेऽपि तत्र लक्षणास्वीकारात् व्यक्तिविषयकः शाब्दबोधः संभवति इति **मूले** आशङ्कितम्। इयम् आशङ्का न सङ्गच्छते । व्यक्तौ पदस्य लक्षणास्वीकारेऽपि शक्त्या पदजन्यव्यक्तिस्मरणाभावेन व्यक्तिविषयक-शाब्दबोधानुपपत्तेः इत्याशङ्कायाम् आह – **तावतैव** इति । तद्विषयकशाब्दबोधं प्रति शक्त्या तद्विषयकपदजन्यस्मरणं कारणम् इति न कल्प्यते, किन्तु वृत्त्या पदजन्यतद्विषयकस्मरणं कारणम् इति कल्प्यते । अन्यथा पदात् लक्ष्यार्थबोधानुप-पत्तेः । वृत्तिश्च शक्तिलक्षणान्यतरसंबन्धः इति पूर्वमेव उक्तम् । एवञ्च वृत्तिज्ञानसह-कृतपदज्ञानजन्यपदार्थोपस्थितिः शाब्दबोधे कारणम् इति लक्षणया गोपदजन्य-गोव्यक्त्युपस्थित्या गोशाब्दबोधनिर्वाहात् गवादिपदानां व्यक्तौ शक्तिः अनावश्यिकी इति **मीमांसकानां** आक्षेपः ।।

तत्र समाधानम् उक्तम् – **अनुपपत्तिप्रतिसन्धानं विनापि** इति । तदुपपादयति – **गामानय इत्यादौ** इत्यादिना । गवादिपदानां गवादिव्यक्तौ लक्षणा हि अन्वयानुपपत्त्या वक्तव्या । सा च अन्वयानुपपत्तिः ''गामानय'' इत्यादौ अस्ति । गोपदशक्यार्थे गोत्वे आनयनकर्मत्वान्वयासंभवात् । अतः तत्र गोपदस्य गवि लक्षणास्वीकारेऽपि ''गौरस्ति'' इत्यादौ शक्यार्थगोत्वजातावपि अस्तित्वान्वयसंभवात् व्यक्तौ लक्षणाबीजस्य अन्वयानुपपत्तेः अभावेन तत्र

गोपदस्य गवि लक्षणा न स्यात् । तथा च ''गौरस्ति'' इत्यादौ गोव्यक्तेरपि शाब्दबोधात् तन्निर्वाहाय व्यक्तौ शक्तिः स्वीकरणीया इति भावः ।।

स्वमते इति । व्यक्तिशक्तिवादिनैयायिकमते इत्यर्थः । **पूर्वोक्तदोषम्** इति । शक्त्यानन्त्यप्रसङ्गरूपदोषम् इत्यर्थः ।।

ननु व्यक्तौ शक्तिस्वीकारे पदार्थस्मृतिं प्रति व्यक्तिशक्तिज्ञानं कारणम् इति वक्तव्यम् । तत्र च विषयविधया व्यक्तिरेव अवच्छेदिका वक्तव्या । तच्च न संभवति । एतद्व्यक्तिविशेष्यकशक्तिज्ञानस्य अन्यगोव्यक्तिस्मृतेः पूर्वं अवर्तमानत्वात् । अन्यगोव्यक्तेश्च एतद्व्यक्त्यपेक्षया भिन्नत्वेन एतद्गोव्यक्तिविशेष्यकशक्तिज्ञाने विषयतया असत्त्वात् इत्याशङ्क्य समाहितम् मूले **न च अननुगमः, गोत्वादेरेव अनुगमकत्वात्** इति । तं ग्रन्थं व्याचष्टे – **गोव्यक्तीनाम्** इत्यादिना । **अननुगततया** इति । अनुगताननतिप्रसक्तधर्मानवच्छिन्नतया इत्यर्थः । **अवच्छेदकत्वासंभव** इति । व्यक्तिषु अनुगताननतिप्रसक्तस्य एकस्य धर्मस्य सत्त्वे तद्धर्मावच्छिन्नविषयकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविशेष्यकशक्तिज्ञानत्वेन कारणत्वस्य संभवात् शक्तिज्ञाननिष्ठकारणतायां विषयतासंबन्धेन व्यक्तेरेव अवच्छेदकत्वं संभवति, न तु अनुगताननतिप्रसक्तस्य एकस्य धर्मस्य अभावे इत्यर्थः ।।

न च – तद्विषयकशाब्दबोधं प्रति तद्विषयकशक्तिज्ञानं हेतुरस्तु इति– वाच्यम् । तथा सति शक्तिज्ञानाविषयस्य गोव्यक्तेः शाब्दबोधानुपपत्तेः इति भावः ।।

व्यक्तीनां गोत्वेन एकरूपेण अनुगमे सति व्यक्तेः शक्तिज्ञाननिष्ठकारणतायाम् अवच्छेदकत्वम् उपपादयति – **गोशाब्दबोधे** इति । एवं च गोत्वावच्छिन्नविषयकशाब्दबोधं प्रति गोत्वावच्छिन्नविशेष्यकशक्तिज्ञानत्वेन हेतुत्वात् गोत्वेन

रूपेण सर्वासां गोव्यक्तीनां शक्तिज्ञाने विषयत्वात् विषयविधया गोव्यक्तीनां अवच्छेदकत्वसंभवात् गोव्यक्तीनां शाब्दबोधे भानं संभवति इति भावः ।।

मुक्तावली

किञ्च ''गौः शक्या'' इति शक्तिग्रहः यदि, तदा व्यक्तौ शक्तिः । यदि तु ''गोत्वं शक्यम्'' इति शक्तिग्रहः, तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात्; समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् ।।

दिनकरी

ननु सर्वत्र पदजन्यपदार्थोपस्थितेः हेतुत्वे मानाभावः । कथम् अन्यथा शाब्दबोधे संसर्गज्ञानम्?

न च – एवं पदानुपस्थितघटादेरपि भानापत्तिः इति – वाच्यम् । गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्वस्य उक्तत्वात् एतादृशातिप्रसङ्गविरहात् इति, अत आह – **किञ्च** इति । **तदा व्यक्तौ शक्तिः** इति । **''गौः शक्या''** इति विशिष्टज्ञानं प्रमात्मकमेव, त्वन्मते अन्यथाख्यात्य-भावात्, प्रमायाश्च वस्तुसाधकत्वात् इति भावः । **समानप्रकारकत्वेन** इति । ईदृशशक्तिज्ञानस्य गोत्वप्रकारकत्वाभावेन ''गामानय'' इत्यादौ गोत्वप्रकारक-स्मरणशाब्दबोधानुपपत्तिः इत्यर्थः ।।

न च - ''गोपदं गोत्वे शक्तम्'' इत्येतादृशशक्तिग्रहस्यैव शाब्दबोधे हेतुत्वात्, तस्य च शक्त्यंशे गोत्वप्रकारकत्वात् न तत्प्रकारकशाब्दबोधानुपपत्तिः इति – वाच्यम् । शक्तिग्रहे यदंशे गोत्वादिप्रकारकत्वम्, शाब्दबोधस्यापि तदंशे गोत्वादिप्रकारकत्वम् इति एतादृशसमानप्रकारकत्वस्य परमते सिद्धान्तितत्वात् ।

अत एव अपूर्ववादे अपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रहः इति आशङ्क्य कार्यत्वेन घटादिषु शक्तिग्रहात् योग्यतया शाब्दबोधे अपूर्वभानम् इत्युक्तं तैः इति ।।

राजीवोल्लासः

किञ्च इति ग्रन्थम् अवतारयति – **ननु सर्वत्र** इति । तद्विषयकशाब्दबोध-सामान्ये तद्विषयकपदजन्योपस्थितिः हेतुः इति कार्यकारणभावः यदि स्यात् तदैव गोपदात् अनुपस्थितायाः गोव्यक्तेः शाब्दबोधे भानासंभवात् तद्भाननिर्वाहाय शक्तिर्वा लक्षणा वा व्यक्तौ स्वीकरणीया भवति । उक्तकार्यकारणभावे एव प्रमाणं नास्ति । पदात् अनुपस्थितस्यापि पदार्थद्वयसंसर्गस्य शाब्दबोधे भानात् । न च – पदानुपस्थितस्यापि शाब्दबोधे भानाङ्गीकारे पदानुपस्थितस्य घटत्वादेरपि शाब्दबोधे भानापत्तिः इति – वाच्यम् । घटविशेष्यकघटत्व-प्रकारकशाब्दबोधं प्रति घटत्वविशेष्यकशक्तिज्ञानम् कारणम् इति स्वीकारात् घटत्वे घटपदशक्तिज्ञानरहितस्य घटत्वविषयकशाब्दबोधापत्तेः असंभवात् इत्यतः दूषणान्तरम् आह – **किञ्च** इत्यादिना इति भावः ।।

जातिशक्तिवादिनां मते शक्तिग्रहस्य आकारः कीदृशः । यदि ''गौः शक्या'' इति शक्तिग्रहस्य आकारः, तदानीं गोपदेन व्यक्तेरेव उल्लेखात् व्यक्तौ शक्तिः अङ्गीकृता स्यात् । यदि तु ''गोत्वं शक्यम्'', इति शक्तिग्रहस्य आकारः, तदानीं शक्तिग्रहे गोत्वस्य विशेष्यतया गोत्वत्वस्य च प्रकारतया च भानात् गोत्वत्वप्रकारकगोत्वविशेष्यकस्मरणं गोत्वत्वप्रकारकगोत्वविशेष्यक-शाब्दबोधश्च स्यात्, न तु गोत्वप्रकारकस्मरणं गोत्वप्रकारकशाब्दबोधश्च स्यात् । तत्प्रकारकशाब्दबोधं तत्प्रकारकस्मरणं च प्रति तत्प्रकारकशक्तिज्ञानं कारणम् इति समानप्रकारकत्वेनैव शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति

च हेतुत्वात् इति दूषणं **मूले** उक्तम् । तत्र प्रथमपक्षे ''गौः गोपदशक्या'' इति शक्तिज्ञानस्य शाब्दबोधे हेतुत्वेऽपि न व्यक्तौ शक्तिसिद्धिः । उक्तज्ञानस्य भ्रमत्वाङ्गीकारात् । न हि भ्रमाद्वस्तुसिद्धिः इति न्यायात् इत्याशङ्क्य आह **दिनकर्याम् – गौः शक्या इति** । **त्वन्मते इति** । **प्राभाकरमते** इत्यर्थः । **अन्यथाख्यात्यभावात्** इति । सर्वं ज्ञानं यथार्थम् इति स्वीकारात् इति भावः ।।

ईदृशशक्तिज्ञानस्य इति । ''गोत्वं शक्यम्'' इत्याकारकस्य शक्तिज्ञानस्य इत्यर्थः ।।

न च गोपदम् इति । तन्मते ''गोपदं गोत्वे शक्तम्'' इत्याकारकं गोपदविशेष्यकशक्तिज्ञानमेव गोत्वविशिष्टगोविशेष्यकशाब्दबोधे हेतुः । तस्मिन् शक्तिज्ञाने शक्त्यंशे निरूपितत्वसंबन्धेन गोत्वप्रकारकत्वम् अस्ति इति तादृशशक्तिज्ञानात् गोत्वप्रकारकशाब्दबोधस्य न अनुपपत्तिः इति शङ्कां । गोत्वगोपदयोरेव शक्तिरूपसंबन्धज्ञानात् गोत्वस्मरणमेव संभवति, न तु व्यक्तेरपि स्मरणम् संभवति । अतः स्मरणानुपपत्तिरूपः दोषः अस्त्येव इत्याशयेन **''न तत्प्रकारकशाब्दबोधानुपपत्तिः''** इत्युक्तम् ।।

समाधत्ते – **शक्तिग्रहे यदंशे** इत्यादिना । शक्तिग्रहे यदंशे यद्धर्माश्रयांशे गोत्वादिप्रकारकत्वं शाब्दबोधस्यापि तदंशे – तद्धर्माश्रयांशे गोत्वादिप्रकारकत्वम् इति तेषां **मीमांसकानां** सिद्धान्तः । यदि ''गोपदं गोत्वे शक्तम्'' इत्याकारकं शक्तिज्ञानं स्यात्, तदा तस्य शक्तिज्ञानस्य शक्तित्वाश्रयशक्त्यंशे गोत्वप्रकारकत्वात् शाब्दबोधोऽपि शक्तित्वाश्रये शक्त्यंशे गोत्वप्रकारकः स्यात् । न तु गोव्यक्त्यंशे गोत्वप्रकारकः । गोव्यक्तेः शक्तित्वानाश्रयत्वात् । तथा च ईदृशशक्तिज्ञानात् गोविशेष्यकगोत्वप्रकारकशाब्दबोधानुपपत्तिः दुर्वारा इति भावः ।।

अत एव इति । ''यदंशे'' इत्यादिना दर्शितस्य समानप्रकारकत्वस्य परमताङ्गीकृतत्वादेव इत्यर्थः । अपूर्ववादे इति । तत्त्वचिन्तामणिस्थापूर्ववादाख्यप्रकरणे इत्यर्थः । ''यजेत'' इत्यादौ अपूर्वस्य पूर्वम् अनुपस्थितत्वात् अपूर्वे लिङादेः शक्तिग्रहः कथं संभवति इत्याशङ्क्य ''यजेत'' इत्यत्रत्यलिङः न अपूर्वत्वावच्छिन्ने शक्तिः, किन्तु कार्यत्वावच्छिन्ने शक्तिः । कार्यत्वावच्छिन्ने घटादौ लिङादेः शक्तिग्रहः, शाब्दबोधे तु कार्यत्वावच्छिन्नस्य अपूर्वस्यैव यागविषयकत्व-स्वर्गकामीयत्वयोः अन्वययोग्यत्वात् भानम् । न तु घटादेः, तदन्वयायोग्यत्वात् इत्युक्तं प्राभाकरैः । ''कार्यं लिङ्शक्यम्'' इत्याकारके शक्तिग्रहे कार्यत्वम् कार्यत्वाश्रये प्रकारः, लिङ्जन्यशाब्दबोधेऽपि कार्यत्वाश्रये कार्यत्वं प्रकारः । शाब्दबोधे कार्यत्वाश्रयतया अपूर्वं भासते। शक्तिज्ञाने तु कार्यत्वाश्रयतया घटादिकं भासते इति आश्रयव्यक्तेः भेदेऽपि शक्तिज्ञाने यद्धर्माश्रये यत्प्रकारकत्वं शाब्दबोधेऽपि तद्धर्माश्रये तत्प्रकारकत्वमिति समानप्रकारकत्वस्य न विरोधः । ''गोपदं गोत्वे शक्तम्'' इत्याकारकशक्तिज्ञानस्य गोत्वप्रकारकगोविशेष्यकशाब्दबोधहेतुत्वस्वीकारे पूर्वोक्तसमानप्रकारकत्वभङ्गः । शाब्दबोधः गोत्वाश्रये गवि गोत्वप्रकारकः । शक्तिज्ञानं तु गोत्वानाश्रये शक्तौ गोत्वप्रकारकम् इति । ''यदंशे'' इत्यादेः ''यद्धर्माश्रये'' इत्यर्थम् उपेक्ष्य यथाश्रुतार्थाङ्गीकारे अत एव इत्यादि उपष्टम्भासङ्गतिः । शक्तिज्ञानस्य घटांशे कार्यत्वप्रकारकत्वात् शाब्दबोधस्य अपूर्वांशे कार्यत्वप्रकारकत्वाच्च शक्तिग्रहः यदंशे यत्प्रकारकः शाब्दबोधः तदंशे तत्प्रकारकः इत्यस्य समानप्रकारकत्वस्य तत्र अभावात् ।।

एवं च ''गोपदं गोत्वे शक्तम्'' इत्याकारकस्य शक्तिज्ञानस्य गोविशेष्यकगोत्वप्रकारकशाब्दोधहेतुत्वं न संभवति इति एतावता उपपादितम् । ''गोत्वं गोपदशक्यम्'' इति शक्तिज्ञानस्य शाब्दबोधहेतुत्वासंभवस्तु पूर्वमेव उक्तः ।।

मुक्तावली

किञ्च गोत्वे यदि शक्तिः, तदा गोत्वत्वं **शक्यतावच्छेदकं वाच्यम्** । गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम् । तथा च गोव्यक्तीनां शक्यतावच्छेदके अनुप्रवेशात् **तवैव गौरवम्** । **तस्मात्** जात्याकृति-विशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिः जात्याकृतिविशिष्टव्यक्तावेव विश्राम्यति इति ।।

दिनकरी

ननु कार्यत्वाद्युपाधिप्रकारकशाब्दबोधस्थले तादृशसमानप्रकारकत्वस्य तदनुमतत्वेऽपि जातिप्रकारकशाब्दबोधस्थले तादृशसमानप्रकारकत्वं न तदनुमतम्, अत आह – **किञ्च** इति । **शक्यतावच्छेदकं वाच्यम्** इति । **गोत्वधर्मिकशक्य-त्वज्ञानस्य** गोपदधर्मिकगोत्वादिशक्तिज्ञानस्य वा शाब्दबोधहेतुत्वे गोत्वत्वावच्छिन्नगोत्वविषयताया निवेश आवश्यकः । **निर्धर्मितावच्छेदकक-शक्तिज्ञानस्य** गोत्वाद्यंशे निष्प्रकारकशक्तिज्ञानस्य वा **विपरीतज्ञानाविरोधिनः** शाब्दबोधाहेतुत्वात् । तथा च गोत्वत्वे शक्यतावच्छेदकत्वावगाहितादृशप्रमायाः विषयसाधकत्वात् गोत्वत्वे **शक्यतावच्छेदकत्वसिद्धिः** इति भावः ।।

तवैव गौरवम् इति । न च – गोत्वत्वावच्छिन्नविषयकशक्तिज्ञानस्य कारणत्वेऽपि **स भ्रमः**, न तु तस्य **विषयसाधकत्वम्** इति – वाच्यम् । तथा सति प्रतीतेः कारणतावच्छेदकत्वाद्यंशेऽपि भ्रमत्वस्य वक्तुं शक्यतया कारणतावच्छेदकत्वादीनां कुत्रापि सिद्धिः न स्यात् ।।

अस्तु वा गोत्वत्वादीनाम् अनवच्छेदकत्वम्, तथापि गवेतरासमवेतत्वादि-घटितगोत्वत्वादेः धर्मितावच्छेदकताद्यात्मकगोविषयतायाः शाब्दबोध-**कारणतावच्छेदककोटिप्रवेशप्रयुक्तगौरवं दुर्वारमेव** इति ।।

स्वमतम् उपसंहरति – तस्मात् इति । **जात्याकृतिविशिष्टव्यक्तावेव** इति । **अवयवसंस्थानविशेषरूपाया** आकृतेः शक्यत्वेऽपि न जातिवत् तदवच्छेदकत्वम् । सामानाधिकरण्यसंबन्धस्य शक्यतावच्छेदकतावच्छेदकत्वकल्पने गौरवात् ।।

अत्र च परस्परंपरित्यागेन परस्परस्य बोधाभावात् त्रिषु एकैव शक्तिः । **एतद्बोधनायैव** सूत्रे जात्याकृतिव्यक्तयः पदार्थः इति एकवचनम् इति **संप्रदायः** ।।

नव्यास्तु – संस्थानानुपस्थितावपि गोत्वादिना गवाद्यन्वयबोधात् जातिविशिष्टव्यक्तावेव शक्तिः । संस्थाने च पृथगेव शक्तिः । **व्युत्पत्तिवैचित्र्याच्च** संस्थानव्यक्त्योः एकपदार्थयोरपि परस्परमन्वयबोधः । **सौत्रं** ''पदार्थः इति एकवचनं तु जातिव्यक्त्योः एकशक्तिलाभायैव इति – **आहुः** ।।

राजीवोल्लासः

किञ्च इति ग्रन्थम् अवतारयति – ''कार्यत्वाद्युपाधिप्रकारकशाब्दबोधस्थले यद्धर्माश्रयांशे यस्य प्रकारत्वं शक्तिग्रहे तद्धर्माश्रयांशे तस्य प्रकारत्वं शाब्दबोधेऽपि'' इत्येवंरूपस्य समानप्रकारकत्वस्य प्राभाकारानुमतत्वेऽपि जातिप्रकारकशाब्दबोधस्थले तादृशसमानप्रकारकत्वं न तदनुमतम् । तथा च ''गोपदं गोत्वे शक्तम्'' इत्याकारकशक्तिज्ञानात् गोत्वप्रकारकशाब्दबोधोत्पत्तौ न विरोधः । तथा च लाघवात् जातावेव शक्तिः सिद्ध्यति इत्याशङ्क्य जातिशक्तिवादे दूषणान्तरम् आह – **किञ्च** इत्यादिना इति भावः । **गोत्वधर्मिकशक्यत्वज्ञानस्य** इत्यादि । यदि गोपदस्य गोत्वे शक्तिः तदानीं शक्यतावच्छेदकं गोत्वत्वम् इति वक्तव्यम् । गोत्वत्वं तु गवेतरासमवेतत्वे सति निखिलगोसमवेतत्वम् इति शक्यतावच्छेदकशरीरे सर्वासां गोव्यक्तीनां अनुप्रवेशात् गौरवमिति दूषणम् उक्तं मूले । गोत्वे गोपदस्य शक्तिस्वीकारे शक्तिज्ञाने गोत्वांशे गोत्वत्वस्य यदि प्रकारतया भानं स्यात् तदानीमेव गोत्वत्वस्य शक्यतावच्छेदकत्वं वक्तुं शक्यते

इत्यतः शक्तिज्ञाने गोत्वत्वभानं निरूपयति अनेन ग्रन्थेन । जातिशक्तिवादिमते ''गोत्वं गोपदशक्यम्'' इत्याकारकं गोत्वविशेष्यकगोपदशक्यत्वप्रकारकज्ञानं वा, ''गोपदं गोत्वे शक्तम्'' इत्याकारकं गोपदविशेष्यकगोत्वनिरूपित-शक्तिप्रकारकज्ञानं वा शाब्दबोधकारणं इति वक्तव्यम्। तत्र प्रथमज्ञाने गोत्वस्य विशेष्यतया भानात् जातेः यत्र विशेष्यतया भानं तत्र किञ्चिद्रूपेणैव भानमिति नियमात् गोत्वत्वेन गोत्वभानं आवश्यकम् । एवं द्वितीयज्ञाने गोत्वस्य शक्त्यंशे प्रकारतया भानेऽपि जातेः यत्र समवायसंबन्धेन प्रकारता तत्रैव स्वरूपतः प्रकारता इति नियमात् समवायातिरिक्तनिरूपितत्वसंबन्धेन शक्त्यंशे गोत्वस्य प्रकारतया भानेऽपि गोत्वत्वेनैव प्रकारत्वं वक्तव्यम् इति उभयोरपि शक्तिज्ञानयोः गोत्वत्वावच्छिन्नविषयताशालिज्ञानत्वेनैव शाब्दबोधहेतुत्वं वक्तव्यम् इति कारणतावच्छेदकशरीरे सकलगोप्रवेशः अवश्यकः इति भावः ।।

ननु ''गोत्वं गोपदशक्यम्'' इत्याकारकं ज्ञानं गोत्वांशे गोत्वत्वानवगाहि निर्धर्मितावच्छेदककमेव शाब्दबोधहेतुरस्तु । एवं ''गोपदं गोत्वे शक्तम्'' इत्याकारकं गोत्वांशे गोत्वत्वाप्राकारकमेव शक्तिज्ञानं शाब्दबोधहेतुरस्तु इत्याशङ्क्य आह – **निर्धर्मितावच्छेदककशक्तिज्ञानस्य** इति । समानधर्मितावच्छेदककयोरेव बाधबुद्धिविशिष्टबुद्ध्योः प्रतिबध्यप्रतिबन्धकभावात् निर्धर्मितावच्छेदककविशिष्टबुद्धेः सधर्मितावच्छेदककबाधबुद्धिप्रतिबध्यत्वं न संभवति । एवं च ''गोत्वं न गोपदशक्यम्'' इत्याकारकगोत्वत्वावच्छिन्नधर्मिकगोपदशक्यत्वाभावप्रकारक-बाधज्ञानदशायां, ''गोत्वं गोपदशक्यम्'' इत्याकारकनिर्धर्मितावच्छेदककबुद्धेः अप्रतिबद्धतया उत्पत्तिः संभवति इति तादृशशक्तिज्ञानात् गोपदात् गोत्वप्रकारक-शाब्दबोधापत्तिः निर्धर्मितावच्छेदककशक्तिज्ञानस्य शाब्दबोधहेतुत्वाभ्युपगमे इति भावः । अनुभवविरुद्धं च इदम् । न खलु ''गोत्वं न गोपदशक्यम्'' इति

बाधबुद्धिकाले गोपदात् गोत्वप्रकारकशाब्दबोधः केनाप्यङ्गीक्रियते इत्याशयात् ।।

न च – बाधबुद्धिरपि निर्धर्मितावच्छेदिकैव अस्तु इति – वाच्यम् । अनुयोगितावच्छेदकावच्छेदेनैव अभावो भासते इति नियमात् निर्धर्मितावच्छेदकक-बाधबुद्धेः असंभवात् ।।

''गोपदं गोत्वे शक्तम्'' इति शक्तिज्ञानस्य तु समवायेनैव जातेः स्वरूपतः प्रकारत्वं अभ्युपगम्यते, न अन्यसंबन्धेन इति नियमानुसारेण गोत्वत्वेन गोत्वप्रकारकत्वम् आवश्यकम् । तादृशनियमः किमर्थं स्वीकरणीयः इति न आशङ्कनीयम् । ''ज्ञानं गुणः'' इति व्यवहारवत् ''ज्ञानं घटः'' इति व्यवहारापत्तेः वारणाय तादृशनियमस्य स्वीकरणीयत्वात् । ज्ञाने समवायसंबन्धेन गुणत्वजातिसत्त्वात् यथा स्वरूपतः गुणत्वप्रकारकज्ञानजनकः ''ज्ञानं गुणः'' इति व्यवहारो भवति, एवं ज्ञाने विषयतासंबन्धेन घटत्वसत्त्वात् स्वरूपतः घटत्वप्रकारकज्ञानजनकः ''ज्ञानं घटः' इति व्यवहारः आपद्यते । समवायेनैव जातेः स्वरूपतः प्रकारत्वं, न अन्यसंबन्धेन इति नियमस्वीकारे तु समवायातिरिक्त-विषयतासंबन्धेन स्वरूपतः घटत्वप्रकारकज्ञानस्य असंभवात् तज्जनकः व्यवहारोऽपि आपादयितुं न शक्यत इत्याशयः । तथा च ''गोत्वं गोपदशक्यम्'' इति वादिनां मते उभयविधेऽपि शक्तिज्ञाने शक्ये गोत्वे गोत्वत्वस्य प्रकारतया भानात् गोत्वत्वस्य शक्यतावच्छेदकत्वम् आवश्यकम् इति शक्यतावच्छेदकशरीरे निखिलगोप्रवेशः मूलोक्तः सङ्गच्छते ।।

विपरीतज्ञानाविरोधिन इति । विपरीतज्ञानम् अविरोधि अप्रतिबन्धकम् यस्य तत् इति व्युत्पत्या विपरीतज्ञानाप्रतिबध्यस्य इत्यर्थः । **शक्यतावच्छेदकत्व-सिद्धिः** इति । ननु ''गोत्वं गोपदशक्यम्'' इति प्रतीतौ गोत्वनिष्ठायां

शक्यतायां गोत्वत्वसामानाधिकरण्यमेव भासते, न तु गोत्वत्वावच्छिन्नत्वम् इति कथं गोत्वत्वस्य शक्यतावच्छेदकत्वसिद्धिः इति चेत्, न । प्रतीतीनां विशिष्टवैशिष्ट्यावगाहित्वस्य औत्सर्गिकत्वात् । विशिष्टवैशिष्ट्यावगाहित्वं द्विविधम् – विशिष्टस्य यद्वैशिष्ट्यं तदवगाहित्वम् इति, विशिष्टे यद्वैशिष्ट्यं तदगाहित्वम् इति च । "गोपदं गोत्वे शक्तम्" इति ज्ञानं गोत्वत्वविशिष्टस्य गोत्वस्य वैशिष्ट्यं शक्तौ अवगाहते । "गोत्वं गोपदशक्यम्" इति ज्ञानं गोत्वत्वविशिष्टे गोपदशक्यत्ववैशिष्ट्यम् अवगाहते । विशिष्टस्य वैशिष्ट्यावगाहि-प्रतीतौ विशेषणतावच्छेदकस्य गोत्वत्वस्य विशेषणगोत्वविशेष्यायां शक्तौ धर्मिपारतन्त्र्येण अवच्छिन्नत्वसंबन्धेन भानम् उपगम्यते । अतः शक्तौ गोत्वत्वावच्छिन्नत्वभानात् गोत्वत्वस्य शक्यतावच्छेदकत्वसिद्धिः । "गोत्वत्वविशिष्टं गोपदशक्यम्" इति गोत्वत्वविशिष्टे शक्यत्ववैशिष्ट्यावगाहिज्ञाने विशेष्यतावच्छेदकस्य गोत्वत्वस्य धर्मिपारतन्त्र्येण विशेषणे शक्तौ अवच्छिन्नत्वसंबन्धेन भानम् उपगम्यत इति गोत्वत्वस्य शक्यतावच्छेदकत्वसिद्धिः ।।

स भ्रम इति । गोत्वत्वस्य अवच्छेदकत्वांशे भ्रमः इत्यर्थः । **विषयसाधकत्वम्** इति । अवच्छेदकत्वसाधकत्वम् इत्यर्थः ।।

ननु यत्र उत्सर्गः तत्र अवश्यं बाधकम् इति नियमः । प्रकृते अनन्तव्यक्तीनां शक्यतावच्छेदककोटिप्रवेशे गौरवरूपं बाधकं विशिष्टवैशिष्ट्यावगाहितायां जागर्ति । तथा च पूर्वोक्तम् उभयविधमपि शक्तिज्ञानं गोत्वत्वविशिष्टवैशिष्ट्यावगाहि न भवति इति गोत्वत्वस्य शक्यतावच्छेदकत्वं न सिद्ध्यति । तथा च शक्तिज्ञानं विशेष्ये विशेषणम् इति रीत्यैव जायते । तच्च गोत्वत्वे शक्यता-वच्छेदकत्वं न बोधयति । एवं विशिष्टवैशिष्ट्यावगाहित्वाङ्गीकारेऽपि शक्तिज्ञानस्य संसर्गांशे विशेषणतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेष्यतावच्छेदकावच्छिन्नानु-

योगिताकत्वयोरेव बोधः अङ्गीक्रियते । न तु गोत्वत्वस्य प्रकारत्वम्। तथा च शक्तिज्ञानेन गोत्वत्वे संसर्गप्रतियोगितावच्छेदकत्वं संसर्गानुयोगितावच्छेदकत्वं च विषयीक्रियते, न तु शक्यतावच्छेदकत्वम् इत्यनुशयेन दोषान्तरम् आह – **अस्तु वा** इत्यादिना । **अनवच्छेदकत्वम्** इति । शक्यतानवच्छेदकत्वम् इत्यर्थः । **तथापि** इत्यादि । गोत्वत्वस्य अवच्छिन्नत्वसंबन्धेन शक्त्यंशे अभानेऽपि गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रति गोत्वत्वावच्छिन्नगोत्व-विशेष्यकशक्तिज्ञानस्य ''गोत्वं गोपदशक्यम्'' इत्याकारकस्य गोत्वत्वावच्छिन्न-गोत्वप्रकारकशक्तिज्ञानस्य ''गोपदं गोत्वे शक्तम्'' इत्याकारकस्य च कारणत्वम् अङ्गीकरणीयम् इति कारणतावच्छेदकशरीरे निखिलगोघटितगोत्वत्वनिष्ठ-धर्मितावच्छेदकतायाः तन्निष्ठप्रकारतावच्छेदकतायाश्च प्रवेशस्य आवश्यकतया सकलगोव्यक्तीनां कारणतावच्छेदककोटिप्रवेशप्रयुक्तगौरवं दुर्वारमेव इति भावः । **धर्मितावच्छेदकताद्यात्मक** इति । ''आदि''पदेन प्रकारतावच्छेदकता ग्राह्या । **गोविषयताया** इति । गोत्वत्वस्य निखिलगोघटितत्वात् गोत्वत्वनिष्ठा धर्मितावच्छेदकतारूपा विषयता निखिलगोनिष्ठा भवति इति आशयेन गोविषयताया इत्युक्तम् । **कारणतावच्छेदककोटि** इति । गोत्वत्वनिष्ठावच्छेदकताकगोत्वनिष्ठ-विशेष्यतानिरूपितगोपदशक्यत्वनिष्ठप्रकारताशालिज्ञानत्वं ''गोत्वं गोपदशक्यम्'' इति ज्ञानस्य कारणत्वे कारणतावच्छेदकम् । गोत्वत्वनिष्ठावच्छेदकताकगोत्वनिष्ठ-प्रकारताकशक्तिनिष्ठविशेष्यतारूपप्रकारतानिरूपकगोपदनिष्ठविशेष्यताशालिज्ञानत्वं ''गोपदं गोत्वे शक्तम्'' इति ज्ञानस्य कारणत्वपक्षे कारणतावच्छेदकम् । तच्छरीरे च गोत्वत्वघटकतया सकलगोव्यक्तीनां प्रवेशः इति भावः ।।

जात्याकृतिविशिष्टव्यक्तौ शक्तिः इति मूलेन गवादिपदानां गोत्वादि-जातिसास्नाद्याकारोभयविशिष्टगोव्यक्तौ शक्तिः इति लभ्यते । तत्र शक्यता-वच्छेदकत्वं गोत्वादिजातेरेव, न तु सास्नाद्याकृतेः इति निरूपयति – **अवयवसंस्थान-**

विशेषरूपाया इति । आकृतिर्नाम अवयवसंस्थानम् । अवयवानां संयोगः । जातिविशिष्टव्यक्तौ शक्तिः इत्यस्य जातौ व्यक्तौ समवायरूपवैशिष्ट्ये च गवादिपदानां शक्तिः इत्यर्थः । तत्र जातेः गोपदशक्यत्ववत् गोपदशक्यतावच्छेदकत्वमपि वर्तते । परन्तु आकृतेः अवयवसंयोगरूपायाः गोपदशक्यत्वं वर्तते, न तु गोपदशक्यतावच्छेदकत्वम् । कुत इति चेत्? शक्ये यद्वर्तते तदेव शक्यतावच्छेदकम् । शक्ये गवि गोत्वं समवायसंबन्धेन वर्तते इति तस्य शक्यतावच्छेदकत्वम् । अवयवसंयोगरूपा आकृतिस्तु समवायसंबन्धेन अवयवेष्वेव वर्तते इति गोव्यक्त्यवृत्तित्वात् न शक्यतावच्छेदकम् । न च – अवयवसंयोगरूपाकृतेः स्वाश्रयवृत्तित्वरूपसामानाधिकरण्यसंबन्धेन गोव्यक्तिवृत्तितया शक्यतावच्छेदकत्वम् अस्तु इति – वाच्यम् । उक्तपरंपरासंबन्धस्य शक्यतावच्छेदकतावच्छेदकसंबन्धत्वकल्पने गौरवात् अनेकावयवसंयोगव्यक्तीनां अवच्छेदकत्वकल्पने गौरवाच्च । जातेस्तु एकस्याः साक्षात्संबन्धेन व्यक्तिवृत्तेः शक्यतावच्छेदकत्वकल्पने लाघवम् इति भावः । **अत्र च** इति । जात्याकृतिव्यक्तीनां परस्परपरित्यागेन परस्परस्य बोधाभावात् जात्याकृतिव्यक्तिषु त्रिष्वपि गवादिपदानाम् एकैव शक्तिः, न तु भिन्नभिन्ना शक्तिः । तथा सति नानार्थकहर्यादिपदादिव एकैकपरित्यागेनापि एकैकबोधापत्तेः । अत्र **सूत्रकारस्य** संमतिम् आह – **एतद्बोधनायैव** इति । ''पदार्थः'' इत्येकवचनार्थस्य एकत्वस्य पदार्थत्वेऽन्वयः । पदार्थत्वं च पदशक्तिः । तथा च जात्याकृतिव्यक्तयः एकपदशक्तिमन्तः इति सूत्रार्थः । शक्तौ एकत्वबोधनार्थमेव ''पदार्थ'' इति एकवचनम् इति भावः । शक्तिभेदे तु पदार्थाः इति बहुवचनं स्यात् ।।

नव्यास्तु इति । अवयवसंयोगरूपसंस्थानानुपस्थितावपि गवादिपदात् गोत्वादिप्रकारेण गवादिविषयकशाब्दबोधोत्पत्त्या गवादिपदानां जातिविशिष्टव्यक्तौ शक्तिः । संस्थाने च पृथगेव शक्तिः इति **नव्यानां** मतम् ।।

ननु संस्थाने पृथक् शक्त्यङ्गीकारे तस्य कथं व्यक्तौ अन्वयः ? एकपदोपस्थाप्ययोः अर्थयोः परस्परम् अन्वयबोधस्य अव्युत्पन्नत्वात् । अन्यथा हरिपदार्थयोः अश्वसूर्ययोरपि परस्परं अन्वयप्रसङ्गात् । न च – अत्र हरिपदार्थयोः अश्वसूर्ययोः अभेदसंबन्धेन अन्वये योग्यता नास्ति । भेदसंबन्धेन अन्वये च आकाङ्क्षा नास्ति । नामार्थयोः भेदेन अन्वयस्य अव्युत्पन्नत्वात् इति कथम् इयम् आपत्तिः इति – वाच्यम् । तथा सति संस्थानस्यापि व्यक्तौ आश्रयता-रूपभेदसंबन्धेन अन्वयानुपपत्तेः । तस्मात् नामद्वयोपस्थापितयोः अर्थयोरेव भेदेन अन्वये निराकाङ्क्षत्वम् । एकनामोपस्थापितयोः अर्थयोस्तु भेदेन अन्वये आकाङ्क्षा अस्ति इत्याशयेन आह – **व्युत्पत्तिवैचित्र्याच्च** इति । तथा च संस्थानस्य गोपदोपस्थाप्यस्य गोपदोपस्थाप्यव्यक्तौ आश्रयतासंबन्धेन अन्वयः अङ्गीक्रियते । हरिपदोपस्थाप्ययोः अश्वसूर्ययोस्तु तथा अन्वयः न अङ्गीक्रियते । अत्र च अनुभवानुरोधि आकाङ्क्षावैचित्र्यमेव मूलमिति भावः ।।

ननु एवमपि सूत्रे पदार्थः इति एकवचनानुपपत्तिः, त्रिषु एकशक्तेः अभावात् इति, अत आह – **सौत्रम्** इति ।।

आहुः इति अस्वरसोद्भावनम् । तद्बीजं तु पदार्थत्वं यदि शक्तिरूपं स्यात् तर्हि त्रिषु एकशक्तेः अभावेन द्वयोः एकशक्तिः, आकृतौ अन्या शक्तिः इति शक्तिद्वयस्यैव स्वीकारेण एकशक्तिमत्त्वस्य बाधितत्वात् पदार्थः इति सौत्रं एकवचनम् अनुपपन्नं भवति इति ।।

।। तदादिपदार्थनिरूपणम् ।।

दिनकरी

तच्छब्दस्य वक्तृबुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्ने शक्तिः ।

अथ घटत्वादीनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदात् शक्तिभेदापत्तिः । न च – शक्यतावच्छेदकभेदेऽपि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकत्वस्य ऐक्यात् न शक्तिभेद इति – वाच्यम् । तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दबोधे तद्भानापत्तेः इति चेत्,

न । बुद्धिविषयतावच्छेदकत्वस्य उपलक्षणतया शक्यतावच्छेदकतावच्छेदकत्वात् । उपलक्षणस्य च शाब्दबोधे भानानङ्गीकारात् । घटत्वादेश्च शक्यतावच्छेदकत्वं विशेषणत्वेनैव, अतः तस्य शाब्दबोधे भानम् ।

विशेषणत्वं च तत्तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वम् । उपलक्षणत्वं च तत्तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वम् इति ।

एवम् इदंपदादिष्वपि । तत्रापि इदमेतदोः प्रत्यक्षबुद्धिविषये, अदसः परोक्षबुद्धिविषये शक्तिः । अत एव तेषां विभिन्नार्थकत्वम् । एवम् एतत्तदोरपि ।

इदमः प्रत्यक्षगतं, समीपतरवर्ति चैतदो रूपम् ।

अदसस्तु विप्रकृष्टं, तदिति परोक्षे विजानीयात् ।। इत्यपि वदन्ति ।

किंपदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः । सर्वपदस्य व्यापकत्वे । "सर्वे घटाः रूपवन्तः" इत्यादौ घटत्वव्यापकं रूपवत्त्वम् इति बोधात् । त्वंपदस्य तत्कालीनसंबोध्यचैत्रत्वादि शक्यतावच्छेदकम् । एवम् अहंपदस्य तत्कालीनस्वतन्त्रोच्चारयितृचैत्रत्वादि । स्वातन्त्र्योक्त्या च "वाच्यस्त्वया मद्वचनात् स राजा" इत्यादौ न मत्पदात् कवेः बोधः इति आस्तां विस्तरः ।।

राजीवोल्लासः

प्रसङ्गात् सर्वनामतदादिशब्दानां शक्यतावच्छेदकान् आह – **तच्छब्दस्य** इति । वक्तुः – तच्छब्दप्रयोक्तुः बुद्धौ विषयतायां अवच्छेदका ये धर्माः घटत्वादयः तदवच्छिन्ने घटादौ तच्छब्दस्य शक्तिः । यद्यपि वक्तृबुद्धिविषये शक्तिः इत्येव वक्तुम् उचितं, तथापि "सोऽस्ति" इत्यादौ तच्छब्दात् घटत्वेन घटबोधस्य उपपत्तये एतादृशगुरुधर्मावच्छिन्ने शक्तिः इत्युक्तम् ।।

अथ घटत्वादीनाम् इति । घटत्वादीनां तच्छब्दशक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदात् शक्तिभेदापत्तिः । शक्तिभेदे च हर्यादिपदवत् तदादिपदानामपि नानार्थत्वापत्तिः । न च इष्टापत्तिः । तथा सति "तौ स्तः" इत्यादौ एकदा तच्छब्देन घटपटयोः बोधानुपपत्तेः । न हि हर्यादिपदात् एकदा अनेकार्थबोधः भवति । किञ्च नानार्थप्रकरणे तदादिशब्दानां कोशे अपाठाच्च इति भावः ।।

न च शक्यतावच्छेदकभेदेऽपि इति । शक्यतावच्छेदकानां घटत्वपटत्वादीनां भिन्नत्वेऽपि शक्यतावच्छेदकतावच्छेदकं वक्तृबुद्धिविषयतावच्छेदकत्वं घटत्वपटत्वादिनिष्ठम् एकमेव इति न शक्तिभेदः इति – न च वाच्यम् । वक्तृबुद्धिविषयतावच्छेदकत्वस्य शक्यतावच्छेदकतावच्छेदकत्वे तच्छब्दजन्यशाब्दबोधे वक्तृबुद्धिविषयतावच्छेदकत्वस्यापि भानापत्तेः । यथा लोमलाङ्गूलादिमच्छक्तं यत् पशुपदं तज्जन्यशाब्दबोधे शक्यतावच्छेदकतावच्छेदकानां लोमत्वलाङ्गूलत्वादीनामपि भानं भवति । "पशुः अस्ति" इति वाक्यात् "लोमत्वलाङ्गूलत्वादिविशिष्टलोमलाङ्गूलादिमान् अस्ति" इति शाब्दबोधोदयात् । प्रकृते च "सोऽस्ति" इत्यादौ घटोऽस्ति – घटत्वावच्छिन्नः अस्ति – इत्येव शाब्दबोधः अनुभूयते, न तु बुद्धिविषयतावच्छेदकावच्छिन्नः अस्ति इत्याकारकः शाब्दबोधः इति न इष्टापत्तिसंभवः इति भावः ।।

समाधत्ते – **बुद्धिविषयतावच्छेदकत्वस्य** इति । बुद्धिविषयतावच्छेदकत्वं यद्यपि तत्पदशक्यतावच्छेदकतावच्छेदकं, तथापि बुद्धिविषयतावच्छेदकत्वम् उपलक्षणविधया शक्यतावच्छेदकतावच्छेदकम् इत्यङ्गीक्रियते । उपलक्षणस्य च शाब्दबोधे भानानङ्गीकारात् न तस्य भानापत्तिः । घटत्वादिकं तु विशेषणतया शक्यतावच्छेदकम् । अतः तस्य शाब्दबोधे भानं भवति ।।

उपलक्षणतया इति । तत्पदजन्यशाब्दबोधविषयत्वेन भगवदिच्छायाम् अविषयत्वे सति तत्पदशक्यतावच्छेदकानुगमकत्वं उपलक्षणतया तत्पदशक्यतावच्छेदकतावच्छेदकत्वम् । ''वक्तृबुद्धिविषयतावच्छेदकाः ये धर्माः तदवच्छिन्नाः तत्पदजन्यबोधविषयाः भवन्तु'' इत्याकारकभगवदिच्छायां बुद्धिविषयतावच्छेदकत्वस्य तत्पदजन्यबोधविषयत्वेन अविषयत्वात् तस्य उपलक्षणविधया शक्यतावच्छेदकतावच्छेदकत्वम् ।।

तत्पदजन्यशाब्दबोधविषयत्वेन भगवदिच्छायां विषयत्वे सति तत्पदशक्यतावच्छेदकानुगमकत्वं विशेषणविधया शक्यतावच्छेदकत्वम् । तादृशं च शक्यतावच्छेदकतावच्छेदकं लोमत्वलाङ्गूलत्वादिकम् इति विभावनीयम् । ''लोमलाङ्गूलादिमन्तः पशुपदजन्यबोधविषया भवन्तु'' इत्याकारकभगवदिच्छायां विषयत्वे सति पशुपदशक्यतावच्छेदकलोमलाङ्गूलाद्यनुगमकत्वं लोमत्वलाङ्गूलत्वादीनाम् अस्ति इति तेषां विशेषणविधया पशुपदशक्यतावच्छेदकतावच्छेदकत्वम् ।।

विशेषणत्वं च इति । घटादिपदजन्यबोधविषयत्वेन शक्तिविषयत्वं विशेषणत्वम् । एवं सति विशेष्यस्य घटादेरपि विशेषणत्वापत्तिः । अतः ''शक्यव्यावर्तकत्वे सति'' इत्यपि संयोजनीयम् । एवं च उपलक्षणत्वं च इत्यत्रापि । अन्यथा घटपदजन्यबोधविषयत्वेन शक्त्यविषयस्य उदासीनधर्मस्यापि उपलक्षणत्वापत्तेः ।।

प्रत्यक्षबुद्धिविषये इति । वक्तृगता या प्रत्यक्षरूपा बुद्धिः तद्विषयता-वच्छेदकघटत्वपटत्वाद्यवच्छिन्ने इदमेतदोः शक्तिः । अत्र प्रत्यक्षबुद्धिश्च वक्तृगतैव ग्राह्या। तथा च ''अयमस्ति'', ''एषोऽस्ति'' इत्यादिपदात् घटत्वादिना घटादिबोधनिर्वाहः । ''अयं घटः'' इत्यादौ एतद्देश-एतत्कालवृत्तित्वमेव वक्तुः प्रत्यक्षविषयतावच्छेदकम् । अतः न अभेदान्वयानुपपत्तिः । एतद्देश-एतत्कालवृत्तिः घटाभिन्नः इति बोधः । अन्यथा घटत्वस्यापि प्रत्यक्षविषयतावच्छेदकत्वे ''घटो घटः'' इत्यत्रेव अभेदान्वयः न स्यात् ।।

अत एव इति । यतः प्रत्यक्षविषये इदमेतदोः, परोक्षबुद्धिविषये अदसः शक्तिः, अत एव तेषाम् ''इदम्, एतद्, अदस्'' शब्दानां भिन्नार्थकत्वम् । इदमेतदोः एकोऽर्थः । तदन्यस्तु अदसोऽर्थः । अदसो योऽर्थः तदन्यस्तु इदमेतदोः इति रीत्या भिन्नार्थकत्वम् इति यावत् । एवम् इति । भिन्नार्थकत्वम् इत्यर्थः । एतत्तदोरपि इति । एतदः – एतच्छब्दस्य प्रत्यक्षविषयार्थ-कत्वम् । तदस्तु – तच्छब्दस्य सामान्यतः बुद्धिविषयार्थकत्वम् इति भेदः । मतान्तरम् आह – इदमः इदं शब्दस्य, प्रत्यक्षगतं – प्रत्यक्षविषयीभूतं रूपं – वस्तुस्वरूपम् शक्यम् इति शेषः । ''समीपतरवर्ति'' इति एतच्छब्दार्थस्य वक्ष्यमाणत्वात् समीपवर्तिप्रत्यक्षगतं इदंशब्दस्य शक्यम् इति अवधेयम् । एतदः – एतच्छब्दस्य समीपतरवर्ति, ''च'' कारेण प्रत्यक्षगतम् इत्यस्य अनुकर्षः । तथा च समीपतरवर्ति प्रत्यक्षविषयीभूतं च वस्तुस्वरूपं एतच्छब्दस्य शक्यम् इत्यर्थः । अदसस्तु विप्रकृष्टम् इति । प्रत्यक्षगतम् इत्यस्य अनुकर्षः । तथा च ''अदस्'' शब्दस्य दूरस्थितं प्रत्यक्षविषयीभूतं वस्तु शक्यम् इत्यर्थः । तदिति परोक्षे विजानीयात् इति । परोक्षे इत्यत्र सप्तम्याः वाचकत्वम् अर्थः । तथा च तच्छब्दः परोक्षवाचक इति विजानीयात् इति श्लोकार्थः ।।

किं पदस्य इति । ज्ञातुं इच्छा जिज्ञासा। तद्विषयः किंशब्दार्थः । इच्छा च किंशब्दोच्चारयितृनिष्ठा किंशब्देन प्रत्याय्यते। तथा च ''को घटः'' इति वाक्यात् मदीयजिज्ञासाविषयः घटः इति शाब्दबोधः इति भावः ।।

सर्वपदस्य व्यापकत्वे इति । उद्देश्यतावच्छेदकनिरूपिते विधेयतावच्छेदकनिष्ठे व्यापकत्वे सर्वपदस्य शक्तिः इत्यर्थः । ''सर्वे घटाः रूपवन्तः'' इत्यादौ घटमुद्दिश्य अभेदसंबन्धेन रूपवत् विधीयते । उद्देश्यतावच्छेदकं घटत्वम्, विधेयतावच्छेदकं रूपम् । रूपे घटत्वव्यापकत्वं सर्वपदेन बोध्यते । घटत्वव्यापकत्वमपि घटत्ववन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकरूपत्ववत्त्वरूपम् बोध्यम् ।।

त्वंपदस्य इति – युष्मत्पदस्य इत्यर्थः । **तत्कालीन** इति । युष्मत्पदोच्चारणकाले संबोध्यः यः चैत्रादिः सः युष्मत्पदशक्यः । तद्गतचैत्रत्वादिकं शक्यतावच्छेदकम् । **संबोध्यचैत्रत्वम्** इत्यस्य संबोध्यगतं चैत्रत्वम् इत्यर्थः । तत्कालीनसंबोध्यत्वं नाम तत्कालोच्चरितसंबोधनप्रथमान्तचैत्रादिपदाव्यवहितोत्तरवाक्यजन्यशाब्दबोधाश्रयत्वेन वक्तुः इच्छाविषयत्वम् । ''हे चैत्र! त्वया भुज्यताम्'' इत्यादौ चैत्रपदोत्तरप्रथमया चैत्रस्य, ''त्वया भुज्यताम्'' इति वाक्यजन्यशाब्दबोधाश्रयत्वेन वक्तुरिच्छाविषयत्वरूपं संबोध्यत्वं प्रतिपाद्यते । तथा च एतादृशसंबोध्यत्वसमानाधिकरणत्वोपलक्षितचैत्रत्वाद्यवच्छिन्ने युष्मच्छब्दस्य शक्तिः इति पर्यवसितोऽर्थः । **अहंपदस्य** इति । अस्मत्पदस्य इत्यर्थः । तत्कालीनं यत् स्वतन्त्रम् उच्चारणं तत्कर्तृत्वसमानाधिकरणचैत्रत्वादिकम् अस्मत्पदशक्यतावच्छेदकम् इत्यर्थः । उच्चारणे स्वतन्त्रत्वं च अन्योच्चारणानधीनत्वम्। अन्योच्चारणाननुवादकत्वं स्वतन्त्रत्वम् इति यावत् । तथा च स्वतन्त्रोच्चारणकर्तृत्वसमानाधिकरणत्वोपलक्षितचैत्रत्वाद्यवच्छिन्ने अस्मच्छब्दस्य शक्तिः इत्यर्थः । उच्चारणे स्वतन्त्रत्वविशेषणस्य प्रयोजनम् आह – **स्वातन्त्र्योक्त्या**

च इति । न मत्पदात् कवेर्बोध इति । ''वाच्यस्त्वया मद्वचनात् स राजा'' इति श्लोकस्थस्य अस्मच्छब्दस्य उच्चारयिता कविः । परन्तु तद्बोधकत्वं तत्र अस्मच्छब्दस्य नास्ति । किन्तु सीताबोधकत्वमेव । अतः उच्चारयितरि शक्तिः इत्यनुक्त्वा स्वतन्त्रोच्चारयितरि इत्युक्तम् । श्लोकस्थास्मच्छब्दोच्चारणं-सीताकर्तृकास्मच्छब्दोच्चारणानुवादरूपम् इति स्वतन्त्रोच्छारणरूपत्वविरहात् न मत्पदात् कवेः बोध इति भावः ।।

एवं युष्मच्छब्दशक्यतावच्छेदकघटक ''तत्तत्कालोच्चरित'' इत्यत्र उच्चारणमपि स्वतन्त्रमेव ग्राह्यम् । तेन ''गर्ज गर्ज क्षणं मूढ'' इत्यादौ संबोधनप्रथमान्तमूढपदोत्तर ''मया त्वयि हतेऽत्रैव'' इत्यादौ तद्वाक्यजन्य बोधाश्रयत्वेन इच्छाविषयत्वेऽपि सुरथस्य न सुमेधोमहर्षिणा उक्तयुष्मत्पदात् शाब्दबोध इति मन्तव्यम् इति तरङ्गिणीकाराः ।।

।। पदविभागः ।।

मुक्तावली

शक्तं पदम् । तच्चतुर्विधम् । क्वचित् यौगिकम्, क्वचिद्रूढम्, क्वचिद्योगरूढं, क्वचिद्यौगिकरूढम् ।।

तथा हि – यत्र अवयवार्थ एव बुध्यते, तत् यौगिकम् । यथा पाचकादिपदम् ।

यत्र अवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुद्ध्यते, तद्रूढम् । यथा गो-मण्डला(पा)दिपदम् ।।

यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति, तत् योगरूढम् । यथा पङ्कजादिपदम् । तथा हि – पङ्कजपदम् अवयवशक्त्या पङ्कजनिकर्तृत्वरूपम्

अर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति । न च–केवलया अवयवशक्त्या कुमुदेऽपि प्रयोगः स्यात् इति–वाच्यम् । रूढिज्ञानस्य केवलयौगिकार्थबुद्धौ **प्रतिबन्धकत्वात्** इति **प्राञ्चः** ।।

वस्तुतस्तु समुदायशक्त्युपस्थितपद्मे अवयवार्थपङ्कजनिकर्तुः अन्वयः भवति, **सान्निध्यात्** । **यत्र तु रूढ्यर्थस्य** बाधः **प्रतिसन्धीयते**, तत्र **लक्षणया कुमुदादेः** बोधः । यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानम्, पद्मत्वस्य च बाधः, तत्र च **अवयवशक्तिमात्रेण निर्वाहः** इति आहुः ।।

यत्र तु स्थलपद्मादौ अवयवार्थबाधः, तत्र समुदायशक्त्या **पद्मत्वेन** रूपेण **बोधः** । यदि तु स्थलपङ्कजं विजातीयमेव, तदा **लक्षणयैव** इति ।।

यत्र यौगिकार्थरुढ्यर्थयोः स्वातन्त्र्येण बोधः, तत् यौगिकरूढम् । यथा उद्भिदादिपदम् । तत्र हि उद्भेदनकर्ता तरुगुल्मादिरपि बुद्ध्यते, यागविशेषोऽपि इति ।।

दिनकरी

पदं विभजते – शक्तं पदम् इति । क्वचित् इति । किञ्चित् इत्यर्थः । एवम् अग्रेऽपि ।।

''मण्डलादि'' इत्यत्र बहुपुस्तकेषु **''मण्डपादि''** इति पाठः । स प्रामादिकः ।

प्रतिबन्धकत्वात् इति । न च – **रूढिज्ञानस्य** यौगिकार्थबुद्धौ प्रतिबन्धकत्वे पद्मेऽपि योगार्थस्य पङ्कजनिकर्तृत्वस्य बोधः न स्यात् इति – वाच्यम् । पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितपङ्कजपदयोगजन्यपङ्कजनिकर्तृत्वावच्छिन्नविषयताशालिबोधं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मधर्मिकयोगार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वात् इति ।।

''प्रतिबन्धकत्वं जनकज्ञानविघटकत्वेनैव'' इति नियमभङ्गम् अस्वरसं ''प्राञ्चः'' इत्यनेन सूचयन् **मणिकारमतम्** आह – **वस्तुतस्तु** इति । **सान्निध्यात्** इति । **रूढ्यर्थस्य सन्निहितोपस्थितिकत्वात्** इत्यर्थः । **व्यक्तिवचनानां** – सन्निहितविशेषपरत्वनियमात् इति भावः । व्यक्तिवचनानाम् किञ्चिद्व्यक्ति-तात्पर्यकाणाम्, सन्निहितपरत्वम् – उपस्थितविशेषपरत्वम् इत्यर्थः । तथा च पद्मे तात्पर्यसत्त्वेन रुढ्यर्थयोगार्थयोः परस्परान्वयबोधजनकसामग्र्यन्तरसत्त्वेन च रूढ्यर्थ एव योगार्थान्वयः, न कुमुदादौ इति न रूढिज्ञानस्य यौगिकार्थबुद्धौ प्रतिबन्धकत्वम् । एवं च रूढ्यर्थयोगार्थयोः परस्परान्वयबोधसामग्रीस्थले एव न कुमुदादेः पङ्कजपदात् बोधः । यत्र तु तयोः परस्परम् अन्वयबोधसामग्रीविरहः तत्र कुमुदादेः बोधः भवत्येव । परन्तु **कुमुदत्वेन** रूपेण कुमुदत्वविशिष्टपङ्कजनि-कर्तृत्वेन वा लक्षणया, शुद्धपङ्कजनिकर्तृत्वेन तु शक्त्या इत्याह – **यत्र तु रूढ्यर्थ** इत्यादिना । ''प्रतिसन्धीयते'' इत्यनन्तरं कुमुदत्वेन बोधे च तात्पर्यम् इति पूरणीयम् । **लक्षणया** इति । पङ्कजनिकर्तृकुमुदत्वेन बोधः लक्षणया इत्यर्थः । रूढ्यर्थयोगार्थयोः परस्परसामग्रीविरहोपलक्षणमेतत् । तेन रूढ्यर्थबाधप्रतिसन्धाना-सत्त्वेऽपि यत्र **सामग्र्यन्तरविरहः** तत्रापि लक्षणया कुमुदादेः बोधः भवत्येव । **अवयवशक्तिमात्रेण** इति । ''मात्र'' पदेन लक्षणानादरः सूचितः । **निर्वाहः** – पङ्कजनिकर्तृत्वेन कुमुदशाब्दबोधनिर्वाहः इत्यर्थः । **पद्मत्वेन बोधः** – पद्मत्वेनैव बोधः । **लक्षणयैव** इति । रूढ्यर्थतावच्छेदकपद्मत्वजातेः तत्र अभावेन रूढ्या तद्बोधनासंभवात् इति भावः ।।

राजीवोल्लासः

शक्तं पदम् इति इति । ननु मूले **शक्तं पदं** इति वाक्यं न पदविभागरूपम् । किन्तु पदलक्षणप्रतिपादकम् । तच्चतुर्विधम् इत्यादिवाक्यमेव पदविभागरूपम् । अतः पदं विभजते – **शक्तं पदम्** इति इति प्रतीकधारणं अनुपपन्नं इति चेत्,

न – शक्तं पदम् इति इत्यस्य शक्तं पदमित्यादि इत्यर्थः । ''इति'' शब्दस्य आद्यर्थकत्वात् । एवं च पदविभागस्य पदसामान्यलक्षणाभिधानानन्तरत्वनियमसूचनाय लक्षणपरशब्दघटितप्रतीकधारणम् इति न अनुपपत्तिः ।।

ननु मूले **क्वचिद् यौगिकम्, क्वचिद्रूढम्** इति अनुपपन्नम् । एकस्यैव पदस्य एकस्मिन्नर्थे यौगिकत्वम्, अन्यस्मिन्नर्थे रूढत्वं च यदि स्यात् तदैव कस्मिंश्चिदर्थे यौगिकं, कस्मिंश्चिदर्थे रूढम् इति वक्तुं शक्यते। तत्तु न संभवति । उच्चारणभेदेन पदभेदात् ''सकृदुच्चरितः शब्दः सकृदेव अर्थं गमयति'' इति न्यायाच्च एकस्यैव पदस्य एकस्मिन्नर्थे यौगिकत्वस्य अर्थान्तरे रूढत्वस्य च अयोगात् इत्याशङ्क्य ''क्वचित्'' इत्यस्य न कस्मिंश्चिदित्यर्थः, अपि तु किञ्चित् इत्यर्थः इत्याह – **क्वचिदिति किञ्चिदित्यर्थ** इति । तथा च किंचित्पदं यौगिकम्, किंचित्पदं रूढम् इति मूलार्थ इति न अनुपपत्तिः ।।

''मण्डलादि'' इत्यत्र बहुपुस्तकेषु **''मण्डपादि''** इति पाठः, स प्रमादिक इति । इदमत्र चिन्त्यम् । गौडप्रधानैः **जगदीशतर्कालङ्कारैः** मण्डपपदस्यैव गृहार्थकत्वं स्पष्टम् उक्तं **शब्दशक्तिप्रकाशिकायां** पदविभागप्रकरणे । ''मण्डपान् भोजयति'' इति प्रयोगस्यापि तत्र दर्शितत्वात् मण्डपपदस्य यौगिकरूढत्वमेव गौडैः अङ्गीकृतम् । इत्थं च केवलरूढोदाहरणत्वं मण्डपपदस्य न संभवति इत्येव **दिनकरभट्टाशय** इति बोध्यम् इति **सुबोधिनीकाराः** ।।

मूले अवयवशक्तिविषये इति । अवयवशक्तिज्ञानजन्यशाब्दबोध इत्यर्थः । **समुदायशक्तिरप्यस्ति** इत्यस्य समुदायशक्तिस्मारितार्थविषयकत्वमप्यस्ति इत्यर्थः । यथाश्रुते पाचकादिपदस्यापि योगरूढत्वापत्तेः । पाककर्तरि प्रयुक्तस्य एकादशेऽहनि पितृसङ्केतितपाचकपदस्य अवयवशक्तिविषये समुदायशक्ति-सत्त्वात् । अस्माकं पङ्कजपदादित एव पद्मत्वावच्छिन्ने पङ्कजनिकर्त्राद्यभेदान्वयबोधे

अनादितात्पर्योपगमान् । पाककर्त्राद्यभिन्नः पाचकः इति शाब्दबोधस्य अनुदयेन तस्य योगरूढत्वापत्तिविरहात् इति बोध्यम् इति तरङ्गिणीकाराः ॥

पङ्कजपदं अवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति । समुदायशक्त्या पद्मत्वावच्छिन्नं बोधयति । तत्र पङ्कजनिकर्तृरूपं अवयवार्थम् आदाय पङ्कजपदस्य कुमुदेऽपि प्रयोगः स्यात् इत्याशङ्क्य केवलावयवार्थज्ञानं प्रति – समुदायशक्ति-स्मारितार्थाविषयकावयवार्थज्ञानं प्रति – रूढिज्ञानं प्रतिबन्धकम् । तथा च "पद्मत्वावच्छिन्ने पङ्कजपदं रूढम्" इत्याकारकरूढिज्ञानस्य पद्माविषयकावयवार्थ-ज्ञानं प्रति प्रतिबन्धकत्वात् कुमुदतात्पर्येण न पङ्कजपदप्रयोगः इति मूले उक्तम् ॥

तत्र शङ्कते – **न च रूढिज्ञानस्य** इति । रूढिज्ञानं यदि यौगिकार्थ-विषयकबुद्धौ प्रतिबन्धकम्, तदा पङ्कजपदात् पङ्कजनिकर्तृत्वरूपयौगिकार्थम् अविषयीकृत्य पद्मत्वावच्छिन्नस्यैव बोधः स्यात्, न तु योगार्थस्य पङ्कजनिकर्तृत्वस्य पद्मांशे बोधः स्यात् इति शङ्का ॥

तत्र समाधत्ते – **पद्मत्वावच्छिन्न** इति । पद्मत्वावच्छिन्नविशेष्यत्वा-निरूपितपङ्कजपदयोगशक्तिजन्यपङ्कजनिकर्तृत्वावच्छिन्नविषयताशालिशाब्दबोधं प्रति रूढिशक्तिज्ञानं प्रतिबन्धकम् इति स्वीकारात् पङ्कजपदात् पद्मत्वावच्छिन्न-विशेष्यतानिरूपितपङ्कजनिकर्तृत्वावच्छिन्नविषयताशालिशाब्दबोधोत्पत्तौ बाधका-भावात् । एवं च पङ्कजपदरूढ्यर्थे पद्मत्वावच्छिन्ने पङ्कजपदयोगार्थस्य पङ्कजनि-कर्तृत्वावच्छिन्नस्य अभेदसंबन्धेन शाब्दबोधस्वीकारात् "पद्मं पङ्कजनिकर्तृ" इति बोधः पङ्कजपदात् भवति । अयं च बोधः पद्मत्वावच्छिन्नविशेष्यतानिरूपित-पङ्कजनिकर्तृत्वावच्छिन्नप्रकारताशाली भवति इति एतादृशशाब्दबोधं प्रति पङ्कजपदरूढिज्ञानस्य अप्रतिबन्धकत्वात् पद्मे योगार्थस्य पङ्कजनिकर्तृत्वस्य बोधः

न स्यात् इति शङ्कायाः न अवसरः । कुमुदतात्पर्येण पङ्कजपदप्रयोगे तु तज्जन्यः शाब्दबोधः ''कुमुदं पङ्कजनिकर्तृ'' इत्याकारकः भवेत् । स च पद्मत्वावच्छिन्न-विशेष्यत्वानिरूपितपङ्कजनिकर्तृत्वावच्छिन्नविषयताशाली भवति इति तादृशबोधं प्रति पङ्कजपदरूढिशक्तिज्ञानस्य प्रतिबन्धकत्वात् तादृशबोधतात्पर्येण पङ्कजपदप्रयोगः न भवति इति भावः ।।

पङ्कजपदस्य पद्मत्वावच्छिन्ने रूढिज्ञानकालेऽपि कर्दमजादिपदात् योगजन्यपङ्कजनिकर्तृबोधोदयात् व्यभिचारवारणाय आह – **पङ्कजपदयोगजन्य** इति । पद्मे रूढिज्ञानदशायामपि लक्षणया पङ्कजनिकर्तृबोधजननात् आह – **योगजन्य** इति । योगशक्तिजन्य इति तदर्थः । कुमुदेऽपि पद्मत्वभ्रमवतः-कुमुदविशेष्यकपङ्कजनिकर्तृत्वावच्छिन्नविषयकबोधदर्शनात् पद्मवृत्तिविशेष्यत्वा-निरूपितत्वं विहाय पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितत्वनिवेशः ।।

अत्र ''योगजन्य'' इत्यस्य योगप्रयोज्येत्यर्थः। अन्वयश्च अस्य विषयतायाम् । बोधेऽन्वये तु अनिरूपितपदविषयतापदयोः आसत्तिः न स्यात् । विशेष्यान्तरान्वयि-बोधकपदान्तरेण व्यवधानात् इति सुबोधिनीकाराः ।।

वस्तुतस्तु इति ग्रन्थम् अवतारयति – **प्रतिबन्धकत्वम्** इति । विरोध्यविषयकज्ञानस्य इत्यादिः । **प्राचीनैः** रूढिज्ञानस्य केवलयौगिकार्थबुद्धौ यत्प्रतिबन्धकत्वम् उक्तं तन्न सङ्गच्छते । ग्राह्याभावानवगाहिनः ज्ञानस्य विरोध्यविषयकतया प्रतिबन्धकत्वायोगात् जनकज्ञानविघटकत्वेनैव प्रतिबन्धकत्वं वक्तव्यम् । प्रकृते च जनकज्ञानविघटकत्वमपि रूढिज्ञानस्य नास्ति इति तस्य प्रतिबन्धकत्वं न घटत इति प्राचीनमते अस्वारस्यम् । अतः **मणिकारमतम्** आह– **वस्तुतस्तु** इत्यादिना इति भावः ।।

सन्निहितोपस्थितिकत्वाद् इति । समुदायशक्तिरूपसंबन्धज्ञानाधीनशीघ्रोपस्थितिकत्वात् इत्यर्थः । प्राथमिकोपस्थितिविषयत्वात् इति यावत् ।।

सान्निध्यात् इति इति । ननु मूले पद्मत्वावच्छिन्नस्य सन्निहितोपस्थितिविषयत्वेन तत्र पङ्कजनिकर्तुः अवयवार्थस्य अभेदान्वय एव भवति, न तु उक्तप्रतिबध्यप्रतिबन्धकभावः प्रामाणिकः इति उक्तं **नवीनैः** । तन्न सङ्गच्छते । कुमुदतात्पर्येणापि योगव्युत्पत्या पङ्कजपदप्रयोगस्य इष्टत्वेन तत्रापि ''पङ्कजनिकर्त्रभिन्नं पद्मम्'' इति बोधापत्तेः ।।

न च – तत्र पद्मत्वावच्छिन्नस्य उपस्थितिविरहादेव नेयमापत्तिः इति– वाच्यम् । ''पङ्कज'' इत्यस्य पद्मे स्मारकशक्तिसत्त्वात् ततः पद्मस्मरणस्य आवश्यकत्वात् इत्याशङ्कानिरासाय **सान्निध्यात्** इत्यनेन तत्र पङ्कजपदस्य पद्मरूपार्थे तात्पर्यसत्त्वात् इत्येव उक्तम् इत्याह - **व्यक्तिवचनानाम्** इति । घटपटादिव्यक्तिवाचकानाम् इत्यर्थः । जातिपरशब्दव्यावृत्त्यर्थं विशेषोपादानम् । **सन्निहितिपरत्वम्** अव्यवहितोपास्थितव्यक्तितात्पर्यकत्वम् इत्यर्थः । अत एव ''घटम् आनय'' इत्युक्तौ सन्निधाने घटसत्त्वे न दूरस्थघटानयने लोकः प्रवर्तते इति भावः । तथा च उपस्थितपद्मत्वावच्छिन्नपरत्वे पङ्कजपदस्य तात्पर्यविषयीभूतस्य पङ्कजनिकर्तुः पद्मेऽपि अभेदान्वयबोधे योग्यतासत्त्वात् तत्र भवति तादृशान्वयबोधः।।

यत्र तु कुमुदतात्पर्येणैव ''अत्र पङ्कजम् अस्ति'' इति प्रयुज्यते, तत्र पद्मे एतद्देशवृत्तित्वस्य बाधितत्वेन कुमुद एव तात्पर्यनिश्चयसत्त्वात् तात्पर्यविषयस्य पङ्कजनिकर्तुः कुमुदस्य पद्मे भेदसत्त्वात् योग्यतायाविरहेण तत्र न तादृशान्वयबोधः इति भावः ।।

ननु एतद्देशे रूढ्यर्थस्य पद्मस्य बाधनिश्चयेऽपि पद्मकुमुदातिरिक्तपङ्कजनिकर्तृपदार्थतात्पर्येण पङ्कजनिकर्तृत्वमात्रतात्र्येण वा कुमुदस्यैव बोधे तात्पर्यम्, तत्र

लक्षणया कुमुदबोधाभावात् तद्ग्रन्थासङ्गतिः इत्यतः पूरयति – **कुमुदत्वेन** इति।।

सामग्र्यन्तर इति । प्रामादिकोऽयं पाठः । "कारणान्तरविरह" इत्येव वक्तुम् उचितत्वात् । वस्तुतः सामग्रीपदं सामग्रीघटककारणमात्रपरम् अत्र द्रष्टव्यम् । अन्तरपदं बाधाभावभिन्नपरम् । तच्च कारणं रूढ्यर्थस्मरणादिकमेव इति ध्येयम् इति तरङ्गिणीकाराः ।।

।। लक्षणानिरूपणम् ।।

कारिकावली

लक्षणा शक्यसंबन्धः तात्पर्यानुपपत्तितः ।

मुक्तावली

लक्षणा शक्यसंबन्ध इति । "गङ्गायां घोषः" इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्य अन्वयानुपपत्तिः तात्पर्यानुपपत्तिः वा यत्र प्रतिसन्धीयते, तत्र लक्षणया तीरस्य बोध इति । सा च शक्यसंबन्धरूपा ।।

तथा हि – प्रवाहरूपशक्यार्थसंबन्धस्य तीरे गृहीतत्वात् तीरस्य स्मरणम् । ततः शाब्दबोधः । परन्तु यदि अन्वयानुपपत्तिः लक्षणाबीजं स्यात्, तदा "यष्टीः प्रवेशय" इत्यादौ लक्षणा न स्यात् । यष्टिषु प्रवेशान्वयस्य अनुपपत्तेः अभावात् । तेन तत्प्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा ।।

एवं "काकेभ्यः दधि रक्ष्यताम्" इत्यादौ काकपदस्य दध्युपघातके लक्षणा, सर्वतो दधिरक्षायाः तात्पर्यविषयत्वात् । एवं "छत्रिणो यान्ति" इत्यादौ छत्रिपदस्य एकसार्थवाहित्वे लक्षणा । इयमेव अजहत्स्वार्था लक्षणा इत्युच्यते । एकसार्थ-वाहित्वेन रूपेण छत्रितदन्ययोः बोधात् ।।

यदि च अन्वयानुपपत्तिः लक्षणाबीजं स्यात्, तदा क्वचित् गङ्गापदस्य तीरे क्वचित् घोषपदस्य मत्स्यादौ लक्षणा इति नियमो न स्यात् ।।

इदं तु बोध्यम् – शक्यार्थसंबन्धः यदि तीरत्वेन रूपेण गृहीतः, तदा तीरत्वेन तीरबोधः । यदि तु गङ्गातीरत्वेन रूपेण गृहीतः, तदा तेनैव रूपेण स्मरणम् । अत एव लक्ष्यतावच्छेदके न लक्षणा । तत्प्रकारकबोधस्य लक्षणां विनापि उपपत्तेः । परन्तु एवंक्रमेण शक्यतावच्छेदकेऽपि शक्तिः न स्यात् । तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्य सामर्थ्यम् इत्यस्य सुवचत्वात् इति विभावनीयम् ।।

दिनकरी

लक्षणा द्विविधा – जहत्स्वार्था अजहत्स्वार्था च । तत्र आद्यां प्रदर्शयति – गङ्गायाम् इति । वक्ष्यमाणास्वरसात् आह – तात्पर्यानुपपत्तिः वा इति । सा च – लक्षणा च । द्वितीयां प्रदर्शयति – एवं काकेभ्य इति । दध्युपघातके – काकबिडालादिसाधारणदध्युपघातकत्वविशिष्टे । एकसार्थवाहित्वे– एकसार्थवाहित्वविशिष्टे । छत्रिपदलक्षणाभिधानं च वाक्यलक्षणावादिमताभिप्रायेण । न्यायमते तु छत्रपदस्यैव एकसार्थवाहित्वे लक्षणा, प्रत्ययार्थश्च संबन्धी । तथा च एकसार्थवन्तः गच्छन्ति इत्यन्वयः । एकसार्थवाहित्वं च एकसार्थ एव, न तु एकसार्थगन्तृत्वम् । नैराकाङ्क्ष्येण ''यान्ति'' इत्यस्य अनन्वयानुपपत्तेः ।।

न च – अजहत्स्वार्थतोक्तिः विरुद्धा इति – वाच्यम् । वाक्यलक्षणावादिमतेनैव तदभिधानात् इति ।।

क्वचित् – गङ्गापदस्य तीरे तात्पर्यग्रहस्थले । क्वचित् – घोषपदस्य मत्स्यादौ तात्पर्यग्रहस्थले ।।

तेनैव रूपेण इति । न च ''गङ्गायाम्'' इत्यादौ गङ्गातीरत्वेन बोधे जहत्स्वार्थत्वहानिः इति – वाच्यम् । तीरत्वेन लक्षणायामेव जहत्स्वार्थत्वस्य सर्वसंमतत्वात् । गङ्गातीरत्वेन भाने तु अजहत्स्वार्थैव लक्षणा इति । एवं पूर्वोक्तस्थले ''यष्टीः प्रवेशय'', ''मञ्चाः क्रोशन्ति'' इत्यादावपि यष्टिधरत्वमञ्चस्थत्वादिना बोधे अजहत्स्वार्थैव लक्षणा इति ध्येयम् । **अत एव – तद्धर्मविशिष्टे** लक्षणाग्रहस्य तेन रूपेण उपस्थितिशाब्दबोधौ प्रति हेतुत्वादेव । एवं च पदानुपस्थाप्यस्यापि लक्ष्यतावच्छेदकस्य शाब्दे भानं सुकरम् । अतिप्रसङ्गस्य **''तद्धर्मविशिष्टे''**त्यादिनैव वारणात् इति भावः ।।

इदम् उपलक्षणम् । गङ्गापदशक्यप्रवाहसंबन्धस्य तीरत्वे बाधात् इत्यपि द्रष्टव्यम् ।।

राजीवोल्लासः

जहत्स्वार्था इति । जहत् स्वार्थं यया सा जगत्स्वार्था । यया लक्षणया पदं स्वार्थं जहत् – त्यजत् सा जहत्स्वार्था लक्षणा । शक्यार्थत्यागपूर्वकं लक्ष्यार्थं बोधयन्ती वृत्तिः जहत्स्वार्था । शक्यार्थाविषयकलक्ष्यार्थविषयकशाब्द-बोधजनिका लक्षणा जहत्स्वार्था लक्षणा इति यावत् । यथा गङ्गापदस्य तीरादौ लक्षणा । एवं न जहत् स्वार्थं यया सा अजहत्स्वार्था । शक्यार्थापरित्यागेन शक्यार्थलक्ष्यार्थोभयविषयकबोधजनिका लक्षणा अजहत्स्वार्थलक्षणा । **आद्याम्** इति । जगत्स्वार्थामित्यर्थः । **वक्ष्यमाणास्वरसात्** इति । अन्वयानुपपत्तेः लक्षणाबीजत्वे ''यष्टीः प्रवेशय'' इत्यादौ यष्टिपदस्य यष्टिधरे लक्षणानुपपत्ति-रूपास्वरसात् इत्यर्थः । **द्वितीयाम्** इति । अजहत्स्वार्थां लक्षणाम् इत्यर्थः । **काकबिडालादि** इति । काकबिडालादि साधारणं यत् दध्युपघातकत्वं दधिनाशकत्वं, तदवच्छिन्ने काकपदस्य लक्षणा इत्यर्थः । **एकसार्थवाहित्वविशिष्टे** इति । एकः सार्थः – समुदायत्वम्, तद्वाहित्वं – तद्वत्त्वम् । समुदायत्वं नाम तद्विषयक-

बुद्धिविषयत्वम् । एवं च ''छत्रिणो यान्ति'' इत्यत्र छत्रिपदस्य छत्रिविषयक-बुद्धिविषयत्वावच्छिन्ने शक्तिः । छत्रिविषयकबुद्धिश्च छत्रि-अछत्रि-उभयविषयक-समूहालम्बनबुद्धिः । तद्विषयत्वावच्छिन्ने छत्रिणि अच्छत्रिणि च छत्रिपदस्य लक्षणा ।।

ननु छत्रिपदस्य लक्षणा न संभवति, छत्रम् अस्य अस्ति इत्यर्थे छत्रपदोत्तरं तद्धितेन ''इनि'' प्रत्ययेन छत्रीत्यस्य निष्पन्नतया प्रकृतिप्रत्ययसमुदायरूपस्य तस्य छत्रिपदस्य शक्तपदसमूहरूपवाक्यत्वात् वाक्ये च शक्तिविरहात् शक्यसंबन्धरूपायाः लक्षणाया अपि अयोगात् इति, अत आह – **छत्रिपदलक्षणाभिधानं च** इति । **वाक्यलक्षणावादिमत** इति । वैयाकरणैः राजपुरुषादिसमासस्य राजस्वत्ववत्पुरुषे पाचकछत्र्यादिपदस्य पाककर्तृछत्रसंबन्ध्यादौ शक्तिस्वीकारात् तन्मतानुसारेण शक्यसंबन्धरूपा लक्षणा संभवति इति भावः ।।

न्यायमते तु इति । न्यायमते वाक्ये शक्त्यनङ्गीकारात् ''छत्रिणो यान्ति'' इत्यत्र ''इनि'' प्रकृतेः छत्रपदस्य एकसार्थवाहित्वे लक्षणा । इनिप्रत्ययस्य संबन्धी अर्थः । तथा च एकसार्थवाहित्ववन्तः गच्छन्ति इति अन्वयः । **एकसार्थवन्त** इति । एकसमुदायत्ववन्तः इत्यर्थः । **एकसार्थ एव** इति । एकसमुदायत्वमेव इत्यर्थः । **न तु एकसार्थगन्तृत्वम्** इति । एकसमुदायत्ववत्त्वे सति गन्तृत्वं न एकसार्थवाहित्वम् । तथा सति ''छत्रिणो यान्ति'' इति वाक्यस्य ''एकसमुदायत्ववत्वे सति गन्तारः गच्छन्ति'' इति अर्थो वक्तव्यः । तत्र गन्तृषु धात्वर्थगमनकर्तृत्वान्वये आकाङ्क्षाविरहात् तादृशान्वय-बोधानुपपत्तिः इत्यर्थः । **नैराकाङ्क्ष्येण** इति । उद्देश्यतावच्छेदकविधेययोः ऐक्ये अन्वयबोधस्य अव्युत्पन्नतया गमनकर्तृत्वविशिष्टे गमनकर्तृत्वस्य अन्वयबोधे

आकाङ्क्षाविरहात् इति भावः । यद्यपि – उद्देश्यतावच्छेदकविधेययोः ऐक्ये अभेदेन अन्वय एव अव्युत्पन्नः । अत्र तु गमनकर्तृत्वविशिष्टे तिङन्तार्थस्य गमनकर्तृत्वस्य आश्रयतासंबन्धेन अन्वयबोधे का अनुपपत्तिः इति शङ्का भवति – तथापि ''पचन् पचति'', ''जानन् जानाति'' इत्यादौ पाककर्तृत्वविशिष्टे पाककर्तृत्वस्य आश्रयतासंबन्धेन अन्वयेऽपि आकाङ्क्षाविरहस्य स्वीकृतत्वात् प्रकृतेऽपि गमनकर्तृत्वविशिष्टे गमनकर्तृत्वस्य आश्रयतया अन्वयबोधेऽपि आकाङ्क्षा नास्ति इति तात्पर्यम् ।।

न च अजहत्स्वार्थतोक्तिः इति । ''छत्रिणो यान्ति'' इत्यत्र छत्रपदस्य छत्रिघटितसमुदाये लक्षणाङ्गीकारे तज्जन्यशाब्दबोधे शक्यार्थस्य छत्रस्य मुख्यविशेष्यतया भानाभावात् कथमियम् अजहत्स्वार्था लक्षणा । ''काकेभ्यो दधि रक्ष्यताम्'' इत्यादौ शक्यार्थस्यापि मुख्याविशेष्यतया भानस्थले एव अजहत्स्वार्थलक्षणास्वीकारात् इति – न च वाच्यम् । वाक्यलक्षणावादिमतानुसारेण छत्रिपदस्य लक्षणापक्षे मुख्यार्थस्य छत्रिणः छत्रिपदजन्यशाब्दबोधे विशेष्यतया भानात् अजहत्स्वार्था लक्षणा इत्यभिधानात्। छत्रपदलक्षणापक्षे तु जहत्स्वार्थैव लक्षणा इति तात्पर्यात् । वस्तुतस्तु पदजन्यबोधे शक्यार्थस्य विशेषणतया भानेऽपि न अजहत्स्वार्थताभङ्गः । यादृशलक्षणया शक्यार्थस्य कथञ्चिदपि न बोधः तस्या एव जहत्स्वार्थलक्षणात्वात् । प्रकृते च छत्रपदात् लक्षणया छत्रिघटितसमुदायबोधे सति विशेषणतया छत्रस्यापि बोधात् अजहत्स्वार्थताया न विरोधः । अत एव गङ्गापदस्य गङ्गातीरत्वेन गङ्गातीरलक्षणायां शक्यार्थस्य प्रवाहस्य विशेषणतया बोधात् सा अजहत्स्वार्था लक्षणा । यत्र तु तीरत्वेन लक्षणा तत्रैव प्रवाहस्य शक्यार्थस्य अबोधात् जहत्स्वार्था लक्षणा इति स्वीकृतम् ।।

तद्धर्मविशिष्टे इति । गङ्गातीरत्वविशिष्टे गङ्गापदलक्षणाग्रहः गङ्गातीरत्वेन गङ्गातीरस्य उपस्थितिं शाब्दबोधं च जनयति । तीरत्वविशिष्टे लक्षणाग्रहः तीरत्वेन रूपेण तीरस्य उपस्थितिं शाब्दबोधं च जनयति इति स्वीकारात् लक्ष्यतावच्छेदके गङ्गातीरत्वे तीरत्वे वा न लक्षणा । तत्र लक्षणां विनापि गङ्गातीरत्वविशिष्टलक्षणाग्रहादेव गङ्गातीरत्वादिप्रकारकोपस्थितिशाब्दबोधयोः संभवात् । **एवञ्च पदानुपस्थाप्यस्य** इति । पदनिरूपितवृत्त्यनाश्रयस्यापि इत्यर्थः । न तु पदजन्योपस्थित्यविषयस्यापि इत्यर्थः । पूर्ववाक्ये लक्ष्यतावच्छेदकस्य पदात् उपस्थितेः उपपादितत्वात् । **अतिप्रसङ्गस्य** इति । वृत्त्या पदजन्योपस्थित्यविषयस्यापि शाब्दबोधे भानोपगमे घटादिपदात् पटादिविषयकशाब्दबोधप्रसङ्गस्य इत्यर्थः । **तद्धर्मविशिष्टेत्यादिनैव** इति । तथा च यद्धर्मावच्छिन्नविशेष्यकसंबन्धग्रहः तद्धर्मावच्छिन्नविशेष्यकमेव पदार्थस्मरणं शाब्दबोधश्च इति नियमस्वीकारेणैव घटादिपदात् न पटादिविषयकशाब्दबोधापत्तिः इति भावः ॥

लक्ष्यतावच्छेदके लक्षणायाः अनङ्गीकारे लक्ष्यतावच्छेदकस्य स्मरणं शाब्दबोधश्च कथं स्याताम् इति आशङ्का परिहृता । इदानीं लक्ष्यतावच्छेदके लक्षणानङ्गीकारे हेत्वन्तरम् आह – **इदम् उपलक्षणम्** इति । गङ्गापदस्य लक्ष्यतावच्छेदके तीरत्वे यदि लक्षणा स्यात् तदानीं गङ्गापदशक्यप्रवाहसंबन्धः तीरत्वे आवश्यकः । शक्यसंबन्धस्यैव लक्षणात्वात् । तीरत्वे तु प्रवाहसंबन्धो नास्तीति तीरत्वे न लक्षणा इति भावः ॥

यद्यपि तीरत्वे संयुक्तसमवायरूपशक्यसंबन्धः अस्त्येव, तथापि युगपद्वृत्तिद्वयविरोधेन शक्तिद्वयेनेव लक्षणाद्वयेनापि एकदैव पदार्थद्वयशाब्दबोधस्य अनुपगमेन एकपदात् तीरतीरत्वयोः बोधानुपपत्तिः इति ग्रन्थकृतां तात्पर्यम् ।

''गङ्गायां घोषमत्स्यौ स्तः'' इत्यादि प्रयोगस्य प्रामाण्योपगमे तु सजातीयवृत्तिद्वयेनैव युगपत् न अर्थद्वयविषयकशाब्दबोधः इत्यवधेयम् । अतः उक्तस्थले गङ्गापदात् एकदैव तीरप्रवाहयोः बोधेऽपि न क्षतिः इति मन्तव्यम् इति तरङ्गिणीकाराः ।।

मुक्तावली

यत्र तु शक्यार्थस्य परंपरासंबन्धरूपा लक्षणा, सा लक्षितलक्षणा इत्युच्यते । यथा द्विरेफादिपदे रेफद्वयसंबन्धः भ्रमरपदे ज्ञायते, भ्रमरपदस्य च संबन्धः भ्रमरे ज्ञायते, तत्र लक्षितलक्षणा ।।

दिनकरी

लक्षितलक्षणाया आधिक्यम् आशङ्क्य जहत्स्वार्थायाम् अन्तर्भावम् आह - यत्र तु इति । परंपरासंबन्धरूपा इति । स्ववाच्यरेफद्वयघटितपदवाच्यत्वादिरूपा ।।

न च – ''द्वौ रेफौ यत्र'' इति व्युत्पत्त्या द्विरेफपदेन स्वशक्यरेफद्वयसंबन्धि भ्रमरपदं लक्ष्यते, भ्रमरपदेन च शक्त्या भ्रमरः कल्प्यते इति एतावतैव सामञ्जस्ये अलं द्विरेफपदस्य भ्रमरे परंपरासंबन्धरूपलक्षणया । एवं च लक्षितेन लक्षणा ज्ञापनम् इति लक्षितलक्षणाशब्दार्थोऽपि अस्तु इति – वाच्यम् । तथा सति ''द्विरेफम् आनय'' इत्यादितः कर्मत्वादौ भ्रमरपदार्थान्वयानुपपत्तेः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् इति ।।

राजीवोल्लासः

स्ववाच्य इति । स्वं द्विरेफपदम् । स्ववाच्यम् – रेफद्वयम् । तद्घटितं पदं भ्रमरपदम् । तद्वाच्यत्त्वादिरूपा इत्यर्थः । कल्प्यते इति । उपस्थाप्यत इत्यर्थः । अवयवशक्त्या द्विरेफपदात् भ्रमरपदस्य स्मरणं भवति । तेन च

स्मरणात्मकपदज्ञानेन कीटकविशेषार्थस्मरणं शाब्दबोधश्च इति रीत्या शक्त्यैव द्विरेफपदात् साक्षात्संबन्धरूपनिरूढलक्षणायाः निर्वाह्यतया भ्रमरबोधनिर्वाहे शक्यपरंपरासंबन्धरूपलक्षितलक्षणास्वीकारः अनुचितः इति भावः – इति तरङ्गिणीकाराः ।।

ननु एवं द्विरेफपदे लक्षितलक्षणा इति सर्वसिद्धप्रवादस्य का गतिः इति, अत आह - **लक्षितेन** इति । द्विरेफपदेन निरूढलक्षणया बोधितेन भ्रमरपदेन शक्त्या लक्षणं शाब्दबोधरूपं ज्ञानम् इति ।।

तथा सति इति । द्विरेफपदस्य कीटविशेषे लक्षणानङ्गीकारे ''द्विरेफम् आनय'' इत्यत्र द्वितीयार्थकर्मत्वे कीटस्य अन्वयः न स्यात्, द्वितीयाविभक्तिप्रकृत्या द्विरेफपदेन वृत्या भ्रमरपदस्यैव उपस्थापितत्वात् कीटस्य प्रकृत्यनुपस्थापितत्वात् प्रत्ययानां प्रकृत्युपस्थापितार्थान्वितस्वार्थबोधकत्वम् इति व्युत्पत्तिविरोधात् । यस्मात् प्रत्ययः विधीयते सः प्रकृतिः । तदर्थः वृत्या तज्जन्योपस्थितिविषयः यः तदर्थान्वितस्वार्थबोधकत्वम् प्रत्ययानाम्। प्रत्ययाश्च विभक्ति-कृत्-तद्धिताख्याः । तथा च द्विरेफपदेन लक्षणाख्यवृत्या उपस्थितं भ्रमरपदमेव, न तु कीट इति, कथं तत्र विभक्त्यर्थकर्मत्वान्वयः इत्यनुपपत्तिः स्यात् । अतः शक्यस्य रेफद्वयस्य स्वघटितपदवाच्यत्वरूपपरंपरासंबन्धात्मिकया लक्षित-लक्षणात्मकवृत्या द्विरेफपदात् कीटविशेषोपस्थित्यर्थं तादृशलक्षणास्वीकार आवश्यक इति भावः ।।

मुक्तावली

किन्तु लाक्षणिकं पदं न अनुभावकम् । लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम् । शक्तिलक्षणान्यतरसंबन्धेन इतरपदार्थान्वित-स्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणात् ।।

दिनकरी

ननु तच्छाब्दबोधे तच्छक्तपदज्ञानत्वेन हेतुत्वात् लाक्षणिकशाब्दबोधः कथं स्यात् इति, अत आह – **किन्तु** इति । **पदान्तरं** – **समभिव्याहृतं शक्तं पदम्** । **शक्तिलक्षणा** इति । **अन्यतरसंबन्धेन यः इतरपदार्थः तदन्वितः यः स्वार्थः** इत्यर्थः ।।

''**कुमतिः पशुः**'' इत्यादिसर्वलाक्षणिकस्थले शाब्दबोधस्य अनुभवसिद्धतया लाक्षणिकार्थस्यापि अनुभावकत्वम् इति नव्याः ।।

राजीवोल्लासः

अथ शक्तिवत् लक्षणाया अपि पदार्थोपस्थितौ उपयोगात्, शक्तमिव लाक्षणिकमपि पदं शाब्दबोधात्मकानुभवहेतुः इति भ्रमं निरसितुम् आह – **किन्तु लाक्षणिकम्** इति ।।

न अनुभावकम् इति । शाब्दानुभवजनकं न इत्यर्थः । तथा च लाक्षणिके पदे स्मारिका शक्तिरेव, न आनुभाविकी इति भावः ।।

ननु तर्हि लाक्षणिकार्थस्य कथं शाब्दबोधे भानम् इति आशङ्क्य लाक्षणिकपदसमभिव्याहृतशक्तपदान्तरमेव लाक्षाणिकार्थान्वितस्वार्थबोधं प्रति कारणम् इति शक्तपदान्तरादेव शाब्दबोधे लाक्षणिकार्थस्य भानम् इति समाधत्ते – **लाक्षणिकार्थस्य** इति । **सामार्थ्यावधारणात्** - शक्त्यवधारणात् इत्यर्थः ।।

मूलस्थपदान्तरम् इत्यस्य लाक्षाणिकपदभिन्नार्थकत्वेन सकलशक्तपदानामपि लाक्षणिकार्थशाब्दबोधजनकत्वं प्रतीयते । तच्च अयुक्तम् । ''गङ्गायां घोषः'' इत्यत्र घोषपदस्यैव तीरशाब्दबोधजनकतायाः सर्वानुभवसिद्धत्वात्, अतः

व्याचष्टे – **पदान्तरम्** इति । **समभिव्याहृतम्** इति । तल्लाक्षणिकपदसमभिव्याहृतम् इत्यर्थः । तथा च तल्लाक्षणिकपदसमभिव्याहृतं शक्तं पदं तत्स्मारितलक्ष्यार्थविषयकशाब्दबोधजनकम् इति भावः ।।

इतरपदार्थ इति । इतरपदजन्यस्मृतिविषय इत्यर्थः । इतरपदे तृतीयार्थवैशिष्ट्यस्य अन्वयः । तथा च अन्यतरसंबन्धविषयकज्ञानसहितेन इतरपदेन स्मारितः यः अर्थः तदन्वितस्वार्थबोधजनकत्वं शक्तपदानाम् ।।

कुमतिः इति । कुत्सिता मतिः यस्य सः कुमतिः इति बहुव्रीहौ उत्तरपदस्य कुत्सितज्ञानवति लाक्षणिकतया पूर्वपदस्य तात्पर्यग्राहकतया निरर्थकतया कुमतौ पशुत्वस्य बाधितत्वेन पशुपदस्यापि पशुसदृशे लाक्षणिकतया ''कुमतिः पशुः'' इत्यत्र कस्यापि शक्तपदस्य अभावात् तत्र शाब्दबोधः न स्यात् इति तत्र शाब्दबोधोपपत्तये लाक्षणिकपदेऽपि आनुभाविकी शक्तिः अवश्यम् अङ्गीकरणीया इति भावः – इति **तरङ्गिणीकाराः** ।।

।। वाक्यलक्षणानिरासः ।।

मुक्तावली

वाक्ये तु शक्तेरभावात् शक्यसंबन्धरूपा लक्षणापि नास्ति । यत्र ''गभीरायां नद्यां घोषः'' इत्युक्तं, तत्र नदीपदस्य नदीतीरे लक्षणा, गभीरपदार्थस्य नद्या सह अभेदेन अन्वयः, क्वचित् एकदेशान्वयस्यापि स्वीकृतत्वात् ।

यदि तत्र एकादेशान्वयः न स्वीक्रियते, तदा नदीपदस्य गभीरनदीतीरे लक्षणा, गभीरपदं तात्पर्यग्राहकम् ।।

दिनकरी

ननु शक्यसंबन्धो न लक्षणा । तथा सति वाक्यस्य शक्याप्रसिद्ध्या तत्र लक्षणा न स्यात् इति **मीमांसकाक्षेपम्** इष्टापत्त्या निराकुरुते – **वाक्ये तु** इति । ननु ''गभीरायां नद्यां घोषः'' इत्यादौ नदीपदस्य नदीतीरे लक्षणास्वीकारे गभीरपदार्थस्य एकदेशान्वयापत्त्या पदलक्षणाया असंभवेन वाक्यलक्षणा आवश्यकी इति, अत आह – **यत्र गभीर** इति । **क्वचित्** इति । **''चैत्रस्य गुरुकुलम्''** इत्यादौ इत्यर्थः । **स्वीकृतत्वात्** इति । **पदभेदेन व्युत्पत्तिभेदात् प्रकृते तथा व्युत्पत्त्यकल्पनात्** इति भावः । **नदीपदस्य** इति ।।

न च – विनिगमनाविरहेण गभीरपदस्य लक्षणा, नदीपदं तात्पर्यग्राहकम् इत्यस्यापि वक्तुं शक्यत्वात् कथं नदीपदमात्रे लक्षणाभिधानम् इति – वाच्यम् । **प्रत्ययानां** प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः उत्तरपदे एव लक्षणायाः उक्तत्वात् ।।

राजीवोल्लासः

चैत्रस्य गुरुकुलम् इति । षष्ठ्यर्थस्य संबन्धस्य गुरुकुलपदार्थैकदेशे गुरौ अन्वयात् ''चैत्रसंबन्धिगुरोः कुलम्'' इति बोधस्य विवक्षितत्वात् क्वचित् पदार्थस्य पदार्थैकदेशेनापि अन्वयः भवितुम् अर्हति इति भावः । वस्तुतः ''कुलम्'' इति संपातायातम् । ''चैत्रस्य गुरुः'' इत्येव एकदेशान्वयस्य उदाहरणं वक्तुं शक्यम् । तत्र गुरुपदस्य गुरुत्ववान् अर्थः । षष्ठ्याः निरूपितत्व-मर्थः । तस्य आश्रयतासंबन्धेन गुरुपदार्थैकदेशे गुरुत्वेऽन्वयः । तथा ''चैत्रनिरूपितगुरुत्ववान्'' इति बोधः । तत्र पदार्थैकदेशे गुरुत्वे षष्ठ्यर्थान्वयात् ''पदार्थः पदार्थेन अन्वेति न तु तदेकदेशेन'' इति व्युत्पत्तिसङ्कोचः कार्यः इति भावः । न च ''चैत्रस्य गुरुः'' इत्यत्र पदार्थे गुरावेव षष्ठ्यर्थस्य संबन्धस्य

अन्वयोऽस्तु, न तु पदार्थैकदेशे गुरुत्वे इति – वाच्यम् । तथा सति चैत्रपुत्रेऽपि चैत्रस्य गुरुः इति प्रयोगः स्यात् । चैत्रपुत्रस्य चैत्रान्यं कञ्चित् प्रति गुरुत्वात् चैत्रसंबन्धित्वाच्च । गुरुत्वे षष्ठ्यर्थान्वये तु चैत्रपुत्रनिष्ठं गुरुत्वं न चैत्रनिरूपितम्, किन्तु चैत्रान्यनिरूपितमिति षष्ठ्यर्थबाधात् चैत्रपुत्रे न चैत्रस्य गुरुः इति प्रयोगः इति वक्तुं शक्यते ।।

ननु गुर्वादिपदस्य ससंबन्धिकत्वेन – नियमेन संबन्धिसाकाङ्क्षत्वेन – तदर्थैकदेशे गुरुत्वादौ पदार्थान्तरान्वयसंभवेऽपि नदीपदस्य ससंबन्धिकत्वाभावात् कथं ''गभीरायां नद्यां घोषः'' इत्यत्र नदीपदार्थनदीतीरैकदेशनद्यां गभीरपदार्थस्य अन्वयः इति, अत आह – **पदभेदेन** इति । **व्युत्पत्तिभेदात्** इति आकाङ्क्षाभेदात् इत्यर्थः । **प्रकृते** इति । ''गभीरायां नद्यां घोष'' इति वाक्यस्थनदीपदे इत्यर्थः । **तथा व्युत्पत्त्यकल्पनात्** इति । पदार्थस्य एकदेशानन्वयनियमाकल्पनात् इत्यर्थः ।।

ननु **मूले** ''गभीरायां नद्यां घोष'' इत्यत्र नदीतीरे नदीपदस्य लक्षणा । गभीरपदार्थस्य नद्याम् अभेदेन अन्वय इति यदुक्तं तन्न युक्तम् । गभीरपदस्य गभीरनदीतीरे लक्षणा, नदीपदं तात्पर्यग्राहकम् इत्यपि विनिगमनाविरहेण वक्तुं शक्यतया नदीपदमात्रे लक्षणाभिधानात् इति शङ्कते – **न च विनिगमनाविरहेण** इति । समाधत्ते – **प्रत्ययानाम्** इति । नदीपदस्य नदीतीरे लक्षणायां सत्यामेव तदन्विताधेयत्वरूपार्थबोधकत्वं नदीपदोत्तरसप्तम्याः इति वक्तुं शक्यते, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति व्युत्पत्तेः । गभीरपदस्य गभीरनदीतीरे लक्षणायां तु तदन्वितम् आधेयत्वं नदीपदोत्तरसप्तम्या बोधयितुं न शक्यते, गभीरपदस्य तादृशसप्तम्यप्रकृतित्वात् । न च ''गभीरायां नद्यां घोष'' इत्यत्र गभीरपदोत्तरमपि सप्तम्याः श्रवणात् सैव

गभीरपदलक्ष्यार्थतीरान्वितम् आधेयत्वं बोधयति इति न अनुपपत्तिः इति – वाच्यम् । विशेषणवाचकपदोत्तरविभक्त्याः निरर्थकत्वेन गभीरपदोत्तरसप्तम्या आधेयत्वबोधनासंभवात् । न च – नदीपदस्य तात्पर्यग्राहकत्वे गभीरपदमेव विशेष्यवाचकम् इति नायं दोष इति – वाच्यम्। एवमपि घोषपदेन गभीरायाम् इत्यस्य असंनिहितत्वेन आसत्त्यभावात् शाब्दबोधानुपपत्तेः । न च – **नव्यमते**, ''द्वारम्'' इत्यादौ अर्थाध्याहार इति **मीमांसकमते** च पदानाम् आसत्तेः न शाब्दबोधोपयोगित्वम् । यद्वा श्लोकादाविव नदीपदोत्तरं गभीरायाम् इति पदस्य योजनयैव अत्र शाब्दबोध इति न अनुपपत्तिः इति – वाच्यम् । ''गभीरनद्यां घोष'' इत्यत्र सर्वथानुपपत्तेः । समासघटकगभीरपदस्य नदीपदोत्तरं योजनायाः असंभवात् । तस्मात् नदीपदस्यैव नदीतीरे लक्षणा इति भावः ।।

दिनकरी

अत्र मीमांसकमतानुयायिनः — वाक्यलक्षणयैव उपपत्तौ गभीरपदस्य तात्पर्यग्राहकत्वकल्पनम् अयुक्तम् । न च - वाक्ये शक्त्यभावात् शक्यसंबन्धरूपा लक्षणापि न संभवति इति - वाच्यम् । स्वबोध्यसंबन्धस्यैव लक्षणापदार्थत्वात् ''गङ्गायां घोषः'' इत्यादौ **गङ्गापदबोध्यस्य** प्रवाहस्य संबन्धः तीरे इति तत्र लक्षणा । ''गभीरायां नद्याम्'' इति **वाक्यस्य बोध्या** गभीराभिन्ना नदी, तत्संबन्धः तीरे इति वाक्येऽपि लक्षणा । एवं समासात्मके ''चित्रगुः'' इति वाक्येऽपि चित्रगुपदस्य अवयवशक्त्या चित्राभिन्ना गौः स्वबोध्या, स्वजन्यबोधविषयस्यैव स्वबोध्यत्वात्, तत्संबन्धस्य स्वामिनि सत्त्वात् इति - आहुः ।।

तन्न । स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वम् । ''गङ्गायां घोषः'' इत्यादौ ''गङ्गायाम्'' इत्यस्यापि लाक्षणिकत्वापत्तेः । **अतः तत्त्वेन बोधकत्वं वाच्यम्** । **न च एतावताऽपि निर्वाहः**, अपभ्रंशस्यापि लाक्षणिकत्वापत्तेः ।

अतः तत्त्वावच्छिन्ना या शक्त्यवच्छिन्ना बोधकता सैव निवेश्या । तथा च कथं वाक्यस्य लक्षकत्वम्?

वस्तुतस्तु स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वम्, तदा ''गङ्गायां घोषः'' इत्यादौ गङ्गापदे लक्षणानुपपत्तिः । गङ्गापदेन तत्र **प्रवाहशाब्दबोधाजननेन** प्रवाहस्य गङ्गापदबोध्यत्वाभावात् । किन्तु **शक्त्या स्वजन्यज्ञानविषयत्वं** तद्वाच्यम् । न च ''शक्त्या'' इत्यधिकम् । समवायेन घटपदस्मारिताकाशस्यापि स्वबोध्यत्वापत्त्या तत्संबन्धज्ञानात् घटपदेन पटादेः शाब्दबोधप्रसङ्गात् । एवञ्च शक्यसंबन्धापेक्षया शक्त्या स्वबोध्यसंबन्धस्य गुरुत्वात् न तस्य लक्षणात्वम् इति ।।

किञ्च ''गभीरायां नद्याम्'' इति सप्तम्यन्तस्य गभीरनदीतीरलक्षकत्वे घोषे तादृशतीराधेयताबोधानुपपत्तिः; आधेयताबोधकपदाभावात्, नामार्थयोः भेदसंबन्धेन अन्वयस्य अव्युत्पन्नतया आधेयतासंबन्धेनापि तीरस्य घोषादौ अन्वयासंभवात् । **''गभीरायां नदी'' इति सप्तमीशून्यभागस्य** तीरे लक्षकत्वे सप्तम्यर्थाधेयत्वादौ तादृशतीरादेः अनन्वयापत्तिः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः, ''गभीरायां नदी'' इति भागस्य **सप्तमीप्रकृतित्वाभावात्** ।।

न च – ''गभीरायां नद्याम्'' इति सप्तम्यन्तस्य गभीरनदीतीरवृत्तित्वे लक्षणा अस्तु इति – शङ्क्यम् । तादृशतीरवृत्तित्वस्य घोषादौ अन्वयानुपपत्तेः । नामार्थयोः भेदसंबन्धेन अन्वयस्य अव्युत्पन्नत्वात् । सप्तम्यन्तभागस्य तादृशतीरवृत्तौ लक्षणाम् उपगम्य तस्य अभेदेन घोषादौ अन्वयः इत्यपि न । अभेदेन अन्वयबोधे समानविभक्तिकत्वस्य तन्त्रत्वात् इति आस्तां विस्तरः ।।

राजीवोल्लासः

वाक्यलक्षणावादिमीमांसकमतम् उपन्यस्यति – **अत्र मीमांसकमतानुयायिन** इति । ''गभीरायां नद्याम्'' इति वाक्यस्य गभीरनदीतीरे लक्षणयैव शाब्दबोधनिर्वाहे

नदीपदस्य गभीरनदीतीरे लक्षणाम् अङ्गीकृत्य गभीरपदस्य तात्पर्यग्राहकत्वकल्पनम् अयुक्तम् । न च – वाक्यस्य शक्त्यभावात् शक्यसंबन्धरूपा लक्षणापि न संभवति इति – वाच्यम् । यतो हि शक्यसंबन्धो न लक्षणा, अपि तु स्वबोध्यसंबन्धो लक्षणा । स्वजन्यबोधविषयः योऽर्थः तत्संबन्धो लक्षणा । ''गङ्गायां घोषः'' इत्यत्र गङ्गापदजन्यबोधविषयः – गङ्गापदशक्यार्थस्मरणविषयः – प्रवाहः तत्संबन्धः तीरे इति गङ्गापदस्य तीरे लक्षणा । ''गभीरायां नद्याम्'' इति वाक्यजन्यबोधविषयः गभीराभिन्नः प्रवाहः, तत्संबन्धः तीरे इति तत्र ''गभीरायां नद्याम्'' इति वाक्यस्य लक्षणा । स्वपदेन लक्षकत्वेन अभिमतं पदं वाक्यं वा ग्राह्यम् । एवं समासात्मके ''चित्रगुः'' इति वाक्येऽपि चित्रगुपदस्य अवयवभूतयोः चित्रगोपदयोः शक्त्या चित्राभिन्ना गौः चित्रगुपदजन्यबोधविषयः, तत्संबन्धः स्वामिनि इति ''चित्रगु'' इति वाक्यस्य चित्रगोस्वामिनि लक्षणा इति समुदायार्थः ॥

गङ्गापदबोध्यस्य इति । गङ्गापदजन्यस्मरणविषयस्य इत्यर्थः । पदात् संसर्गावगाहिज्ञानात्मकबोधासंभवात् । **वाक्यस्य बोध्या** इत्यत्र वाक्यजन्यबोधविषय इत्यर्थः । वाक्यजन्यस्य गभीराभिन्ना नदी इति ज्ञानस्य अनेकपदार्थसंसर्गावगाहितया शाब्दबोधरूपत्वं संभवति इत्यवधेयम् ॥

मीमांसकमतं खण्डयति – तन्न इत्यादिना । ''स्वबोध्यसंबन्धः लक्षणा'' इत्यत्र स्वबोध्यत्वं स्वजन्यबोधविषयत्वम् इति न वक्तुं शक्यते । ''गङ्गायां घोषः'' इत्यादौ ''गङ्गायाम्'' इत्यस्यापि लाक्षणिकत्वापत्तेः । तथा हि – ''गङ्गायां घोषः'' इत्यत्र गङ्गापद एव लक्षणा सर्वानुमता, न तु ''गङ्गायाम्'' इति वाक्ये। भवन्मते तु स्वपदेन ''गङ्गायाम्'' इति वाक्यस्य ग्रहणे तज्जन्यो यो बोधः ''गङ्गातीरवृत्तिः'' इत्याकारकः, तत्र गङ्गारूपप्रवाहस्यापि

विषयत्वेन तत्संबन्धस्य तीरे सत्त्वात् ''गङ्गायाम्'' इति वाक्यस्यापि तीरे लाक्षणिकत्वापत्तिः इति भावः । इदं च गङ्गातीरत्वेन शक्यसंबन्धग्रहम् अभिप्रेत्य उक्तम् । तीरत्वावच्छिन्ने शक्यतासंबन्धग्रहे तु प्रवाहस्य न वाक्यजन्यबोध-विषयत्वम् । ''तीरवृत्तिः'' इति बोधस्यैव ''गङ्गायाम्'' इति वाक्यजन्यत्वात् इति अवधेयम् ।।

अतः तत्त्वेन बोधकत्वम् इति । ''गङ्गायां'' इति वाक्यस्य लाक्षणिकत्वा-पत्तिवारणाय तत्त्वेन बोधकत्वं स्वबोध्यसंबन्ध इत्यत्र विवक्षणीयम् इत्यर्थः । तत्त्वम् – आनुपूर्वी । तत्त्वेन बोधकत्वम् आनुपूर्व्यवच्छिन्नं बोधजनकत्वम् इत्यर्थः । तथा च यादृशानुपूर्व्यवच्छिन्नस्य लक्षकत्वमभिमतम्, तादृशानुपूर्व्य-वच्छिन्नजनकतानिरूपितजन्यताशालिबोधविषयसंबन्धः तादृशानुपूर्व्यवच्छिन्नस्य लक्षणा । एवं च ''गङ्गायाम्'' इत्यानुपूर्व्यवच्छिन्नस्य शाब्दबोधजनकत्वाभावात् तादृशानुपूर्वी न शाब्दबोधजनकतावच्छेदिका इति तदवच्छिन्नजनकता-निरूपितजन्यताशालिबोधाप्रसिद्ध्या ''यादृशानुपूर्वी'' इत्यनेन ''गङ्गायाम्'' इत्यानुपूर्व्याः ग्रहीतुमशक्यतया न तदवच्छिन्नस्य लाक्षणिकत्वम् इति भावः । यद्यपि – गङ्गातीरवृत्तिः इति बोधं प्रति गङ्गापदोत्तरसप्तमीरूपसमभिव्याहारज्ञानस्य कारणत्वम् आवश्यकम् । अन्यथा सप्तम्युत्तरगङ्गापदज्ञानादपि गङ्गातीरवृत्तिः इति शाब्दबोधापत्तेः – तथापि तादृशानुपूर्व्यवच्छिन्नविषयकज्ञानमेव शाब्दबोधजनकं, न तु तादृशानुपूर्व्यवच्छिन्नम् इति तात्पर्यम् ।।

ननु तर्हि तादृशानुपूर्व्यवच्छिन्नजनकतानिरूपितेत्यादिकं परित्यज्य तादृशानुपूर्व्यवच्छिन्नविषयकज्ञानजन्यबोधविषयसंबन्ध एव तादृशानुपूर्व्यवच्छिन्नस्य लक्षणा इति ''गङ्गायाम्'' इत्यानुपूर्व्यवच्छिन्नस्य लाक्षणिकत्वम् आगतमेव इति, अत आह – **न च एतावता अपि** इति । गोशब्दापभ्रंशस्य, ''गावी,

गोणी'' इत्यादेः या आनुपूर्वी गकारोत्तराकारोत्तरवकारोत्तरेकारत्वादिः तदवच्छिन्न-विषयकज्ञानस्यापि शाब्दबोधकारणतया तज्जन्यबोधविषयसंबन्धम् आदाय अपभ्रंशस्यापि लाक्षणिकत्वापत्तिः । तद्वारणाय तत्त्वावच्छिन्ना या शक्त्यवच्छिन्ना बोधकता सैव निवेश्या । ''गङ्गापदं प्रवाहे शक्तम्'' इति शक्तिज्ञानस्य आकारः । पदस्य बोधकतामते प्रवाहनिरूपितशक्तिविशिष्टस्य आनुपूर्वीविशेषावच्छिन्नस्य गङ्गापदस्यैव बोधजनकतया गङ्गापदनिष्ठा बोधजनकता साक्षादेव शक्त्यवच्छिन्ना आनुपूर्व्यवच्छिन्ना च भवतीति तन्निरूपितजन्यताशालि-बोधविषयसंबन्धस्य तीरे सत्त्वात् गङ्गापदस्य तीरे लक्षणा । अपभ्रंशे तु शक्त्यनङ्गीकारात् तन्निष्ठायां जनकतायां शक्त्यवच्छिन्नत्वं नास्तीति शक्त्यवच्छिन्न-जनकतानिरूपितजन्यताशालिबोधविषयसंबन्धरूपा लक्षणा न संभवति । तथा च वाक्ये शक्त्यभावात् शक्त्यवच्छिन्नजनकताघटितलक्षणायाः न प्रसक्तिः इति भावः । पदज्ञानस्य कारणत्वे तु विषयितासंबन्धेन आनुपूर्वी–शक्त्युभयविशिष्टपद-विशिष्टज्ञानस्य शाब्दबोधजनकतया पदनिष्ठायां विषयितासंबन्धावच्छिन्नायां जनकतावच्छेदकतायाम् अवच्छेदकत्वं शक्त्यानुपूर्व्योः इति परम्परया जनकतावच्छेदकत्वं बोध्यम् ।।

एतत्पदजन्योऽयमर्थः इति शक्तिज्ञानाकारे च तरङ्गिणीरीत्या दिनकरी-ग्रन्थः व्याख्यातव्यः । तथा हि – तत्त्वं तादृशानुपूर्वी तदवच्छिन्ना तन्निष्ठावच्छेदकतानिरूपिका शक्त्यवच्छिन्ना विषयितासंबन्धावच्छिन्नशक्ति-निष्ठावच्छेदकतानिरूपिका ज्ञाननिष्ठबोधजनकता सैव निवेश्या इत्यर्थः । तथा च तादृशानुपूर्व्यवच्छिन्नशक्तिज्ञानजन्यबोधविषयसंबन्धः तदानुपूर्व्यवच्छिन्नस्य लक्षणा इति पर्यवसानात् वाक्यस्य च शक्त्यभावात् तस्य लक्षकत्वं न संभवति, एवम् अपभ्रंशस्यापि इति भावः । अपभ्रंशस्य बोधकत्वं तु साधुशब्दस्मृतिद्वारा वा शक्तिभ्रमाद्वा इत्यन्यदेतत् ।।

ननु तदानुपूर्व्यवच्छिन्ना तद्घटकपदशक्तिसहकृता या बोधजनकता तन्निरूपकबोधविषयसंबन्ध एव तदानुपूर्व्यवच्छिन्नस्य लक्षणा, एवं च न अपभ्रंशस्य लाक्षणिकत्वापत्तिः, न वा वाक्यलक्षणानुपपत्तिः इति, अत आह – **वस्तुतस्तु** इति । **स्वबोध्यत्वम्** इत्यादि । स्वं-लाक्षणिकत्वेन अभिमतं पदम् । स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं तदा ''गङ्गायां घोष'' इत्यादौ गङ्गापदे लक्षणायाः अनुपपत्तिः । गङ्गापदेन प्रवाहस्मृतेरेव जननेन प्रवाहशाब्दबोधाजननेन प्रवाहस्य गङ्गापदजन्यशाब्दबोधविषयत्वा-भावात् । किं तु शक्त्या स्वजन्यस्मरणविषयत्वं स्वबोध्यत्वम् इति वक्तव्यम् । तत्र ''शक्त्या'' इत्यस्या अनुपादाने समवायेन घटपदस्मारिताकाशस्यापि स्वबोध्यत्वापत्त्या स्वबोध्याकाशसंबन्धिनि पटादौ घटपदस्य लक्षणापत्तेः । एवं च शक्त्या – शक्तिसहकारेण – स्वजन्यज्ञानविषयसंबन्धः लक्षणा इति वक्तव्यम् । अस्य शक्यसंबन्धापेक्षया गुरुत्वात् न लक्षणात्वम् इति भावः ।।

प्रवाहशाब्दबोधाजननेन इति । संसर्गावगाहिज्ञानस्यैव शाब्दबोधरूपतया असंसृष्टप्रवाहज्ञानस्य शाब्दबोधरूपत्वाभावात् इति भावः । **स्वजन्यज्ञान** इति । स्वजन्यस्मरणेत्यर्थः ।।

यद्यपि ''शक्त्या'' इत्यस्य अनुपादानेऽपि वाक्यलक्षणानिरासः संभवति, पदस्यैव अर्थस्मारकत्वेन वाक्यस्य स्मारकत्वाभावात्, तथापि वाक्यवाक्यार्थयोः बोध्यबोधकभावरूपसंबन्धज्ञाने वाक्यस्यापि वाक्यार्थस्मारकत्वसंभवात् तज्जन्यस्मृति-विषयसंबन्धस्यैव लक्षणात्वोपगमे लक्षणायाः शक्त्यघटितत्वात् लक्षणायाः शक्य-संबन्धरूपत्वे न लाघवावकाश इति पर्यालोच्य शक्यसंबन्धरूपलक्षणायां लाघवसंपादनाय ''शक्त्या'' इत्युपात्तम् ।।

ननु वाक्यलक्षणाया अनङ्गीकारे ''गभीरायाम्'' इति वाक्ये यत्किंचित्पदस्य वृत्त्या अर्थबोधजनकत्वतात्पर्यस्य वक्तृगतस्य उपपत्तिः न संभवति इति, अत

आह – किं च इति । वाक्यलक्षणापक्षे दूषणान्तरमभिधीयते। ''गभीरायां नद्याम्'' इति सप्तम्यन्तस्य गभीरनदीतीरे लक्षणास्वीकारे घोषे तादृशतीरवृत्तित्व-बोधानुपपत्तिः, आधेयत्वबोधकपदाभावात् । न च – सप्तम्यन्तार्थस्य गभीरनदीतीरस्य आधेयतासंबन्धेन घोषेऽन्वयात् तीरवृत्तित्वबोधोपपत्तिः इति – वाच्यम् । नामार्थयोः भेदसंबन्धेन अन्वयस्य अव्युत्पन्नत्वात् ।।

ननु ''गभीरायां नद्याम्'' इत्यन्तभागस्य कथं नामत्वम्? नामघटितत्वेन इति चेत्, प्रत्ययघटितत्वेन प्रत्ययत्वमप्यस्तीति भेदसंबन्धेन अन्वयोपपत्तिः इति चेत्, न । ''अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'' इति सूत्रेण प्रत्ययधातुभिन्नस्य अर्थवतो नामत्वं बोध्यते । भिन्नान्तस्य धातुप्रत्ययापर्याप्तधर्मवदर्थकतया अर्थवत्पदस्य वृत्तिमदर्थकतया च ''गभीरायां नद्याम्'' इति भागस्य नामत्वाक्षतेः इत्याशयात् ।।

न च – ''पश्य मृगो धावति'' इत्यादौ वाक्यार्थस्य कर्मतासंबन्धेन दर्शनक्रियायाम् अन्वयस्य अनुभवसिद्धत्वात् प्रकृतेऽपि वाक्यार्थस्य भेदेन अन्वये न बाधकम् इति – वाच्यम् । राजपुरुषीयधनबोधाभिप्रायेण ''राज्ञः पुरुषो धनम्'' इति प्रयोगापत्तेः । धात्वर्थ एव वाक्यार्थस्य भेदसंबन्धेन अन्वय इति संकोचस्य आवश्यकत्वात्, प्रकृते धात्वर्थातिरिक्ते घोषे भेदेन अन्वयासंभवात् इति. सुबोधिनीकाराः प्राहुः ।।

गभीरायां नदीति सप्तमीशून्यभागस्य इति । एतावता सप्तम्यन्तभागस्य लाक्षणिकत्वे दोष उक्तः । अथ सप्तमीशून्यस्य ''गभीरायां नदी'' इतिभागस्य तीरलक्षकत्वे दोष उच्यते । ''गभीरायां नदी'' इति भागस्य सप्तमीप्रकृतित्वाभावात् तदर्थस्य तीरस्य सप्तम्यर्थाधेयत्वेऽन्वयः न संभवति, प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वम् इति व्युत्पत्तिविरोधात् इति भावः । सप्तमीप्रकृतित्वाभावात्

इति । प्रातिपदिकादेव सुब्विभक्तेर्विधानात् । प्रत्ययविध्युद्देश्यस्यैव प्रकृतित्वात् ''अर्थवदधातुः'' इत्यनेन प्रत्ययधातुभिन्नस्य शक्तस्यैव प्रातिपदिकसंज्ञाविधानेन ''गभीरायां नदी'' इत्यस्य किंचिदर्थाशक्तत्वेन सप्तमीप्रकृतित्वाभावात् इति भावः । वस्तुतस्तु वाक्यार्थस्य धात्वर्थातिरिक्ते न भेदेन अन्वय इति पूर्वोक्तसमाधानमेव युक्तम् ।।

ननु ''गभीरायां नद्याम्'' इति सप्तम्यन्तस्य गभीरनदीतीरे लक्षणायां तस्य आधेयतासम्बन्धेन अन्वयः न संभवति इति भवदुक्ततया सप्तम्यन्तस्य गभीरनदीतीरवृत्तित्वे लक्षणा स्वीक्रियताम् इत्याशङ्क्य तथापि तादृशतीरवृत्तित्वस्य घोषे आश्रयत्वरूपभेदसंबन्धेनैव अन्वयस्य वक्तव्यतया नामार्थयोः भेदसम्बन्धेन अन्वये न व्युत्पत्तिविरोध इति समाधत्ते – **न च गभीरायाम्** इत्यादिना । ननु एतद्दोषाभावाय ''गभीरायां नद्याम्'' इति भागस्य गभीरनदीतीरवृत्तौ लक्षणा । तस्य अभेदेन अन्वयः घोषे भवतु । ''तादृशतीरवृत्त्यभिन्नो घोष'' इति वाक्यार्थस्य अबाधितत्वात् इत्याशङ्क्य अभेदान्वयबोधे विशेष्यविशेषणवाचकयोः समानविभक्तिकत्वस्य प्रयोजकत्वात्, ''गभीरायां नद्याम्'' इत्यनन्तरं विभक्त्यभावेन तस्य भागस्य विशेष्यवाचकपदसमानविभक्तिकत्वाभावात् न अभेदेनापि अन्वयः संभवति इति समाधत्ते – **सप्तम्यन्तभागस्य तादृशतीरवृत्तौ लक्षणायाम्** इति ।।

ननु ''राजपुरुष'' इत्यादौ समासे राजपदस्य अविभक्तिकत्वेऽपि पुरुषपदाव्यवहितपूर्ववर्तिनः राजपदार्थस्य राजसंबन्धिनः पुरुषे अभेदेन अन्वयदर्शनात्, प्रकृतेऽपि सप्तम्यन्तवाक्यस्य घोषपदाव्यवहितपूर्ववृत्तितया तदर्थस्य गभीरनदीतीरवृत्तेः घोषे अभेदान्वये बाधकाभावात् इदम् असङ्गतम् ।।

न च – अव्यवहितपूर्ववर्तिनः किंचिदर्थशक्तत्वरूपपदत्वमपि अभेदान्वयबोधे प्रयोजकम् । ''राजपुरुष'' इत्यत्र राजपदस्य शक्तत्वसत्त्वात् तल्लक्ष्यार्थस्य

अभेदान्वयः युज्यते । ''गभीरायां नद्याम्'' इति वाक्यस्य तु किंचिदर्थशक्तत्व-रूपपदत्वाभावात् तल्लक्ष्यार्थस्य घोषेऽभेदेन अन्वयः न संभवति इति – वाच्यम् । ''नीलघटरूपम्'' इत्यादौ ''नीलघटस्य रूपम्'' इति षष्ठीसमासे ''नीलघट'' इत्यस्य वाक्यत्वेन शक्तत्वरूपपदत्वाभावेऽपि तदर्थस्य नीलघटसंबन्धिनः रूपादौ अभेदेन अन्वयदर्शनात् इति चेत्, न । ''घोषो गभीरायां नद्याम्'' इति वाक्यादपि ''गभीरनदीतीरवृत्त्यभिन्नो घोष'' इति बोधस्य अनुभवसिद्धत्वेन तत्र घोषपदाव्यवहितपूर्ववृत्तित्वसमानविभक्तिकत्वयोः ''गभीरायां नद्याम्'' इति भागे अभावात् अभेदान्वयबोधानुपपत्तेः वज्रलेपायमानत्वात् इत्याशयेन आह – **आस्तां विस्तर इति** ।।

इदम् अत्र अवधेयम् – ''स्तोकं पचति'' इत्यादौ समानविभक्तिकत्वा-भावेऽपि अभेदेन अन्वयानुभवात् नियमसंकोचस्य आवश्यकतया वाक्यलक्ष्यार्थस्य तथा अन्वयस्वीकारे बाधकाभावः ।।

न च – नामार्थयोः अभेदेन अन्वय एव समानविभक्तिकत्वं तन्त्रम्, एवं च ''स्तोकं पचति'' इत्यादौ न व्यभिचारः । पूर्वोक्तदिशा गभीरनदीतीरवृत्तेः अत्र नामार्थत्वमेव इति व्यभिचारो भवत्येव इति – वाच्यम् । वाक्यस्य नामत्वस्वीकारे मानाभावात्, तदुत्तरं विभक्त्यापत्तेश्च इति सुबोधिनीकाराः ।।

मुक्तावली

बहुव्रीहावपि एवम् । तत्र हि चित्रगुपदादौ यदि एकदेशान्वयः स्वीक्रियते, तदा **गोपदस्य** गोमति लक्षणा, गवि चित्राभेदान्वयः । **यदि तु एकदेशान्वयः न स्वीक्रियते**, तदा गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम् । एवम् ''आरूढवानरः वृक्षः'' इत्यत्र वानरपदे वानरारोहणकर्मणि लक्षणा, आरूढपदं च तात्पर्यग्राहकम् । एवम् अन्यत्रापि ।।

दिनकरी

एवम् - अवयवलक्षणैव, न तु वाक्ये लक्षणा इत्यर्थः । **गोपदस्य इति । प्रत्ययार्थान्वयानुरोधेन** उत्तरपदलक्षणाया युक्तत्वात् इति भावः । **गोमति** - गोस्वामिनि । **न स्वीक्रियत** इति । **गोधर्मिकान्वयबोधे** गोधर्मिकवृत्तिज्ञानस्य हेतुताया आवश्यकत्वात् । अन्यथा ''चित्रव्रजः अस्ति'' इत्यादावपि व्रजपदार्थस्य गोस्थानरूपस्य एकदेशे गवि चित्रान्वयप्रसङ्गात् । यद्यपि ''घटशून्यम्'' इत्यादौ एकदेशान्वयः दृश्यते, तथापि तादात्म्येन तथा अन्वयः न स्वीक्रियत इति हृदयम् ।।

राजीवोल्लासः

''**बहुव्रीहावप्येवम्**'' इति मूलस्थस्य एवंपदस्य अर्थम् आह – **एवम् अवयवलक्षणैव** इति । **प्रत्ययार्थान्वयानुरोधेन** इति । प्रत्ययार्थस्य प्रकृत्यर्थेनैव अन्वय इति नियमानुरोधेन इत्यर्थः । **एकदेशान्वयः न स्वीक्रियत** इत्यत्र युक्तिम् आह – **गोधर्मिक** इत्यादिना । गोविशेष्यकेतरपदार्थप्रकारकशाब्दबोधं प्रति गोविशेष्यकपदवृत्तिज्ञानं – ''गौः गोपदशक्या'' इत्याद्याकारकं – कारणम् इति अवश्यं वक्तव्यम् । अन्यथा ''चित्रव्रजोऽस्ति'' इत्यादौ व्रजपदार्थः गोस्थानम् तदेकदेशे चित्रपदार्थस्य अभेदान्वयेन चित्राभिन्ना या गौः तत्स्थानम् इति बोधः स्यात् । न च इष्टापत्तिः । ''चित्रश्चासौ व्रजश्च'' इति कर्मधारयात् ''चित्राभिन्नं गोस्थानम्'' इति बोधस्य तात्पर्यविषयत्वे एव तथा प्रयोगस्य प्रामाणिकत्वात् । एकदेशान्वयस्वीकारे तु ''चित्राभिन्ना गौः'' इति तात्पर्येणापि तथा प्रयोगस्य प्रामाणिकत्वापत्तिः । उक्तकार्यकारणभावस्वीकारे च गोस्थान-विशेष्यकव्रजपदशक्तिज्ञानसत्त्वेऽपि गोविशेष्यकव्रजपदशक्तिज्ञानाभावात् न गोविशेष्यकचित्रपदार्थप्रकारकाभेदान्वयबोधापत्तिः । एवं च ''चित्रगुः'' इत्यत्र

गोपदस्य गोस्वामिनि लक्षणायां गोस्वामिविशेष्यकगोपदवृत्तिज्ञानमेव अस्ति न गोविशेष्यकगोपदवृत्तिज्ञानम् इति गोविशेष्यकचित्राभेदान्वयबोधानुपपत्तिः । अतः गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम् इति भावः ॥

घटशून्यम् इति। शून्यपदस्य अभाववत् इत्यर्थः । तदेकदेशे अभावे घटपदार्थस्य घटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन अन्वयः । एकदेशान्वयास्वीकारे कथमेतत् इति शङ्का । उक्तकार्यकारणभावरीत्यापि अभावविशेष्यकशून्यपदवृत्तिज्ञानरूपकारणाभावात् कथम् अभावविशेष्यकघटप्रकारकबोध इति शङ्का ॥

समाधत्ते – **तथापि तादात्म्येन** इति । **तथान्वय** इति । एकदेशान्वय इत्यर्थः । ''घटशून्यम्'' इत्यत्र शून्यपदार्थैकदेशे अभावे प्रतियोगित्वरूपभेदसंबन्धेन घटपदार्थस्य अन्वयः इष्यते । तदभिप्रायेण तथा प्रामाणिकप्रयोगात् । पदार्थैकदेशे अभेदसंबन्धेन इतरपदार्थान्वयस्तु न, ''चित्रव्रजोऽस्ति'' इति चित्रगोतात्पर्येण प्रयोगाभावात् । एवं च ''चित्रगुः'' इत्यत्र गोपदार्थगोस्वाम्येकदेशगवि चित्रपदार्थस्य अभेदेन अन्वयासंभवात् चित्रगोस्वामिनि गोपदस्य लक्षणा चित्रपदस्य तात्पर्यग्राहकत्वं च अङ्गीकार्यम् इति भावः ॥

अत्र **सुबोधिनीकाराः** – ननु नामार्थत्वात् घटस्य कथं भेदसंबन्धेन अन्वयः ? इति चेत्, न – ''नामार्थनिष्ठप्रकारता'' इत्यादिकार्यकारणभावघटकनाम्नि निपातातिरिक्तत्ववत् समासघटकातिरिक्तत्वस्यापि निवेशात् । न च – घटपदस्य घटप्रतियोगिके लक्षणा, अभेदेन च अन्वयोऽस्तु इति – वाच्यम् । अभेदेन एकदेशान्वयस्य अव्युत्पन्नत्वात्। वस्तुतस्तु – शून्यपदस्यैव अत्र घटाभाववति लक्षणा । घटपदं तात्पर्यग्राहकम् । अन्यथा तत्पुरुषे पूर्वपरान्यतरपदे लक्षणा

इति प्रवादोऽपि व्याहन्येत । एतमेव अभिप्रायं दिनकरभट्टः सूचयति "इति हृदयम्" इत्यनेन इति – प्राहुः ।।

मुक्तावली

तत्पुरुषे तु पूर्वपदे लक्षणा । तथा हि – राजपुरुषादिपदे राजपदार्थेन पुरुषादिपदार्थस्य साक्षात् न अन्वयः, निपातातिरिक्तनामार्थयोः भेदेन अन्वयबोधस्य अव्युत्पन्नत्वात् । अन्यथा "राजा पुरुष" इत्यत्रापि तथान्वयबोधः स्यात् । "पटो न घटः" इत्यादौ घटपटाभ्यां नञः साक्षादेव अन्वयात् "निपातातिरिक्त" इति । "नीलो घटः" इत्यादौ नामार्थयोः अभेदसंबन्धेन अन्वयात् "भेदेन" इति ।।

न च – "राजपुरुष" इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यताम् इति - वाच्यम् । अस्मृतविभक्तेरपि ततः बोधोदयात् । तस्मात् राजपदादौ राजसंबन्धिनि लक्षणा, तस्य च पुरुषेण सह अभेदान्वयः ।।

दिनकरी

निपातातिरिक्त इति । निपातपदम् अव्ययस्यापि उपलक्षकम् । तेन "चन्द्र इव" इत्यादौ इवार्थसादृश्ये चन्द्रस्य प्रतियोगितया अन्वयोपपत्तिः । अन्यथा – अव्ययनिपातातिरिक्तनामार्थयोरपि भेदेन अन्वयबोधस्वीकारे । तथान्वयबोध इति । भेदेन अन्वयबोधः स्यात् इत्यर्थः । साक्षादेव - प्रत्ययार्थम् अद्वारीकृत्यैव । "भूतले घटः" इत्यादौ आधेयतासंसर्गेणापि घटभूतलयोः अन्वयात् "साक्षात्" इत्यस्यापि व्युत्पत्तौ निवेशात् इति भावः । नञः - नञर्थान्योन्याभावस्य । स्मरणं कल्प्यम् इति । तथा च अत्रापि प्रत्ययार्थद्वारैव राजपुरुषयोः अन्वयात् न उक्तव्युत्पत्तिविरोधः इति भावः ।।

परे तु – ''राजपुरुष'' इत्यादि तत्पुरुषे न लक्षणा, व्युत्पत्तिवैचित्र्येण स्वत्वादिसंसर्गेणैव राज्ञः पुरुषादौ अन्वयबोधस्वीकरात् । अन्यथा ''दशैते राजमातङ्गाः तस्यैवामी तुरङ्गमाः'' इत्यादौ तच्छब्देन राज्ञः परामर्शो न स्यात्, तस्य एकदेशत्वात् इति – आहुः ।।

राजीवोल्लासः

ननु निपातातिरिक्तनामार्थयोः भेदेन अन्वयस्य अव्युत्पन्नत्वात् इत्युक्त्या निपातार्थमात्रस्य नामार्थेन साकं भेदसंबन्धेन अन्वयः भवति इति लभ्यते । तथा सति ''चन्द्र इव मुखम्'' इत्यत्र इवार्थे सादृश्ये प्रतियोगितासंबन्धेन मुखस्य अनुयोगितासंबन्धेन सादृश्यस्य च चन्द्रे अन्वयः न स्यात् । ''चादयोऽसत्त्वे'' इति पाणिनिसूत्रेण अद्रव्यार्थानां चादीनामेव निपातसंज्ञाविधानेन चादिगणमध्येऽपठितस्य ''इव'' शब्दस्य निपातसंज्ञाविरहात् इति आशङ्कां निरस्यति – निपातपदम् अव्ययस्यापि उपलक्षकम् इति । तथा च निपातार्थस्य अव्ययार्थस्य च नामार्थे भेदसंबन्धेन अन्वयः भवति, निपाताव्ययातिरिक्त-प्रातिपदिकार्थस्य तु भेदसंबन्धेन अन्वयः न भवति इति नियमः । वस्तुतस्तु ''स्वरादिनिपातमव्ययम्'' इति सूत्रेण निपातस्यापि अव्ययसंज्ञाविधानात् ''अव्ययातिरिक्तनामार्थयोः साक्षात् भेदेन अन्वयः न भवति'' इति व्युत्पत्तिः । तेन ''राजा पुरुष'' इत्यत्र अव्ययातिरिक्तराजप्राति-पदिकार्थस्य तादृशपुरुषप्रातिपदिकार्थे स्वत्वरूपभेदसंबन्धेन अन्वयः न भवति, अपि तु अभेदसंबन्धेनैव अन्वय इति ध्येयम् ।।

भेदेन इति । अभेदातिरिक्तसंबन्धेन इत्यर्थः । **प्रत्ययार्थम् अद्वारीकृत्य** इति । विभक्त्यर्थभिन्नेन संबन्धेन इत्यर्थः । ननु मूले ''निपातातिरिक्त'' इत्यस्य ''भेदेन'' इत्यस्य च प्रयोजनम् उक्तम्, न तु ''साक्षात्'' इत्यस्य

इति नियमघटकसाक्षात्पदम् अनर्थकम् इति शङ्कां निराकुरुते – **भूतले घट** इत्यादिना । ''भूतले घटः'' इत्यत्र सप्तम्यर्थाधेयत्वसंबन्धेन नामार्थस्य भूतलस्य नामार्थे घटेऽन्वयात् नामार्थयोः भेदेन न अन्वय इत्युक्तौ तदनुपपत्तिः । अतः ''साक्षात्'' इति व्युत्पत्तौ निवेशितम् । तत्र विभक्त्यर्थद्वारा अन्वयात् न दोष इति भावः । **आधेयतासंसर्गेणापि** इति ''अपि'' ना सप्तम्यन्तार्थस्य भूतल-निरूपिताधेयत्वस्य आश्रयतासंबन्धेन घटेऽन्वयः समुच्चीयते ।।

यद्यपि – ''भूतले घटः'' इति वाक्यात् भूतलनिरूपिताधेयत्वप्रकारकघट-विशेष्यकशाब्दबोधस्वीकारेणैव उपपत्तौ आधेयतासंबन्धेन भूतलप्रकारकघटविशेष्यक-शाब्दबोधस्यापि स्वीकारः अनुचितः । सप्तमीविभक्त्यर्थस्य पदशक्यस्य आधेयत्वस्य संसर्गविधया भानस्य अनुचितत्वात् । पदवृत्यनुपस्थापितस्यैव अर्थस्य शाब्दबोधे संसर्गतया भानस्य स्वीकारात् – तथापि ''भूतले घटः'' इति वाक्यजन्य-शाब्दबोधानन्तरं ''घटः आधेयतासंबन्धेन भूतलविशिष्टो न वा'' इति संशयस्य अनुत्पादात् तादृशसंशयप्रतिबन्धकत्वं शाब्दबोधस्य वक्तव्यम् । शाब्दबोधेऽपि यदि आधेयतासंबन्धेन भूतलं प्रकारतया भासेत तदैव तादृशसंशयनिवर्तकत्वं भवितुम् अर्हति । समानप्रकारकयोः ज्ञानयोरेव प्रतिबध्यप्रतिबन्धकभावस्वीकारात् । अतः ''भूतले घटः'' इति वाक्यजन्यशाब्दबोधे आधेयत्वस्य संसर्गतया भानम् आवश्यकम् । परन्तु तत् आधेयत्वं विभक्त्यर्थरूपं भवति इति विभक्त्यर्थातिरिक्त-भेदसंबन्धेनैव नामार्थयोः अनन्वयः इति व्युत्पत्तिः एतदनुसारेण अङ्गीकर्तव्या भवति । अत एव साक्षात्पदस्य व्युत्पत्तिशरीरे प्रवेशः ।।

अपि च ''आधेयतासंबन्धावच्छिन्नभूतलनिष्ठप्रतियोगिताकाभाववान् घटः प्रमेयः'' इत्याकारकं भूतलाभावविशिष्टे घटे प्रमेयत्ववैशिष्ट्यावगाहिप्रत्यक्षं प्रति ''भूतले घटः'' इति वाक्यजन्यशाब्दसामग्र्याः आधेयत्वस्य संसर्गतया भाने

प्रतिबन्धकत्वं न कल्पनीयम् इति लाघवं भवति। तथा हि – विशिष्टे वैशिष्ट्यावगाहिप्रत्यक्षं प्रति विशेष्यतावच्छेदकप्रकारकनिश्चयः कारणम् । आधेयतासंबन्धेन ''भूतलाभाववान् घटः'' इति निश्चये सति तादृशविशिष्टवैशिष्ट्य-प्रत्यक्षोदयात् । ''भूतले घटः'' इति वाक्यजन्यशाब्दबोधं प्रति प्रतिबन्धकाभावविधया आधेयतासंबन्धेन ''भूतलाभाववान् घटः'' इति निश्चयाभावः कारणम् । विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति तु आधेयतया ''भूतलाभाववान् घटः'' इति निश्चयः कारणम् इति तादृशनिश्चयतदभावरूपयोः प्रत्यक्षशाब्दबोधसामग्र्योः परस्परविरुद्धयोः एकदा अवस्थानासंभवात् शाब्दबोधसामग्रीकाले विशेष्यतावच्छेदक-प्रकारकनिश्चयरूपकारणाभावादेव तादृशप्रत्यक्षानुदयोपपत्तौ तादृशप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं न कल्पनीयम् इति लाघवम् । विभक्त्यर्थस्य संसर्गविधया भानानङ्गीकारे तु ''भूतले घटः'' इति वाक्यात् ''भूतलनि-रूपिताधेयत्ववान् घटः'' इति आधेयत्वप्रकारकशाब्दबोधस्यैव उदयात् तादृशशाब्द-बोधं प्रति ''भूतलनिरूपिताधेयत्वाभाववान् घटः'' इति निश्चयस्यैव प्रतिबन्धकतया तदभाव एव कारणम् । तदभावकाले ''आधेयत्वसंसर्गकः आधेयतया भूतलाभाववान् घटः'' इति विशेष्यतावच्छेदकभूतलाभावप्रकारकनिश्चयः भवितुम् अर्हति इति तद्वशात् ''आधेयतया भूतलाभाववान् घटः प्रमेयः'' इति विशिष्टवैशिष्ट्य-प्रत्यक्षवारणाय ''भूतले घटः''इति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम् इति गौरवम् । अतः प्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवानुसारेण ''भूतले घटः'' इति वाक्यात् आधेयत्वसंसर्गकबोधोऽपि स्वीकरणीय इति भावः ।।

''घटः पटो न'' इत्यत्र अत्यन्ताभावः नञा न बोधयितुं शक्यते, नञा अत्यन्ताभावबोधने अनुयोगिवाचकपदोत्तरं सप्तम्यपेक्षणात्, अतः तत्र नञर्थः अन्योन्याभाव एव इति आह – **नञः नञर्थान्योन्याभावस्य** इति । तथा

च अत्रापि इति । "राजपुरुष" इति समासेऽपि लुप्तायाः षष्ठीविभक्तेः स्मरणेन तदर्थस्य स्वत्वस्यापि स्मरणात् स्मृतषष्ठ्यर्थसंबन्धेन राजपदार्थस्य पुरुषपदार्थेऽन्वयेन "स्वत्वसंबन्धेन राजविशिष्टः पुरुष" इति शाब्दबोधस्यैव संभवात् राजपदस्य राजसंबन्धिनि लक्षणां स्वीकृत्य तस्य पुरुषे अभेदेन अन्वयस्वीकारः न युक्त इति शङ्काग्रन्थस्य आशय इति भावः ।।

यद्वा स्मृतलुप्तविभक्त्यर्थस्वत्वे राजपदार्थस्य अन्वयः, स्वत्वस्यैव पुरुषे अन्वयः, "राजनिरूपितस्वत्ववान् पुरुषः" इति च बोधः। न तु राजपदस्य संबन्धिनि लक्षणया तस्य अभेदान्वयबोधः इत्याशयः । न उक्तव्युत्पत्तिविरोध इति । निपातातिरिक्तनामार्थयोः साक्षात् भेदेन न अन्वय इति व्युत्पत्तिविरोध इत्यर्थः ।।

मूले अस्मृतविभक्तेरपि इति । यद्यपि तत्पुरुषे पूर्वपदस्य स्वार्थविशेषितविग्रहवाक्यस्थविभक्त्यर्थविशिष्टे निरूढलक्षणोपगमेन तत्तद्विभक्त्यस्मरणे पूर्वपदस्य तत्तदर्थे निरूढलक्षणानिर्णय एव न संभवति इति लक्षणारूपवृत्तिज्ञानाभावादेव पदजन्यपदार्थस्मरणाभावेन शाब्दबोधः न संभवत्येव इति अस्मृतविभक्तेः शाब्दबोधोपपादनं दुर्वचम्, तथापि विभक्तिस्मरणं विना निरूढलक्षणार्थस्य अनिर्णयेऽपि सामान्यतः लक्षणाज्ञानं तदधीनपदार्थस्मरणं च संभवत्येव । निरूढलक्षणाज्ञानादेव पदार्थस्मरणम् इति न नियमः । तथा सति "गङ्गायां घोषः" इत्यादौ गङ्गापदात् तीरस्मरणानुपपत्तेः । एवं च तत्तत्स्थलेषु नानाविभक्तिस्मरणकल्पनम् अपेक्ष्य लक्षणया राजपदात् राजसंबन्ध्युपस्थितिं कल्पयित्वा अभेदशाब्दबोधोपगम एव उचितः, लाघवात् । "राजपुरुषः" इति कर्मधारये तु अन्वयानुपपत्त्यादिलक्षणाबीजाभावेन "राजाभिन्नः पुरुषः" इति शक्यार्थाभेदबोध एव स्वीक्रियते इति भावः ।।

मतान्तरम् आह – परे तु इति । व्युत्पत्तिवैचित्र्येण इति । पुरुषविशेष्यकस्वत्वसंसर्गकराजप्रकारकशाब्दबोधं प्रति राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानस्य कारणत्वात् इत्यर्थः । तथा च अत एव ''राजा पुरुष'' इत्यादौ तादृशान्वयबोधवारणसंभवेन न उक्तापत्तेः अवकाशः इति भावः ।।

परामर्शो न स्यात् इति । तत्पदेन पूर्ववाक्यस्थपदार्थस्यैव परामर्शः, न तु तादृशपदार्थतावच्छेदकस्यापि इति नियमः । अन्यथा ''अत्र शुक्लो घटः अस्ति, स न द्रव्यम्'' इति स्वारसिकप्रयोगापत्तेः । तथा च राजपदस्य राजसंबन्ध्यर्थकत्वे तत्पदेन राज्ञः परमर्शः न स्यात् इति भावः ।।

आहुः इति अस्वरसोद्भावनम् । तद्बीजं तु – एवं सति राज्ञः पुरुषः इत्यादावपि स्वत्वसंसर्गकबोधस्वीकार एव उचितः । अतिप्रसङ्गस्य षष्ठ्यन्तराजपदसमभिव्याहारज्ञानस्य तादृशशाब्दबोधनियामकत्वोपगमेनैव वारणसंभवात् ।।

न च एवं – व्याससमासवाक्यज्ञानयोः परस्परजन्यशाब्दबोधे व्यभिचारेण कारणतैव अनुपपन्ना इति – वाच्यम् । तादृशानुपूर्वीज्ञानाव्यवहितोत्तरत्वस्यापि कार्यतावच्छेदककोटौ निवेशनीयतया व्यभिचाराप्रसक्तेः । अन्यथा त्वन्मतेऽपि ''राजस्वत्वं पुरुषः'' इत्यतः तादृशशाब्दबोधवारणाय षष्ठ्यन्तराजपदसमभिव्याहारज्ञानस्य राजस्वत्वप्रकारकशाब्दबोधहेतुतायाः कल्पनीयतया पर्यायपदान्तरघटितवाक्यादपि तादृशशाब्दबोधोत्पत्त्या व्यभिचारस्य दुर्वारत्वात् इति तरङ्गिणीकाराः ।।

मुक्तावली

द्वन्द्वे तु ''धवखदिरौ'' इत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बुध्यते, तत्र न लक्षणा । न च – साहित्ये लक्षणा इति – वाच्यम् ।

साहित्यशून्ययोरपि द्वन्द्वदर्शनात् । न च – एकक्रियान्वयित्वरूपं साहित्यम् अस्ति इति – वाच्यम् । क्रियाभेदे ''धवखदिरौ पश्य, छिन्धि'' इत्यादौ दर्शनात्, साहित्यस्य अननुभवाच्च । अत एव ''राजपुरोहितौ सायुज्यकामौ यजेयाताम्'' इत्यत्र लक्षणाभावात् द्वन्द्वः आश्रीयते । तस्मात् साहित्यादिकं नार्थः, किन्तु वास्तवः भेदः यत्र, तत्र द्वन्द्वः ॥

न च – ''नीलघटयोः अभेदः'' इत्यादौ कथम् इति – वाच्यम् । तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा । ''अभेदः'' इत्यस्य आश्रयाभेद इत्यर्थात् ॥

दिनकरी

द्वन्द्वे तु – इतरेतरयोगद्वन्द्वे तु । ''धवखदिरौ'' इत्यत्र धवत्वं खदिरत्वं च प्रत्येकं न उद्देश्यतावच्छेदकम् । सुपाम् उद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वस्य ''आकाशौ'' इत्यादिवाक्यस्य प्रामाण्यापत्तिभिया क्लृप्तत्वेन धवद्वयस्य खदिरद्वयस्य च बोधापत्तेः । परन्तु खदिरपदस्य धवखदिरसाहित्याश्रये लक्षणा उपगम्यते । एवञ्च उद्देश्यतावच्छेदकीभूततादृशसाहित्यव्याप्यत्वं न धवद्वयवृत्तिद्वित्वस्य, न वा खदिरद्वयवृत्तिद्वित्वस्य, अपि तु धवखदिरोभयवृत्तिद्वित्वस्य इति न धवद्वयादेः बोधः इति मीमांसकमतं शङ्कते – न च साहित्य इति । साहित्याश्रये इत्यर्थः । सहवृत्तित्वरूपं साहित्यं लक्ष्यम्, उत एकक्रियान्वयित्वम् इति विकल्प्य आद्यं दूषयति – साहित्यशून्ययोरपि इति । द्वितीयं शङ्कते – न च एक इति । अननुभवाच्च इति । वस्तुगत्या एकक्रियान्वयित्वस्य धवखदिरयोः सत्त्वेऽपि एकक्रियान्वयित्वस्य शाब्दबोधाभावात् इत्यर्थः ॥

इदम् उपलक्षणम् । ''चैत्रमैत्रौ गच्छतः'' इत्यादौ चैत्रादिपदस्य यदि साहित्यविशिष्टे लक्षणा, तदा साहित्यस्य व्यासज्यवृत्तितया तदवच्छेदेन अव्यासज्यवृत्तेः गमनकर्तृत्वस्य अन्वयासंभव इत्यपि बोध्यम् ॥

ननु यदि द्वन्द्वे न लक्षणा, तदा कर्मधारयात् द्वन्द्वस्य को विशेषः इति, अत आह – **किन्तु** इति । ''**चार्थे द्वन्द्वः**'' इति अनुशासनात् । तत्र चार्थाः चत्वारः – **समुच्चय-अन्वाचय-इतरेतरयोग-समाहारभेदात्** । तत्र समुच्चय-अन्वाचययोः सामर्थ्याभावात् न समासः । इतरेतरसमाहारयोः सामर्थ्यसत्त्वात् तत्र समासः । तत्र **चार्थस्य भेदव्याप्यत्वात्** भेदे द्वन्द्वः इत्याशयः । ''**इत्यादौ**'' इति ''आदि''पदेन ''**प्रमाणप्रमेय**'' इत्यादिसूत्रपरिग्रहः । **कथम्** इति । यदि समासघटकपदार्थयोः यत्र भेदः तत्रैव द्वन्द्वः, तदा नीलघटयोः भेदाभावात् कथं द्वन्द्वः? एवं ''प्रमाण प्रमेय...'' इत्यादिसूत्रे ''आत्मशरीरेन्द्रियार्थबुद्धिमनः-प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्...'' इतिसूत्रोपात्तद्वादशविध-प्रमेयान्तर्गतमनोबुद्धीन्द्रियाणां प्रमाणत्वेन प्रमाणप्रमेययोः भेदाभावात् कथं द्वन्द्वः इत्यर्थः । **लक्षणा** इति । तथा च तयोः भेदसत्त्वात् द्वन्द्वः इति भावः ।।

ननु अभेद इति असङ्गतम्, नीलत्वघटत्वयोः अभेदाभावात्, अत आह – **अभेद इत्यस्य** इति ।।

केचित्तु – पदार्थत्वं **पदजन्यप्रतीतिविषयत्वम्** । तथा च क्वचित् पदार्थभेदात् क्वचित् पदार्थतावच्छेदकभेदात् द्वन्द्वः । प्रकृते च नीलत्वघटत्वयोः पदार्थतावच्छेदकयोः भेदात् द्वन्द्वः ।।

अस्तु वा पदार्थतावच्छेदकभेद एव द्वन्द्वः । न च एवं – ''घटाः'' इत्यादौ द्वन्द्वस्य अप्रसक्तत्वेन तदपवादकः सरूपैकशेषो न स्यात् इति – वाच्यम् । इष्टापत्तेः । तत्र घटपदोपस्थापितेषु बहुत्वान्वयादेव बहुघटबोधसंभवात् । ''सकृदुच्चरित'' इत्यादिव्युत्पत्तौ मानाभावात् । सरूपैकशेषविधेः ''हरी'' इत्यादौ सार्थकत्वात् ।।

अस्तु वा ''सकृत्'' इत्यादिव्युत्पत्तिः । परन्तु ''सकृत्'' इति अर्थपदार्थैकदेशो वृत्तौ विशेषणम् ।।

वस्तुतः बोधविशेषणमेव तत् इति न दोषः इति – आहुः ।।

राजीवोल्लासः

ननु मूले **''द्वन्द्वे न लक्षणा''** इति यदुक्तं तन्न सङ्गच्छते । ''अहिनकुलम्'' इत्यादौ समाहारद्वन्द्वे उत्तरपदस्य अहिनकुलसमुदाये लक्षणायाः स्वीकारात् । अतः द्वन्द्वपदं इतरेतरद्वन्द्वपरतया व्याचष्टे – **इतरेतरयोगद्वन्द्वे तु इति** । मूले **विभक्त्यर्थद्वित्वप्रकारेण** इति । विभक्त्यर्थः प्रथमाद्विवचनार्थः द्वित्वम् । तदभिन्नेन प्रकारेण इत्यर्थः । तृतीयार्थः बोधान्वयि विषयित्वम् । तथा च धवः खदिरश्च द्वित्वाभिन्नप्रकारविषयकबोधविशेष्यः इति **मूलार्थः** । **''विभक्त्यर्थप्रकारेण''** इति पाठे विभक्त्यर्थः कर्मत्वम् । तस्मिन् प्रकारतया धवखदिरौ बुद्ध्येते इति **मूलार्थः** । व्याख्यायां **धवखदिरौ इत्यत्र** इत्यादि । विभक्त्यर्थस्य द्वित्वस्य उद्देश्यतावच्छेदकं धवत्वं खदिरत्वं च प्रत्येकं न भवति । सुपां उद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वम् इति नियमेन धवत्वव्याप्यस्य खदिरत्वव्याप्यस्य च द्वित्वस्य द्विवचनेन बोधे सति ''धवखदिरौ छिन्धि'' इत्यत्र धवद्वयस्य खदिरद्वस्य बोधापत्तिः । तादृशनियमानङ्गीकारे ''आकाशौ'' इति वाक्यस्य प्रामाण्यापत्तिः । आकाशे घटाकाशगतद्वित्वस्य पर्याप्तिसंबन्धेन समवायसंबन्धेन च सत्त्वेन द्वित्ववत्त्वस्य आकाशे अबाधितत्वात् । तादृशनियमस्वीकारे तु घटाकाशगतद्वित्वस्य आकाशत्वव्याप्यत्वं नास्ति । आकाशत्वशून्ये घटेऽपि विद्यमानत्वात् । तथा च आकाशव्याप्यद्वित्वाप्रसिद्ध्या ''आकाशौ'' इति वाक्यस्य न प्रामाण्यम् । ''धवखदिरौ'' इत्यत्र धवत्वस्य खदिरत्वस्य च प्रत्येकं उद्देश्यतावच्छेदकत्वे धवखदिरगतद्वित्वं धवत्वव्याप्यं वा

खदिरत्वव्याप्यं वा न भवति । धवत्वशून्ये खदिरे खदिरत्वशून्ये धवे च विद्य-मानत्वात् । अतः धवद्वयवृत्तिद्वित्वमेव धवत्वव्याप्यम् । एवं खदिरद्वयवृत्तिद्वित्वमेव खदिरत्वव्याप्यमिति धवखदिरौ इति वाक्यात् धवद्वयस्य खदिरद्वयस्य च बोधापत्तिः । तद्वारणाय उत्तरपदस्य – खदिंरपदस्य धवखदिरसाहित्याश्रये लक्षणा अङ्गीक्रियते । तादृशसाहित्याश्रयम् उद्दिश्य द्विवचनेन द्वित्वं बोध्यते । अतः उद्देश्यतावच्छेदकं धवखदिरसाहित्यम् । तद्व्याप्यं धवद्वयवृत्तिद्वित्वं खदिरद्वयवृत्तिद्वित्वं च न भवति । एकधव-एकखदिर-साहित्यशून्ये धवान्तरे खदिरान्तरे च धवद्वयवृत्तिद्वित्वस्य खदिरद्वयवृत्तिद्वित्वस्य च सत्त्वेन तच्छून्या-वृत्तित्वरूपव्याप्यत्वासंभवात् । अपि तु एकधव-एकखदिरोभयवृत्तिद्वित्वमेव धवखदिरसाहित्यव्याप्यम् इति तादृशद्वित्वप्रकारेण एकधवखदिरयोरेव बोधः, न तु धवद्वयस्य खदिरद्वयस्य वा इति मीमांसकाः आहुः । तन्मतं शङ्कते – न च साहित्ये इति ग्रन्थेन इति भावः ।।

सहवृत्तित्वरूपम् इति । एकदेशवृत्तित्वरूपम् इत्यर्थः । **लक्ष्यम्** इति । लक्ष्यतावच्छेदकम् इत्यर्थः । **मूले साहित्यशून्ययोः** इति । गोत्वाश्वत्वाद्योः इत्यर्थः । ''गोत्वाश्वत्वे पश्य'' इत्यादौ गोत्वाश्वत्वयोः एकदेशवृत्तित्वरूप-साहित्याभावेऽपि द्वन्द्वः दृश्यते । अतः एकदेशवृत्तित्वरूपसाहित्याश्रये लक्षणा न संभवति इत्यर्थः ।।

एकक्रियान्वयित्वं साहित्यम् इति द्वितीयपक्षे गोत्वाश्वत्वयोः दर्शनरूप-एकक्रियान्वयित्वसत्त्वात् न द्वन्द्वानुपपत्तिः । तथापि ''धवखदिरौ पश्य छिन्धि'' इत्यत्र यथाक्रमं धवे दर्शनस्य खदिरे छेदनस्य च तात्पर्येण प्रयोगस्थले धवखदिरयोः एकक्रियान्वयित्वं विनापि द्वन्द्वदर्शनात् एकक्रियान्वयित्वमपि न लक्ष्यतावच्छेदकम् । एवं **साहित्यस्य अननुभवाच्च** इति दूषणान्तरं **मूले**

उक्तम् । तच्च दूषणं **एकक्रियान्वयित्वरूपं साहित्यम्** इति द्वितीयकल्पाभिप्रायेण इत्याशयेन व्याचष्टे व्याख्यायां – **वस्तुगत्या** इति ।।

शाब्दबोधाभावात् इति । ''धवखदिरौ छिन्धि'' इत्यत्र धवखदिरयोः छेदनरूप-एकक्रियान्वयित्वस्य वस्तुगत्या सत्त्वे तस्य शाब्दबोधे भानं नास्ति । कुतः इति चेत् – एकक्रियान्वयित्वं हि एकक्रियानिष्ठविषयता-निरूपित–संसर्गनिष्ठविषयतानिरूपित–शाब्दबोधीयविषयत्वम्। तच्च न शाब्दबोधविषयः, स्वस्मिन् स्वविषयकत्वस्य अननुभावात् इति भावः । अथ वा धवखदिरयोः धवत्वेन खदिरत्वेन च शाब्दबोधविषयत्वम् । न तु एकक्रियान्वयित्वेन रूपेण इत्याशयेन **शाब्दबोधाभावात्** इत्युक्तम् ।।

ननु ''धवखदिरौ'' इत्यत्र साहित्याश्रये लक्षणानङ्गीकारे सुपां उद्देश्यता-वच्छेदकव्याप्यसंख्याबोधकत्वनियमानुसारेण धवद्वयवृत्तिद्वित्वस्य खदिरद्वय-वृत्तिद्वित्वस्य वा बोधनीयतया धवद्वयस्य खदिरद्वयस्य वा बोधापत्तिः इति मीमांसकोक्ताक्षेपस्य किं समाधानम् इति चेत्, उच्यते – यत्र एकधर्मस्य द्वित्वाद्युद्देश्यतावच्छेदकत्वम्, तत्रैव उद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वं सुपां इति नियमः । यत्र धर्मद्वयादेः द्वित्वाद्युद्देश्यतावच्छेदकत्वम्, तत्र तादृशनियमः नास्ति । केवलपर्याप्तिसंबन्धेन प्रकृत्यर्थे द्वित्वस्य भानं तत्र स्वीक्रियते । तथा च विनैव साहित्यस्य उद्देश्यतावच्छेदकत्वं एकैकधवखदिरतात्पर्येण ''धवखदिरौ''इत्यादिप्रयोगोपपत्तेः, साहित्याश्रये नास्ति लक्षणायाः आवश्यकता। अधिकं व्युत्पत्तिवादे द्रष्टव्यम् ।।

इदम् उपलक्षणम् इति । साहित्यविशिष्टे लक्षणास्वीकारे पूर्वोक्तं दूषणम् वक्ष्यमाणदूषणस्यापि ज्ञापकम् इत्यर्थः । ''चैत्रमैत्रौ गच्छतः'' इत्यत्र यदि उत्तरपदस्य साहित्यविशिष्टे लक्षणा, तदानीं साहित्यावच्छिन्ने आख्यातार्थ-

गमनकर्तृत्वान्वयः वक्तव्यः । स च न संभवति । साहित्यस्य चैत्रमैत्रयोः द्वयोः व्यासज्यवृत्तितया गमनकर्तृत्वस्य च प्रत्येकं वर्तमानत्वेन अव्यासज्यवृत्तितया व्यासज्यवृत्तिधर्मावच्छिन्ने अव्यासज्यवृत्तिधर्मान्वयासंभवः इति भावः । यद्यपि ''द्वौ गच्छतः'' इत्यादौ व्यासज्यवृत्तिद्वित्वावच्छिन्ने अव्यासज्यवृत्तिगमनकर्तृ-त्वान्वयः दृश्यते, तथापि ''द्वौ गच्छतः'' इत्यत्र ''पुरुषौ'' इत्यादि पदान्तराध्याहारेणैव बोधः इति स्वीकारात् तत्र अव्यासज्यवृत्तिपुरुषत्वावच्छिन्ने एव गमनकर्तृत्वान्वय इति **दिनकरभट्टाशयः** ।।

मूले अत एव इति । द्वन्द्वे लक्षणायाः अभावादेव इत्यर्थः । ''राजपुरोहितौ सायुज्यकामौ यजेयाताम्'' इत्यत्र राजा च पुरोहितश्च राजपुरोहितौ इति द्वन्द्वो वा, राज्ञः पुरोहितौ राजपुरोहितौ इति षष्ठीतत्पुरुषो वा इति आशङ्क्य षष्ठीतत्पुरुषपक्षे पूर्वपदस्य राजसंबन्धिनि लक्षणा अङ्गीकरणीया भवति, द्वन्द्वे तु लक्षणायाः नास्ति इति द्वन्द्व एव आश्रयणीय इति सिद्धान्तितम् । द्वन्द्वेऽपि लक्षणा स्वीकारे तु तत्पुरुषत्यागे बीजाभावात् सिद्धान्तः न सङ्गच्छते इति भावः ।।

व्याख्यायां ननु यदि इति । यदि द्वन्द्वे लक्षणा नाश्रीयते, द्वन्द्वकर्मधारयोः को भेदः? उभयोरपि लक्षणाविरहात् इति आशङ्क्य यत्र समस्यमानपदार्थयोः भेदः तत्र द्वन्द्वः, यत्र समस्यमानपदार्थयोः अभेदः तत्र कर्मधारय इति समाधानम् आह इत्यर्थः ।।

मूले न च नीलघटयोः इति । नीलपदार्थस्य नीलरूपवतः घटपदार्थस्य च भेदाभावात् ''नीलघटयोः'' इत्यत्र द्वन्द्वः न उपपद्यते इति शङ्का । ''नीलघटयोः'' इति समासे नीलपदस्य नीलरूपवत्त्वे घटपदस्य घटत्वे च लक्षणा । नीलरूपवत्त्वघटत्वयोः इति तदर्थः । नीलरूपवत्त्वघटत्वयोः पदार्थयोः

भेदात् द्वन्द्वसमासः उपपद्यते । परन्तु नीलरूपवत्त्वघटत्वयोः अभेदः कथमिति शङ्कायां ''अभेद'' इत्यस्य आश्रयाभेदः इत्यर्थात् न अनुपपत्तिः इति समाधानम् ।।

समस्यमानपदार्थयोः भेदे सत्येव द्वन्द्वः इत्येतत् सप्रमाणं प्रदर्शयति – व्याख्यायां **चार्थे द्वन्द्वः** इत्यादिना । **समुच्चय** इति । ''घटं पटं च आनय'' इत्यत्र चार्थः समुच्चयः । समुच्चयो नाम परस्परनिरपेक्षस्य अनेकस्य एकस्मिन् अन्वयः । ''भिक्षामट गां च आनय'' इत्यत्र चकारस्य अन्वाचयः अर्थः । अन्वाचयो नाम अन्यतरस्य आनुषङ्गिकत्वम् । मिलितानामन्वयः इतरेतरयोगः । यथा रामश्च लक्ष्मणश्च रामलक्ष्मणौ । समूहः समाहारः । यथा अहिश्च नकुलश्च तयोः समाहारः अहिनकुलम् ।।

तत्र समुच्चायान्वाचययोः समासः नास्ति, सामर्थ्याभावात् । समासाघटकपदनिरपेक्षत्वं सामर्थ्यम् । ''घटं पटं च आनय'' इत्यत्र घटपटयोः समासाघटकानयनक्रियान्वयित्वेन तत्सापेक्षत्वात् न समासः । एवमेव अन्वाचयेऽपि । रामश्च लक्ष्मणश्च रामलक्ष्मणौ, अहिश्च नकुलश्च अहिनकुलम् इति इतरेतरयोगसमाहारयोः समासाघटकपदनिरपेक्षत्वरूपसामर्थ्यसत्त्वात् समासः । **चार्थस्य भेदव्याप्यत्वात्** इति । चकारार्थचतुष्टस्यापि भेदाविनाभूतत्वात् ''चार्थे द्वन्द्वः'' इति वदतः सूत्रकारस्य समस्यमानपदार्थभेदे सत्येव द्वन्द्वः इत्याशयः । **''प्रमाणप्रमेय''** इत्यादिसूत्रपरिग्रहः इति । प्रमाणस्य प्रमेयाभिन्नत्वेन प्रमाणप्रमेयपदार्थभेदाभावात् कथं द्वन्द्वः इति शङ्कायां पदार्थतावच्छेदकयोः प्रमाणत्वप्रमेयत्वयोः भेदादेव द्वन्द्वः । तथा च ''नीलघटयोः'' इत्यत्र नीलत्व-घटत्वयोः यथा नीलघटपदयोः लक्षणा, तथा ''प्रमाणप्रमेय'' इत्यादिन्यायसूत्रेऽपि,

प्रमाणपदस्य प्रमाणत्वे लक्षणा प्रमेयपदस्य प्रमेयत्वे लक्षणा । तयोः भेदात् द्वन्द्व इति भावः । तयोः इति । नीलत्वघटत्वयोः इत्यर्थः ।।

ननु इतरेतरयोगद्वन्द्वे समाहारद्वन्द्वे च "घटपटौ आनय", "अहिनकुलं पश्य" इत्यत्र समासघटकपदयोः समासाघटकानयनपदार्थान्वय्यर्थबोधकतया निरपेक्षत्वरूपसामर्थ्याभावात् कथं समासः इति चेत्, न – साक्षात्परंपरया वा निरूप्यनिरूपकभावापन्नविषयताप्रयोजकत्वमेव पदगतं सामर्थ्यम् । इतरेतरद्वन्द्वसमासस्थले समाहारस्थले च द्वयोरपि पदयोः निरूप्यनिरूपकभावापन्न-विषयताप्रयोजकत्वम् अस्ति । समुच्चयस्थले तु तन्नास्ति इति विशेषः । "घटपटौ आनय" इत्यत्र द्विवचनार्थद्वित्वस्य घटे पटे च अन्वयात् द्वित्वनिष्ठा प्रकारता घटनिष्ठविशेष्यतानिरूपिता पटनिष्ठविशेष्यता निरूपिता च भवति । घटपटनिष्ठविशेष्यतयोः साक्षात् निरूप्यनिरूपकभावाभावेऽपि द्वित्वनिष्ठप्रकारताद्वारा निरूप्यनिरूपकभावः अस्ति – घटनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारतानिरूपिता पटनिष्ठा विशेष्यता, पटनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारतानिरूपिता घटनिष्ठविशेष्यता इति । एवं च घटपदप्रयोज्यघटनिष्ठविषयतया परंपरया निरूपिता – द्वित्वनिष्ठप्रकारता द्वारा – या पटनिष्ठा विषयता तत्प्रयोजकत्वं पटपदस्य अस्ति इति पटपदं घटपदेन समर्थम् इति उच्यते ।।

"राजपुरुषः" इत्यत्र राजपदप्रयोज्यराजपदार्थनिष्ठविषयतया साक्षात् निरूपिता या पुरुषनिष्ठा विषयता तत्प्रयोजकत्वं पुरुषपदे अस्ति इति राजपुरुषपदयोः सामर्थ्यम् ।।

एवं च तत्पदप्रयोज्यविषयताविशिष्टविषयताप्रयोजकत्वं पदान्तरगतं तत्पदैकवाक्यत्वम् तत्पदसामर्थ्यं वा । वैशिष्ट्यं च स्वनिरूपितत्व–स्वनिरूपित-निरूपितत्वान्यतरसंबन्धेन इत्युक्तं भवति ।।

पदजन्य इति । विशेषणविशेष्यविधया पदार्थतावच्छेदकस्य पदार्थस्य च पदजन्यप्रतीतेः विषयत्वेन पदार्थतावच्छेदकयोः पदार्थयोः वा भेदे द्वन्द्वः साधुः । ''नीलघटयोः'' इत्यादौ पदार्थतावच्छेदकभेदादेव द्वन्द्वस्य साधुता ।।

न च – एवं पदार्थयोः भेदः कथं द्वन्द्वस्य साधुतानियामकः इति – वाच्यम् । ''घटश्च घटश्च घटौ'' इत्यत्र द्वन्द्वोपपत्तये पदार्थभेदस्य द्वन्द्वसाधुता-नियामकत्वोपगमात् ।।

न च – तत्र ''सरूपाणाम् एकशेषः'' इति सूत्रेण पदान्तरस्य लोपविधानात् द्वन्द्व एव नास्ति इति कृतं पदार्थभेदस्य द्वन्द्वसाधुतानियामकत्वोपगमेन इति – वाच्यम् । सरूपैकशेषस्य द्वन्द्वसमासापवादकत्वेन द्वन्द्वस्य साधुतास्थले एव सरूपैकशेषविधेः प्रवर्तनीयतया तत्र च पदार्थतावच्छेदकघटत्वस्य भेदाभावेन पदार्थयोः घटव्यक्त्योः भेदादेव द्वन्द्वस्य साधुताम् उपपाद्य तदपवादकसरूपैकशेषविधेः प्रवर्तनीयत्वात् इति भावः ।।

न च – एवं ''नीलघटः'' इति कर्मधारयस्थलेऽपि पदार्थतावच्छेदकभेद-सत्त्वेन द्वन्द्वप्रवृत्त्या कर्मधारयोच्छेदापत्तिः इति – वाच्यम् । समस्यमानपदार्थयोः अभेदविवक्षायामेव कर्मधारयविधानात् विशेषेण सामान्यबाधात् अभेदविवक्षाभाव एव द्वन्द्वसमासविधेः अभ्युपगमात् इति ध्येयम् ।।

सकृदुच्चरित इति । एकवारोच्चरितपदात् एकस्यैव अर्थस्य बोधेन घटपदात् एकदा नानाघटबोधासंभवात् इति आशङ्कायाम् इदमुक्तम् – इति तरङ्गिणीकाराः ।।

न च एवं ''सरूपाणाम्'' इति सूत्रवैयर्थ्यम् । एकघटपदेनैव नानाघटोपस्थितिसंभवेन पदान्तरं कल्पयित्वा तल्लोपविधानस्य अनुचितत्वात् इति आशङ्कायाम् आह – एकशेषविधेः इति । हरिपदे सूर्यत्वसिंहत्वादि-

पदार्थतावच्छेदकानां भेदेन द्वन्द्वप्रसक्त्या तत्रैव तदपवादकसरूपैकशेषविधेः सार्थकत्वात् इति भावः ।।

ननु ''सकृदुच्चरित'' इति व्युत्पत्यनभ्युपगे सैन्धवादिपदात् एकदैव लवणाश्वयोः बोधापत्तिः । न च – तात्पर्यज्ञानस्य नियामकत्वात् न अनुपपत्तिः इति – वाच्यम् । तात्पर्यसत्त्वेऽपि एकदा लवणाश्वयोः बोधाननुभवात् इति, अत आह – अस्तु वा इति । पदार्थैकदेश इति । सकृदर्थम् इत्यत्र अर्थशब्दार्थः वृत्त्या पदबोध्यः । तदेकदेशवृत्तौ सकृदित्यर्थस्य एकत्वस्य अन्वयः । तथा च सकृदुच्चरितः शब्दः एकया वृत्त्या स्वबोध्यम् अर्थं बोधयति इति व्युत्पत्यर्थकतया घटत्वावच्छिन्नैकशक्तेः नानाघटबोधोपपत्तिः इति भावः ।।

ननु ''हरयः तिष्ठन्ति'' इत्यादौ तात्पर्यसत्त्वे सिंहसूर्यादीनामपि बोधः अनुभवसिद्धः इति नानावृत्त्यापि नानार्थानाम् एकदा नानार्थबोधकत्वम् अङ्गीकरणीयम् इत्याशयेन आह – वस्तुतः इति । तथा च एकपदज्ञानात् एक एव शाब्दबोधः, न तु क्रमिकशाब्दबोधद्वयम् इत्येव उक्तव्युत्पत्तेः पर्यवसितार्थ इति भावः । ''घटाः'' इत्यादेरपि एकशेषोदाहरणत्वेन व्याकरणप्रतिपादितत्वात् आहुः इत्युक्म् – इति तरङ्गिणीकाराः ।।

मुक्तावली

समाहारद्वन्द्वे तु यदि समाहारोऽपि अनुभूयत इत्युच्यते, तदा ''अहिनकुलम्'' इत्यादौ परपदे अहिनकुलसमाहारे लक्षणा, पूर्वपदं तात्पर्यग्राहकम् ।।

न च – ''भेरीमृदङ्गं वादय'' इत्यत्र कथम्? अपेक्षाबुद्धिविशेषरूपस्य तस्य वादनासंभवात् इति – वाच्यम् । परंपरासंबन्धेन तदन्वयात् । एवं ''पञ्चमूली'' इत्यादावपि ।

परे तु – "अहिनकुलम्" इत्यादौ अहिः नकुलश्च बुध्यते । प्रत्येकम् एकत्वान्वयः । समाहारसंज्ञा च यत्र एकत्वं नपुंसकत्वं च "प्राणितूर्य..." इत्यादिसूत्रेण उक्तं तत्रैव । अन्यत्र एकवचनम् असाधु इति – वदन्ति ।।

"पितरौ", "श्वशुरौ" इत्यादौ पितृपदे जनकदम्पत्योः, श्वशुरपदे स्त्रीजनकदम्पत्योः लक्षणा । एवम् अन्यत्रापि । "घटाः" इत्यादौ तु न लक्षणा । घटत्वेन रूपेण नानाघटोपस्थितिसंभवात् ।।

दिनकरी

समाहार इति । "अहिनकुलम्" इत्यादौ अहिनकुलयोः समाहार इति प्रतीतेः अनुभवसिद्धत्वम् इत्यर्थः । वस्तुतः तत्र अहिनकुलमात्रप्रतीतेः न उत्तरपदे समाहारलक्षणा, न वा शक्तिः इत्यभिप्रेत्य उक्तम् यदि इति । पूर्वपदम् इति । "प्रत्ययानाम्" इति व्युत्पत्तेः विनिगमकत्वात् इति भावः । कथम् इति । कथं समाहारबोध इत्यर्थः । तत्र हेतुम् आह – वादनासंभवात् इति । अभिघाताख्यसंयोगावच्छिन्नक्रियाया एव वादनपदार्थतया धात्वर्थतावच्छेदकीभूत-तादृशाभिघाताख्यसंयोगस्य समाहारेऽसंभवेन वादनकर्मत्वासंभवात् इत्यर्थः । परंपरासंबन्धेन – स्वाश्रयवृत्तित्वरूपेण । तदन्वयात् – वादनकर्मत्वान्वयात् । एवम् इति । उत्तरपदे समाहारलक्षणा इत्यर्थः ।।

नव्यमतम् आह – परे तु इति । "बुध्यते" इत्यस्य न तु समाहारोऽपि इति शेषः । ननु यदि समाहारः न बुध्यते, तदा एकत्वस्य कुत्र अन्वयः? समाह्रियमाणयोः एकत्वाभावात्, अत आह – प्रत्येकम् इति । तत्र एकवचनं साधुत्वार्थम् इत्यपि वदन्ति ।।

ननु "पाणिपादम्" इत्यादेः समुदायस्य समाहारबोधकत्वाभावे कथं तस्य समाहारसंज्ञा इति, अत आह – समाहारसंज्ञा इति । तत्रैव इति । तथा च

पारिभाषिक्येव सा, **अन्वर्थत्वे अन्यत्र अतिप्रसङ्गात्** इति भावः । ननु तादृशसंज्ञायाः किं प्रयोजनम्? अत आह – **अन्यत्र** इति । समाहारातिरिक्तद्वन्द्वे इत्यर्थः । तथा च नित्यैकवचनक्लीबलिङ्गत्वादिपदसंस्कारार्थत्वात् न तस्या वैयर्थ्यम् इति भावः ।।

पितरौ श्वशुरौ इत्यादौ इति । "चैत्रस्य पितरौ" इत्यादौ **विरूपैकशेषस्थले** इत्यर्थः । **लक्षणा** इति । **एकस्य चैत्रादेः** पितृद्वयासंभवेन तत्र **विरूपैकशेषं** विना गत्यभावात् इति भावः । **विरूपैकशेषत्वेऽपि** तत्र लुप्तमात्रादिशब्दस्मरणेनैव शाब्दबोधात् न लक्षणा इति **अन्ये** ।।

एवम् अन्यत्रापि इति । "पुमान् स्त्रिया...." इत्यनेन यत्र एकशेषः तत्र, दम्पतीपूजाप्रकरणे "ब्राह्मणौ आनय" इत्यादौ, "शिवौ नमस्कुर्यात्" इत्यादौ, "भ्रातरौ" "पुत्रौ" इत्यत्रापि **प्रमाणान्तरेण स्त्रीपरत्वज्ञाने**, "भ्रातृपुत्रौ स्वसृदुहितृभ्यां...." इति विरूपैकशेषात् भ्रातृपदे भ्रातृस्वस्रोः, पुत्रपदे च पुत्रदुहित्रोः लक्षणा इत्यर्थः ।

न लक्षणा इति । **बहुत्वान्वययोग्यानैकोपस्थितेः** शक्तित एव संभवात् इति भावः ।।

राजीवोल्लासः

ननु **"अहिनकुलम्"** इत्यादौ उत्तरपदस्य समाहारे लक्षणा, पूर्वपदं **तात्पर्यग्राहकम्"** इति **मूलोक्तिः** न सङ्गच्छते, पूर्वपदस्य समाहारे लक्षणा, उत्तरपदं तात्पर्यग्राहकम् इत्यपि वक्तुं शक्यत्वात् इति आशङ्क्य आह – **प्रत्ययानाम्** इति । अहिनकुलपदोत्तरप्रत्ययार्थसंख्याकारकादेः प्रकृत्यर्थे एव अन्वयः वाच्यः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति नियमात्। तदनुसारेण उत्तरपदस्यैव समाहारे लक्षणा युक्ता । तस्यैव प्रत्ययप्रकृतित्वात्।

पूर्वपदस्य तु प्रत्ययप्रकृतित्वाभावात् तदर्थान्विततत्वं प्रत्ययार्थस्य न संभवति । अतः उत्तरपदस्य लक्षणा इत्युक्तम् । **विनिगमकत्वात्** इति । अन्यतरपक्षनिर्धारकत्वात् इत्यर्थः ।।

यद्यपि समासोत्तरं प्रत्ययविधानात् ''अहिनकुल'' इति समासस्यैव प्रकृतित्वम्, नतु तद्घटकस्य नकुलपदस्य, तथापि प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ-बोधकत्वम् इति नियमे निविष्टस्य प्रकृतिपदस्य प्रत्ययाव्यवहितपूर्ववर्तीत्यर्थः । अतः न विरोध इत्याशयः ।।

समाहारबोध इति । द्वितीयार्थकर्मत्वविशेष्यकसमाहारप्रकारकशाब्दबोधः कथम् उपपद्यते । समाहारस्य वादननिरूपितकर्मत्वान्वययोग्यताविरहात् इति भावः । **तत्र हेतुम् आह** इति । तादृशशाब्दबोधानुपपत्तौ योग्यताविरहरूपं हेतुम् आह इत्यर्थः । वादनासंभवम् उपपादयति – **अभिधाताख्य** इत्यादिना । **वादनासंभवात्** इत्यस्य वादनकर्मत्वासंभवात् इत्यर्थः । कर्मत्वं नाम धात्वर्थता-वच्छेदकफलाश्रयत्वम् । ''भेरीमृदङ्गं वादय'' इत्यत्र णिजन्तधात्वर्थः शब्दजनकसंयोगानुकूलः व्यापारः । धात्वर्थतावच्छेदकं फलं शब्दजनक-संयोगः । तदाश्रयत्वं भेर्यां मृदङ्गे च अस्ति, न तु बुद्धिविशेषरूपे तत्समूहे इति समूहस्य धात्वर्थतावच्छेदकफलाश्रयत्वरूपकर्मत्वासंभवात् कर्मत्वान्वययोग्यता नास्ति इति भावः । अभिघाताख्यसंयोगः शब्दजनकः संयोगः । तदवच्छिन्ना अनुकूलतासंबन्धेन तद्विशिष्टा क्रिया तस्याः इत्यर्थः । तथा च शब्दजनक-संयोगानुकूलः व्यापारः धात्वर्थः । द्वितीयार्थः आधेयत्वम् । तस्य संयोगे अन्वयः वक्तव्यः । संयोगे च समाहारवृत्तित्वं बाधितम् इति भावः । **स्वाश्रयवृत्तित्वरूपेण** इति । स्वं समाहारः, तदाश्रयः भेरी मृदङ्गं च तद्वृत्तित्वं वादनकर्मत्वे । **कर्मत्वान्वयात्** इति । वादनकर्मत्वे अन्वयात् इत्यर्थः ।।

कर्मत्वस्य द्वितीयार्थत्वे तत्र प्रकृत्यर्थस्य समूहस्य स्वाश्रयवृत्तित्वसंबन्धेन अन्वयः । कर्मत्वस्य निरूपकतासंबन्धेन धात्वर्थेऽन्वयः । आधेयत्वस्य द्वितीयार्थत्वे, तत्र प्रकृत्यर्थस्य समूहस्य स्वाश्रयनिरूपितत्वसंबन्धेन अन्वयः । आधेयत्वस्य धात्वर्थतावच्छेदकफले आश्रयतासंबन्धेन अन्वयः । तथा च समूहाश्रयनिष्ठ-कर्मतानिरूपक–वादनानुकूलकृतिमान् इति वा, समूहाश्रयनिरूपित-आधेयत्वाश्रय-अभिघाताख्यसंयोगजनकव्यापारानुकूलकृतिमान् इति वा बोधः ।।

अन्वर्थत्वे अन्यत्र अतिप्रसङ्गात् इति । समाहारार्थविवक्षायामेव समाहारद्वन्द्वः इति स्वीकारे घटपटादीनां समाहारविवक्षायामपि ''घटपटम्'' इत्यादिसमाहारद्वन्द्वप्रसङ्गः इत्यर्थः ।।

पदसंस्कारार्थत्वात् इति । पदस्य – अहिनकुलादिपदस्य संस्कारः – विलक्षणधर्मः स च नपुंसकत्वनित्यैकवचनान्तत्वरूपः । तदर्थत्वात् – तत्प्रयोजकत्वात् । समाहारद्वन्द्व एव तथा उपगमात् इति भाव : ।।

विरूपैकशेषस्थले इति । ''सरूपाणाम् एकशेषः'' इति सूत्रेण समानानुपूर्वीकाणां समानार्थकपदानां एकशेषः विहितः । ''रामौ, रामाः'' इत्यादिकम् उदाहरणम् । ''विरूपाणाम् अपि समानार्थानाम्'' इति वार्तिकेन समानार्थकानां विभिन्नानुपूर्वीकपदानां एकशेषः उक्तः । ''वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ'' इत्यादिकम् उदाहरणम् । ''पिता मात्रा'', ''श्वशुरः श्वश्वा'' ''भ्रातृपुत्रौ स्वसृदुहितृभ्याम्'' इत्यादिसूत्रैः पितृश्वशुरभ्रात्रादिपदानां मातृश्वश्रूस्वस्रादिशब्दैः सहोक्तौ पितृश्वशुरभ्रात्रादिपदानां शेषः । मातृश्वश्रूस्वस्रादिपदानां लोपश्च विहितः । स च एकशेषः विरूपाणां भिन्नार्थकानां च सहोक्तौ भवति । **दिनकर्यां विरूपैकशेषस्थले** इत्यनेन सूत्रकारोक्तः विरूपाणां भिन्नार्थकानां च पदानां एकशेषः विवक्षितः । तथा च ''पितरौ''

इत्यत्र पितृपदस्य जनकदम्पत्योः – जनकमातापित्रोः लक्षणा । श्वशुरपदस्य पत्नीजनकदम्पत्योः लक्षणा ।।

ननु "पितरौ" इत्यादौ पितृद्वयविवक्षया सरूपैकशेष एव भवतु इत्याशङ्क्य आह – **एकस्य चैत्रादेः** इति । अत्र दत्तकस्य पितृद्वयसंभवेन विरूपैकशेषं विना गत्यभाववचनम् असङ्गतम् इति यत् **प्रभाकारैः** अवादि, तत् **दिनकरभट्टाशयानभिज्ञानमूलकम्** । दत्तादिभिन्नव्यक्तिविशेषबोधनायैव "चैत्रादेः" इत्यस्य उपादानात् । अन्यथा तस्य वैयर्थ्यप्रसङ्गात् । "जनकपुंस्त्वावच्छिन्नस्यैव पितृशब्दार्थत्वात्" इति तरङ्गिण्यनुसरणे गतिगन्धस्याप्यभावाच्च इति **सुबोधिनीकाराः** । **विरूपैकशेषं विना** इति । पिता च माता च पितरौ इति विरूपैकशेषं विना इत्यर्थः । अनेन "श्वशुरौ", "पुत्रौ" इत्यादौ सरूपैकशेषोऽपि संभवति इति सूचितम् । एकस्य चैत्रादेः श्वशुरद्वयस्य पुत्रद्वयस्य च संभवात् ।।

ननु "माता च पिता च पितरौ" इत्यत्र मातृशब्दस्य लोपाङ्गीकारे मातुः उपस्थापकस्य पदस्य अभावात् पितृशब्दश्रवणेन पितुरेव उपस्थितिः भवति न मातुः इति कथं पितृपदात् मातृपित्रोः द्वयोः शाब्दबोधः इति, अत आह – **विरूपैकशेषत्वेऽपि** इति । विरूपाणां पदानां मध्ये एकस्य शेषे सत्यपि लुप्तस्य मात्रादिशब्दस्य स्मरणम्, ततः तदर्थस्य स्मरणम्, तदनन्तरमेव शाब्दबोधः इत्यङ्गीकारात् लक्षणाया अपि आवश्यकता नास्ति इति **केचित्** वदन्ति ।।

मुक्तावल्यां तु पितृपदस्यैव जनकदम्पत्योः लक्षणास्वीकारात् पितृपदश्रवणानन्तरं लक्षणाख्यावृत्तिज्ञानवतां मातापित्रोः द्वयोरपि स्मरणं भवति, अतः द्वयोः शाब्दबोधः भवति इत्युक्तम् ।।

अन्ये इत्यनेन मात्रादिशब्दस्मरणकल्पे अस्वरसः सूचितः । तद्बीजं तु अस्मृतमातृशब्दस्यापि यः मातृविषयकशाब्दबोधानुभवः तस्य अपलापः, शब्दस्य अर्थस्य च द्वयोः स्मरणकल्पनं च इति गौरवम् ।।

प्रमाणान्तरेण इति । अनुमानादिना इत्यर्थः । **स्त्रीपरत्वज्ञाने** इति । भ्रातृपदस्य भ्रातृभगिन्युभयतात्पर्यकत्वज्ञाने पुत्रपदस्य पुत्रीपुत्रोभयपरत्वज्ञाने च इत्यर्थः । इदं च लक्षणायां बीजप्रदर्शनम् । तात्पर्यानुपपत्तेः लक्षणाबीजत्वात् इत्यर्थः ।।

बहुत्वान्वययोग्य इति । "घटाः" इत्यादौ बहुवचनार्थबहुत्वान्वययोग्यानां अनेकेषां घटानां घटपदस्य घटत्वावच्छिन्ने शक्त्यैव संभवात् अनेकेषु घटेषु न लक्षणा इत्यर्थः ।।

मुक्तावली

कर्मधारयस्थले तु "नीलोत्पलम्" इत्यादौ अभेदसंबन्धेन नीलपदार्थः उत्पलपदार्थे प्रकारः । तत्र च न लक्षणा । अत एव "निषादस्थपतिं याजयेत्" इत्यत्र न तत्पुरुषः, लक्षणापत्तेः । किन्तु कर्मधारयः, लक्षणाभावात् ।

न च – निषादस्य सङ्करजातिविशेषस्य वेदानधिकारात् याजनासम्भव इति – वाच्यम् । निषादस्य विद्याप्रयुक्तेः तत एव कल्पनात् । लाघवेन मुख्यार्थस्य अन्वये तदनुपपत्त्या कल्पनायाः फलमुखगौरवतया अदोषत्वात् इति ।।

दिनकरी

न तत्पुरुष इति । स्वीक्रियते इति शेषः । **वेदानधिकारात्** इति । "स्त्रीशूद्रौ नाधीयाताम्" इत्यनेन निषेधात् इति भावः । **याजनासम्भव** इति । अध्ययनविधिसिद्धज्ञानाभावात् इति भावः । **तत एव** इति । श्रुतिबोधित-याजनानुपपत्त्यैव इत्यर्थः ।

ननु निषादस्य विद्याकल्पने गौरवम्, अत आह – लाघवेन इति । ननु ''स्त्रीशूद्रौ नाधीयाताम्'' इति श्रुतेः अप्रामाण्यापत्तिभिया लाघवम् अकिञ्चित्करम् । शूद्रपदस्य निषादेतरशूद्रपरत्वे निषादस्य वेदान्तराध्ययनप्रसङ्गः । अध्ययनपदस्य यागोपयुक्ताध्ययनेतराध्ययनपरत्वे च शूद्रान्तरस्यापि यागोपयुक्ताध्ययनप्रसङ्गः इति चेत्, न । तत्र विशेषतः प्राप्ताध्ययनेतराध्ययनपरत्वात् अध्ययनपदस्य । तेन निषादस्य यागोपयुक्ताध्ययनेतराध्ययननिषेधः, शूद्रान्तरस्य तु अध्ययनमात्रनिषेधः सिद्ध्यति इति ।।

अदोषत्वात् इति । ननु लक्षणाकल्पनेऽपि न दोषः । शक्यसंबन्धरूपलक्षणायाः क्लृप्तत्वात् ।।

न च – शाब्दबोधं प्रति लक्षणाज्ञानस्य हेतुत्वकल्पनम् अधिकम् इति – वाच्यम् । निषादानां स्थपतिः इति व्युत्पत्या निषादसंबन्ध्यभिन्नस्थपत्यनुभवस्य लौकिकवाक्ये क्लृप्तत्वात् तदनुरोधेन लक्षणाज्ञानहेतुत्वस्य सर्वसिद्धत्वेन वेदे अधिकस्य अकल्पनात् इति चेत्,

न । शक्यसंबन्धरूपलक्षणाज्ञानस्य शक्तिज्ञानं विना असंभवेन शक्तिज्ञानस्य तत्र उभयसिद्धतया भवन्मते वैदिकवाक्यजन्यशाब्दबोधात् पूर्वं लक्षणाज्ञानव्यक्तिकल्पनागौरवस्य वज्रलेपत्वात् इति ।।

राजीवोल्लासः

''नीलोत्पलम्'' इत्यादिकर्मधारयस्थले नीलाभिन्नोत्पलम् इति बोधात् तत्र च अभेदांशस्य समासघटकपदबोध्यतया न लक्षणां विना उपपत्तिः इति भ्रमं निवर्तयितुम् आह – **मूले कर्मधारयस्थले** इति । तथा च न तत्र अभेदप्रकारिका उपस्थितिः शाब्दबुद्धिर्वा इति न लक्षणा इति भावः । अपि तु अभेदः संसर्गतयैव भासते ।।

न लक्षणा इति । न समासाधीनलक्षणा इत्यर्थः । तेन नीलपदस्य अत्र नीलरूपविशिष्टे लक्षणायाः सत्त्वेऽपि न असङ्गतिः । अन्यथा ''नीलशुक्लौ'' इत्यादिद्वन्द्वेऽपि विशिष्टे लक्षणासत्त्वात् द्वन्द्वे न लक्षणा इति अभियुक्तोक्ति-विरोधापत्तेः ।।

मूले **विद्याप्रयुक्तेः** इति । विद्याप्राप्तेः इत्यर्थः । व्याख्यायां **अध्ययनविधि-सिद्ध** इति । ''अर्थी समर्थो विद्वान्'' इत्यादिना यागोपयुक्तद्रव्यवतः शक्तिमतः ज्ञानवतश्च यागे अधिकारित्वप्रदर्शने ज्ञानस्य च ''स्वाध्यायोऽध्येतव्यः'' इति श्रुत्या प्रयोजनवदर्थप्रतीतिजनकस्वाध्यायः वेदः कर्तव्य इत्यर्थकतया वेदाध्ययनेनैव ज्ञानसंपादनस्य बोधितत्वात् । उक्तनिषेधश्रुत्या च निषादस्य अध्ययनस्य निषिद्धत्वात् वेदाध्ययनजन्यज्ञानाभावेन निषाधस्य यजनासभवः । तदसंभवे तद्याजनस्यापि असंभवः इति भावः इति तरङ्गिणीकाराः ।।

याजनानुपपत्त्यैव इति । श्रुतिबोधितं यत् याजनम् तस्य अनुपपत्या इत्यर्थः । निषाधस्थपतिकर्मकयाजनं श्रुतिबोधितम् । तच्च निषाधस्थपतिकर्तृक-यजनानुकूलव्यापारः । तत्कर्तृकयजनं च तस्य वेदाध्ययनं विना अनुपपन्नम् इति भावः ।।

गौरवम् – कल्पनागौरवम् इत्यर्थः । **लाघवम् अकिञ्चित्करम्** इति । लक्षणाऽकल्पनाप्रयुक्तलाघवं – लक्षणायाः अकल्पनया प्रयुक्तं लाघवं–दोषावहम् इत्यर्थः । उक्तश्रुतेः अप्रामाण्यापत्त्या शक्यार्थान्वये लाघवेऽपि तदानादरणीयम् इति भावः ।।

ननु ''मा हिंस्यात् सर्वा भूतानि'' इति निषेधविधिना हिंसामात्रस्य निषिद्धत्वे ''वायव्यं श्वेतमालभेत भूतिकामः'' इति यागे पशुहिंसाविधानबलात् विहितहिंसातिरिक्तहिंसानिषेधपरत्वमेव यथोक्तनिषेधविधेः स्वीक्रियते, तथा अत्रापि

''निषादस्थपतिम्'' इति विधानबलात् ''न स्त्रीशूद्रौ'' इत्यादिनिषेधवाक्ये शूद्रपदं वा निषादातिरिक्तशूद्रपरम्, अधिपूर्वकइङ्धात्वर्थः वा यागोपयुक्ताध्ययन-भिन्नाध्ययनार्थकः अङ्गीकरणीयः, यथाश्रुतेऽप्रामाण्यापत्तेः इति आशङ्कां निराकुरुते – **शूद्र** इति । **तत्र** इति । **विशेषतः** – विशेषविधानेन प्राप्तं यत् अध्ययनं तदतिरिक्ताध्ययनमेव उक्तश्रुतेः तात्पर्यार्थः । तथा च ''निषादस्थपतिम्'' इति विधिना प्राप्तं निषादस्य यागोपयुक्तवेदाध्ययनम् इति तदतिरिक्तवेदाध्ययनं निषादस्य, वेदाध्ययनमात्रं निषादातिरिक्तशूद्रमात्रस्य निषिद्धम् इति भावः । **अदोषत्वात्** इति । ननु ''निषादस्थपतिम्'' इत्यत्र कर्मधारयोपगमे लाघवम्, तत्पुरुषोपगमे निषादपदस्य निषादसंबन्धिनि लक्षणायाः कल्पनीयतया गौरवात् । एवञ्च विधितः निषादस्य यजने प्राप्ते तदनुरोधेन निषादस्य अध्ययनकल्पनेऽपि न कल्पनागौरवम् । फलमुखगौरवस्य अदोषत्वात् इत्युक्तम् । तदिदम् असङ्गतम् । शक्यसंबन्धरूपलक्षणायाः सर्वसिद्धतया तस्याः अकल्पनीयत्वात् इति तत्पुरुषोपगमेऽपि न किञ्चिद्गौरवम् । अतः कर्मधारयम् उपगम्य निषादस्य अध्ययनकल्पनमेव गौरवग्रस्तम् इति शङ्कते - **ननु** इति ।।

लक्षणायाः क्लृप्तत्वेऽपि तज्ज्ञानस्य वेदजन्यशाब्दं प्रति हेतुत्वकल्पने गौरवम् अक्षुण्णमेव इति शङ्कते – **न च** इति । लौकिकशाब्दबोधानुरोधेन लक्षणाज्ञानस्यापि लाक्षणिकार्थविषयकशाब्दबोधं प्रति हेतुतायाः क्लृप्ततया तत एव वैदिकशाब्दस्यापि उपपत्त्या वेदस्थले कार्यकारणभावान्तरकल्पनाविरहात् इति समाधत्ते – **निषादानाम्** इति । लक्षणाज्ञानहेतुतायाः आधिक्यविरहेऽपि वेदजन्यशाब्दबोधव्यक्तीनाम् अव्यवहितपूर्वकाले लक्षणाज्ञानव्यक्तीनाम् अनन्तानां कल्पनाप्रयुक्तगौरवं वज्रलेपरूपमेव ।।

न च - तन्मतसिद्धशक्तिज्ञानव्यक्तिकल्पनास्थानीयलक्षणाज्ञानकल्पनम् इति न आधिक्यम् इति – वाच्यम् । शक्यसंबन्धरूपलक्षणाज्ञाने विशेषणज्ञानविधया शक्तिज्ञानस्य आवश्यकतया शक्तिज्ञानव्यक्तीनां वेदजन्यशाब्दबोधात् पूर्वम् उभयवादिसिद्धत्वात् इति समाधत्ते – **शक्यसंबन्धरूप** इति – इति तरङ्गिणीकाराः ।।

मुक्तावली

''उपकुम्भम्'', ''अर्धपिप्पली'' इत्यादौ परपदे तत्संबन्धिनि लक्षणा, पूर्वपदार्थप्रधानतया च अन्वयबोध इति ।।

इत्थं च समासे न क्वापि शक्तिः, पदशक्त्यैव निर्वाहात् इति ।।

दिनकरी

उपकुम्भम् अर्धपिप्पली इत्यादौ इति । अत्र कुम्भस्य समीपम् इति अस्वपदविग्रहः । अव्ययीभावस्य नित्यसमासत्वात् । **पूर्वपदार्थप्रधानतया** इति । कुम्भपदलक्षितस्य कुम्भसंबन्धिनः उपपदार्थसमीपे अभेदान्वयात् कुम्भसम्बन्ध्यभिन्नसमीपम् इति उपपदार्थविशेष्यकः अन्वयबोधः इत्यर्थः ।।

केचित्तु – उपपदार्थः सामीप्यम्, न तु समीपम् । समीपे उपपदलक्षणास्वीकारे तु पदद्वयलक्षणापेक्षया कुम्भपदस्यैव कुम्भसमीपे लक्षणा, उपपदं तात्पर्यग्राहकम्; कुम्भसमीपम् इति अन्वयबोधः इति – **आहुः** ।।

अत्र यद्यपि अर्धपिप्पली इति तत्पुरुषे शक्तिनिराकरणं पुनरुक्तम्, पूर्वं तत्पुरुषे तन्निरासात्, तथापि पूर्वम् उत्तरपदार्थप्रधानराजपुरुषादौ तन्निराकरणं पूर्वपदलक्षणया, इह च पूर्वपदार्थप्रधाने अर्धपिप्पली इत्यादितत्पुरुषे उत्तरपदलक्षणया तन्निराकरणम् इति भेदात् अपौनरुक्त्यम् इति बोध्यम् ।।

वैयाकरणमतं दूषयति – इत्थं च इति । **पदशक्त्यैव** इति । समासघटकीभूतपदशक्तिलक्षणाभ्याम् इत्यर्थः ।।

राजीवोल्लासः

अस्वपद इति । समस्यमानपदमात्रघटितविग्रहः स्वपदविग्रहः, तदन्य इत्यर्थः । तादृशविग्रहकसमास एव नित्यसमास इति व्यवह्रियते – इति तरङ्गिणीकाराः ।।

कुम्भपदलक्षितस्य इति । यद्यपि – ''घटशून्यम्'' इत्यादौ घटपदार्थस्य भेदसंबन्धेन शून्यपदार्थैकदेशान्वयपक्षस्य पूर्वं दर्शितस्य अनुसरणे ''उपकुम्भम्'', ''अर्धप्पिली'' इत्यादावपि कुम्भपिप्पल्यादेः निरूपितत्वसंबन्धेन उपार्धादिपदैकदेश-सामीप्यार्धत्वादौ अन्वयसंभवात् न लक्षणाया आवश्यकता । एवं ''राजपुरुष'' इत्यादावपि – तथापि निपातातिरिक्तनामार्थस्य भेदसंबन्धेन अन्वयस्य सिद्धान्ते अनङ्गीकारात् लक्षणादरणम् आवश्यकम् इति भावः ।।

एवमपि अव्ययीभावघटकोपादिपदस्य अव्ययभिन्ननामत्वाभावात् तदर्थे कुम्भादिरूपनामार्थस्य भेदान्वये नियमभङ्गाभावात् लक्षणादरणक्लेशः चिन्त्यः इति सुबोधिनीकाराः ।।

आहुः इति अस्वरसोद्भावनम् । तद्बीजं तु – समासानन्तर्भाविन क्वापि ''उप''पदस्य प्रयोगाभावेन ''उप''पदस्य सामीप्यार्थकतायाः निश्चेतुम् अशक्यतया अस्वपदविग्रहस्थले समानार्थकपदान्तरेणैव विग्रहवाक्यस्वीकाराच्च, समीपपदस्य सामीप्यविशिष्टार्थकतया ''उप''पदस्यापि तदर्थकताया एव उचितत्वात् । संभवति सार्थकत्वे किंचित्पदस्य निरर्थकताकल्पनम् अयुक्तम् इति मन्तव्यम् इति तरङ्गिणीकाराः ।।

।। शाब्दबोधकारणकथनम् ।।

कारिकावली

आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ।। ८२ ।।
कारणम्...

मुक्तावली

आसत्तिः इत्यादि । आसत्तिज्ञानं, योग्यताज्ञानम्, आकाङ्क्षाज्ञानं, तात्पर्यज्ञानं च शाब्दबोधे कारणम् ।।

दिनकरी

''आसत्तिर्योग्यताकाङ्क्षा'' इति मूलात् आसत्तेः स्वरूपसत्या एव कारणत्वं लभ्यते, न तु योग्यताज्ञानादिवत् आसत्तिज्ञानस्य । ज्ञानपदस्य समासघटकत्वेन समासाघटकासत्तिपदार्थेन अनन्वयात् । स्वरूपसत्याश्च आसत्तेः कारणत्वं न संभवति । ''गिरिर्भुक्तम्'' इत्यादौ गिरिपदाग्निमत्पदयोः अव्यवधानभ्रमेण शाब्दबोधोदयेन व्यभिचारात् । अतः मूलस्थम् आसत्तिपदम् आसत्तिज्ञानपरतया व्याचष्टे – **आसत्तिज्ञानम्** इति । ''आसत्तियोग्यता'' इति विसर्गशून्यपाठस्तु ऋजुरेव ।।

राजीवोल्लासः

''आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते । कारणम्'' इति मूलम् । आसत्तिः इति सविसर्गपाठे आसत्तिः योग्यताकाङ्क्षातात्पर्यज्ञानं च शाब्दबोधकारणम् इति लभ्यते । योग्यताकाङ्क्षातात्पर्याणां ज्ञानम् इति द्वन्द्वगर्भषष्ठीतत्पुरुषेण आसत्तिः योग्यताज्ञानं आकाङ्क्षाज्ञानं तात्पर्यज्ञानं च कारणम् इति यावत् । आसत्तिज्ञानस्य तु कारणत्वं न लभ्यते ।

समासघटकज्ञानपदस्य समासाघटकेन आसत्तिपदेन अन्वयासंभवात् । तथा च स्वरूपतः विद्यमानायाः आसत्तेरेव कारणत्वलाभात् ''गिरिर्भुक्तम् अग्निमान् देवदत्तेन'' इत्यत्र गिरिपदाग्निमत्पदयोः भुक्तपदव्यवहितयोः असत्त्यामपि अव्यवधानरूपासत्तौ अव्यवधानभ्रमेण शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचारात् आसत्तेः कारणत्वोक्तिः न युज्यते इत्यालोच्य आसत्तिपदम् आसत्तिज्ञानपरतया व्याचष्टे **मुक्तावल्याम्** इति आह – **आसत्तिर्योग्यताकाङ्क्षा इति मूलात्** इति । **अनन्वयात्** इति । सामर्थ्याभावेन इति शेषः । **विसर्गशून्यपाठस्तु** इति । ''आसत्तियोग्यते'' त्यादि निर्विसर्गपाठे आसत्तिश्च योग्यता चाकाङ्क्षा च तात्पर्यं च इति तात्पर्यान्तानां द्वन्द्वसमासं ततः ज्ञानपदेन आसत्तियोग्यता-काङ्क्षातात्पर्याणां ज्ञानम् इति षष्ठीसमासं च आश्रित्य आसत्तेरपि ज्ञानेन अन्वयसम्पादनेन आसत्तिज्ञानस्य कारणत्वं लभ्यते इति भावः ।।

।। आसत्तिनिरूपणम् ।।

कारिकावली

........सन्निधानं तु पदस्यासत्तिरुच्यते ।

मुक्तवली

तत्र आसत्तिपदार्थम् आह – **सन्निधानं तु** इति । (अन्वयप्रतियोग्यनुयोगि-पदयोः अव्यवधानम् आसत्तिः । तज्ज्ञानं शाब्दबोधे कारणम् । क्वचित् व्यवहितेऽपि अव्यवधानभ्रमात् शाब्दबोधात् इति केचित् । वस्तुतस्तु अव्यवधानज्ञानस्य अनपेक्षितत्वात्) यत्पदार्थेन यत्पदार्थस्य अन्वयः अपेक्षितः, तयोः अव्यवधानेन उपस्थितिः शाब्दबोधे कारणम् । तेन ''गिरिर्भुक्तम् अग्निमान् देवदत्तेन'' इत्यादौ न शाब्दबोधः ।।

''नीलो घटः द्रव्यं पटः'' इत्यादौ आसत्तिभ्रमात् शाब्दबोधः । आसत्तिभ्रमात् शाब्दभ्रमाभावेऽपि न क्षतिः ।।

दिनकरी

ननु ''सन्निधानं तु पदस्यासत्तिरुच्यते'' इति मूलोक्तस्य आसत्तिलक्षणस्य ''गिरिर्भुक्तम्'' इत्यत्र अतिव्याप्तिः । तत्रापि गिरिपदभुक्तपदयोः अव्यवधानसत्त्वात्, अतः व्याचष्टे – **यत्पदार्थ** इति । **अपेक्षितः** – तात्पर्यविषयः । **तयोः** इति । **तयोः पदयोः इत्यर्थः** । तादृशपदयोः अव्यवधानम् आसत्तिः, तदुपस्थितिः कारणम् इत्यर्थः । **तथा च** गिरिपदार्थभुक्तपदार्थयोः अन्वयः न तात्पर्यविषयः, अपि तु गिरिपदार्थाग्निमत्पदार्थयोरेव इति **तयोः अव्यवधानाभावात् न अतिव्याप्तिः** इति भावः । **तेन** – एतादृशयत्तत्पदगर्भासत्तिनिर्वचनेन ।।

ननु **''नीलो घटः** द्रव्यं पटः'' इत्यत्र नीलपदार्थपटपदार्थयोः यत्र अन्वयः वक्तुः तात्पर्यविषयः, न तु नीलपदार्थघटपदार्थयोः, तत्र नीलपदघटपदयोः आसत्तिः न स्यात् । तत्तदर्थान्वयस्य तात्पर्यविषयत्वाभावात् । अतः तत्र इष्टापत्तिम् आह – **नीलो घटः** इत्यादिना । **तर्हि** तत्र ''नीलो घटः'' इति कथं शाब्दबोधः? इति, अत आह – **भ्रमात् शाब्दबोध** इति । तथा च भ्रमात् शाब्दबोधमात्रम्, न तु तत्र आसत्तिः इति भावः ।।

ननु तत्र यदि आसत्तिभ्रमः तदा शाब्दबोधः भ्रमात्मकः स्यात् । न च इष्टापत्तिः । घटे नीलस्य सत्त्वेन विषयबाधाभावात् । आसत्तिभ्रमात् शाब्दप्रमाङ्गीकारे च आसत्तिभ्रमात् शाब्दभ्रमः इति **प्राचीनगाथाविरोधः** इति, अत आह – **आसत्तिभ्रमात्** इति । **न क्षतिः** इति । **आसत्तिभ्रमस्य** न शाब्दभ्रमप्रयोजकत्वम्, किन्तु योग्यताभ्रमस्य । ''आसत्तिभ्रमात् शाब्दभ्रमः'' इति **प्राचीनगाथा** तु निर्युक्तिकत्वात् अश्रद्धेया इति भावः ।।

क्वचित् पुस्तके ''न शाब्दबोधः....'' इत्यनन्तरं ''नीलो घटः'' इत्यतः पूर्वं ''तात्पर्यगर्भा च आसत्तिः'' इति पाठः । स च ''यत'' इत्यादिपूरणेन यतः तात्पर्यगर्भा – **तात्पर्यविषयीभूतान्वयबोधविषयीभूतार्थबोधकपदान्वयरूपा पूर्वनिरुक्ता आसत्तिः**, अतः न शाब्दबोधः इत्यर्थकतया व्याख्येयः । पाठान्तरं काल्पनिकम् इति ।।

न च – उक्तायाः आसत्तेः श्लोके अभावात् विशेषदर्शनेन पदाव्यवधान-भ्रमस्यापि तत्र अभावात् शाब्दबोधः न स्यात् इति – वाच्यम् । **श्लोकादौ योजनावाक्यादेव** अन्वयबोधोपगमात् ।।

नव्यास्तु – उक्तासत्तिः मौनिश्लोकादौ न संभवति, तत्र पदाभावेन पदाव्यधानासंभवात्, **उक्तासत्तिज्ञानविलम्बेन** शाब्दबोधविलम्बाभावाच्च । **किन्तु अव्यवधानेन** वृत्त्या पदजन्यपदार्थोपस्थितिः आसत्तिः । तत्रापि अव्यवधानांशः न निवेश्यते । **शाब्दबोधं प्रति** पदजन्यपदार्थोपस्थितेः कारणतया अव्यवधानेनैव तत्संभवात् । तस्मात् वृत्त्या पदजन्यपदार्थोपस्थितिः आसत्तिः इति – **आहुः** ।।

राजीवोल्लासः

ननु **''संनिधानं तु पदस्य आसत्तिरिष्यते''** इति कारिकायां पदद्वयसांनिध्यम् आसत्तिरिति यथाश्रुतार्थः प्रतीयते । तदर्थस्वीकारे यत्र पदयोः न परस्परम् अन्वयबोधजनकत्वं, यथा ''गिरिर्भुक्तम्'' इत्यत्र गिरिपदभुक्तपदयोः, तत्र पदयोः सान्निध्यस्य आसत्तित्वापत्तिः इत्याशङ्क्य व्याचष्टे **मुक्तावल्यां ''यत्पदार्थेन''** इत्यादिना इत्याह – **ननु संनिधानं तु इति** । ''अन्वयप्रतियोग्यनुयोगिपदयोः अव्यवधानम् आसत्तिः । तज्ज्ञानं शाब्दबोधे कारणम्। क्वचित् व्यवहितेऽपि अव्यवधानभ्रमात् शाब्दबोधात् इति **केचित्** । वस्तुतस्तु अव्यवधानज्ञानस्य अनपेक्षितत्वात्'' इति **मुक्तावल्यां** दृश्यमानः

पाठः प्रक्षिप्तः । **दिनकरभट्टस्य असंमतश्च । तयोः पदयोः** इत्यर्थ इति । तथा च ''यत्पदार्थेन यत्पदार्थस्य'' इत्यत्र यदित्यस्य पदेऽन्वयः । यस्य पदस्य अर्थेन सह यस्य पदस्य अर्थस्य अन्वयः तात्पर्यविषयः तयोः पदयोः अव्यवधानम् आसत्तिः। तदव्यवधानज्ञानं शाब्दबोधकारणम् इत्यर्थः। **तथा च** इति । ''गिरिर्भुक्तम् अग्निमान् देवदत्तेन'' इत्यत्र गिरिपदभुक्तपदार्थयोः अन्वयः न तात्पर्यविषयः, अतः तयोः पदयोः अव्यवधानज्ञानस्य सत्त्वेऽपि न तदर्थयोः अन्वयबोध इति भावः । **तयोः अव्यवधानाभावात्** इति । गिरिपदभुक्तपदयोः निरुक्तयत्तत्पदगर्भाव्यवधानाभावात् इत्यर्थः । **न अतिव्याप्तिः** इति । गिरिपदार्थभुक्तपदार्थयोः न अन्वयबोधापत्तिः इत्यर्थः ।।

ननु नीलो घट इत्यादि। ''नीलो घटः द्रव्यं पटः'' इत्यत्र नीलपदार्थपट-पदार्थयोः अन्वयबोधः यदि वक्तुः तात्पर्यविषयः, न तु नीलपदार्थघटपदार्थयोः, तदा नीलपदघटपदयोः आसत्तिः न स्यात्, नीलपदार्थघटपदार्थयोः अन्वयस्य वक्तृतात्पर्यविषयत्वाभावात् इति आशङ्क्य इष्टापत्त्या समाधत्त इति भावः । **तर्हि तत्र** इति । ''नीलो घटः द्रव्यं पटः'' इत्यत्र नीलपदघटपदयोः आसत्त्यभावे कथं ''नीलो घट'' इति शाब्दबोध इति शङ्का । नीलपदघटपदयोः उक्तस्थले तात्पर्यविषयत्वगर्भासत्त्यभावेऽपि तद्गर्भासत्तिभ्रमात् शाब्दबोधः, भ्रमप्रमासाधारणस्य आसत्तिज्ञानस्यैव शाब्दबोधहेतुत्वात् इति समाधानम् ।।

ननु तत्र इति । उक्तस्थले आसत्तिभ्रमात् शाब्दबोध इति स्वीकारे शाब्दबोधस्य भ्रमत्वं स्यात् । न च इष्टापत्तिः । घटे नीलस्य सत्त्वेन विषय-बाधाभावात् तदभाववति तत्प्रकारकत्वरूपभ्रमत्वाभावात् । न च – आसत्तिज्ञानस्य भ्रमत्वेऽपि तज्जन्यशाब्दबोधः प्रमारूप एव अस्तु इति – वाच्यम् । आसत्तिभ्रमात् शाब्दप्रमाया अङ्गीकारे आसत्तिभ्रमात् शाब्दभ्रम इति प्राचीनप्रवादविरोधापत्तेः

इत्याशङ्क्य उक्तस्थले आसत्तिज्ञानस्य भ्रमरूपत्वेऽपि शाब्दबोधः प्रमात्मक एव, विषयाबाधात्, आसत्तिभ्रमात् शाब्दबोधभ्रम इति प्राचीनप्रवादस्तु निर्युक्तिक इति समाधत्ते **मुक्तावल्याम्** इति भावः ।।

आसत्तिभ्रमस्य शाब्दबोधभ्रमप्रयोजकत्वाभावे शाब्दभ्रमस्य किं प्रयोजकम् इत्याशङ्क्य योग्यताभ्रम एव शाब्दभ्रमप्रयोजक इत्याह – **आसत्तिभ्रमस्य** इति । **तात्पर्यविषयीभूत** इत्यादि । तात्पर्यविषयीभूतः यः अन्वयबोधः – पदार्थद्वयान्वयविषयकबोधः – तद्विषयभूतयोः अर्थयोः बोधके ये पदे तयोः अव्यवधानरूपेत्यर्थः ।।

ननु यत्पदार्थस्य यत्पदार्थेन अन्वयः तात्पर्यविषयः तयोः पदयोः अव्यवधानम् आसत्तिः, तज्ज्ञानं शाब्दबोधे कारणम् इति एतावता यदुक्तं तन्न युज्यते । "अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः" इत्यादिश्लोके क्रियाकारकादिपदयोः पदान्तरेण व्यवधानेऽपि तदर्थयोः अन्वयबोधस्य अनुभवसिद्धत्वात् । न च – तत्र पदयोः अव्यवधानाभावेऽपि अव्यवधानभ्रमात् अन्वयबोधः, अव्यवधानज्ञानस्यैव शाब्दबोधहेतुत्वात् इति – वाच्यम् । "इमे पदे व्यवहिते" इति विशेषदर्शनस्य प्रतिबन्धकस्य सत्त्वेन अव्यवधानभ्रमासंभवात् इत्याशयेन शङ्कते – **न च उक्ताया आसत्तेः** इति । **विशेषदर्शनेन** इति । बाधज्ञानेन इत्यर्थः । अव्यवधानविरोधिव्यवधानज्ञानसत्त्वेन इति यावत् । **योजनावाक्यात्** इति । पश्चात् पूर्वं वा व्यवहितस्य पदस्य अव्यवधानेन उच्चारणेन, अव्यवहितोच्चरितपदाभ्यामित्यर्थः ।।

नव्यास्तु इति । पदाव्यवधानज्ञानं न कारणम्। मौनिश्लोके – वाक्यबोधक-मौनिकर्तृकलिप्यादौ पदाभावेन पदाव्यवधानरूपासत्त्यसंभवात् । अपि तु पदजन्यपदार्थोपस्थितिरेव आसत्तिः । सा च स्वरूपसती शाब्दबोधकारणम् इति नव्यानाम् आशयः ।।

ननु मौनिश्लोकेऽपि लिपीनाम् अव्यवधानेन पदाव्यवधानस्य अनुमितेः स्मरणस्य वा संभवात् तत्रापि आसत्तिज्ञानं संभवति इति, अत आह – **उक्तासत्तिज्ञानविलम्बेन** इति । पदाव्यवधानरूपासत्तिज्ञानाभावेन शाब्दबोधाभावाभावात् व्यतिरेकव्यभिचारात् न उक्तासत्तिज्ञानस्य कारणत्वं इति भावः । **किंतु अव्यवधानेन** इति । ययोः पदार्थयोः अन्वयबोध इष्टः वृत्त्या तयोः पदार्थयोः अव्यवधानेन उपस्थितिः आसत्तिः इति भावः । **शाब्दबोधं प्रति** इति । येषां पदार्थानां परस्परम् अन्वयबोधः इष्टः, वृत्त्या तेषां पदार्थानामुपस्थितीनां शाब्दबोधं प्रति कारणत्वात् तेषाम् अव्यवधानेन उपस्थित्यभावे शाब्दबोधाव्यवहितपूर्ववृत्तित्वरूपकारणत्वायोगादेव तेषाम् अव्यवधानेन उपस्थितेः अर्थसिद्धतया अव्यवधानांशनिवेशस्य अनावश्यकत्वात् इत्यर्थः ॥

आहुः इत्यनेन अस्वरसः सूचितः नव्यमते । पदार्थोपस्थित्यतिरिक्ताया आसत्तेः शाब्दबोधकारणत्वेन सर्वसिद्धायाः विलयप्रसङ्गः अस्वारस्यबीजम् ॥

मुक्तावली

ननु यत्र ''छत्री कुण्डली वासस्वी देवदत्तः'' इत्युक्तं तत्र उत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशात् अव्यवधानेन तत्तत्पदस्मरणासंभव इति चेत्–

न । प्रत्येकपदानुभवजन्यसंस्कारैः चरमस्य तावत्पदविषयकस्मरणस्य अव्यवधानेनोत्पत्तेः । नानासन्निकर्षैः एकप्रत्यक्षस्येव नानासंस्कारैः एकस्मरणोत्पत्तेरपि संभवात् । तावत्पदसंस्कारसहितचरमवर्णज्ञानस्य उद्बोधकत्वात् । कथम् अन्यथा नानावर्णैः एकपदस्मरणम् ?

परन्तु तावत्पदार्थानां स्मरणात् एकदैव खले कपोतन्यायात् तावत्पदार्थानां क्रियाकर्मभावेन अन्वयबोधरूपः शाब्दबोधः भवति इति केचित् ॥

वृद्धा युवानः शिशवः कपोताः खले यथा अमी युगपत् पतन्ति ।।
तथैव सर्वे युगपत् पदार्थाः परस्परेण अन्वयिनो भवन्ति ।।

दिनकरी

ननु अव्यवधानेन पदोपस्थितिः शाब्दबोधे कारणम् इत्युक्तम् । अनेकपदघटितवाक्यस्थले अव्यवधानेन पदोपस्थित्यसंभवात् इति आशङ्कते – ननु इति ।।

अव्यवधानेनोत्पत्तेः इति । **अभेदेऽपि** अव्यवधानसंभवात् इति भावः । ननु तद्विशेष्यकतत्प्रकारकस्मृतिं प्रति तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन जनकत्वात् कथं प्रत्येकपदसंस्कारैः नानापदविशेष्यकस्मरणम्? भिन्नविषयकत्वात्, अत आह – **नानासन्निकर्षैः** इति । **संभवात्** इति । तथा च यथा घटचक्षुःसंयोगस्य पटप्रत्यक्षांशे कारणत्वाभावेऽपि घटचक्षुःसंयोगपटचक्षुःसंयोगाभ्याम् एकं प्रत्यक्षम्, तथा तत्तत्पदगोचरसंस्कारस्य भिन्नविषयकत्वांशे अजनकत्वेऽपि तत्तत्संस्कारजन्यस्मरणम् एकमेव जायते, बाधकाभावात् इति भावः । **अन्यथा** – नानासंस्काराणाम् एकस्मरणजनकत्वाभावे । **नानावर्णैः** इति । नानावर्णानां प्रत्येकसंस्कारैः इत्यर्थः । **एकपदस्मरणम्** – नानावर्णगोचरम् एकपदस्मरणम् ।।

पदस्मरणवत् आशुतरविनाशिनीनां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि मेलनासंभवात् सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकैव कारणम् । एवञ्च सर्वत्र युगपदेव सकलपदार्थानां ''विशेष्ये विशेषणम्'' इति न्यायेनैव शाब्दबोधः, न तु ''विशिष्टस्य वैशिष्ट्यम्'' इति रीत्या; तज्जनकविशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वम् अभावात् इति प्राचीनमतं दर्शयति – **परन्तु** इत्यादिना ।।

एकदैव इति । न तु ''घटमानय'' इत्यादौ प्रथमं ''घटीया कर्मता'' इत्येवं बोधः, तदनन्तरं च ''घटकर्मकानयनम्'' इत्यादिबोधः इत्यादिक्रमेण इत्यर्थः।।

"वृद्धा युवानः..." इत्यस्य "तदाहुः–" इत्यादिः । अत्र वृद्धयुवशिशुभिः कपोतैः चिरतर-चिरसन्निहित-कालोक्तानां पदार्थानां साम्यं बोध्यम् ।।

राजीवोल्लासः

पदोपस्थितिः इति । पदज्ञानम् इत्यर्थः ।।

ननु तावत्पदविषयकस्मरणस्याव्यवधानेन उत्पत्तेः इति असङ्गतम् । तावत्पदविषयकसमूहालम्बनस्मरणस्य एकतया तस्मिन् भेदघटिताव्यवधानासंभवात् इति आशङ्क्य आह – **अभेदेऽपि** इति । तत्पदस्मरणाव्यवहितत्वं हि पदान्तरस्मरणस्य तत्पदस्मरणाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणक्षण-वृत्तित्वम् । तच्च नानापदविषयके एकस्मिन् स्मरणेऽपि संभवति । तत्पदविषयक-समूहालम्बनस्मरणाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणक्षणवृत्तित्वस्य तत्पदविषयके पदान्तरविषयके च तस्मिन् समूहालम्बनस्मरणे अक्षतत्वात् इति भावः ।।

तद्विशेष्यक इत्यादि । तत्तद्विशेष्यकतत्तत्प्रकारकस्मरणं प्रति तत्तद्विशेष्यक-तत्तत्प्रकारकसंस्कारस्यैव हेतुतया यावदर्थविशेष्यकयावदर्थप्रकारकस्मरणं जायते तावदर्थविशेष्यकतावदर्थप्रकारकसंस्कारस्यैव हेतुतया प्रत्येकपदविषयकसंस्कारेषु कस्यापि संस्कारस्य तावत्पदविषयकत्वाभावेन कथं तावत्पदविषयकसमूहालम्बन-स्मरणं भवितुम् अर्हति । समानविशेष्यकत्वसमानप्रकारकत्वाभ्यामेव स्मृतिसंस्कारयोः कार्यकारणभावात् इत्याशयः । समाधाने तु तद्विशेष्यकतत्प्रकारकस्मरणं प्रति तद्विशेयकतत्प्रकारकसंस्कारत्वेनैव हेतुता । तावदर्थविशेष्यकस्मरणं प्रति तु तत्तदर्थविशेष्यक एव संस्कारो हेतुः इति नानासंस्कारैः समूहालम्बनरूपैकस्मरणस्य न अनुपपत्तिः । एकस्यैव स्मरणस्य तत्तत्संस्कारकार्यतावच्छेदकतत्त-दर्थस्मृतित्वाक्रान्तत्वात् इति हृदयम् ।।

एतदेव समाधानं सोदाहरणं प्रपञ्चयति – **तथा च यथा घटचक्षुस्संयोगस्य** इति । **एकं प्रत्यक्षम्** इति । घटपटविषयकम् एकं समूहालम्बनं प्रत्यक्षम् इत्यर्थः । **भिन्नविषयकत्वांशे अजनकत्वेऽपि** इति । तत्पदभिन्नपदविषयकत्वावच्छिन्नजन्यतानिरूपितजनकत्वाभावेऽपि इत्यर्थः । **बाधकाभावात्** इति । तत्तत्पद-विषयकसंस्कारजन्यवाक्यघटकसकलपदविषयकसमूहालम्बनस्मरणस्य एकव्यक्तित्वात्, तस्य तत्तत्संस्कारजन्यतावच्छेदकाक्रान्तत्वात् इति भावः ।।

नानावर्णगोचरम् इति । वर्णसमुदायस्यैव पदरूपत्वेन एतादृशपदस्मरणस्य वर्णसमुदायविषयकानुभवाभावेन तावद्वर्णविषयकसंस्काराभावात् तज्जन्यत्वासंभवेन प्रत्येकवर्णविषयकसंस्कारैरेव समूहालम्बनतावद्वर्णविषयकपदस्मरणस्य उपगन्तव्यत्वात् इति भावः ।।

''परं तु'' इत्यादिग्रन्थम् अवतारयति – **पदस्मरणवत्** इति । एकस्मिन् वाक्ये यावन्ति शक्तानि पदानि सन्ति तेषां ये अर्थाः तद्विषयकोपस्थितीनां क्रमशः जायमानानाम् एककाले स्थित्यसंभवेन तावदर्थसंसर्गावगाहिशाब्दबोधात् पूर्वं समूहालम्बनात्मकमेव तावत्पदार्थविषयकस्मरणं शाब्दबोधे कारणम् इति वक्तव्यम् । तादृशसमूहालम्बनात्मकपदार्थस्मरणानन्तरं युगपदेव सकलपदार्थानां ''विशेष्ये विशेषणम्'' इति न्यायेनैव शाब्दबोधः, न तु ''विशिष्टस्य वैशिष्ट्यम्'' इति रीत्या । विशिष्टवैशिष्ट्यावगाहिबोधं प्रति कारणस्य विशेषणतावच्छेदक-प्रकारकनिर्णयस्य पूर्वम् अभावात् इति **प्राचीनमतं परं तु** इत्यादिना दर्शयति इति भावः । **नवीनमते तु** खण्डवाक्यार्थबोधपूर्वकं महावाक्यार्थबोधस्वीकारात् खण्डवाक्यार्थबोध एव विशेषणतावच्छेदकप्रकारकनिर्णयरूप इति ''विशिष्टस्य वैशिष्ट्यम्'' इति रीत्यैव महावाक्यार्थबोध इति अनुपदं वक्ष्यति ।।

न तु इति । ''घटमानय'' इत्यत्र प्रथमतः ''घटम्'' इति पदात् घटनिष्ठा कर्मता इति बोधः । द्वितायार्थे कर्मत्वे आधेयतासंबन्धेन प्रकृत्यर्थस्य घटस्य अन्वयात् । अयमेव खण्डवाक्यार्थबोधः इति उच्यते । तदनन्तरं द्वितीयार्थस्य कर्मत्वस्य निरूपकतासंबन्धेन धात्वर्थे आनयनेऽन्वयात् घटनिष्ठकर्मतानिरूपकम् आनयनम् इति परिपूर्णवाक्यार्थबोधः ।।

केचित् इत्यनन्तरं वृद्धा युवानः इति श्लोकस्य मूले पाठात् तत्र अन्वयानुपपत्तिं मन्यमानः पूरयति – तदाहुः इत्यादिः इति । इदमुपलक्षणम् – श्लोकानन्तरं ''इति'' इत्यपि पूरणीयम् ।।

मुक्तावली

अपरे तु –

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ।।

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोधः इत्यप्याहुः ।।

दिनकरी

केचित् इत्यनेन सूचितम् अस्वरसं प्रकाशयन् मतान्तरम् आह – अपरे तु इति । यद्यत् इति । स्वार्थाकाङ्क्षितं स्वार्थयोग्यं यद्यत् सन्निधानं प्रपद्यते – स्वार्थोपस्थितिविषयो भवति, तेन तेनैव अन्वितः स्वार्थः पदैः प्रथमम् अनुभाव्यते, अनन्तरं च महावाक्यार्थबोधः इत्यर्थः । एवञ्च पूर्वोक्तसमूहालम्बनात्मकं पदार्थस्मरणं विनापि निर्वाह इति भावः ।।

न च –“घटमानय” इत्यादौ चरमपदार्थस्मृतिकाले घटादिपदार्थस्मृतेः नाशात् समूहालम्बनस्मृतिः आवश्यकी इति – वाच्यम् । तत्र घटस्मरणनाशेऽपि “घटीया कर्मता” इत्याकारकावान्तरशाब्दबोधस्यैव पदजन्यपदार्थोपस्थितित्वेन तेनैव “घटकर्मकम् आनयनम्” इत्यादिमहावाक्यार्थबोधनिर्वाहात् । न हि पदजन्यपदार्थस्मृतित्वेन शाब्दबोधं प्रति हेतुत्वम्, अपि तु शाब्दबोधसाधारण-तादृशोपस्थितित्वेनैव इति ॥

एवञ्च एतन्मते खण्डवाक्यार्थबोधपूर्वक एव महावाक्यार्थबोधः । अत एव सर्वत्र खण्डवाक्यार्थबोधरूपस्य विशेषणतावच्छेदकप्रकारकनिश्चयस्य पूर्वं सत्त्वात् “विशिष्टस्य वैशिष्ट्यम्” इति रीत्यैव महावाक्यार्थबोधः उत्पद्यत इति । एवं यत्र खण्डवाक्यार्थबोधनाशोत्तरं महावाक्यार्थबोधः, तत्रापि खण्डवाक्यार्थसमानाकारं स्मरणं कल्पयित्वा विशिष्टवैशिष्ट्यबोधनिर्वाह इत्याह – तथैव पदार्थस्मृत्या इति ॥

अत्र इदं बोध्यम् – यत्र खण्डवाक्यार्थबोधानन्तरं चरमपदस्मृतिः, तदुत्तरं तदर्थस्मृतिः तत्र खण्डवाक्यार्थानुभवस्य नाशात् समूहालम्बनस्मरणम् आवश्यकम् । एवञ्च यत्र न विशिष्टवैशिष्ट्यबोधसामग्री तत्र “विशेष्ये विशेषणम्” इति रीत्यैव बोधः, यत्र तत्सामग्री तत्र “विशिष्टस्य वैशिष्ट्यम्” इति रीत्या इति अन्यत्र विस्तरः ॥

राजीवोल्लासः

स्वार्थ इत्यादि । स्वं घटादिपदम्, तस्य अर्थः घटादिः, तेन आकाङ्क्षितं तदुपस्थितिजन्य “किं घटीयम्” इति जिज्ञासाविषयीभूतं योग्यताज्ञानाधीनं कर्मत्वादि सन्निधानं – घटरूपार्थविषयकसमूहालम्बनस्मृतिविषयत्वं

प्रपद्यते । तेन कर्मत्वादिना अन्वितः यः स्वार्थः घटादिपदैरेव अवगम्यते – तज्जन्यशाब्दबोधविषयः भवति इति कारिकार्थ इति भावः ।।

प्रथमम् इत्यनेन आनयनरूपार्थोपस्थितेः पूर्वमेव ''घटम्'' इति पदेन ''घटीया कर्मता'' इति शाब्दबोधः भवति इति सूचितम् । **अनन्तरं च** इति । खण्डवाक्यार्थविषयकशाब्दबोधानन्तरम् इत्यर्थः । तथा च न पदार्थोपस्थित्यनन्तरमेव महावाक्यार्थबोधः भवति इति बोध्यम् – इति **तरङ्गिणी-कारा**ः ।।

न च घटमानय इत्यादौ इति । ''घटमानय'' इत्यत्र ''घटपदम्'', ''अम् पदम्'' ''धातुः'', ''लोट् '' इति चत्वारि पदानि सन्ति । तदर्थानां चतुर्णामपि क्रमेण उपस्थित्यनन्तरं शाब्दबोधः भवति। तत्र अन्तिमपदार्थो-पस्थितिकाले तद्व्यवहितपूर्वपदार्थोपस्थितीनां नाशात् उपस्थितिरूपकारणं विना शाब्दबोधोत्पत्त्ययोगाच्च अन्तिमपदार्थोपस्थितिकाले तद्वाक्यघटकसकलपदार्थ-विषयकसमूहालम्बनस्मरणम् आवश्यकम् इति कथं समूहालम्बनस्मरणं विना शाब्दबोधनिर्वाहः इति प्रश्नः । समाधत्ते – **तत्र घटस्मरणनाशेऽपि** इति । घटकर्मत्वयोः क्रमशः उपस्थित्यनन्तरं ''घटनिष्ठा कर्मता'' इत्याकारकः अवान्तरशाब्दबोधो जायते । तदनन्तरं धातु–तदुत्तरप्रत्ययार्थयोः उपस्थितिपूर्वकं ''घटकर्मकम् आनयनम्'' इति महावाक्यार्थबोधो भवति । अत्र अवान्तरवाक्यार्थबोधः पदजन्यपदार्थोपस्थितिस्थाने स्थित्वा महावाक्यार्थबोधे घटकर्मत्वयोः भाने हेतुर्भवति ।।

ननु पदजन्यपदार्थस्मरणस्यैव शाब्दबोधहेतुत्वात् अनुभवात्मकस्य खण्डवाक्यार्थबोधस्य कथं शाब्दबोधहेतुत्वम् इत्याशङ्क्य आह – **न हि** इति । अन्वयबोधं प्रति पदजन्यपदार्थस्मृतित्वेन न हेतुत्वम्, अपि तु पदजन्यपदार्थज्ञानत्वेनैव । ज्ञानत्वं तु स्मृतावपि अस्ति, खण्डवाक्यार्थबोधेऽप्यस्ति

इति पदजन्यस्य खण्डवाक्यार्थबोधस्यापि महावाक्यार्थबोधहेतुत्वम् उपपद्यत इति भावः ।।

पदजन्यपदार्थोपस्थितित्वेन इति । पदजन्यपदार्थज्ञानत्वेन इत्यर्थः । खण्डवाक्यार्थबोधस्यापि पदजन्यत्वात् । **तेनैव** इति । अवान्तरशाब्दबोधेनैव इत्यर्थः । **शाब्दबोधसाधारण** इति । खण्डवाक्यार्थविषयकशाब्दबोधानुगतं यत् पदजन्यपदार्थज्ञानत्वं तेनैव रूपेण इत्यर्थः । तथा च पदजन्यज्ञानत्वेन क्वचित् शाब्दबोधस्य क्वचित् स्मरणस्य च शाब्दबोधहेतुत्वम् इति भावः ।।

ननु लोडर्थस्मृतिकाले तत्पूर्वक्षणोत्पन्नस्य धात्वर्थस्मरणस्य सत्त्वेऽपि तत्पूर्वक्षणोत्पन्नस्य खण्डवाक्यार्थबोधस्य नष्टत्वात् लोडर्थस्मृत्यनन्तरभावि महावाक्यार्थबोधे घटकर्मत्वयोः कथं भानम् इति चेत्, न – आदौ घटस्मृतिः, ततः कर्मत्वस्मृतिः, ततः घटनिष्ठा कर्मता इति खण्डबोधः, तदनन्तरं धात्वर्थस्य आनयनस्य स्मृतिः, तदनन्तरं ''घटकर्मकम् आनयनम्'' इति खण्डबोधः, तदनन्तरं लोडर्थस्य स्मृतिः, तदनन्तरं घटकर्मकानयनानुकूला कृतिः इति महावाक्यार्थबोधः इति स्वीकारात् ।।

एतन्मते महावाक्यार्थबोधस्य विशिष्टवैशिष्ट्यावगाहिताम् उपपादयति – **अत एव** इति । ''घटमानय'' इति वाक्यजन्यः महावाक्यार्थबोधः आधेयतासंबन्धेन घटविशिष्टं यत्कर्मत्वं, निरूपकतासंबन्धेन तद्वैशिष्ट्यं आनयने अवगाहते । विशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयः हेतुः । प्रकृते आनयने विशेषणं कर्मत्वम्, कर्मत्वे घटः विशेषणम्, अतः घटः विशेषणतावच्छेदकः । तत्प्रकारकनिश्चयः आधेयतासंबन्धेन घटविशिष्टा कर्मता इत्याकारकखण्डवाक्यार्थबोधः । तद्बलात् विशिष्टवैशिष्ट्यावगाही महावाक्यार्थबोधः भवितुम् अर्हति । पूर्वमते तु सर्वेषां पदार्थानां समूहालम्बनस्मृतिपूर्वकं

महावाक्यार्थबोधस्य स्वीकारात् खण्डवाक्यार्थबोधस्य च अनङ्गीकारात् विशेषणतावच्छेदकप्रकारकनिश्चयविरहात् शाब्दबोधः विशिष्टवैशिष्ट्यावगाही न भवति । किन्तु ‘‘विशेष्ये विशेषणम्, तत्र च विशेषणान्तरम्’’ इति रीत्या युगपत् सकलपदार्थविषयकशाब्दबोधः इति भावः ।।

यत्र इति । यादृशस्थले खण्डवाक्यार्थबोधानन्तरं चरमपदस्मरणं, ततः तत्पदार्थस्मरणं, ततः महावाक्यार्थबोधः, तत्र चरमपदार्थस्मृतिकाले खण्डवाक्यर्थ-शाब्दबोधनाशात् चरमपदार्थस्मरणमेव खण्डवाक्यार्थविषयकसमूहालम्बनरूपम् उपगन्तव्यम् । यत्र तु खण्डवाक्यर्थशाब्दबोधजनकस्मृतिरेव चरमपदविषयिणी समूहालम्बनरूपा, तत्रैव महावाक्यार्थबोधप्राक्क्षणे खण्डवाक्यार्थशाब्दबोधसत्त्वम् इति भावः ।।

एवं च खण्डवाक्यार्थविषयकशाब्दबोधं विनापि समूहालम्बनस्मरणेन विशिष्टवैशिष्ट्यावगाहिशाब्दबोधोत्पत्तिस्वीकारे यत्र यत्किञ्चित्कारणवैगुण्येन न खण्डवाक्यार्थविषयकशाब्दबोधः, किन्तु पदार्थविषयकसमूहालम्बनस्मरणमेव आसीत् तत्र ‘‘विशेष्ये विशेषणम्’’ इति रीत्या महावाक्यार्थबोधसामग्र्याः अक्षततया तादृशरीत्या महावाक्यार्थबोधोऽपि अवर्जनीय इत्याह – अत्र इदं बोध्यम् इत्यादिना इति ।।

एवं च यत्र न इति । खण्डवाक्यार्थबोधस्य यत्र उपेक्षात्मकत्वं फलबलकल्प्यस्य उद्बोधकस्य अन्वयांशे वैधुर्यं वा तत्र इत्यर्थः ।।

अन्यत्र विस्तर इति । प्रत्यक्षादिकं यथा विशिष्टवैशिष्ट्यरूपं ‘‘विशेष्यं विशेषणं च’’ इति न्यायेन च भवति, तथा शाब्दबोधोऽपि, सामग्रीसमव-धानासमवधानयोः उभयत्र तुल्यत्वात् इति भावः इति तरङ्गिणीकाराः ।।

मुक्तावली

एतेन तावत् वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः । तत्तद्वर्णसंस्कारसहित-चरमवर्णोपलम्भेन तद्व्यञ्जकेनैव उपपत्तेः ।।

राजीवोल्लासः

अत्र तरङ्गिणीकाराः – मूले वैयाकरणमतं निरस्यति – एतेन इत्यादिना । पूर्व वर्णानुभवजनितसंस्कारसहितचरमवर्णानुभवरूपोद्बोधकोद्बोधितचरम-वर्णानुभवजनितसंस्कारेणैव क्रमिकतत्तद्वर्णविषयकपदस्मरणस्य उपपादितत्वेन इत्यर्थः । तद्व्यञ्जकेनैव इति । स्फोटव्यञ्जकेनैव इत्यर्थः ।।

वैयाकरणैः घटाद्यर्थोपस्थापकः स्फोट एव इत्युच्यते । घटपदस्य क्रमिकवर्णचतुष्टयात्मकस्य कदापि असत्त्वेन अर्थोपस्थापकत्वासंभवात् । स्फोटस्तु ब्रह्मैव, न अतिरिक्तः पदार्थः । तस्य एकत्वेऽपि तत्तद्वर्णाभिव्यक्तिः तत्तदर्थोपस्थापिका भवति इति घटपदोच्चारणदशायां न पटाद्युपस्थित्या-पत्तिः । पदस्फोटवाक्यस्फोटादीनां भेदव्यवहारोऽपि पदजन्याभिव्यक्तिवाक्यजन्या-भिव्यक्तिभेदादेव इति ।

अत्र च पदस्य अर्थबोधकत्वम् अर्थबोधजनकज्ञानविषयत्वमेव । तच्च वर्णानाम् अनेकत्वेऽपि चरमवर्णानुभवानन्तरक्रमिकतावद्वर्णविषयकसमूहालम्बनस्मृतितः घटरूपार्थस्मृतौ ततः घटविषयकशाब्दबोधोत्पत्त्या वर्णसमुदायरूपपदस्यापि घटबोधकत्वम् उपपद्यत एव, किं घटशाब्दबोधजनकता स्फोटे स्वीकरणीया । स्फोटाभिव्यक्त्यर्थं त्वयापि तादृशचरमवर्णानुभवस्य स्वीकरणीयतया तत एव अर्थोपस्थापकपदस्मरणोपपत्तेः इति समुदायार्थः ।।

अत्र वैयाकरणाः – तत्तत्पदार्थवाचकतायाः पर्याप्तिः क्रमिकवर्णसमुदाय एव स्वीकरणीया, न तु प्रत्येकम् । तथा सति एकैकवर्णादपि अर्थप्रतीत्या-

पत्तेः । वर्णानां च अस्थिरत्वेन वाचकत्व पर्याप्त्यधिकरणीभूतसमुदायस्य कदापि असत्त्वेन क्रमिकवर्णसमुदायात्मकपदे न वाचकतापर्याप्तिसंभवः इति स्थिरपदस्फोट एव तत्तदर्थवाचकत्वेन स्वीकरणीय इति – वदन्ति ।।

तदपि न विचारक्षमम् । यत्र हि वाचकत्वं समवेतं तत्समवायिकारणं वर्णसमुदाय इति न ब्रूमः । येन समवायिकारणस्य कार्यकालवृत्तित्वेन कारणतया न क्रमिकवर्णसमुदाये वाचकत्वं समवायेन उत्पत्तुम् अर्हति इति अनुपपत्तिः स्यात्, समुदायस्य एकस्मिन् क्षणे असत्त्वात् । किन्तु तत्तदर्थविषयकबोध-जनकत्वेन भगवदिच्छाविषयत्वमेव तत्तदर्थवाचकत्वम् । तच्च क्रमिकेष्वपि वर्णेषु संभवत्येव ।।

न च – ''अस्मात् शब्दात् अयमर्थो बोद्धव्यः'' इति भगवदिच्छायाः तद्विषयताया वा वाचकत्वरूपत्वेन नैयायिकैः अभ्युपगमात्, तत्र जन्यत्वस्य पञ्चम्यर्थत्वात्, वर्णसमुदायस्य ज्ञानरूपकार्याव्यवहितप्राक्क्षणे असत्त्वात्, ईश्वरेच्छायाः अपि विसंवादित्वापत्तिः इति ''अस्मात् शब्दात्'' इत्यस्य ''एतच्छब्दाभि-व्यक्तस्फोटात्'' इत्येव अर्थो वक्तव्यः इति – वाच्यम् ।।

नव्यानां मते पदस्य अर्थबोधाजनकत्वेन ज्ञानजन्यत्वस्यैव पञ्चम्यर्थत्वेन उपगन्तव्यत्वात् । वस्तुतस्तु वर्णसमुदायस्य न पदत्वम् । किन्तु पूर्वपूर्ववर्णोत्तरचरम-वर्णस्यैव । तस्य च ज्ञानरूपकार्याव्यवहितपूर्वक्षणवृत्तित्वं संभवत्येव इति न अनुपपत्तिगन्धोऽपि ।।

मूले तद्व्यञ्जकेनैव इति । पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितचरम-वर्णानुभवस्यैव स्फोटव्यञ्जकत्वेन वैयाकरणैः स्वीकारात् तद्व्यञ्जकत्वेन भवदभिमतेन इत्यर्थः । उपपत्तेः इति । वर्णसमुदायात्मकपदस्मरणोपपत्तेः इत्यर्थः ।

स्फोटव्यञ्जकत्वेन भवदङ्गीकृतस्यैव यावदर्थविषयकसंस्काराणाम् उद्बोधकत्वेन अस्माभिः उपगन्तव्यत्वात् इति भावः ।।

एतेन इत्यादि । दिनकरभट्टनृसिंहशास्त्रिभ्यां अव्याख्यानात् पाठोऽयं न तदनुमत इति भाति – इति **सुबोधिनीकाराः** ।।

मुक्तावली

इदं तु बोध्यम् – यत्र ''द्वारम्'' इत्युक्तं, तत्र ''पिधेहि'' इति पदस्य ज्ञानादेव बोधः, न तु पिधानादिरूपार्थज्ञानात् । **पदजन्यतत्तत्पदार्थोपस्थितेः** तत्तच्छाब्दबोधे हेतुत्वात् । **किञ्च** क्रियाकर्मपदानां(तेन) **तेनैव** पदेन आकाङ्क्षितत्वात् तेन क्रियापदं विना कथं बोधः स्यात्? तथा ''पुष्पेभ्यः'' इत्यादौ ''स्पृहयति'' इत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहारः आवश्यकः ।।

दिनकरी

अवान्तरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधे अवान्तरवाक्यार्थस्मरणमेव कारणम्, न तु समूहालम्बनस्मृतिः । न हि शाब्दबोधे पदजन्यपदार्थोपस्थितिः कारणम्, लाघवेन **पदार्थोपस्थितेरेव** हेतुत्वात् । **अत एव** ''द्वारम्'' इत्यादौ न ''पिधेहि'' इति पदाध्याहारः, किन्तु अर्थाध्याहार एव इति **प्राभाकरमतं** दूषयति – **इदं तु बोध्यम्** इत्यादिना । **पदजन्य** इति । **पदार्थोपस्थितिमात्रस्य** हेतुत्वे प्रत्यक्षादिना उपस्थितस्यापि शाब्दबोधापत्तिः इति भावः ।।

ननु प्रत्यक्षोपस्थितकलशपटादेः शाब्दबोधाभावः, **तात्पर्याभावात्**; तत्सत्त्वे तु इष्टापत्तिः, अत आह – **किञ्च** इति । **तेनैव** इति । ''**द्वारं कर्मत्वं पिधानं कृतिः**'' इति वाक्यात् द्वारकर्मकपिधानान्वयबोधानुदयात् ''द्वारं पिधेहि'' इति आनुपूर्वीरूपाकाङ्क्षाज्ञानहेतुत्वस्य अवश्यं वाच्यतया तादृशाकाङ्क्षाज्ञानार्थं ''पिधेहि'' इति पदाध्याहारः आवश्यक इति भावः ।।

ननु द्वारकर्मकपिधानानुकूलकृतिबोधे आनुपूर्वीविशेषस्य द्वारपदोत्तराम्पदरूपस्य ''पिधेहि'' इत्याकारस्य वा ज्ञानं कारणम्, अतः न ''द्वारं कर्मत्वं पिधानं कृतिः'' इत्यस्मात् शाब्दबोधापत्तिः । तथा च ''द्वारम्'' इत्युक्ते ''पिधेहि'' इति पदस्य न अध्याहारः ।।

न च तादृशानुपूर्व्याः परस्परं व्यभिचारः । अव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशात् ।।

न च – **''यत्र द्वारं पिधानं कृतिः''** इति, ''द्वारकर्मत्वं पिधेहि'' इति च उक्तम्, तत्रापि द्वारकर्मकपिधानानुकूलकृतेः शाब्दबोधापत्तिः इति – वाच्यम् । इष्टापत्तेः । प्रत्यक्षानुमानादिना उपस्थितस्येव निराकाङ्क्षपदेन उपस्थितस्यापि बोधे बाधकाभावात्, अत आह – **तथा पुष्पेभ्य इति** । **''स्पृहयति इत्यादि''** इति **''आदिना''** ''क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति'' इत्यादिपरिग्रहः । **चतुर्थ्यनुपपत्तेः** इति । कर्मत्वार्थकचतुर्थ्याः स्पृहयतियोग एव **अनुशासनेन** बोधनात् इति भावः ।।

अत्र इदं चिन्त्यम् – अस्तु एवंरीत्या क्वचित् पदाध्याहारः । तावतापि तज्जन्यपदार्थोपस्थितित्वेन **न शाब्दबोधहेतुत्वम्**, लाघवेन पदार्थोपस्थितित्वस्यैव जनकतावच्छेदकत्वात् । तथा च ''द्वारम्'' इत्यादौ कथंचिदुपस्थितस्य पिधानादेः बोधे बाधकाभावात् अर्थाध्याहारपक्ष एव उचितः इति ।।

राजीवोल्लासः

पदार्थोपस्थितेरेव इति । ''एव''कारेण पदजन्यत्वविशेषणव्यवच्छेदः । **अत एव** इति । पदार्थोपितस्थितेरेव हेतुत्वादेव इत्यर्थः । **पदार्थोपस्थितिमात्रस्य** इति । **प्राभाकरैः** यत्किंचित्पदजन्यपदार्थोपस्थितिसत्त्वे एव अश्रुतपदार्थस्मरणात् शाब्दबोधः स्वीक्रियते, न तु यत्किंचित्पदज्ञानं

विनापि शाब्दबोधः स्वीक्रियते । एवं च पदजन्यत्वं विहाय पदार्थोपस्थितित्वेन शाब्दबोधहेतुत्वे प्रत्यक्षादिना उपस्थितानां पदार्थानामपि तद्वाचकपदज्ञानं विनैव अन्वयबोधापत्तिः इति भावः । **तात्पर्याभावात्** इति । तात्पर्यज्ञानस्यापि शाब्दबोधहेतुत्वात् पदोच्चारयितुः इच्छायाः एव तात्पर्यरूपत्वात् किञ्चित्पदस्यापि अनुच्चारणे तदुच्चारयितुः इच्छारूपतात्पर्यस्य असंभवात् प्रत्यक्षोपस्थितघटादेः शाब्दबोधो न भवति । यत्किञ्चित्पदोच्चारणस्थले तदुच्चारयितृतात्पर्यसंभवात् अध्याहृतपदार्थान्तरविषयकशाब्दबोधः इष्ट एव इत्याशङ्क्य दोषान्तरम् आह – **किञ्च इत्यादिना** इति भावः । **द्वारं कर्मत्वम्** इत्यादि । तथा च तात्पर्यसत्त्वेऽपि ''द्वारं पिधानं कृतिः'' इति निराकाङ्क्षपदसमूहस्थले द्वारकर्मकपिधानानुकूला कृतिः इति शाब्दबोधस्य अनुत्पत्त्या ''द्वारं पिधेहि'' इत्यानुपूर्वीरूपाकाङ्क्षाप्रकारक-ज्ञानमपि शाब्दबोधं प्रति हेतुः इति अवश्यं वक्तव्यम् । तादृशानुपूर्वीरूपाकाङ्क्षाज्ञानं च ''पिधेहि'' इति पदाध्याहारं विना न संभवति इति ''पिधेहि'' इति पदाध्याहारः आवश्यकः इति भावः ॥

तथा पुष्पेभ्यः इति मूलम् अवतारयति – **ननु द्वारकर्मक** इति । द्वारकर्मकपिधानानुकूलकृतिप्रकारकशाब्दबोधं प्रति द्वारपदोत्तर-अम्-पदरूपस्य पिधेहि इत्याकारकस्य वा आनुपूर्वीविशेषस्य ज्ञानं कारणम् । अतः ''द्वारं कर्मत्वं पिधानं कृतिः'' इत्यत्र एकतरस्यापि आनुपूर्वीविशेषस्य अभावात् न शाब्दबोधापत्तिः । एवं च ''द्वारम्'' इत्युक्ते ''पिधेहि'' इति पदस्य अध्याहारः अनावश्यकः । तदभावेऽपि द्वारपदोत्तरद्वितीयैकवचन – अम्-पदरूपानुपूर्वीज्ञानादेव ''द्वारकर्मक'' इत्यादि शाब्दबोधस्य उपपत्तेः । एवं ''पिधेहि'' इत्यत्रापि न ''द्वारम्'' इत्यस्य अध्याहारः ॥

न च – द्वयोरपि आनुपूर्व्योः प्रत्येकं ''द्वारकर्मक'' इत्यादि शाब्दबोधप्रयोजकत्वे परस्परं व्यतिरेकव्यभिचारः । एकतरानुपूर्वीज्ञानोत्तरशाब्दबोधे

आनुपूर्व्यन्तरज्ञानस्य विरहात् इति – वाच्यम् । अव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशात् ।।

अयम् आशयः – द्वारपदोत्तर-अम्-पदरूपानुपूर्वीज्ञानाव्यवहितोत्तरद्वार-कर्मकपिधानानुकूलकृतिप्रकारकशाब्दबोधं प्रति द्वारपदोत्तर-अम्-पदज्ञानं कारणम् । ''पिधेहि'' इति आनुपूर्वीज्ञानाव्यवहितोत्तरतादृशशाब्दबोधं प्रति ''पिधेहि'' इति आनुपूर्वीज्ञानं कारणम् इति कार्यकारणभावद्वयं कल्प्यते । अतः न व्यभिचार इति ।।

न च – एवं कार्यकारणभावद्वयकल्पनाप्रयुक्तं गौरवं स्यात् इति – वाच्यम् । घटकर्मक – आनयन – शाब्दबोधं प्रति ''घटं'', ''कलशम्'' इत्यादिपर्यायपदानां कारणत्वेन शब्दाध्याहारवादिमतेऽपि व्यतिरेकव्यभिचार-वारणाय ''घटमानय'' इत्याकारकानुपूर्वीज्ञानाव्यवहितोत्तरशाब्दबोधं प्रति ''घटमानय'' इति आनुपूर्वीज्ञानं कारणम् । ''कलशमानय'' इति आनुपूर्वीज्ञाना-व्यवहितोत्तरशाब्दबोधं प्रति ''कलशमानय'' इति आनुपूर्वीज्ञानं कारणम् इति कार्यकारणभावद्वयस्य कल्पनीयत्वात् ।।

ननु द्वारकर्मकपिधानानुकूलकृतिप्रकारकशाब्दबोधं प्रति ''द्वारम्'' इत्यानुपूर्वीज्ञानस्य ''पिधेहि'' इत्यानुपूर्वीज्ञानस्य वा कारणत्वस्वीकारे यत्र ''द्वारं पिधानं कृतिः'' इत्युक्तम्, यत्र च ''द्वारकर्मत्वं पिधेहि'' इत्युक्तम्, तत्रापि द्वारकर्मकपिधानानुकूलकृतिप्रकारकशाब्दबोधापत्तिः । ''द्वारम्'' इति आनुपूर्वीज्ञानस्य ''पिधेहि'' इत्यानुपूर्वीज्ञानस्य च सत्त्वात् इत्याशङ्क्य इष्टापत्त्या समाधत्ते – न च यत्र द्वारं पिधानं इति । तथा च अर्थाध्याहावादिमते न पूर्वोक्तदोषः इत्याशङ्क्य तन्मते दोषान्तरम् आह – तथा पुष्पेभ्य इति इत्यादिना इति भावः ।।

स्पृहयति इत्यादि इति । ''स्पृहेः ईप्सितः'' इति सूत्रेण स्पृहधातुयोगे कर्मण्यर्थे चतुर्थी विधीयते । ''क्रुध-दुह-ईर्ष्या-असूयार्थानां यं प्रति कोपः'' इति सूत्रेण क्रुधादिधातुयोगे संप्रदानसंज्ञाविधानात् ''चतुर्थी संप्रदाने'' इति चतुर्थी भवति ।।

अनुशासनेन इति । स्पृहधातुयोगे इच्छाविषयस्य संप्रदानसंज्ञा भवति । इच्छार्थकधातुयोगे तु पुष्पादिपदोत्तरं द्वितीयैव साधुः, न चतुर्थी । तद्योगे इच्छाविषयस्य संप्रदानसंज्ञायाः अविधानात् । अतः चतुर्थीसाधुत्वोपपत्तये ''स्पृहयति'', इति पदाध्याहारः आवश्यकः ।।

न शाब्दबोधहेतुत्वम् इति । लाघवेन शाब्दबोधमात्रं प्रत्येव पदार्थोपस्थितित्वेनैव हेतुत्वावधारणात् । तथा च ''द्वारम्'' इत्यादौ ''पिधेहि'' इत्यादिशब्दाध्याहारः न आवश्यक इति भावः ।।

इदमत्र चिन्त्यम् – ''पिधानं कुरु'' इति शब्दप्रयोगे ''द्वारम्'' इति द्वितीयापि न साधुः । ''कर्तृकर्मणोः कृति'' इत्यनेन षष्ठ्या द्वितीया-बाधनात् । तथा च ''पुष्पेभ्यः स्पृहयति'' इत्यादाविव ''द्वारम्'' इत्यत्रापि द्वितीयासाधुत्वोपपत्तये ''पिधेहि'' इति पदाध्याहारः आवश्यक एव इति तरङ्गिणीकाराः ।।

।। योग्यतानिरूपणम् ।।

कारिकावली

पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ।। ८३ ।।

मुक्तावली

योग्यतां निर्वक्ति – पदार्थ इति । एकपदार्थे अपरपदार्थसंबन्धः योग्यता इत्यर्थः । तज्ज्ञानाभावाच्च "वह्निना सिञ्चति" इत्यादौ न शाब्दबोधः ।।

ननु एतस्या योग्यतायाः ज्ञानं शाब्दबोधात् प्राक् सर्वत्र न संभवति, वाक्यार्थस्य अपूर्वत्वात् इति चेत्, न । तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचित् निश्चयरूपस्य योग्यतायाः ज्ञानस्य संभवात् ।।

नव्यास्तु – योग्यताज्ञानं न शाब्दबोधहेतुः । "वह्निना सिञ्चति" इत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धात् न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् । योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बः असिद्ध इति – आहुः ।।

दिनकरी

मूले "पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता" इत्यनेन तत्तत्पदार्थे तत्तत्पदार्थवत्त्वं योग्यता इत्युक्तम्, तच्च अयुक्तम् अनुपयुक्तं च । स्वस्मिन् स्वाधिकरणकत्वाभावात् तज्ज्ञानस्य शाब्दबोधे हेतुत्वाभावाच्च इत्यतः प्रथमं तत्पदम् एकपदार्थपरं द्वितीयं च तत्पदम् अपरपदार्थपरम् इत्यभिप्रायेण व्याचष्टे – एकपदार्थ इति । योग्यताज्ञानस्य शाब्दबोधहेतुत्वे मानम् आह – तज्ज्ञानाभावाच्च इति । अपूर्वत्वात् इति । सर्वत्र शाब्दबोधात् पूर्वम् अनिश्चितत्वात् इत्यर्थः । क्वचित्

संशयरूपस्य इति । संशयनिश्चयसाधारणयोग्यताज्ञानत्वेन हेतुत्वात् इति भावः । अत एव निश्चयमपि दर्शयति – **क्वचित्** इति । ''भूतले घटः'' इति प्रात्यक्षिकनिश्चयोत्तरभाविनि शाब्दबोधे इत्यर्थः ।।

नव्यास्तु इति । ननु अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तदभावत्वेन हेतुत्वं वाच्यम् । तदपेक्षया लाघवेन योग्यताज्ञानहेतुत्वस्यैव उचितत्वम्, अत आह – **तदभावनिश्चयस्य** इति । बाधनिश्चयकालेऽपि लौकिकसन्निकर्षजन्यतद्विशिष्टबुद्धेः उदयात्, अत आह – **लौकिकसन्निकर्षाजन्य** इति । ''शङ्खः न पीतः'' इति निश्चयेऽपि पित्तादिदोषवशात् ''पीतः शङ्खः'' इति प्रत्यक्षोदयात् ''**दोषविशेषाजन्य**'' इत्युक्तम् । शुक्तौ ''नेदं रजतम्'' इति ज्ञानोत्तरं दोषजन्यस्य ''इदं रजतम्'' इति भ्रमस्य वारणाय ''**विशेष**'' इति । पित्तमण्डूकवसाञ्जनादिदोषेत्यर्थः । **तज्ज्ञानमात्रे** – तद्विशिष्टबुद्धिमात्रे । **सिद्धम्** इति । तथा च अयोग्यताज्ञानस्य शाब्दबोधं प्रति प्रतिबन्धकत्वस्य क्लृप्तत्वात् तेनैव निर्वाहे योग्यताज्ञानस्य हेतुत्वं न कल्प्यते इति भावः ।।

ननु यत्र न अयोग्यताज्ञानं न वा योग्यताज्ञानम्, तत्र शाब्दबोधापत्तिः इति अत आह – **योग्यताज्ञानविलम्बाच्च** इति । तथा च इष्टापत्तिः इति भावः ।।

आहुः इति अस्वरसः । तद्बीजं तु – यद्विषयकम् अनुमित्यादिकं न जातम्, शाब्दबोध एव जातः, तद्विशिष्टबुद्धौ अयोग्यताज्ञानाभावत्वापेक्षाया लाघवेन योग्यताज्ञानत्वेनैव हेतुतासिद्धिः । एवञ्च ''यद्विशेषयोः'' इति व्याप्तिबलात् शाब्दसामान्ये योग्यताज्ञानत्वेन हेतुतासिद्धिः दुर्वारा इति ।।

एवम् इच्छायाः उत्तेजकत्वानुरोधेन अयोग्यताज्ञानप्रतिबन्धकत्वस्य विशेषे पर्यवसानात् क्लृप्तप्रतिबध्यतावच्छेदकस्य अनुमितित्वादेः शाब्दबोधसाधारण्याभावात्,

शाब्दबोधे तु अयोग्यत्वनिश्चयस्य अतिरिक्तप्रतिबन्धकताकल्पने गौरवात् लाघवेन योग्यताज्ञानस्यैव हेतुत्वम् युक्तम् इति ।।

न च – योग्यताज्ञानस्य हेतुत्वे अप्रामाण्यनिश्चयाभावः तत्र विशेषणम्, तदपेक्षया अप्रामाण्यज्ञानाभावविशिष्टायोग्यतानिश्चयाभावस्य हेतुत्वे लाघवम् इति – वाच्यम् । **योग्यताज्ञानस्य** हेतुत्वे ''तदभाववति तत्प्रकारकम्'' इति एकविधाप्रामाण्यग्रहाभावनिवेशेन लाघवात् । अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तु तदभावाभाववति तदभावप्रकारकम्, तद्वति तदभावप्रकारकम् इति द्विविधाप्रामाण्यग्रहाभावनिवेशेन प्रतियोगितासंबन्धावच्छिन्नप्रतियोगिताक-तदभाववत्यभावे प्रतियोगितासंबन्धेन तत्प्रकारकम् इति अप्रामाण्यग्रहाभावनिवेशेन च गौरवात् **बाधनिश्चयस्येव** तदभावव्याप्यतदभावावच्छेदकनिश्चययोः प्रतिबन्धकत्वेन **अतिगौरवाच्च** इति ।।

एवं योग्यताज्ञानस्य शाब्दबोधाजनकत्वे शाब्दसामग्रीकाले योग्यताज्ञाना-भावविशिष्टात्ममानसवारणाय तत्र शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम् इति गौरवम् । योग्यताज्ञानस्य शाब्दबोधजनकत्वे तु तत्र योग्यताज्ञाना-भावरूपविषयाभावादेव न तादृशमानसम् इति तत्र शाब्दसामग्रीप्रतिबन्धकत्वं न कल्प्यते इति लाघवम् इत्याद्यवसेयम् ।।

राजीवोल्लासः

अयुक्तत्वम् उपपादयति – **स्वस्मिन्** इति । अनुपयुक्तत्वम् उप-पादयति – **तज्ज्ञानस्य** इति । स्वस्मिन् स्वाधिकरणकत्वज्ञानस्य इत्यर्थः ।।

मूले योग्यताज्ञानविलम्बात् इति । योग्यताज्ञानाभावात् इत्यर्थः । **शाब्दबोधविलम्ब** इति – शाब्दबोधाभाव इत्यर्थः ।।

आहुः इति अस्वरसः इत्यादि । संशयनिश्चयसाधारणं योग्यताज्ञानं शाब्दबोधकारणम् इति प्राचीनाः । अयोग्यतानिश्चयः प्रतिबन्धकः तदभावः शाब्दबोधकारणम् इति नवीनाः । नवीनानां मते यद्यपि अयोग्यता-ज्ञानाभावत्वापेक्षया योग्यताज्ञानत्वस्य लघुत्वात् तदेव कारणतावच्छेदकं भवितुम् अर्हति, तथापि अयोग्यतानिश्चयाभावस्य शाब्दबोधं प्रति पृथक् कारणत्वं न कल्प्यते। तत्प्रकारकप्रत्यक्षं प्रति तत्प्रकारकानुमितिं प्रति च तदभावप्रकारकनिश्चयस्य प्रतिबन्धकत्वं क्लृप्तम् । तत्र प्रत्यक्षे अनुमितौ च तदभावप्रकारकनिश्चयस्य प्रतिबन्धकताद्वयकल्पनापेक्षया प्रत्यक्षानुमितिसाधारणतत्प्रकारकज्ञानत्वावच्छिन्नं प्रति तदभावप्रकारकनिश्चयः प्रतिबन्धकः इति कल्प्यते । एवं च प्रत्यक्षानुमितिस्थले अवश्यकल्प्या या तदभावनिष्ठा प्रतिबन्धकता तन्निरूपितप्रतिबध्यतावच्छेदकस्य तत्प्रकारकज्ञानत्वस्य तत्प्रकारकशाब्दबोधसाधारणतया तेनैव प्रतिबध्यप्रतिबन्धक-भावेन शाब्दबोधं प्रत्यपि तदभावप्रकारकनिश्चयात्मकस्य अयोग्यतानिश्चयस्य प्रतिबन्धकतायाः सिद्धतया प्रतिबन्धकाभावविधया अयोग्यतानिश्चयाभावस्य शाब्दबोधं प्रति हेतुत्वं क्लृप्तम् इति न गौरवम् ॥

प्राचीनमते तु प्रत्यक्षादौ कारणत्वेन अक्लृप्तस्य योग्यताज्ञानस्य शाब्दबोधं प्रति कारणत्वं कल्पनीयम् इति गौरवम् इति नवीनानां आशयः । अस्मिन् नवीनमते अस्वारस्यं आहुः इत्यनेन सूचयति मूलकारः । तथा हि – यत्प्रकारकम् अनुमित्यादिकं न उत्पन्नम्, अपि तु शाब्दबोध एव जातः, तत्प्रकारकशाब्दबोधं प्रति तदभावप्रकारकज्ञानस्य प्रतिबन्धकत्वं, तादृशज्ञानाभावस्य कारणत्वं च कल्पनीयम् इति कारणत्वकल्पने प्राचीननवीनयोः उभयोः साम्यम् । नव्यमते कारणतावच्छेदकधर्मस्य गुरुत्वम्, प्राचीनमते लघुत्वम् इति तादृशशाब्दबोधविशेषे योग्यताज्ञानत्वेनैव कारणत्वं कल्पनीयम् इति ।

''यद्विशेषयोः कार्यकारणभावः सः तत्सामान्ययोः'' इति न्यायेन शाब्दबोधसामान्ये योग्यताज्ञानत्वेन कारणत्वं सिद्ध्यति इति भावः ।।

ननु तादृशशाब्दबोधविशेषे योग्यताज्ञानत्वेन हेतुत्वसिद्धावपि शाब्दबोधसामान्ये योग्यताज्ञानत्वेन हेतुत्वे प्रमाणाभावः । ''यद्विशेषयोः'' इत्यादिनियमस्य अप्रामाणिकत्वात् इत्यतः दूषणान्तरम् आह – एवं इच्छाया इति । लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतत्प्रकारकज्ञानसामान्यं प्रति तदभावनिश्चयः प्रतिबन्धकः इति सामान्यरूपेण प्रतिबन्धकत्वं न संभवति । ''घटाभाववद्भूतलम्'' इति निश्चयकालेऽपि ''घटप्रकारकभूतलविशेष्यकचाक्षुषप्रत्यक्षं मे जायताम्'' इति इच्छाबलात् ''भूतलं घटवत्'' इत्याकारकस्य घटांशे आलौकिकस्य भूतलांशे लौकिकस्य च चाक्षुषप्रत्यक्षस्य उत्पत्या व्यभिचारापत्तेः । अत्र व्यभिचारो नाम प्रतिबन्धकसत्त्वेऽपि कार्योत्पत्तिः । किन्तु तत्प्रकारकचाक्षुष-प्रत्यक्षेच्छाविरहविशिष्टतदभावप्रकारकनिश्चयत्वेन तत्प्रकारकचाक्षुषं प्रति विशिष्यैव प्रतिबध्यप्रतिबन्धकभावः वक्तव्यः । अनुमितिस्थले च तत्प्रकारकानुमितित्वावच्छिन्नं प्रति तदभावप्रकारकनिश्चयत्वेन पृथगेव प्रतिबन्धकत्वं वक्तव्यम् । यदि तु ''भूतलं घटाभाववत्'' इति निश्चयकाले '' 'भूतलं घटवत्' इति अनुमितिः मे जायताम्'' इति इच्छाबलात् ''भूतलं घटवत्'' इत्यनुमितिः स्यात्, तदा प्रत्यक्षानुमितिसाधारण्येन तत्प्रकारकज्ञानत्वावच्छिन्नं प्रति इच्छाविरहविशिष्टतद-भावप्रकारकनिश्चयः प्रतिबन्धकः इति प्रतिबध्यप्रतिबन्धकभावः कल्पयितुं शक्यते । परन्तु बाधनिश्चयकाले इच्छावशात् अनुमितिः न अङ्गीक्रियते । परोक्षज्ञानस्य आहार्यस्य अनभ्युपगमात् । बाधकालीनेच्छाजन्यस्य प्रत्यक्षातिरिक्तस्य ज्ञानस्य अनङ्गीकारात् इति यावत् । एवञ्च अनुमितिस्थले इच्छाविरहविशिष्टत्वम् अनन्तर्भाव्यैव प्रतिबन्धकत्वं कल्पनीयम्, प्रत्यक्षस्थले तु तदन्तर्भाव्यप्रतिबन्धकत्वं कल्पनीयम् इति उभयत्र पृथगेव प्रतिबन्धकता । तथा च शाब्दबुद्धावपि

अयोग्यतानिश्चयस्य पृथगेव प्रतिबन्धकत्वं कल्पयित्वा तदभावस्य कारणत्वं कल्पनीयम् । तदपेक्षया लाघवात् योग्यताज्ञानस्य कारणत्वकल्पनमेव उचितम् ॥

न च – प्रत्यक्षस्थले पृथक् प्रतिबन्धकत्वम् अस्तु । अनुमितिशाब्दयोस्तु अनुगतरूपेण प्रतिबन्धकत्वं वक्तुं शक्यते । तथा हि – प्रत्यक्षान्यतत्प्रकारक-ज्ञानत्वावच्छिन्नं प्रति तदभावनिश्चयः प्रतिबन्धकः इति कल्पनात् शाब्दबोधस्थले पृथक् प्रतिबन्धकत्वं न कल्पनीयम् इति वाच्यम् । प्रत्यक्षान्यत्वज्ञानत्वयोः विशेष्यविशेषणभावे विनिगमनाविरहेण प्रत्यक्षान्यत्वविशिष्टज्ञानत्वावच्छिन्नं प्रति ज्ञानत्वविशिष्टप्रत्यक्षान्यत्वावच्छिन्नं प्रति च तदभावनिश्चयस्य गुरुभूतप्रतिबध्यता-वच्छेदकधर्मद्वयघटितप्रतिबन्धकताद्वयकल्पनापेक्षया प्रतिबध्यतावच्छेदककोटौ शाब्दत्वम् अनुमितित्वं च निवेश्य शाब्दत्वावच्छिन्नं प्रति अनुमितित्वावच्छिन्नं प्रति च तदभावनिश्चयस्य प्रतिबन्धकताद्वयकल्पनमेव उचितम् । तथा च शाब्दबोधेऽपि पृथक् प्रतिबन्धकतायाः कल्पनीयतया गौरवात् लाघवेन योग्यताज्ञानस्यैव हेतुत्वं युक्तम् इति भावः ॥

शङ्कते – न च योग्यताज्ञानस्य इति । संशयनिश्चयसाधारणं ज्ञानं यत्र हेतुः तत्र अप्रामाण्यसन्देहः न कारणत्वविघटकः । ज्ञाने अप्रामाण्यसन्देहेन विषयसन्देहस्यैव जननात् ज्ञानविशेष्यकाप्रामाण्यसंशयस्य विषयसंशयपर्यवसायित्वेन अनुकूलत्वात् । अतः तत्र अप्रामाण्यनिश्चयस्यैव कारणताविघटकत्वेन तन्निश्चयाभाव एव कारणतावच्छेदककोटौ निवेशनीयः इति निश्चयत्वांशस्य निवेशनीयतया गौरवम्। प्रकृते शाब्दबोधं प्रति संशयनिश्चयसाधारणयोग्यताज्ञानस्य प्राचीनमते हेतुतया योग्यताज्ञाने अप्रामाण्यसंशयसत्त्वेऽपि तस्य योग्यतासंशयपर्यवसायितया शाब्दबोधानुकूलत्वात् अप्रामाण्यज्ञानाभाववैशिष्ट्यं योग्यताज्ञाने न निवेश्यते ।

अपि तु योग्यताज्ञाने अप्रमाण्यनिश्चयसत्त्वे शाब्दबोधानुदयात् अप्रामाण्यनिश्चयाभावं निवेश्य तद्विशिष्टस्य योग्यताज्ञानस्यैव शाब्दबोधहेतुत्वं वक्तव्यम् इति निश्चयत्वांशस्य तदभावाप्रकारकत्वे सति तत्प्रकारकत्वरूपस्य कारणतावच्छेदकशरीरे निवेशनीयतया गौरवम् । अयोग्यतानिश्चयस्य शाब्दबोधप्रतिबन्धकत्वे तु अयोग्यतानिश्चये अप्रामाण्यसन्देहोऽपि प्रतिबन्धकताविघटकः । अतः अप्रामाण्यज्ञानसामान्याभाव-विशिष्टायोग्यतानिश्चय एव प्रतिबन्धक इति प्रतिबन्धकतावच्छेदककोटौ निश्चयत्वानिवेशेन लाघवम् इति भावः ।।

यद्यपि अप्रामाण्यज्ञानांशे निश्चयत्वानिवेशोऽपि अयोग्यतानिश्चयस्य प्रतिबन्धकतया अयोग्यताज्ञाने निश्चयत्वनिवेशः आवश्यक एव, तथापि अयोग्यतानिश्चयत्वं तदप्रकारकत्वे सति तदभावप्रकारकत्वरूपं लघु । आप्रामाण्यनिश्चयत्वं तु – अप्रामाण्याभावाप्रकारकत्वे सति अप्रामाण्य-प्रकारकत्वम् । अप्रामाण्यं नाम तदभाववति तत्प्रकारकत्वम्; तथा च तदभाववति तत्प्रकारकत्वरूप-अप्रामाण्याभावाप्रकारकत्वे सति तदभाववति तत्प्रकारकत्व-रूप-अप्रामाण्यप्रकारकत्वरूपं अप्रमाण्यनिश्चयत्वं पूर्वोक्तायोग्यतानिंश्चयत्वापेक्षया गुरु । अतः अयोग्यतानिश्चयत्वावच्छिन्नाभावस्य शाब्दबोधकारणत्वमेव लाघवात् युक्तम् इति भावः ।।

समाधत्ते – **योग्यताज्ञानस्य हेतुत्वे** इति । योग्यताज्ञानस्य हेतुत्वे ''तदभाववति तत्प्रकारकम्'' इति एकविधाप्रामाण्यग्रहाभाव एव कारणता-वच्छेदककोटौ निवेशनीय इति लाघवम् । अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तु त्रिविधाप्रामाण्यज्ञानाभावः निवेशनीयः इति गौरवम्। तथा हि – ''भूतलं घटवत्'' इत्याकारकशाब्दबोधं प्रति भूतलविशेष्यकघटप्रकारकज्ञानरूपं योग्यताज्ञानं कारणम् । तज्ज्ञानविशेष्यक-अप्रामाण्यज्ञानम्, ''इदं ज्ञानं घटाभाववति

घटप्रकारकम्'' इति एकविधमेव । ''भूतलं घटवत्'' इति शाब्दबोधे भूतलविशेष्यकघटाभावप्रकारकनिश्चयः प्रतिबन्धकः । तद्विशेष्यकं च अप्रामाण्यप्रकारकज्ञानं, घटाभावाभाववति घटाभावप्रकारकम्, घटवति घटाभावप्रकारकम् (घटाभावाभावस्य घटरूपत्वात्), प्रतियोगितासंबन्धेन घटाभाववति अभावे (पटाभावे) प्रतियोगितासंबन्धेन घटप्रकारकम् इति त्रिविधम् । सर्वं ज्ञानं धर्मिणि अभ्रान्तम्, प्रकारे तु विपर्ययः इति सिद्धान्तात् ''भूतलं घटाभाववत्'' इति निश्चये भूतलांशे घटाभावस्य अभावांशे घटस्य च प्रकारत्वात् द्वयोरपि प्रकारयोः भ्रमसंभवात् भ्रमत्वरूपस्य अप्रामाण्यस्य द्विविधत्वात् । घटाभावाभावस्य घटस्वरूपत्वेन तस्य घटत्वेन घटाभावाभावत्वेन च निवेशम् अभिप्रेत्य अप्रामाण्यस्य त्रिविधत्वम् । तथा च त्रिविधाप्रामाण्यज्ञानाभावः अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे निवेशनीयः ।।

योग्यताज्ञानस्य हेतुत्वे तु एकविधाप्रामाण्यनिश्चयाभाव एव निवेशनीय इति लाघवम् इति भावः ।।

प्रतिबन्धकतावादिमते अन्यदपि गौरवम् प्रदर्शयति – **बाधनिश्चयस्येव** इत्यादिना । यत्र तदभावनिश्चयः प्रतिबन्धकः, तत्र तदभावव्याप्यवत्तानिश्चयः तदभावधर्मितावच्छेदकतया गृहीतो यो धर्मः तत्प्रकारकनिश्चयश्च प्रतिबन्धकः । ''जलवान् वन्ह्यभाववान्'' इति ज्ञानविशिष्टः ''जलवान् ह्रदः'' इति निश्चयः ''ह्रदो वन्हिमान्'' इत्यनुमितिं प्रति प्रतिबन्धकः । प्रथमज्ञाने वन्ह्यभावधर्मितावच्छेदकत्वेन गृहीतं जलं द्वितीयज्ञाने प्रकारः । अतः ईदृशं ज्ञानं तदभावावच्छेदकतयागृहीतधर्मप्रकारकनिश्चय इति व्यवह्रियते । इदं ज्ञानं ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकम् इत्यपि अस्मिन् शास्त्रे व्यवह्रियते । तथा च अयोग्यतानिश्चयस्य बाधनिश्चयात्मकस्य शाब्दबोधप्रतिबन्धकतावादिना तदभावप्रकारकनिश्चयाभावस्य तदभावव्याप्यप्रकारकनिश्चयाभावस्य तदभावा-

वच्छेदकतया गृहीतधर्मप्रकारकनिश्चयाभावस्य च कारणत्वम् इति कारणतात्रयं कल्पनीयम् । योग्यताज्ञानस्य कारणतावादिना तु योग्यताज्ञानस्य एकस्यैव कारणत्वं कल्पनीयम् इति लाघवम् । अयोग्यतानिश्चयादिसत्त्वे योग्यताज्ञान-रूपकारणविरहादेव शाब्दबोधवारणसंभवात् अयोग्यतानिश्चयाभावादीनां कारणत्वं न कल्प्यते इति लाघवम् । अपि च बाधनिश्चयधर्मिकत्रिविधाप्रामाण्यग्रहाभावनिवेशवत् तदभावव्याप्यनिश्चयादिधर्मिकत्रिविधाप्रामाण्यग्रहाभावस्यापि निवेशनीयतया गौरवम् इति भावः ।।

अतिगौरवाच्च इति । इदमुपलक्षणम् । भिन्नविषयकप्रत्यक्षप्रतिबन्धकशाब्द-सामग्र्यां ग्राह्याभावतद्व्द्देदतद्व्याप्य-अवच्छेदकधर्मदर्शनाभावकूटनिवेशादपि गौरवम् इति ।।

अत्र **नव्याः** – योग्यताज्ञाने अप्रामाण्यनिश्चयेऽपि शाब्दबोधः भवति । अत एव ''मुखं चन्द्रः'' इत्यादिरूपकस्थले शाब्दबोधः । परन्तु तत्र अप्रामाण्यनिश्चयात् न तदुत्तरं चन्द्राहरणादिविषयकप्रवृत्यापत्तिः । इत्थं च योग्यताज्ञाननिष्ठकारणतावच्छेदककोटौ अप्रामाण्यनिश्चयाभावः न निवेश्यते इति **सुबोधिनीकाराः** ।।

ननु शाब्दबोधे अयोग्यानिश्चयस्य प्रतिबन्धकत्वमेव न स्वीक्रियते । उक्तं च **खण्डनकारैः** – ''अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि'' इति । अस्यार्थः – अत्यन्तासति बाधनिश्चयविषयेऽर्थेऽपि शब्दः वाक्यं ज्ञानं – शाब्दबोधं, हि – निश्चयेन करोति हि – जनयत्येव इति । तथा च योग्यताज्ञानकारण-तावादिनामेव गौरवं इति, अत आह – एवम् इति । योग्यताज्ञानस्य शाब्दबोधाजनकत्वे अयोग्यतानिश्चयाभावस्यैव शाब्दबोधकारणत्वपक्षे अयोग्यतानिश्चयाभावघटितशाब्दसामग्रीसत्त्वे ''योग्यताज्ञानाभाववान् अहम्''

इत्याकारकमानसप्रत्यक्षवारणाय तादृशप्रत्यक्षं प्रति ''भूतलं घटवत्'' इति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम् । भिन्ने विषये शाब्दसामग्र्याः बलवत्त्वात् । योग्यताज्ञानस्य शाब्दबोधजनकत्वपक्षे तु योग्यताज्ञानघटित-शाब्दसामग्रीसत्त्वे योग्यताज्ञानाभावरूपस्य विषयस्य अभावादेव योग्यताज्ञानाभाव-विशिष्टात्मविषयकमानसप्रत्यक्षं न भविष्यति, प्रत्यक्षे विषयस्य कारणत्वात् । तथा च मानसप्रत्यक्षे शाब्दसामग्र्याः प्रतिबन्धकत्वं न कल्प्यत इति लाघवम् ।।

।। आकाङ्क्षानिरूपणम् ।।

कारिकावली

यत्पदेन विना यस्य अननुभावकता भवेत् ।
आकाङ्क्षा........

मुक्तावली

आकाङ्क्षां निर्वक्ति – यत्पदेन इत्यादि । येन पदेन विना यत्पदस्य अन्वयाननुभावकत्वम्, तेन पदेन सह तस्य आकाङ्क्षा इत्यर्थः । क्रियापदं विना कारकपदं न अन्वयबोधं जनयति इति तेन तस्य आकाङ्क्षा ।

वस्तुतस्तु क्रियाकारकपदानां सन्निधानम् आसत्त्या चरितार्थम् । परन्तु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणम् । तेन ''घटः कर्मत्वम् आनयनं कृतिः'' इत्यादौ न शाब्दबोधः । ''अयम् एति पुत्रः राज्ञः पुरुषः अपसार्यताम्'' इत्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात् तेनैव अन्वयबोधः । पुरुषेण सह तात्पर्यग्रहे तु तेन सह अन्वयबोधः स्यादेव ।।

दिनकरी

तेन पदेन सह तस्य इति । तत्पदविशिष्टत्वं तत्पदस्य इत्यर्थः । ''घटम् आनय'' इत्यत्र घटपदं विना अम्पदस्य अन्वयाननुभावकत्वात् घटपदविशिष्टत्वम् अम्पदे आकाङ्क्षा । ''घटः कर्मत्वम्'' इत्यादौ कर्मत्वपदे घटपदवत्त्वं तु न आकाङ्क्षा, कर्मत्वपदे ''घटीया कर्मता'' इति शाब्दबोधाननुभावकत्वस्य घटपदविरहाप्रयुक्तत्वात् । अत्र च अननुभावकत्वं तादृशपदपरिचायकम्, न तु आकाङ्क्षास्वरूपान्तर्गतम् । यद्वा अननुभावकत्वमपि आकाङ्क्षास्वरूपान्तर्गतम् । शाब्दबोधे तस्य स्वरूपत एव उपयोगः । तेन जनितान्वयबोधात् वाक्यात् न पुनः अन्वयबोधापत्तिः । एकपदे अपरपदवत्त्वांशश्च ज्ञात एव उपयुज्यते । तेन – क्रियापदेन । तस्य–कारकपदस्य ।।

अत्र च एकपदे अपरपदवत्त्वम् – अपरपदाव्यवहितोत्तरत्वम् । तत्र च अव्यवधानांशस्य आसत्त्यैव लाभः । आसत्तेः पदाव्यवधानरूपतायाः पूर्वम् उपवर्णितत्वात् । उत्तरत्वं च क्रियाकारकपदयोः न अपेक्षितम् । ''चैत्रः पचति'', ''पचति चैत्रः'' इति वाक्यद्वयादपि अन्वयबोधात् । अतः क्रियाकारकपदयोः आकाङ्क्षा नास्त्येव, किन्तु प्रकृतिप्रत्यययोरेव । तत्रापि अव्यवधानांशस्य आसत्त्या लाभात्, प्रत्यये प्रकृत्युत्तरत्वरूपाकाङ्क्षाज्ञानं कारणम् इत्याह – **वस्तुतस्तु** इत्यादिना ।।

ननु ''अयम् एति पुत्रो राज्ञः'' इत्यादौ अजनितान्वयबोधदशायां राजपदस्य पुत्रपदेनेव पुरुषपदेनापि आकाङ्क्षासत्त्वात् ''राज्ञः पुरुषः'' इति अन्वयबोधः स्यात्, अत आह – **अयम् एति इति** । तथा च राजपदपुरुषपदयोः आकाङ्क्षायाः सत्त्वेऽपि तात्पर्याभावात् न तथा अन्वयबोध इति भावः । **स्यादेव इति** । भवत्येव इत्यर्थः ।।

ननु पुरुषेण पुत्रेण च राजपदस्य तात्पर्यज्ञानेऽपि पुत्रपदराजपदयोः एव यत्र एकवाक्यतानिश्चयः, पुरुषपदराजपदयोः एकवाक्यत्वाभावनिश्चयश्च तत्र पुरुषपदेन सह निरुक्ताकाङ्क्षायाः सत्त्वात् ''राज्ञः पुरुषः'' इति बोधापत्तिः इति चेत्, न । ''यत्पदं विना'' इत्यस्य ''समभिव्याहृतयत्पदं विना'' इत्यर्थकतया समभिव्याहारस्यापि आकाङ्क्षाशरीरे प्रवेशात् । सभभिव्याहारश्च ''इदं पदम् एतत्पदेन सह अन्वयं बोधयतु'' इति पदतात्पर्यम् । प्रकृते च तज्ज्ञानाभावात् तद्घटिताकाङ्क्षाज्ञानाभाव इति ।।

समभिव्याहारस्य न आकाङ्क्षाशरीरे प्रवेशः, किन्तु स्वातन्त्र्येण तज्ज्ञानं शाब्दबोधे कारणम् इति अन्ये ।।

नव्यास्तु – अर्थतात्पर्यज्ञानस्य राजपदं (पुरुष)[पुत्र]विषयकराजसंसर्गक-प्रतीतीच्छयोच्चरितम् इत्याकारकज्ञानत्वादिना हेतुत्वादेव अतिप्रसङ्गाभावे समभिव्याहारज्ञानस्य हेतुत्वे मानाभावः । निरुक्ततात्पर्यनिश्चये पूर्वोक्तसमभि-व्याहारस्य पदतात्पर्यरूपस्य संशये व्यतिरेकनिश्चये वा भवत्येव शाब्दबोधः इति – आहुः इति अन्यत्र विस्तरः ।।

इदं तु बोध्यम् – आकाङ्क्षालक्षणे यत्पदपदं यत्पदज्ञानपरम्, मौनिश्लोकानुरोधात् । अत एव अध्याहृतपदेनापि आकाङ्क्षानिर्वाहः । अध्याहारश्च अश्रुतपदानाम् अनुसन्धानम् । अत एव सर्वापेक्षया जघन्यत्वं तस्य; यतः स्वस्थानस्थितस्य पुनरनुसन्धानम् आवृत्तिः, नेदीयस्थानान्तरस्थितस्य अनुसन्धानम् अनुषङ्गः, दवीयस्थानान्तरस्थितस्य अनुसन्धानम् अनुवृत्तिः । इयं च सिंहावलोकित–मण्डूकप्लुति–गङ्गास्रोतवत् त्रिधा इति ।।

निराकाङ्क्षात्वज्ञानस्य प्रतिबन्धकत्वम्, न तु आकाङ्क्षाज्ञानस्य हेतुत्वम् इति तु न सत् । तथा सति आकाङ्क्षाभाव–तद्व्याप्य–तदवच्छेदकधर्मज्ञानानां प्रतिबन्धकत्वे गौरवात् इति अलम् ।।

राजीवोल्लासः

कारिकायां – यत्पदेन विना इति । ''घटमानय'' इत्यादौ ''घट-कर्मक-आनयनानुकूलकृतिमान्'' इति शाब्दबोधं प्रति घटपदस्य नीधातुसहकारेण जनकत्वात् नीधातौ घटपदवत्त्वस्यापि आकाङ्क्षात्वापत्तिः । अतः यत्पदेन सह यस्य अनुभावकत्वम् इति अनुक्त्वा निषेधद्वयघटनम् ।।

ननु तेन पदेन सह तस्य आकाङ्क्षा इत्येतावता न आकाङ्क्षास्वरूपं निष्पन्नं भवति इत्यतः व्याचष्टे **दिनकर्यां – तत्पदविशिष्टत्वम्** इति । अव्यवहितपूर्ववृत्तित्वाव्यवहितोत्तरवृत्तित्व–अन्यतरसंबन्धेन तत्पदविशिष्टत्वं तत्पदस्य आकाङ्क्षा इत्यर्थः । तथा च येन पदेन विना यत्पदस्य यादृशशाब्दबोधाजनकत्वम् उक्तान्यतरसंबन्धेन तत्पदविशिष्टतत्पदत्वं तादृशशाब्द-बोधप्रयोजकाकाङ्क्षा इति भावः ।।

तेन ''घटम्'' इत्यादिस्थले अव्यवहितोत्तरत्वादिसंबन्धेन ''अम् पदं घटपदवत्'' इत्याकारकस्य ''अम्'' पदविशेष्यकघटपदप्रकारकज्ञानस्य सत्त्वे ''घटीयं कर्मत्वम्'' इति बोधः । न तु ''अम् घट'' इति विपरीतोच्चारणे । तस्मात् तादृशाकाङ्क्षाज्ञानं शाब्दबोधे कारणम् इति भावः । **घटपदविरहाप्रयुक्तत्वात्** इति । घटपदे सत्यपि, कर्मत्वपदे अन्वयाननुभावकत्वसत्त्वेन व्यतिरेकव्यभिचारात् कर्मत्वपदनिष्ठम् अन्वयाननुभावकत्वं न घटपदविरहप्रयुक्तम् इति भावः ।।

अत्र च इत्यादि । ''अम्''पदे घटपदाव्यवहितोत्तरत्वज्ञानसत्त्वे, अम्पदं घटपदं विना शाब्दबोधाजनकम् इति अम्पदविशेष्यक – घटपदव्यतिरेकप्रयुक्तशाब्द-बोधजनकत्वाभावप्रकारकज्ञानस्य अभावेन शाब्दबोधाभावस्य अननुभवात् अम्पदस्य घटपदाव्यवहितोत्तरत्वम् एव आकाङ्क्षा । अम्पदे घटपदं विना शाब्दबोध-

जनकत्वाभावः न आकाङ्क्षाशरीरे प्रविष्टः । तत्कथनं तु अम्पदघटपदादीनां परिचयार्थम् । घटपदकर्मत्वपदयोस्तु यत्तत्पदाभ्यां न ग्रहणम् । कर्मत्वपदस्य ''घटीया कर्मता'' इत्याकारकशाब्दबोधाजनकतायाः घटपदविरहाप्रयुक्तत्वात् । घटपदसत्त्वेऽपि कर्मत्वपदस्य तादृशशाब्दबोधाजनकत्वात् इति भावः ।।

ननु अन्वयाननुभावकत्वस्य आकाङ्क्षालक्षणाघटकत्वे जनितान्वयबोधस्थले पुनः शाब्दबोधापत्तिः तत्पदविशिष्टतत्पदत्वरूपाकाङ्क्षाज्ञानसत्त्वात् । तस्य लक्षणघटकत्वे तु अन्वयानुभवजनकत्वस्यैव सत्त्वात् न आपत्तिः इति अस्वरसात् आह – **यद्वा** इति । **स्वरूपत एव** इति । तथा च तत्पदजन्यशाब्दबोधं प्रति तत्पदजन्यशाब्दबोधाभावः हेतुः इति भावः । अत एव निषेधद्वयगर्भ-परिचायकप्रदर्शनं सार्थकम् । न च – एवं खण्डवाक्यार्थबोधे जाते महावाक्यार्थ-बोधानुपपत्तिः इति – वाच्यम् । तात्पर्यविषयमहावाक्यार्थबोधाभावस्यैव हेतुत्वात् । तावत्पदजन्यशाब्दबोधविषयित्वाव्यापकविषयिताशून्य-शाब्दबोधत्वस्यैव तावत्पदजन्यबोधाभावकार्यतावच्छेदकत्वात् वा ।।

आकाङ्क्षासत्त्वात् इति । यद्यपि प्रकृतिप्रत्यययोरेव आकाङ्क्षा इति अनुपदम् उक्तत्वात् कथं राजपदपुरुषपदयोः वा, राजपदपुत्रपदयोः वा आकाङ्क्षा इति शङ्का भवति, तथापि अव्यवधानरूपासत्तिसहितप्रकृतिप्रत्ययानुपूर्वीरूपाकाङ्क्षा-सत्त्वात् इति व्याख्येयम् । यद्वा पदानां सन्निधानमपि आकाङ्क्षा इति यथाश्रुतानुसारेण इदम् । **तात्पर्याभावात्** इति । तथा च वक्तुः पुत्रराज्ञोः संबन्धबोधेच्छायां सत्यां पुत्रेण सहैव राजपदार्थस्य अन्वयबोधः । यदा तु वक्तुः पुरुषराज्ञोः संबन्धबोधेच्छा तदा पुरुषराज्ञोः अन्वयबोधः भवत्येव । तथा च तात्पर्यमेव राज्ञः कदाचित् पुत्रेण कदाचित् पुरुषेण अन्वयबोधे नियामकं, न तु आकाङ्क्षा इति भावः ।।

तात्पर्यज्ञाने इति । ''पुरुषे पुत्रे च राजसंबन्धबोधो भवतु'' इति आकारिकायाः वक्तुः इच्छायाः ज्ञाने इत्यर्थः । तथा च ''तात्पर्यज्ञाने'' इत्यस्य ''तात्पर्यप्रकारकज्ञाने'' इत्यर्थः । ''इदं वाक्यं स्वप्रयोज्योच्चारणकर्मत्व-संबन्धेन पूर्वोक्तेच्छारूपतात्पर्यविशिष्टम्'' इति तात्पर्यज्ञानाकारः । स्वं – इच्छा । **एकवाक्यतानिश्चय** इति । राज्ञ इति पदं पुत्रपदार्थेन अन्वयबोधेच्छया उच्चरितं, न तु पुरुषपदार्थेन अन्वयबोधेच्छया उच्चरितम्'' इत्याकारकनिश्चयकाले इति समुदायार्थः । तथा च तादृशनिश्चयकाले ''राज्ञः'' इति पदस्य अव्यवधानसहिताकाङ्क्षायाः पुरुषपदेन साकमपि सत्त्वात् ''राजसंबन्धी पुरुष'' इत्याकारकः शाब्दबोधो भवतु इति शङ्का । समाधत्ते – **यत्पदं विना इत्यस्य** इति । समभिव्याहृतयत्पदं विना यत्पदस्य अन्वयाननुभावकत्वं तत्पदविशिष्टत्वं तत्पदस्य आकाङ्क्षा । समभिव्याहारश्च ''इदं पदम् एतत्पदेन सह अन्वयबोधं जनयतु'' इत्याकारकेच्छात्मकं पदविषयकतात्पर्यम् । ''अयमेति पुत्रो राज्ञः, पुरुषोऽपसार्यताम्'' इत्यत्र 'राज्ञः' इति पदं पुत्रपदेन सहान्वयबोधं जनयतु'' इति तात्पर्यज्ञाने पुत्रपदमेव भासते न पुरुषपदम् इति समभिव्याहृतयत्पदमित्यनेन पुरुषपदस्य ग्रहीतुम् अशक्यतया न पुरुषपदेन सह आकाङ्क्षा इत्यर्थः । तथा च ''समभिव्याहृतम्'' इत्यस्य उक्तेच्छाविषयभूतम् इत्यर्थः ।।

पदतात्पर्यरूपस्य समभिव्याहारस्य न आकाङ्क्षाशरीरे प्रवेशः । उक्ताकारकपदतात्पर्यरूपसमभिव्याहारविषयकज्ञानं आकाङ्क्षाशरीरप्रवेशं विना स्वतन्त्रतया कारणम् इति वदतां मतम् आह – **समभिव्याहारस्य** इति । ''पुरुषविषयक'' इत्यस्य स्थाने ''पुत्रविषयक'' इति पाठः साधुः । **अतिप्रसङ्गाभाव** इति । पुरुषेण सह राज्ञः अन्वयबोधप्रसङ्गाभावे सति इत्यर्थः । **समभिव्याहारज्ञानस्य** इति । पदतात्पर्यज्ञानस्य इत्यर्थः ।।

ननु पदतात्पर्यज्ञानस्य शाब्दबोधहेतुत्वाभावे ''राजपदं पुत्रविषयकराज-संसर्गकप्रतीतीच्छया उच्चरितम्'' इत्याकारकार्थतात्पर्यनिश्चयसत्त्वे पूर्वोक्तपदतात्पर्य-संशये पदतात्पर्याभावनिश्चये च पुत्रपदेन राज्ञः शाब्दबोधप्रसङ्ग इत्याशङ्क्य इष्टापत्त्या समाधत्ते – **निरुक्ततात्पर्यनिश्चये** इति । अर्थतात्पर्यनिश्चये सति इत्यर्थः । **पूर्वोक्तसमभिव्याहारस्य** इति । ''इदं पदम् एतत्पदेन अन्वयबोधं जनयतु'' इत्याकारकवक्त्रिच्छारूपस्य इत्यर्थः ।।

आकाङ्क्षालक्षणे इति । अव्यवहितोत्तरत्वसंबन्धेन तत्पदविशिष्टत्वं तत्पदस्य आकाङ्क्षा इति लक्षणे इत्यर्थः । **यत्पदज्ञानपरम्** इति । तथा च अव्यवहितोत्तरत्व-सम्बन्धेन यत्पदज्ञानविशिष्टं यत्पदज्ञानमेव आकाङ्क्षा। अन्यथा मौनिश्लोकादौ पदाभावात् आकाङ्क्षानुपपत्तेः इति भावः । **अत एव** इति । पदज्ञानविशिष्टपदज्ञानस्य आकाङ्क्षात्वादेव इत्यर्थः । **आकाङ्क्षानिर्वाह** इति । अध्याहारस्थले उच्चरितपदा-भावेऽपि पदज्ञानसत्त्वात् पदज्ञानरूपाया आकाङ्क्षाया उपपत्तिः इत्यर्थः । **सर्वापेक्षया** इति । अनुषङ्गाद्यपेक्षया इत्यर्थः । अनुषङ्गादिषु श्रुतपदस्यैव अनुसन्धानकल्पनात् इति भावः ।।

सिंहावलोकित इत्यादि । सिंहस्तु स्वगृहात् निर्गत्य दूरं गत्वा पुनः परावृत्य स्वगृहं पश्यति, तद्वत् उत्तरत्र केषुचित् वाक्येषु पूर्वतनपदस्य अन्वयः नास्ति, क्वचित् उत्तरवाक्ये पूर्वतनपदस्य अन्वयः । सा सिंहावलोकना । उत्तरवाक्येषु एकत्र पूर्वपदस्य अन्वयः एकत्र नान्वयः, पुनः वाक्यान्तरे च तदन्वयः, तत्र मण्डूकप्लुतिः, उत्तरवाक्येषु क्रमेण सर्वत्र पूर्वपदान्वयः गङ्गास्रोतः इति विभागः बोध्यः इति – **तरङ्गिणीकाराः** ।।

प्रतिबन्धकत्वे गौरवात् इति । अथ ग्राह्याभावव्याप्यतदवच्छेदकधर्म-ज्ञानयोर्हि प्रतिबन्धकत्वं दृश्यते । निराकाङ्क्षत्वं च न अत्र ग्राह्याभावः इति न तयोः प्रतिबन्धकत्वापत्तिः ।।

न च – यज्ज्ञानं यत्र प्रतिबन्धकम्, तद्व्याप्यतदवच्छेदकधर्मज्ञानयोरपि तत्र प्रतिबन्धकत्वम् इति – वाच्यम् । तादृशनियमे मानाभावात् । अन्यथा तद्व्याप्यव्याप्य तदवच्छेदकधर्मदर्शनयोरपि प्रतिबन्धकत्वापत्तेः इति चेत्, न । एतद्रीत्या ग्राह्याभावानवगाहितया निराकाङ्क्षत्वज्ञानस्यापि प्रतिबन्धकत्वासंभवात् ।।

अत्र यद्यपि निराकाङ्क्षत्वज्ञानस्य मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वम्, न तु तद्व्याप्यवत्ताज्ञानादेरिति वक्तुं शक्यम्, तथापि न तस्य प्रतिबन्धकत्वं संभवति, यतः प्रतिबन्धकीभूतज्ञानविषयनिराकाङ्क्षत्वस्वरूपं दुर्वचम् ।।

तद्धि न तावत् घटपदानुत्तराम्पदत्वम्, "घटः कर्मत्वम्" इत्यादौ तादृशाम्पदज्ञानाभावे शाब्दबोधापत्तेः । न वा घटपदोत्तराम्पदाभावः, तज्ज्ञानाभावदशायाम् उक्तापत्तेः अवारणात् । "घटः कर्मत्वम्, घटम्" इति यत्र उक्तम्, तत्र प्रतिबन्धकसद्भावात् "घटीया कर्मता" इति शाब्दबोधानुपपत्तिश्च । अतः प्रकृतिप्रत्यययोः पौर्वापर्यरूपाकाङ्क्षाया ज्ञानम्, प्रकृतिप्रत्ययज्ञानयोः पौर्वापर्यरूपाकाङ्क्षा वा शाब्दबोधहेतुः वक्तव्यः इति । एतदभिप्रेत्य उक्तम् – इति अलम् इति ।।

इदम् अत्र अवधेयम् – न केवलं प्रकृतिप्रत्यययोः पौर्वापर्यम् आकाङ्क्षा । अभेदसंसर्गकनीलादिप्रकारकघटादिविशेष्यकबोधे नीलादिपदाव्यवहितोत्तरघटादिपदत्वम्, नीलादिघटादिपदयोः समानविभक्तिकत्वं वापि आकाङ्क्षा । एवं कर्तृत्वाद्यर्थकषष्ठ्या शाब्दजनने कृदन्तपदसमभिव्याहारोऽपि आकाङ्क्षा । एवम् आख्यातेन भावकर्मत्वयोः विवक्षायां यगात्मनेपदसमभिव्याहारोऽपि आकाङ्क्षा इति । विस्तरः व्युत्पत्तिवादादौ द्रष्टव्यः – इति सुबोधिनीकाराः ।।

।। तात्पर्यनिरूपणम् ।।

कारिकावली

............वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ।। ८४ ।।

मुक्तावली

तात्पर्यं निर्वक्ति – वक्तुरिच्छा इति । यदि तात्पर्यज्ञानं कारणं न स्यात्, तदा "सैन्धवम् आनय" इत्यादौ कचित् अश्वस्य क्वचित् लवणस्य बोधः इति न स्यात् ।।

न च – तात्पर्यग्राहकाणां प्रकरणादीनां शाब्दबोधे कारणत्वम् अस्तु इति – वाच्यम् । तेषाम् अननुगमात् । तात्पर्यज्ञानजनकत्वेन तेषाम् अनुगमे तु तात्पर्यज्ञानमेव लाघवात् कारणम् अस्तु ।।

इत्थं च वेदस्थलेऽपि तात्पर्यज्ञानार्थम् ईश्वरः कल्प्यते । न च – तत्र अध्यापकतात्पर्यज्ञानं कारणम् इति – वाच्यम् । सर्गादौ अध्यापकाभावात् । न च – प्रलय एव नास्ति, कुत्र सर्गादिः इति – वाच्यम् । प्रलयस्य आगमेषु प्रतिपाद्यत्वात् । इत्थं च शुकवाक्येऽपि ईश्वरीयतात्पर्यज्ञानं कारणम् । संवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं कारणम् ।।

अन्ये तु – नानार्थादौ कचिदेव तात्पर्यज्ञानं कारणम् । तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः । वेदे तु अनादिमीमांसापरिशोधिततर्कैः अर्थावधारणम् इति – आहुः ।।

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां

सिद्धान्तमुक्तावल्यां शब्दखण्डः ।।

दिनकरी

वक्तुरिच्छा इति इति । ''घटम् आनय'' इत्यादौ कर्मत्वविशेष्यकाधेयतासंसर्गकघटप्रकारकप्रतीतीच्छा वक्तुः तात्पर्यम्, ''तादृशेच्छया उच्चरितम् इदं वाक्यम्'' इत्याकारकं श्रोतुः तात्पर्यज्ञानं शाब्दबोधे कारणम् इत्यर्थः । तत्र युक्तिम् आह – सैन्धव इति । ''आदि''ना ''श्वेतो धावति'' इत्यादिपरिग्रहः । तत्र कदाचित् श्वेतगुणविशिष्टस्य, कदाचित् कुक्कुरादेः बोधस्य तात्पर्यज्ञाननियम्यत्वात् । क्वचित् लवणस्य इति । क्वचित् तदुभयोरित्यपि बोध्यम् । इति न स्यात् इति । नियमो न स्यात् इत्यर्थः ।।

इदम् उपलक्षणम् – तात्पर्यसंशये व्यतिरेकनिश्चये च शाब्दबोधानुदयात् शाब्दबोधे तात्पर्यज्ञानं कारणम्, ''यत्संशय....'' इति व्याप्तेः इत्यपि बोध्यम् । प्रकरण इति । ''आदि''ना संयोग-विप्रयोग-साहचर्यादीनां परिग्रहः । प्रकरणादीनां क्लृप्तनियतपूर्ववर्तिताकत्वेन अनन्यथासिद्धत्वमात्रं कल्प्यते, लाघवात् इति भावः । अननुगमात् इति । तथा च परस्परजन्यशाब्दबोधे परस्परव्यभिचारेण न हेतुत्वसंभव इति भावः । इत्थं च इति । शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य हेतुत्वे च इत्यर्थः । एवम् अग्रेऽपि । प्रलयस्य – कार्यद्रव्यानधिकरणकार्याधिकरण कालविशेषात्मकखण्डप्रलयस्य ।।

आगमेषु इति ।

''नाहो न रात्रिः न नभो न भूमिः
नासीत् तमो ज्योतिरभून्न चान्यत्''

इत्याद्यागमेषु इत्यर्थः ।।

शुकवाक्येऽपि – संवादिशुकवाक्यजन्यबोधेऽपि । **शिक्षयितुरेव** इति । ईश्वरेच्छायां विसंवादित्वाभावात् इत्यर्थः ।।

अन्ये तु इति । **कचित्** इत्यस्य विवरणं **नानार्थादौ** इति । गृहीतनानार्थवृत्तिकादौ इत्यर्थः । तेन गृहीतनानार्थशक्तिकस्य गृहीतनानार्थलक्षणाकस्य गृहीतविभिन्नार्थशक्तिलक्षणाकस्य च सङ्ग्रहः । "आदि"ना एकार्थगृहीत-लक्षणाकस्य संग्रहः । **मीमांसा** – लाघवज्ञानात्मकः तर्कः । **परिशोधित** इति । सहकृतेत्यर्थः । **तर्कः** – अनुमानम् ।।

आहुः इति अस्वरसोद्भावनम् । तद्बीजं तु – गृहीतनानार्थवृत्तिकपदजन्या-नुभवत्वापेक्षया लाघवेन पदजन्यानुभवत्वस्यैव तात्पर्यज्ञानजन्यतावच्छेदकत्वम् उचितम् इति **अन्यत्र अधिकम् अनुसन्धेयम्** ।।

इति

श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मज-

महादेवभट्टारब्धे तत्पुत्रदिनकरभट्टप्रपूरिते

मुक्तावलीप्रकाशे शब्दखण्डः समाप्तः ।।

राजीवोल्लासः

ननु मूले वक्तुरिच्छायाः तात्पर्यत्वं प्रतिपादितम् । तात्पर्यविषयकज्ञानं च शाब्दबोधे हेतुः इति वक्तव्यम् । तत्र "घटमानय", "पटमानय" इति वाक्यद्वयप्रयोगस्थले वक्तृगतेच्छाद्वयविषयकज्ञानात् कस्माद्वाक्यात् कीदृशार्थस्य बोधः श्रोतुः भवति इति निर्णेतुम् अशक्यम् । अतः तादृशतात्पर्यस्वरूपं तद्विषयकज्ञानाकारं च दर्शयति – **घटम् आनय इत्यादौ** इति । "घटम्

आनय'' इत्यादौ कर्मत्वविशेष्यक-आधेयत्वसंसर्गक-घटप्रकारकप्रतीतिः भवतु'' इत्याकारकेच्छा वक्तृनिष्ठा तात्पर्यम् । ''तादृशेच्छया उच्चरितम् इदं वाक्यम्'' इत्याकारकं श्रोतृनिष्ठं तात्पर्यज्ञानं श्रोतुः शाब्दबोधे कारणम् । तथा च स्वप्रयोज्योच्चरितत्वसम्बन्धेन यादृशवाक्यविशेष्यकं वक्तुरिच्छारूपतात्पर्यप्रकारकं ज्ञानं भवति तत् तादृशवाक्यजन्यशाब्दबोधे कारणम् इति न अनियमः इति भावः । **तत्र युक्तिम्** इति । तात्पर्यज्ञानस्य शाब्दबोधकारणत्वे युक्तिम् इत्यर्थः । तात्पर्यज्ञानस्य शाब्दबोधकारणत्वाभावे ''सैन्धवम् आनय'' इत्यादौ सैन्धवपदात् कदाचित् अश्वस्य कदाचित् लवणस्य बोधः इति नियमः न स्यात् । एवं ''श्वेतो धावति'' इत्यादौ श्वेतपदात् कदाचित् श्वेतवर्णः, कदाचित् श्वा-कुक्कुरः इतः – अस्मात् धावति इत्यर्थश्च बुध्यते इति नियमः तात्पर्यज्ञानाधीनः । अतः तात्पर्यज्ञानस्य शाब्दबोधकारणत्वम् आवश्यकम् इति भावः ।।

इदममुपलक्षणम् इत्यादि । न केवलं पूर्वोक्तनियमनिर्वाहार्थं तात्पर्यज्ञानस्य शाब्दबोधकारणत्वम्, किन्तु तात्पर्यसंशये तात्पर्याभावनिश्चये वा शाब्दबोधानुदयात् तात्पर्यनिश्चयस्य शाब्दबोधकारणत्वं वक्तव्यम् । ''यत्संशययद्व्यतिरेकनिश्चयौ यदुत्पत्तिप्रतिबन्धकौ तन्निश्चयः तद्धेतुः'' इति व्याप्तेः **चिन्तामणौ** उक्तत्वात् इति भावः । यथा व्याप्तिसंशये व्याप्त्यभावनिश्चये वा अनुमितिः न उत्पद्यते इति व्याप्तिनिश्चयस्य अनुमितिहेतुत्वं, तद्वत् इति भावः ।।

संयोगविप्रयोग इति ।

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्य अन्यस्य सन्निधिः ।।

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।।

इति कारिके अत्र अनुसन्धेये ।

संयोगो नाम वाच्यैकार्थनिष्ठार्थान्तरसम्बन्धः । यथा "पुंखयतु अधिकां भूतिं शङ्खचक्रधरो हरिः" इत्यादौ हरिशब्दस्य इन्द्रादिनानार्थवाचकस्य वाच्यैकार्थ-नारायणनिष्ठशङ्खचक्रादिरूपार्थान्तरसंयोगेन नारायण एव तात्पर्यं निश्चीयते । एवं विप्रयोगः नाम वाच्यैकार्थनिष्ठार्थान्तरसंयोगाभावः, वाच्यैकार्थनिष्ठार्थान्तरविभागो वा । यथा "अपिनाको भवो भवान्" इत्यादौ भवशब्दस्य संसारादिनानार्थ-साधारणस्य वाच्यैकार्थनिष्ठपिनाकादिरूपार्थान्तरसंयोगाभावेन विभागेन वा शिवे तात्पर्यं निश्चीयते । एवं साहचर्यं नाम वाच्यैकार्थनिष्ठार्थान्तरसामानाधि-करण्यम् । यथा "वन्देऽहं रामलक्ष्मणौ" इत्यादौ भार्गवादिनानार्थवाचकस्य रामपदस्य सौमित्रिरूपार्थान्तरसाहचर्येण दाशरथौ तात्पर्यं निश्चीयते । "आदि"ना विरोधितादिपरिग्रहः । विरोधिता नाम सहानवस्थितिः । यथा "दिनं निशां च संयुध्य" इत्यादौ निशाशब्दस्य हरिद्रादिसाधारणस्य दिनेन सह अनवस्थानरूप-विरोधात् रात्रौ तात्पर्यं निश्चीयते । **प्रकरणादीनाम्** इति । प्रकरणादीनां शाब्दबोधात् पूर्वं नियमेन वर्तमानतया कारणत्वघटकं नियतपूर्ववृत्तित्वं क्लृप्तम् । कारणत्वघटकं अनन्यथासिद्धत्वमात्रं कल्पनीयम् इति लाघवम् । तात्पर्यज्ञानस्य तु नियतपूर्ववृत्तित्वं अनन्यथासिद्धत्वं च कल्पनीयमिति गौरवम् । अतः प्रकरणादीनामेव तात्पर्यग्राहकाणां शाब्दबोधे हेतुत्वम् अस्तु इति शङ्कितुः आशयः ।।

तथा च इति । प्रकरणादीनां शाब्दबोधं प्रति कारणत्वे परस्परजन्यशाब्दबोधे परस्परं व्यतिरेकव्यभिचार इति तेषां कारणत्वमेव न सम्भवति । तत्र

अव्यवहितोत्तरत्वस्य तत्तत्कार्यतावच्छेदककोटौ निवेशेन व्यभिचारवारणे तु अतिगुरुभूतानेककार्यकारणभावापत्तिः इति भावः ।।

मूले अननुगमात् इति । प्रकरणादिसर्वसाधारणानुगताननतिप्रसक्तधर्माभावात् इत्यर्थः । तथा च प्रकरणादीनाम् अनुगतरूपेण कारणत्वासम्भवात्, प्रातिस्विकरूपेण कारणत्वे व्यतिरेकव्यभिचारात्, तत्तदव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वे गौरवाच्च न तेषां शाब्दबोधहेतुत्वसंभव इति भावः । **तात्पर्यज्ञानजनकत्वेन** इति । तात्पर्यज्ञानजनकत्वरूपानुगतधर्मेण प्रकरणादीनां कारणत्वे अभिमते सति तादृशगुरुधर्मेण प्रकरणादीनां बहूनां कारणत्वापेक्षया तात्पर्यज्ञानत्वरूपलघुधर्मेण एकस्य तात्पर्यज्ञानस्य कारणत्वे लाघवात् तदेव कारणम् अस्तु इति भावः ।।

तात्पर्यज्ञानार्थम् इति । तात्पर्यज्ञानरूपकारणसम्पत्त्यर्थं वेदस्थले ईश्वरः अनुमीयते । तथा च ''वेदवाक्याधीनशाब्दबोधः तात्पर्यज्ञानजन्यः, शाब्दत्वात्, सैन्धवमानय इत्यादिवाक्यजन्यशाब्दबोधवत्'' इत्यनुमानात् तात्पर्यज्ञानसिद्धौ इतरेषां बाधात् तादृशज्ञानविषयतात्पर्याश्रयतया ईश्वरसिद्धिः इति भावः ।।

उक्तानुमानसिद्धतात्पर्याश्रयः न ईश्वरः इति आशङ्कते – **न च तत्र** इति । वेदवाक्यजन्यशाब्दबोधे अध्यापकनिष्ठतात्पर्यस्य ज्ञानमेव कारणम् इति शङ्का । समाधत्ते – **सर्गादौ** इति । सर्गस्य आदिः सर्गादिः, सृष्ट्यव्यवहितप्राक्कालः प्रलयः इति यावत् । तदानीम् अध्यापकस्य अभावात् तदीयतात्पर्यं न सम्भवति इति भावः । **न च प्रलय एव नास्ति** इति । कार्यद्रव्यानधिकरणकाल एव नास्ति इत्यर्थः । **प्रलयस्य** इति । कार्यद्रव्यानधिकरणकार्याधिकरणकालविशेषार्थकखण्डप्रलयस्य इत्यर्थः । महाप्रलये प्रमाणाभावात् ।।

ननु शुकवाक्येऽपि ईश्वरीयतात्पर्यज्ञानं कारणम् इति मूलम् असङ्गतम् । तादृशशुकवाक्ये तात्पर्यज्ञानस्य अहेतुत्वात् इति, अत आह – **संवादि** इति । प्रमाजनकेत्यर्थः । तथा च **शुकवाक्ये** इति **मूलस्य** प्रमाजनकशुक-वाक्यजन्यशाब्धबोधे इत्यर्थः । "वह्निना सिञ्चति" इति शुकवाक्यजन्यशाब्दबोधे ईश्वरीयतात्पर्यज्ञानं न हेतुः । ईश्वरस्य विसंवादीच्छापत्तेः इत्यतः तादृशवाक्य-व्यावृत्त्यर्थं **संवादि** इति वाक्यविशेषणम् । न च – वक्तुरिच्छायाः तात्पर्यरूपत्वेन ईश्वरस्य शुकवाक्यवक्तृत्वाभावात् कथम् ईश्ववरेच्छायाः तात्पर्यरूपता इति – वाच्यम् । वाक्यानुकूलप्रयत्नवत एव वक्तृत्वेन ईश्वरप्रयत्नस्य कार्यसामान्यानुकूलत्वेन शुकवाक्यानुकूलत्वात् ईश्वरस्य शुकवाक्यवक्तृत्वात् इति भावः । शुकस्य तात्पर्याभावेन अगत्या च ईश्वरस्यैव वक्तृत्वस्वीकारात् इति मन्तव्यम् । एवं शिक्षयितुः प्रयत्नस्य परम्परया शुकवाक्यानुकूलत्वेन शिक्षयितुः इच्छाया अपि तात्पर्यरूपता बोध्या ।।

सर्वत्र नानार्थस्थले तात्पर्यज्ञानस्य हेतुत्वोपगमात् "**क्वचित्**" इति असङ्गतम् इति आशङ्क्य "**क्वचित्**" इत्यस्यैव विवरणं नानार्थादौ इति इत्याह – **क्वचित्** इति । ननु नानार्थत्वं यदि नानार्थशक्तत्वं तदा नानार्थलाक्षणिकस्थले क्वचित् कस्यचिदर्थस्य बोधतात्पर्यनियमः न स्यात्, अतः नानार्थगृहीतवृत्तिकत्वमेव नानार्थत्वम् इत्याह – **गृहीत** इति । गृहीता नानार्थे वृत्तिः शक्तिः लक्षणा तदुभयं वा यस्य शब्दस्य सः गृहीतनानार्थवृत्तिकः । तथा च गृहीतनानार्थशक्तिकस्य हर्यादिपदस्य गृहीतनानार्थलक्षणाकस्य करणत्वसहार्थादि-लाक्षणिकस्य कृतिशक्तस्य तृतीयादेः, गृहीतविभिन्नार्थशक्तिलक्षणाकस्य कृतौ शक्तस्य आश्रयत्वे लाक्षणिकस्य तिबादेः च पदस्य सङ्ग्रहः । **गृहीत-**

विभिन्नार्थ इति । एकस्मिन्नर्थे गृहीतशक्तिकस्य अन्यस्मिन्नर्थे गृहीतलक्षणाकस्य पदस्य इत्यर्थः । **आदिना इति** । न च – शक्यसम्बन्धस्यैव लक्षणात्वेन लक्षणाज्ञाने शक्तिज्ञानम् आवश्यकम् । तथा च विभिन्नार्थगृहीतशक्तिलक्षणाकस्य इत्यनेन पूर्वोक्तेन गतार्थमेतत् इति – वाच्यम् । ''विभिन्नार्थे'' इत्यस्य बहुवचनान्ततया गृहीता विभिन्नार्थेषु शक्तिः लक्षणा च यस्य इति विग्रहेण अनेकार्थेषु गृहीतशक्तिकस्य गृहीतलक्षणाकस्य च पदस्यैव पूर्ववाक्यार्थत्वात् ।।

मीमांसाशब्दार्थमाह – **लाघवज्ञानात्मकः तर्कः इति** । ''कपिञ्जलान् आलभेत'' इत्यत्र प्रथमोपस्थितिसंभवेन त्रित्वस्यैव बहुवचनार्थता निश्चयः उपस्थितिकृतलाघवज्ञानात्मकः तर्कः ।।

ननु **''परिशोधित''** इत्यस्य सहकृतार्थकत्वे लाघवतर्कसहकृततर्कान्तरं किम् इत्याकाङ्क्षायाम् आह – **तर्कोऽनुमानम् इति** । अनुमानप्रकारश्च – ''कपिञ्जलान् इति बहुवचनार्थः त्रित्वं, बहुवचनवाच्यत्वात्'' इति । अत्र च लाघवज्ञानं सहकारि । चतुष्ट्वादीनामपि बहुवचनवाच्यत्वात् अनुमानेन त्रित्वमेव बहुवचनार्थः इति निर्णेतुम् अशक्यत्वात् । तत्र बहुत्वस्य त्रित्वरूपत्वे लाघवम् इति लाघवज्ञाने त्रित्वाभिन्नबहुत्वमेव विषयीक्रियते । इत्थं च तादृशतर्कसहकृतया बहुवचनार्थबहुत्वोपस्थित्या त्रित्वविषयक एव अत्र शाब्दबोधः इति भावः । **मूले अनुमानपदेन** प्रतिज्ञादिपञ्चकं तदधीनपरामर्शो वा विवक्षितः । तत्र अनादित्वं च प्रवाहतो बोध्यम् । तेन अनुमानेन अप्रमाण्यशङ्का परिहृता ।।

प्रभायां तु अनादीनां चिरन्तनानां ऋषीणां मीमांसा विचारः, तया परिशोधिताः अबाधितत्वेन निर्णीताः तर्काः लाघवविपक्षबाधकादयः, तैः सहकृतपदैरेव इति विवरणं कृतम् ।।

तद्बीजं तु इत्यादि । नानार्थकस्थल एव यदि तात्पर्यज्ञानस्य हेतुत्वं तदा गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वावच्छिन्नं प्रति तात्पर्यज्ञानं कारणमिति वक्तव्यम् । तत्र कार्यतावच्छेदकस्य गुरुत्वम् । सर्वत्र शाब्दबोधे तात्पर्यज्ञानस्य कारणत्वे शाब्दबोधत्वमेव कार्यतावच्छेदकम् इति लाघवम् । अन्यत्र अधिकम् इति । तात्पर्यसंशयादिस्थले शाब्दबोधाननुभवादपि शाब्दबोधमात्रे तात्पर्यज्ञानस्य हेतुत्वम् आवश्यकम् इति भावः ।।

।। शुभं भूयात् ।।

मुक्तावलीशब्दखण्डप्रकाशोपरि निर्मिता ।
राजीवोल्लासनाम्नीयं व्याख्या संपूर्णतामगात् ।।

इति श्रीरामानुजताताचार्यविरचिते
दिनकरीव्याख्याने राजीवोल्लासे
शब्दखण्डः ।।

|| श्रीरस्तु ||

|| स्मरणनिरूपणम् ||

मुक्तावली

पूर्वम् अनुभव-स्मरणभेदात् बुद्धेः द्वैविध्यम् उक्तम् । तत्र अनुभवप्रकाराः दर्शिताः । स्मरणं तु सुगमतया न दर्शितम् । तत्र हि पूर्वानुभवः कारणम् ॥

अत्र केचित् – अनुभवत्वेन न कारणत्वम्, किन्तु ज्ञानत्वेनैव । अन्यथा स्मरणोत्तरं स्मरणं न स्यात्, समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात् मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यते इति – आहुः ॥

तन्न । यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणम् अजनिष्ट, सकलविषयकस्मरणं तु न अभूत्, तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम् । तथा च न क्रमिकस्मरणानुपपत्तिः ॥

दिनकरी

सुगमतया इति । सुगमस्य स्वयमपि ऊहितुं शक्यतया दुरूहे एव आदौ सुधियां जिज्ञासोदयात् इति भावः । तथा च अवसरसङ्गत्या अनुभवानन्तरं स्मरणनिरूपणम् इति भावः । तत्र हि – स्मरणे हि । स्मरणं न स्यात् इति । अनुभवस्य नष्टत्वात् इति भावः ॥

ननु – अनुभवस्य व्यापारद्वारा कारणत्वम्; तच्च कार्याव्यवहितपूर्वक्षणवृत्तिस्व-स्वव्यापारान्यतरकत्वम्; तच्च अनुभवनाशेऽपि तज्जन्यसंस्कारस्य सत्त्वात् निराबाधम्,

अत आह – **समानप्रकारक** इति । **विनष्टत्वात्** इति । तथा च तादृशमपि कारणत्वम् अनुभवे न संभवति इति भावः । **तेनैव** – संस्करनाशकेन समानप्रकारकस्मरणेनैव । **संस्कारान्तरद्वारा** इति । स्मरणस्य तृतीयक्षणे नाशेन स्वरूपतः हेतुत्वासंभवात् इति भावः । **फलस्य** – प्रत्येकविषयकक्रमिक-स्मरणरूपस्य । **संस्कारनाशकत्वाभावात्** इति । **समानप्रकारकत्वाभावात्** इति भावः । **कालस्य रोगस्य** इति । अन्यथा उक्तसमूहालम्बनसंस्कार-स्यानाशप्रसङ्गात् इति भावः । न च इष्टापत्तिः । जन्यभावत्वेन विनाशित्वनियमात् ।।

ननु कालादेः कालत्वादिना नाशकत्वे संस्कारमात्रस्य क्षणिकत्वापत्तिः, तद्व्यक्तित्वेन तथात्वे गौरवम्, अत आह – **चरमफलस्य वा** इति । चरमफले वैजात्यं कल्पयित्वा तेन रूपेण नाशकत्वं वाच्यम् इति भावः । **न क्रमिक** इति । न स्मरणोत्तरस्मरणम् इत्यर्थः ।।

राजीवोल्लासः

मुक्तावलीप्रकाशस्य मनःस्मरणखण्डयोः ।
राजीवोल्लासनाम्नीयं व्याख्या प्रारभ्यतेऽधुना ।।

सुगमस्य स्वयमपि इति । मूले स्मरणानिरूपणे यत्सुगमत्वं हेतुतया उक्तं तदेव इदानीं स्मरणनिरूपणे सङ्गतिद्योतकमपि इति भावः । **तच्च कार्य** इति । कार्याव्यवहितप्राक्क्षणवृत्तिभिन्नं कार्याव्यवहितप्राक्क्षणवृत्तिस्वव्यापारकभिन्नं च यद्यत् तत्तद्भिन्नत्वम् इत्यर्थः । यथाश्रुते कपालसंयोगपरामर्शादौ कारणलक्षणाव्याप्तेः तत्र तद्व्यापाराप्रसिद्धेः । वस्तुतस्तु तत्कार्याव्यवहितपूर्ववृत्तित्व-तादृशपूर्ववृत्तित्वाश्रया-व्यवहितपूर्ववृत्तित्वान्यतरत्वे सति अनन्यथासिद्धत्वमेव तत्कार्यकारणत्वम् । अस्य अयम् अनुगमः– कार्यविशिष्टान्यत्वं कारणत्वम् । वैशिष्ट्यं च

स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदद्वयवत्त्वसम्बन्धेन । अवच्छेदकते च स्वाव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धावच्छिन्ने । एकं वृत्तित्वं कालिकसम्बन्धावच्छिन्नम्, अपरं वृत्तित्वं च स्वनिरूपितव्यापारवत्त्वसम्बन्धावच्छिन्नम् इति ।।

मुक्तावल्यां कालस्य इति । ''कालेन तद्विस्मृतं मया'' इत्यादिव्यवहारदर्शनात् इति भावः । सन्निपातज्वरादीनां संस्कारनाशहेतुत्वस्य आयुर्वेदप्रतिपादितत्वात् अनुभूयमानत्वात् च आह – **रोगस्य** इति । रोगविशेषस्य इत्यर्थः । उभयत्रापि कार्यता कारणता च कालिकसम्बन्धावच्छिन्ना ।।

दिनकर्यां समानप्रकारकत्वाभावात् इति । संस्कारान्यूनप्रकारकत्वाभावात् इत्यर्थः । न च – तत्प्रकारकसंस्कारनाशं प्रति तत्प्रकारकस्मरणं कारणमित्येव अस्तु । एवं च फलस्य संस्कारनाशकत्वमपि घटत इति – वाच्यम् । तर्हि तत्र घटस्मरणेनैव समूहालम्बनसंस्कारनाशात् पटस्मरणस्य अनन्तरं जायमानस्य अनुपपत्तेः ।।

मुक्तावली

न च-पुनः पुनः स्मरणात् दृढतरसंस्कारानुपपत्तिः इति – वाच्यम् । झटिति उद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात् । न च – विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यात् इति – वाच्यम् । विशेषधर्मेण व्यभिचाराज्ज्ञाने सामान्यधर्मेण अन्यथासिद्धत्वात् । कथम् अन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम्?

न च – आन्तरालिकस्मरणानां संस्कारनाशकत्वसंशयात् व्यभिचारसंशयः इति – वाच्यम् । अनन्तसंस्कारतन्नाशकल्पनापेक्षया चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात् ।।

दिनकरी

दार्ढ्यपदार्थत्वात् इति । तथा च पुनःपुनः स्मरणात् न दृढतरसंस्कारोत्पत्तिः; किन्तु विद्यमानसंस्कारस्यैव पुनःपुनः स्मरणेन झटिति उद्बोधकसमवधानं जायते, उद्बुद्धाच्च तस्मात् स्मरणान्तरम् इति भावः । **व्यभिचारसंशय** इति । अनुभवत्वेन हेतुत्वे व्यभिचारसंशयः इत्यर्थः । तथा च न **विशेषधर्मेण** व्यभिचाराज्ञानम् इति भावः । **व्यभिचारसंशयाभावात्** इति । **सकृदनुभूतस्थले** संस्कारनाशकचरम-स्मृतेः तदानीम् अभावेन संस्कारनाशाभावात् अनुभवत्वेन हेतुत्वेऽपि न व्यभिचारसन्देहः इति भावः । **यद्यपि** अनन्तसंस्कार-तन्नाशक-कल्पनागौरवस्य फलमुखत्वेन न दोषत्वम्, अन्यथा विशिष्टज्ञानकल्पनागौरवभिया अनुमितिं प्रति विशिष्टज्ञानत्वेन हेतुताविलयप्रसङ्गात्, तथापि ज्ञानत्वेन हेतुत्वे **उपेक्षात्मक**-तत्तत्स्मृतिव्यक्तिभेदस्य कारणतावच्छेदककोटिनिवेशेन गौरवम्, अनुभवत्वेन स्मृतिहेतुत्वे तु तत्तत्स्मृतिव्यक्तिभेदानिवेशे लाघवम् इति लाघवज्ञानरूपोत्तेजक-सत्त्वात् व्यभिचारशङ्का अकिञ्चित्करी इत्यत्र तात्पर्यम् ।।

राजीवोल्लासः

मुक्तावल्यां व्यभिचारसंशय इति । आन्तरालिकानां स्मरणानां नाशकत्वेऽपि बाधकाभावात् इति आशयः । ननु चरमफलस्य संस्कारनाशकत्वस्य पूर्वम् उक्तत्वात् आन्तरालिकानां कथम् इदानीं नाशकत्वसंशयसम्भवः इति चेत्, न । यत्र गत्यन्तराभावः, तत्रैव चरमफलस्य वैजात्येन हेतुत्वम्, न तु सर्वत्र, वैजात्यकल्पने मानाभावात् इत्येव पूर्वग्रन्थाशयात् । ननु अनुभवत्वेन स्मृतित्वेन च कार्यकारणभावे व्यभिचारसंशयः कथं कार्यकारणभावान्तरव्यवस्थापनेन अपैति इति शङ्कायां भावं वर्णयति-**सकृत्** इति । ननु विशेषधर्मेण व्यभिचारज्ञानेन

सामान्यधर्मेण ज्ञानत्वेन हेतुत्वे सिद्धे पश्चात् आपतत् अनन्तसंस्कारतन्नाशकल्पनात् गौरवं फलमुखत्वात् न दुष्यति इत्याशङ्क्य निरस्यति–यद्यपि इत्यादिना । उपेक्षात्मक इति । तथा च उपेक्षार्थस्य एकस्य अभावेन उपेक्षाज्ञानत्वावच्छिन्नैक-भेदनिवेशासम्भवेन उपेक्षाज्ञानव्यक्तीः तत्तद्व्यक्तित्वेन उपादाय तत्तद्व्यक्तिभेदकूटस्य कारणतावच्छेदककोटौ निवेशनीयतया तत्र ज्ञानत्वेन हेतुतापक्षे उपेक्षात्मक-स्मृतिव्यक्ति भेदनिवेशेन गौरवम् । अनुभवत्वेन हेतुत्वे तु उपेक्षात्मकतत्तदनुभवव्य-क्तिभेदनिवेशेऽपि उपेक्षात्मकतत्तत्स्मृतिव्यक्तिभेदानिवेशेन लाघवम् इति भावः ।।

।। मनोनिरूपणम् ।।

कारिकावली

साक्षात्कारे सुखादीनां करणं मन उच्यते ।
अयौगपद्यात् ज्ञानानां तस्याणुत्वमिहेष्यते ।। ८५ ।।

मुक्तावली

इदानीं क्रमप्राप्तं मनः निरूपयति – साक्षात्कारे इति । एतेन मनसि प्रमाणं दर्शितम् । तथा हि – ''सुखसाक्षात्कारः सकरणकः, जन्यसाक्षात्कारत्वात्, चाक्षुषसाक्षात्कारवत्'' इति अनुमानेन करणस्य मनसः सिद्धिः । न च – एवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युः इति – वाच्यम् । लाघवात् एकस्यैव सकलसाक्षात्कारकरणतया सिद्धेः । एवं सुखादीनाम् असमवायिकारणसंयोगाश्रयतया मनसः सिद्धिः बोद्धव्या ।।

तत्र मनसः अणुत्वे प्रमाणम् आह – **अयौगपद्यात्** इति । ज्ञानानां चाक्षुषरासनादीनाम् अयौगपद्यम् एककालोत्पत्तिः नास्ति इति अनुभवसिद्धम् । तत्र नानेन्द्रियाणां सत्यपि विषयसन्निधाने यत्संबन्धात् एकेन इन्द्रियेण ज्ञानं जन्यते, यदसंबन्धाच्च परैः ज्ञानं न उत्पाद्यते, तन्मनः । **तन्मनसः विभुत्वे च असन्निधानं न संभवति** इति न विभु मनः ।

न च – तदानीम् अदृष्टविशेषोद्बोधकविलम्बादेव तज्ज्ञानविलम्बः इति – वाच्यम् । **तथा सति चक्षुरादीनामपि** अकल्पनापत्तेः ।

न च – दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथम् एकदा अनेकेन्द्रियजन्यज्ञानम् इति – वाच्यम् । मनसः अतिलाघवात् झटिति नानेन्द्रियसंबन्धात् नानाज्ञानोत्पत्तेः, उत्पलशतपत्रभेदादौ इव यौगपद्यप्रत्ययस्य **भ्रान्तित्वात्** । न च – मनसः सङ्कोचविकासशालित्वात् **उभयोपपत्तिः** इति – वाच्यम् । नानावयवतन्नाशादिकल्पने गौरवात् लाघवात् निरवयवस्य अणुरूपस्यैव मनसः कल्पनात् इति **संक्षेपः** ॥

दिनकरी

जन्यसाक्षात्कारत्वात् इति । ईश्वरीयसाक्षात्कारे व्यभिचारवारणाय जन्य इति । ननु – **अतिलाघवात्** त्वगिन्द्रियस्य प्राणस्य वा करणत्वम् अस्तु, अत आह – **एवम्** इति । **असमवायिकारणसंयोगाश्रयतया** इति । भावकार्यस्य सासमवायिकारणकत्वनियमात् इति भावः । **तन्मनसो विभुत्वे च** इति । तदसन्निधानं मनसः विभुत्वे न संभवति इति योजना । **तथा सति** इति । दृष्टसामग्रीसत्त्वेऽपि अदृष्टविलम्बात् कार्यविलम्बाङ्गीकारे इत्यर्थः । **चक्षुरादीनामपि** इति । चाक्षुषतद्विरहयोः अदृष्टतद्विरहाभ्याम् उपपत्तेः इति भावः । **भ्रान्तित्वात्** इति । अव्यवहितकालोत्पत्तिकत्वस्य दोषत्वात् इति भावः । **उभयोपपत्तिः**

इति । मनसः सङ्कोचे एकेन्द्रियमात्रसंबन्धात् एकमेव ज्ञानम्, विकासे तु नानेन्द्रियैः मनसः संबन्धात् युगपत् नानाज्ञानानाम् उत्पत्तिः इति भावः । यद्यपि नानेन्द्रियैः मनःसन्निकर्षकाले चाक्षुषाद्युत्पत्तिकाले रासनाद्यनुत्पादस्य रासनादिकं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वेनैव उपपत्तेः मनसः विभुत्वेऽपि बाधकाभावः, तथापि तथाप्रतिबन्धकत्वे गौरवम् इत्यभिप्रायः ।

न च – त्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वात् चाक्षुषसामग्रीकाले स्पार्शन-सामग्र्याः नियमतः सत्त्वात् स्पार्शनापत्तिः मनसः अणुत्वपक्षेऽपि दुर्वारैव इति – वाच्यम् । अनन्यगत्या स्पार्शनं प्रति चाक्षुषादिसामग्र्याः प्रतिबन्धकत्वस्वीकारात् । एवमपि रासनादिप्रत्यक्षे चाक्षुषादिसामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवस्य अणुत्वपक्षे निष्प्रत्यूहत्वात् ।

यद्वा, ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य अहेतुत्वम् इत्यभिप्रायः । **अत एव** यदसंबन्धात् त्वगादिभिः परैः ज्ञानं न उत्पाद्यते'' इति उक्तं प्राक् । यथा च त्वङ्मनोयोगस्य ज्ञानसामान्यं प्रति अजनकत्वेऽपि सुषुप्तौ ज्ञानानुत्पादनिर्वाहः, तथा उपपादितम् अधस्तात् ।

एवं मनसः विभुत्वे आत्ममनःसंयोगानुपपत्तिः, आत्ममनसोः कर्माभावेन कर्मजन्यसंयोगस्य विभुत्ववादिमते असंभवात्, अजन्यसंयोगे मानाभावात् ।

यदपि भौतिकाः एव परमाणवः मनांसि अनन्तधर्मिणाम् अतिरिक्तायाश्च जातेः कल्पनाम् अपेक्ष्य क्लृप्तानामेव धर्मिणां ताद्रूप्येण हेतुत्वस्य युक्तत्वात्, **नियमस्तु अदृष्टोपग्रहात्** इति नव्यैः उक्तम्, तदपि न । **यत्संयोगव्यतिरेकात्** सुषुप्तिकाले कार्यानुत्पादः तस्य मनसः अवश्यम् अङ्गीकरणीयत्वात् ।

न च – कालविशेषस्य प्रतिबन्धकत्वादेव सुषुप्तिकाले कार्यानुत्पादः इति – वाच्यम् । अनन्तानां कालविशेषाणां प्रतिबन्धकत्वे गौरवात् ।

न च – **उदासीनमनःसंयोगस्य** सुषुप्तिप्राक्काले सत्त्वात् आपत्तिः तदवस्थैव इति **अदृष्टविशेषाकृष्टं** मन एव ज्ञानादिहेतुत्वेन वक्तव्यम्; तदपेक्षया च अदृष्टविशेषाकृष्टभौतिकपरमाणूनामेव तद्धेतुत्वम् उचितम् इति – वाच्यम् । **तस्य भौतिकत्वे** पृथिवीत्वं जलत्वादिकं वा इत्यत्र विनिगमकाभावात् **उभयकल्पने च जातिसाङ्कर्यम्** । तत् एतत् **अभिप्रेत्य** उक्तं **संक्षेप** इति ।

राजीवोल्लासः

अतिलाघवात् इति । क्लृप्तत्वात् त्वगिन्द्रियस्य प्राणस्य वा करणत्वे अतिलाघवात् इत्यर्थः । **मुक्तावल्याम् एवं सुखादीनाम्** इति – ''सुखादीनि असमवायिकारणजन्यानि, भावत्वे सति कार्यत्वात् पटादिवत्'' इत्यनुमानेन असमवायिकारणं सिद्ध्यति। तच्च आत्ममनस्संयोगरूपम्। तदाश्रयतया मनसः सिद्धिः इत्यर्थः । **दिनकर्यां नियमात्** इति । ''यत्र यत्र भावत्वे सति कार्यत्वं तत्र असमवायिकारणजन्यत्वम्'' इति व्याप्तेः इत्यर्थः । **मुक्तावल्यां तन्मनसः** इत्यादि । तदसन्निधानं मनसः विभुत्वे न सम्भवति इत्यन्वयः । **तत्** इत्यस्य ज्ञानाभावप्रयोजकम् इत्यर्थः । मनसः इत्यतः पूर्वं तस्येत्यादिः । पूर्ववाक्ये यच्छब्दश्रवणात् । वस्तुतस्तु ''तन्मनसः'' इत्येकं पदम् । तस्य मनसः इत्यर्थः । भ्रान्तेः दोषाधीनत्वनियमेन दोषाभावात् कथं भ्रान्तिः इति, अत आह – **अव्यवहितकालोत्पत्तिकत्वस्य** इति । तथा च अव्यवहितकालोत्पत्तिकत्वमेव ज्ञानगतं प्रकृते दोष इति भावः । एवमपि चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वेऽपि त्वङ्मनस्संयोगस्य ज्ञानसामान्ये हेतुत्वं विनापि सुषुप्तौ ज्ञानानुत्पादस्य चर्ममनस्संयोगस्य विजातीयमनस्संयोगस्य वा हेतुत्वम् आदाय

अधस्तात् उपपादिततया तत्पक्षे न गौरवलेशः इत्याशयेन आह – **यद्वा इति** । **अत एव** – त्वङ्मनस्संयोगस्य ज्ञानसामान्यहेतुत्वस्य ग्रन्थकृदभिप्रेतत्वादेव ।।

विभुद्वयसंयोगमङ्गीकृत्य मनसः विभुत्वं पूर्वं निराकृतम् । इदानीं विभुद्वयसंयोग एव न स्वीकर्तुं शक्यते, कारणाभावात् इत्याशयेन आह– **मनसः विभुत्वे** इति । **ताद्रूप्येण** इति । भौतिकपरमाणुत्वरूपमनस्त्वेन, न तु अतिरिक्तमनस्त्व-जात्या इत्यर्थः । **नियमस्तु** इति । भौतिकपरमाणुरूपमनसा चक्षुःसंयोगेन चाक्षुषकाले भौतिकपरमाणूनाम् अनन्ततया त्वचा साकं संयोगस्यापि सत्त्वेन त्वचा प्रत्यक्षापत्त्या तन्नियमनिर्वाहाय अदृष्टस्य प्रतिबन्धकत्वम् उपेयम् इति भावः ।।

सुबोधिन्यां विशेषाः – **अधस्तात्** इति । **''त्वचो योगो मनसा ज्ञानकारणम्''** इति **मूलार्थविचारावसरे** इत्यर्थः । ननु मनसः विभुत्वेन युगपत् सर्वेन्द्रियसम्बन्धेऽपि तत्तदिन्द्रियसंयोगेषु केषुचित् वैजात्यं कल्पयित्वा तद्विशिष्टानामेव तत्तदिन्द्रियजन्यप्रत्यक्षहेतुत्वम् अभ्युपेयते । यद्वा मनसोऽणुत्वपक्षेऽपि बहुषु घटेषु मनोऽधिष्ठितचक्षुषा संयुक्तेषु नानाज्ञानोत्पादवारणाय एकस्य आत्ममनस्संयोगस्य युगपत् अनेकज्ञानोत्पादनसामर्थ्याभावः कल्पनीयः । मनोविभुत्वपक्षेऽपि सोऽभ्युपेयते इति न काप्यनुपपत्तिः इति, अत आह – **एवं मनस** इति ।।

ताद्रूप्येण इति । तत्तद्व्यक्तित्वेन इत्यर्थः । न च – भौतिकपरमाणुषु यत् ज्ञानादिहेतुत्वं तदवच्छेदकतया लाघवात् मनस्त्वजातिसिद्धिः इति – वाच्यम् । पृथिवीत्वादिना साङ्कर्येण जातित्वासम्भवात्। ननु एवं कः परमाणुः कस्य ज्ञानादिकं सम्पादयति ? इत्यत्र नियमानुपपत्तिः इत्यत्र आह – **नियमस्तु** इति । अदृष्टेन धर्माधर्मात्मकेन उपग्रहः ज्ञानादिसम्पादनाय शरीरान्तर्नयनं तस्मात् **अदृष्टोपग्रहात्** । **यत्संयोग** इति । यद्धर्मावच्छिन्नसंयोग इत्यर्थः । **तस्य** मनसः मनस्त्वात्मकतद्धर्मावच्छिन्नस्य ।।

"सुषुप्तौ कार्यानुत्पादः कारणाभावप्रयुक्तः" इत्यनुमाने प्रतिबन्धकरूपकारणाभावेन अर्थान्तरम् आशङ्कते – **न च काल** इति । भौतिकपरमाणुभिः सिद्धसाधनम् आशङ्कते – **न च उदासीन** इति । **अदृष्टविशेषाकृष्टम्** इति । सत्स्वपि भूयस्सु मनस्सु एकं चैत्रमनः, अन्यत् मैत्रमनः इत्यत्र त्वन्मते विनिगमकं अदृष्टविशेषाकृष्टत्वं विना वक्तुम् अशक्यम् इति भावः । **तस्य भौतिकत्वे** इति । **तस्य** – ज्ञानादिहेतोः मनसः, **भौतिकत्वे** भूतत्वे । स्वार्थे ठक् । **उभयकल्पने** इति । एकस्मिन्नेव मनसि पृथिवीत्वादिनानाजातिकल्पने इत्यर्थः । **जातिसाङ्कर्यम्** इति – पृथिवीत्वादेः जलत्वादिना साङ्कर्यम् इत्यर्थः ।।

एतदभिप्रेत्य इति–इदम् उपलक्षणम् । मनसो वायुत्वे त्वगिन्द्रियसमानयोगक्षेमतया स्पर्शमात्रग्राहकत्वापत्तिः । अदृष्टविशेषात् अन्यदपि गृह्यते इति चेत्, तर्हि त्वचैव निर्वाहे घ्राणादिकम् अपि न सिद्ध्येत् । अतः गन्धरसरूपस्पर्शेषु एकैकमात्रसाक्षात्काराजनकत्वेन मनसः पृथिव्यादितः भेदसिद्धिः इति । इत्थं च साङ्कर्यस्य जातिबाधकत्वाभावेऽपि न मनसोऽसिद्धिः इति ।।

।। शुभं भूयात् ।।

राजीवोल्लसनाम्नीयं व्याख्या धीधनरञ्जनी ।
संपूर्णतामगात् हृद्या मनःस्मरणखण्डयोः ।।

॥ श्रीरस्तु ॥

॥ अथ गुणखण्डः ॥

॥ गुणनिरूपणम् ॥

कारिकावली

अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः ॥

मुक्तावली

द्रव्यं निरूप्य गुणान् निरूपयति – अथ इत्यादिना । गुणत्वजातौ किं मानम्? इति चेत्, द्रव्यकर्मभिन्ने सामान्यवति या कारणता, सा किञ्चिद्धर्मावच्छिन्ना; कारणतात्वात्, निरवच्छिन्नकारणतायाः असंभवात् । न हि रूपत्वादिकं सत्ता वा तत्र अवच्छेदिका, न्यूनाधिकदेशवृत्तित्वात् । अतः चतुर्विंशत्यनुगतं किञ्चित् वाच्यम् । तदेव गुणत्वम् इति ॥

द्रव्याश्रिता इति । यद्यपि द्रव्याश्रितत्वं न लक्षणम्, कर्मादौ अतिव्याप्तेः, तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः । भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकम्, तद्वत्ता च गुणानाम् इति । द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वव्यापकतावच्छेदकम्, गगनादौ द्रव्यकर्मणोः अभावात् । द्रव्यत्वत्वं सामान्यत्वादिकं वा न जातिः इति तद्व्युदासः ।

निर्गुणा इति । यद्यपि निर्गुणत्वं कर्मादौ अपि, तथापि सामान्यवत्त्वे सति कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम् । जात्यादीनां न सामान्यवत्त्वम्, कर्मणः न कर्मान्यत्वम्, द्रव्यस्य न निर्गुणत्वम् इति तत्र न अतिव्याप्तिः ।

निष्क्रियाः इति स्वरूपकथनम्, न तु लक्षणम्; गगनादौ अतिव्याप्तेः ॥

दिनकरी

अवसरसङ्गतिम् अभिप्रेत्य आह – **द्रव्यं निरूप्य** इति । तस्मिन् निरूपिते प्रतिबन्धकीभूतजिज्ञासानिवृत्तेः इति भावः । ''इति चेत् इदम्'' इति पाठः ।

ननु रूपत्वस्य सत्ताया वा गुणनिष्ठकारणतावच्छेदकत्वं स्यात् इति आशङ्क्य आह – **न हि** इति । ''रूपत्वादिकम्'' इत्यादिना रसत्वादिपरिग्रहः । **यद्यपि** गुणत्वजातौ प्रत्यक्षमेव प्रमाणम्, रूपादिषु संयुक्तसमवेतसमवायेन गुणत्वप्रत्यक्षसंभवात्, **तथापि** अतीन्द्रियरूपादौ तत्प्रत्यक्षासंभवेन तत्साधारण्यं गुणत्वस्य न घटते इति अनुमानं प्रदर्शितम् ।

न च – **रूपत्वादिना साङ्कर्यभिया** अतीन्द्रियरूपादौ गुणत्वसिद्धिः; **गुरुत्वादौ** तु धर्मिग्राहकमानेन तत्सिद्धिः इति अनुमानप्रदर्शनं व्यर्थम् इति – वाच्यम् । **रूपादौ** पण्डितपामरसाधारण ''गुणः'' इति प्रत्यक्षस्य अप्रसिद्धेः ।

इदम् अत्र बोध्यम् – सकलगुणसाधारणी एका कारणता नास्त्येव इति कथं तदवच्छेदकतया गुणत्वजातिसिद्धिः? न च – चतुर्विंशतिगुणेषु प्रत्येकं याः कारणताः तासामेव पक्षतया तादृशसकलकारणतावच्छेदकतया गुणत्वजातिसिद्धिः इति – वाच्यम् । **तथा सति** ''द्रव्यकर्मरूपभिन्नसामान्यवति या कारणता, सा किञ्चिद्धर्मावच्छिन्ना'' इत्यनुमानेन रूपभिन्नत्रयोविंशतिगुणसाधारणवैजात्यस्यापि सिद्धिप्रसङ्गात् । पारिमाण्डल्यस्य क्वापि अकारणतया गुणत्वस्यापि अतिप्रसक्ततया अनवच्छेदकत्वाच्च इति अन्यत्र विस्तरः ।।

कर्मादौ अतिव्याप्तेः इति । ''आदि''ना सामान्यपरिग्रहः । लक्ष्ये लक्षणसत्त्वं प्रतिपादयति – **भवति हि** इति । **''द्रव्यत्वव्यापकतावच्छेदक''** इत्यस्य फलम् आह – **द्रव्यत्वम्** इति । जातिपदस्य कृत्यम् आह – **द्रव्यत्वत्वम्** इति । **सत्तारूपजातिम्** आदाय द्रव्यादौ अतिव्याप्तिवारणाय **सत्ताभिन्न** इति । **तथापि**

सामान्यवत्त्वे सति कर्मान्यत्वे सति इति । सत्यन्तयोः विशेष्यस्य फलम् आह – जात्यादीनाम् इति । तत्र – तेषु । गगनादौ अतिव्याप्तेः इति । ''आदि''ना कालादिपरिग्रहः । यथाश्रुते च एतत् । सामान्यवत्त्वे सति कर्मान्यत्वे च सति कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वे अतिव्याप्तेः अभावात् ।।

राजीवोल्लासः

दिनकर्याः विभूषाय गुणखण्डप्रकाशिनी ।
राजीवोल्लासनाम्नीयं व्याख्या सन्तन्यतेऽधुना ।।

अवसरसङ्गतिम् इति – प्रतिबन्धकीभूतजिज्ञासायाः निवृत्तौ अवश्यवक्तव्यत्वम् अवसरः । अत्र गुणनिरूपणं प्रति द्रव्यजिज्ञासा प्रतिबन्धिका आसीत् । द्रव्यनिरूपणेन अस्याः जिज्ञासायाः निवृत्ततया क्रमप्राप्तं अवश्यनिरूपणीयं गुणं निरूपयति इति भावः ।।

मूले द्रव्यत्वजातौ अनुमानं प्रमाणम् उक्तम् – ''द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, दण्डनिष्ठघटकारणतावत्'' इत्यनुमानम् । अत्र द्रव्यकर्मभिन्नं सामान्यवत् रूपादिकम्, तन्निष्ठा कारणता गुणत्वावच्छिन्ना भवति । तथा च रूपादिनिष्ठकारणतावच्छेदकतया गुणत्वजाति-सिद्धिः इति मूलात् प्रतीयते । तत्र शङ्कते – ननु रूपत्वस्य इति । रूपादिगुणनिष्ठकारणतायां रूपत्वं सत्ता वा अवच्छेदकं भवतु । गुणत्वमेव अवच्छेदकम् इत्यत्र किं नियामकम् इति शङ्का । अन्यूनानतिप्रसक्तधर्मस्यैव अवच्छेदकत्वात् गुणनिष्ठकारणत्वे न्यूनवृत्तित्वात् रूपत्वं न अवच्छेदकम्, तादृशकारणत्वातिरिक्तवृत्तित्वात् सत्ता न कारणतावच्छेदिका । अपि तु अन्यूनानतिप्रसक्तं गुणत्वमेव अवच्छेदकम् इति भावः ।।

यद्यपि इति। रूपरसादिषु ''अयं गुणः, अयं गुणः'' इति सर्वेषाम् अनुगतस्य प्रत्यक्षस्य सत्त्वात् तदेव गुणत्वजातौ प्रमाणं भवितुम् अर्हति । न

च – सन्निकर्षाभावात् कथं प्रत्यक्षम् इति – वाच्यम् । यथा रूपादिनिष्ठ-रूपत्वादिजातेः चक्षुरादिसंयुक्तसमवेतसमवायसम्बन्धेन प्रत्यक्षं भवति, तथा तेनैव सम्बन्धेन रूपादिगतगुणत्वजातेः अपि प्रत्यक्षसम्भवात् इति शङ्का ।। समाधत्ते – तथापि इति। अतीन्द्रियपरमाणुगतरूपादौ गुणत्वजातेः प्रत्यक्षासम्भवेन अतीन्द्रियरूपादिसाधारणगुणत्वजातिः प्रत्यक्षेण न सिद्ध्यति इति तत्र अनुमानं प्रमाणं प्रदर्शितम् इति भावः ।।

रूपत्वादिना साङ्कर्यभिया इति ।। यदि अतीन्द्रियरुपादौ गुणत्वं नाङ्गीक्रियते तदा गुणत्वस्य जातित्वं न स्यात्, रूपत्वेन साङ्कर्यात् । रूपत्वाभाववति रसादौ गुणत्वम् अस्ति । गुणत्वाभाववति अतीन्द्रियरुपे रूपत्वम् अस्ति इति साङ्कर्यं स्यात् इति भीत्या इति भावः ।।

गुरुत्वादौ तु इति । येन प्रमाणेन गुरुत्वादिकं सिद्ध्यति, तेनैव प्रमाणेन गुरुत्वादिगतगुणत्वजातिरपि सिद्ध्यति । धर्मिणः गुरुत्वस्य ग्राहकं प्रमाणं गुणत्वविशिष्टतयैव गुरुत्वं गृह्णाति इति गुणत्वसिद्धौ अनुमानप्रदर्शनं व्यर्थम् इति भावः । **रूपादौ इति** । पण्डितानां रूपादौ ''गुणः'' इति प्रत्यक्षस्य सम्भवेऽपि पामराणां तदसम्भवात् पामरसाधारण्येन प्रत्यक्षप्रमाणेन गुणत्वसिद्धेः वक्तुम् अशक्यतया प्रत्यक्षप्रमाणं परित्यज्य गुणत्वजातिसाधकतया अनुमानप्रमाणं प्रदर्शितम् इति भावः ।।

इदम् अत्र बोध्यम् इत्यादि । रूपादिसकलगुणसाधारणी अनुगता एका कारणता नास्ति । तथा च कारणतावच्छेदकतया कथं गुणंत्वजातिसिद्धिः? **न च चतुर्विंशतिगुणेषु इत्यादि** । रूपादिषु चतुर्विंशतिगुणेषु प्रत्येकं विद्यमानाः याः भिन्नभिन्नाः कारणताः तत्तत्कारणतातिप्रसक्तत्वेऽपि गुणत्वस्य द्रव्यकर्मभिन्न-सामान्यवन्निष्ठकारणतात्वरूपः यः कारणतासु विद्यमानः अनुगतधर्मः तदवच्छिन्न-कारणताननतिप्रसक्ततया गुणत्वस्य तदवच्छेदकत्वं सम्भवति । यथा मूलावच्छिन्न-

तत्तत्संयोगातिप्रसक्तत्वेऽपि संयोगत्वावच्छिन्नानतिप्रसक्ततया द्रव्यत्वस्य संयोगसामान्यावच्छेदकत्वं तद्वत् इति भावः । तथा च "द्रव्यकर्मभिन्न-सामान्यवन्निष्ठकारणता, किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्" इत्यनुमानेन गुणत्वजातिः सिद्ध्यति इति तात्पर्यम् । **तथा सति इत्यादि** । "द्रव्यकर्मरूप-एतत्त्रितयभिन्ने सामान्यवति या कारणता, सा किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्" इत्यनुमानेन रूपभिन्नत्रयोविंशतिगुणसाधारणजातेः अपि सिद्धिप्रसङ्गात् ।।

किञ्च अणुपरिमाणरूपस्य पारिमाण्डल्यरूपगुणविशेषस्य कुत्रापि अकारणतया तत्र गुणत्वस्य सत्त्वेन उक्तकारणताशून्यवृत्तितया गुणत्वस्य अवच्छेदकत्वं न सम्भवति इति कथं कारणतावच्छेदकतया गुणत्वजातिः सिद्ध्येत्? तस्मात् कारणतावच्छेदकतया गुणत्वजातिर्न सिद्ध्यति, किन्तु प्रकारान्तरेण गुणत्वजातिः साधनीया इति **दिनकराशयः** प्रतीयते । तच्च प्रकारान्तरं गुणपदशक्यतावच्छेदकतया गुणत्वजातिसिद्धिः इति भाति ।।

प्रभाकारास्तु – गुणत्वविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति गुणत्व-प्रकारकनिश्चयत्वेन, गुणत्वप्रकारकबुद्धित्वावच्छिन्नं प्रति गुणत्वज्ञानत्वेन वा हेतुतायाः सकलनैयायिकाभिमततया तादृशकारणतैव पक्षः । तस्याः द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणतारूपत्वात् तादृशकारणतायां विषयतासम्बन्धा-वच्छिन्नावच्छेदकतया गुणत्वं सिद्ध्यति । तस्य जातित्वे आश्रयव्यक्त्यैक्यादि-रूपबाधकाभावात् जातिरूपत्वञ्च सिद्ध्यति इत्याहुः ।।

मूले द्रव्याश्रिताः इत्यस्य यथाश्रुतार्थाङ्गीकारे कर्मादीनामपि द्रव्याश्रितत्वात् द्रव्याश्रितत्वरूपस्य गुणलक्षणस्य तत्र अतिव्याप्तिः स्यात् । अतः द्रव्यत्वव्यापकता-वच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः इत्युक्तम् । द्रव्यत्वव्यापकतावच्छेदिका सत्ताभिन्ना च जातिः गुणत्वम्, तद्वत्त्वं गुणेषु अस्ति इति लक्षणसमन्वयः ।

जातिमत्त्वमात्रोक्तौ सत्तारूपजातिमत्त्वस्य द्रव्यकर्मणोः अपि सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय ''सत्ताभिन्न'' इत्युक्तम् । सत्ताभिन्नां कर्मत्वजातिं द्रव्यत्वजातिं च आदाय द्रव्यकर्मणोः अतिव्याप्तिवारणाय ''द्रव्यत्वव्यापकतावच्छेदक'' इत्युक्तम् । कर्मत्वं द्रव्यत्ववति आकाशादौ विद्यमानः यः कर्माभावः तत्प्रतियोगितावच्छेदकम् इति न द्रव्यत्ववन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वरूपं व्यापकतावच्छेदकत्वं कर्मत्वस्य । एवं द्रव्यत्वमपि गगनादौ द्रव्याभावेन द्रव्यत्ववद्गगनादिनिष्ठाभावप्रतियोगितावच्छेदकतया न द्रव्यत्वव्यापकतावच्छेदकम् । अतः द्रव्यत्वम् आदाय द्रव्ये न अतिव्याप्तिः । जातिपदस्य स्थाने धर्मपदस्य निवेशे द्रव्यत्वव्यापकतावच्छेदकः सत्ताभिन्नो यो धर्मः द्रव्यत्वत्वं सामान्यत्वं च तद्वति द्रव्यत्वे सामान्ये च अतिव्याप्तिः स्यात् । तद्वारणाय धर्मपदमुपेक्ष्य जातिपदम् उपात्तम् । द्रव्यत्वत्वसामान्यत्वयोः जातित्वाभावात् न उक्तदोषः । तथा च द्रव्यत्ववन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकसत्ताभिन्नजातिमत्त्वं गुणस्य लक्षणम् ।।

निर्गुणत्वस्य गुणलक्षणत्वे कर्मादौ अतिव्याप्तिः । तद्वारणाय सामान्यवत्त्वे सति कर्मान्यत्वे सति निर्गणत्वं लक्षणम् इति यथा परिष्कृतं, तथैव निष्क्रियत्वस्य गुणलक्षणत्वे गगनादौ प्रसक्तायाः अतिव्याप्तेः ''सामान्यवत्त्वे सति कर्मान्यत्वे च सति कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वम्'' इति लक्षणपरिष्कारेण वारणं सम्भवति। गगनत्वादेः कर्मवदवृत्तित्वेऽपि पदार्थविभाजकत्वाभावात्, द्रव्यत्वस्य पदार्थविभाजकत्वेऽपि कर्मवदवृत्तित्वाभावात् गगनत्वद्रव्यत्वादिकम् आदाय अतिव्याप्तेः वक्तुम् अशक्यत्वात्, कर्मवदवृत्तिः पदार्थविभाजकधर्मः गुणत्वमेव, तद्वत्त्वम् आदाय गुणे लक्षणसमन्वयसम्भवात् इत्याशङ्क्य आह – यथाश्रुते च एतत् इति । कर्मवदवृत्तिं पदार्थविभाजकं सामान्यत्वम् आदाय सामान्ये

अतिव्याप्तिवारणाय सामान्यवत्वे इति । तादृशं कर्मत्वम् आदाय कर्मणि अतिव्याप्तिवारणाय कर्मान्यत्वे सति इति । गगनत्वादिकम् आदाय गगनादौ अतिव्याप्तिवारणाय ''पदार्थविभाजक'' इति उपाधिविशेषणम् ।।

अत्राहुः प्रभाकृतः – तादृशोपाधिमत्त्वस्य समवायेन लक्षणत्वस्वीकारेणैव सामान्यादौ अतिव्याप्तिवारणासंभवात् पृथक् सामान्यवत्वविशेषणं व्यर्थम्, उपाधौ कर्मावृत्तित्वविशेषणेनैव कर्मत्वम् आदाय कर्मण्यव्याप्तिवारणसम्भंवात् कर्मान्यत्वविशेषणस्यापि वैयर्थ्यम् इति ।।

कारिकावली

रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ।। ८६ ।।

द्रवत्वं स्नेहवेगाश्च मता मूर्तगुणा अमी ।
धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ।। ८७ ।।

एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ।
संख्यादयो विभागान्ताः उभयेषां गुणां मताः ।। ८८ ।।

संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयः तद्वत् एते अनेकाश्रिता गुणाः ।। ८९ ।।

मुक्तावली

वेग इति । वेगेन स्थितस्थापकोऽपि उपलक्षणीयः । मूर्तगुणा इति । अमूर्तेषु न वर्तन्ते इत्यर्थः । अमूर्तगुणा इति । मूर्तेषु न वर्तन्ते इत्यर्थः । उभयेषाम् इति । मूर्तामूर्तगुणाः इत्यर्थः । अनेकाश्रिताः इति । संयोग विभाग – द्वित्वादीनि द्विवृत्तीनि । त्रित्व-चतुष्ट्वादिकं त्रि-चतुरादि-वृत्ति इति बोध्यम् ।।

दिनकरी

वेगेन स्थितस्थापकोऽपि उपलक्षणीयः इति । वेगपदस्य भावनान्यसंस्कारपरत्वात् इति भावः । इदम् उपलक्षणम्– ''वेगाश्च'' इत्यत्र ''च''कारेण अनुक्तसमुच्चायकेन गुरुत्वस्यापि संग्रहात् । ननु – मूर्तगुणत्वं मूर्तवृत्तिगुणत्वम्, तच्च संख्यादौ अतिव्याप्तम्, अत आह – **अमूर्तेषु** इति । तथा च अमूर्तावृत्तिगुणत्वं प्रदर्शितमूर्तगुणानां साधर्म्यम् इत्यर्थः । न च – एतदपि **मूर्तमात्रवृत्तिसंख्यायाम् अतिव्याप्तम्** इति – वाच्यम् । **अमूर्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वस्य, मूर्तत्वव्याप्यतावच्छेदकगुणवृत्तिजातिमत्त्वस्य वा** विवक्षितत्वात् । अत्र च आद्ये शून्यान्तेन संख्यादेः बुद्ध्यादेश्च व्युदासः । वेग-स्थितस्थापकोपसंग्रहाय ''संस्कारत्वान्य'' इति । द्वितीये अवच्छेदकान्तेन संख्यात्वादेः, वृत्तित्वान्तेन कर्मत्वादेः व्युदासः ।

मूले ''एतेऽमूर्तगुणाः'' इत्यत्र अकारप्रश्लेषः बोध्यः ।

ननु ''धर्म'' इत्यादिमूलेन एतेषाम् अमूर्तवृत्तिगुणत्वं साधर्म्यम् उक्तम्, तत् संख्यादौ अतिव्याप्तम्, अत आह – **मूर्तेषु** इति । मूर्तावृत्तिगुणत्वमेव तेषां साधर्म्यम् इत्यर्थः । न च – तथापि अमूर्तमात्रवृत्तिसंख्यादौ अतिव्याप्तिः इति – वाच्यम् । मूर्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वस्य, मूर्तत्वाभावव्याप्यतावच्छेदकपरिमाणावृत्तिजातिमत्त्वस्य वा विवक्षितत्वात् । आद्ये शून्यान्तेन संख्यादिरूपादिव्युदासः । सत्ताम् आदाय असंभववारणाय ''गुणत्वव्याप्य'' इति । कर्मणि अतिव्याप्तिवारणाय विशेष्यीभूतगुणत्वस्य निवेशः । द्वितीये परममहत्त्वत्वजातिम् आदाय अतिव्याप्तिवारणाय **परिमाणावृत्ति** इति ।

ननु ''**उभयेषां गुणाः**'' इति **मूलेन** संख्यादिपञ्चानाम् उभयवृत्तिगुणत्वं साधर्म्यम् उक्तम्; तच्च रूपादौ अतिव्याप्तम्, अतः ''उभय''पदं मूर्तामूर्तपरतया

व्याचष्टे – **मूर्तामूर्त** इति । न च – मूर्तमात्रवृत्तिसंख्यादौ अव्याप्तम् इति – वाच्यम् । **कालवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य, द्रव्यत्वव्यापकतावच्छेदकगुणत्वव्याप्यजातिमत्त्वस्य** वा विवक्षितत्वात् ।

ननु अनेकाश्रितत्वं संयोगादौ अव्याप्तम्, अनेकपदस्य बहुत्वविशिष्टे शक्तत्वात्, अत आह – **संयोग** इति । तथा च **एकत्वभिन्नसंख्याविशिष्टवाचकत्वम्** अनेकपदस्य इति न तत्र अव्याप्तिः इति भावः । **स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणगुणत्वस्य** विवक्षितत्वात् न तत्र अव्याप्तिः इत्यपि **केचित्** ।।

राजीवोल्लासः

मूले वेगेन इत्यस्य वेगपदेन इत्यर्थः ।।

कारिकायां रूपरसस्पर्शगन्धपरत्वापरत्वद्रवत्वस्नेहवेगानां मूर्तगुणत्वं साधर्म्यम् इत्युक्तम् । मूर्तगुणत्वं यदि मूर्तवृत्तिगुणत्वं तदा संख्यादौ अतिव्याप्तिः । तद्वारणाय अमूर्तावृत्तिगुणत्वं साधर्म्यमिति उक्तम् । मूर्तस्यैव गुणाः इति सावधारणत्वस्य विवक्षितत्वात् । तेन च मूर्तवृत्तित्वे सति अमूर्तावृत्तिगुणत्वं लभ्यते । तत्र सत्यन्तभागस्य प्रयोजनाभावात् अमूर्तावृत्तिगुणत्वं लभ्यते। संख्यादीनां अमूर्ते आकाशादावपि वर्तमानत्वात् न अतिव्याप्तिः ।।

तदुपरि **मूर्तमात्रवृत्तिसंख्यायाम् अतिव्याप्तिः** इत्याशङ्क्य **दिनकरीये** जातिघटितं लक्षणद्वयम् उक्तम् । तत्र आद्यम् – अमूर्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वम् इति । अमूर्तगुणवृत्तिः संस्कारत्वान्या गुणत्वव्याप्या च जातिः संख्यात्वधर्मत्वाधर्मत्वादिः तच्छून्यगुणत्वस्य रूपरसादिषु सत्त्वात् लक्षणसमन्वयः । संख्यात्वबुद्धित्वादिकम् आदाय संख्याबुद्ध्यादौ अतिव्याप्तिवारणाय शून्यान्तनिवेशः । संख्यात्वबुद्धित्वादेः अमूर्तगुणवृत्तितया संस्कारत्वान्यतया गुणत्वव्याप्यतया च तादृशजातिशून्यत्वं संख्यादौ नास्ति इति नातिव्याप्तिः ।

अमूर्तगुणवृत्तिगुणत्वव्याप्यसंस्कारत्वरूपजातिविशिष्टयोः वेगस्थितिस्थापकयोः अव्याप्तिवारणाय ''संस्कारत्वान्य'' इति जातिविशेषणम् । संस्कारत्वान्य-गुणत्वव्याप्य-रूपत्वरसत्वादिजातिमद्गुणत्वमेव रूपरसादौ अस्ति इति तत्र अव्याप्तिवारणाय ''अमूर्तगुणवृत्ति'' इति जातौ विशेषणम् । अमूर्तस्य गुणः अमूर्त-गुणः । तद्वृत्तीति तदर्थः । रूपत्वादिकं तु मूर्तपृथिव्यादीनां यो गुणः रूपादिः तद्वृत्तीति अमूर्तगुणवृत्तित्वं नास्ति । अतः जातिपदेन संख्यात्वादिकमेव ग्राह्यम् । तच्छून्यगुणत्वं रूपादौ अस्तीति न अव्याप्तिः । अत्र गुणपदं समवायेन वृत्तितालाभाय । ''समवायेन अमूर्तवृत्तिवृत्ति'' इति ''अमूर्तगुणवृत्ति'' इत्यस्य पर्यवसितार्थः । समवायेन इत्यनुक्तौ रूपादेः अपि कालिकसम्बन्धेन अमूर्तकाल-वृत्तितया तद्वृत्तिरूपत्वादिजातिमत्त्वस्यैव रूपादौ सत्त्वात् असम्भवः स्यात् ।।

अमूर्तेषु न वर्तन्ते इत्यस्य न अमूर्तगुणघटितलक्षणकरणे तात्पर्यम्, किन्तु रूपादीनां मूर्तत्वाभाववदवृत्तित्वरूपमूर्तत्वव्याप्यताबोधने एव तात्पर्यम् इत्याशयेन लाघवं मनसिकृत्य द्वितीयलक्षणम् आह – **मूर्तत्वव्याप्यतावच्छेदक** इति । मूर्तत्वव्याप्यतावच्छेदिका गुणवृत्तिः या जातिः तद्वत्वम् इत्यर्थः । मूर्तत्वव्याप्यतावच्छेदकत्वं च मूर्तत्वाभाववद्वृत्तितानवच्छेदकत्वम् । संख्यात्वादि-जातिमत्त्वम् आदाय संख्यादौ अतिव्याप्तिवारणाय व्याप्यतावच्छेदकत्व-निवेशनम् । मूर्तत्वव्याप्यतावच्छेदककर्मत्वजातिमत्त्वस्य कर्मणि सत्त्वात् तत्र अतिव्याप्तिवारणाय ''गुणवृत्ति'' इति जातौ विशेषणम् । कर्मत्वस्य गुणवृत्तित्वा-भावात् न दोषः ।।

धर्माधर्मभावनाशब्दबुद्ध्यादयः अमूर्तगुणाः इति **कारिकायाम्** उक्तम् । तेन एतेषां अमूर्तवृत्तिगुणत्वं साधर्म्यम् इति लभ्यते । तत् संख्यादौ अतिव्याप्तम्

इति आशङ्क्य "मूर्तेषु न वर्तन्त इत्यर्थः" इति मुक्तावल्यां व्याख्यातम् । तेन मूर्तावृत्तिगुणत्वं तेषां साधर्म्यम् । तथापि अमूर्तमात्रवृत्तिसंख्यादौ अतिव्याप्तिः इत्याशङ्क्य पूर्ववत् दिनकरीये जातिघटितं लक्षणद्वयम् उक्तम् । तत्र आद्यं लक्षणम् – **मूर्तवृत्तिगुणवृत्तिसंस्कारत्वान्य-गुणत्वव्याप्यजातिशून्यगुणत्वम्** इति । तादृशजातिः रूपत्वादिजातिः, तच्छून्यगुणत्वं धर्माधर्मादिषु अस्तीति लक्षणसमन्वयः । संख्यात्वादीनां मूर्तवृत्तिगुणवृत्तिसंस्कारत्वान्यजातितया तच्छून्यत्वं संख्यादौ नास्ति इति न अतिव्याप्तिः । सत्ताजातिः मूर्तगुणरूपादिवृत्तिः संस्कारत्वान्या च । तच्छून्यत्वं धर्माधर्मादौ नास्ति इति असम्भवः । तद्वारणाय जातौ "गुणत्वव्याप्य" इति विशेषणम् । संस्कारत्वजातिम् आदाय तच्छून्यत्वस्य भावनायां विरहात् अव्याप्तिवारणाय "संस्कारत्वान्य" इति जातौ विशेषणम् । धर्मत्वाधर्मत्वादीनां संस्कारत्वान्यत्वात् गुणत्वव्याप्यत्वात् च, तच्छून्यगुणत्वं धर्माधर्मादिषु नास्ति इति अव्याप्तिः । तद्वारणाय "मूर्तवृत्तिगुणवृत्ति" इति जातौ विशेषणम् । धर्मात्वाधर्मत्वादीनां मूर्तवृत्तिगुणवृत्तित्वं नास्तीति न दोषः । कर्मणि अतिव्याप्तिवारणाय गुणत्वरूपविशेष्यस्य निवेशः ।।

मूर्तत्वाभावव्याप्यतावच्छेदकपरिमाणावृत्तिजातिमत्त्वम् इति द्वितीयं लक्षणम् । धर्मत्वाधर्मत्वादिजातिः मूर्तत्वाभावव्याप्यतावच्छेदिका परिमाणावृत्तिश्च, तद्वत्त्वं धर्माधर्मादौ अस्ति इति समन्वयः । जातौ "परिमाणावृत्ति" इति विशेषणानुपादाने परममहत्त्वत्त्वं मूर्तत्वाभावव्याप्यतावच्छेदकजातिः । तद्वति परममहत्त्वे अतिव्याप्तिः स्यात् इति तद्वारणाय "परिमाणावृत्ति" इति जातौ विशेषणम्। रूपादिषु मूर्तगुणेषु अतिव्याप्तिवारणाय "मूर्तत्वाभावव्याप्यतावच्छेदक" इति विशेषणम् ।।

कालवृत्ति इत्यादि । कालवृत्तिवृत्तिः गुणत्वव्याप्या या जातिः तद्वत्त्वं मूर्तामूर्तवृत्तिगुणानां संख्यादीनां लक्षणम् । कालवृत्तिः संख्यापरिमाणादिकं, तद्वृत्तिः गुणत्वव्याप्या जातिः संख्यात्वादिः तद्वत्त्वं मूर्तामूर्तवृत्तिगुणेषु संख्यादिषु अस्ति.इति लक्षणसमन्वयः । मूर्तगुणेषु अमूर्तगुणेषु च गुणत्वव्याप्यरूपत्वधर्मत्वादि-जातिमत्त्वसत्त्वात् अतिव्याप्तिवारणाय ''कालवृत्तिवृत्ति'' इति जाति-विशेषणम् । रूपादीनां कालावृत्तितया रूपत्वादीनां कालवृत्तिवृत्तित्वं नास्तीति न रूपत्वादिकम् आदाय पूर्वोक्तातिव्याप्तिः । सत्ताजातिम् आदाय तत्र अतिव्याप्तिवारणाय ''गुणत्वव्याप्य'' इति विशेषणम् ।।

द्रव्यत्वव्यापकतावच्छेकदजातिमत्त्वम् इति द्वितीयं लक्षणम् । द्रव्यत्व-व्यापकतावच्छेदकजातिः संख्यात्वादिः, तद्वत्त्वम् आदाय संख्यादौ समन्वयः । सत्ताम् आदाय रूपादौ अतिव्याप्तिवारणाय जातौ ''गुणत्वव्याप्य'' इत्यपि विशेषणं **दिनकरीये** अनुक्तमपि योजनीयम् ।।

क्वचित् ''द्रव्यत्वसमव्यापकतावच्छेदक'' इति पाठः दृश्यते। तेन सत्तायाः व्यावृत्तिः भवितुम् अर्हति । सत्तायां द्रव्यत्वव्याप्यतावच्छेदकत्वविरहात् । तथापि गुणत्वव्यावृत्तिः न संभवति । यत्र यत्र द्रव्यत्वं तत्र गुणत्वावच्छिन्नम् । यत्र यत्र गुणत्वावच्छिन्नं तत्र द्रव्यत्वम् इति गुणत्वस्य द्रव्यत्वसमव्यापकतावच्छेद-कत्वात् तद्वति रूपादौ अतिव्याप्तिः स्यात् । तद्वारणाय गुणत्वन्यूनवृत्तित्वरूपस्य गुणत्वव्याप्यत्वस्य अवश्यं निवेशिनीयतया तेनैव सत्तायाः वारणसम्भवात् ''सम'' पदनिवेशो प्रयोजनविरहात् इत्यवधेयम् ।।

कारिकायां संयोगविभागसंख्याद्वित्वादीनां द्विपृथक्त्वादीनां च अनेकाश्रितत्वं साधर्म्यम् उक्तम् । तदनुपपन्नम्। अनेकपदस्य बहुत्वविशिष्टार्थकतया संयोगादौ द्वित्वविशिष्टवृत्तित्वेऽपि बहुत्वविशिष्टवृत्तित्वाभावेन अव्याप्तेः इत्याशङ्क्य **मुक्तावल्यां संयोगविभागद्वित्वादीनि द्विवृत्तीनि** । **त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्ति** इति

व्याख्यानं कृतम् । अस्य व्याख्यानस्य **कारिकातः** लाभप्रकारमाह **दिनकर्याम् – तथा च एकत्वभिन्न इति । "अनेकाश्रिता"** इत्यस्य एकत्वभिन्नसंख्याविशिष्टवस्त्वाश्रिताः इत्यर्थः । संयोगादौ एकत्वभिन्नद्वित्वसंख्यां गृहीत्वा तद्विशिष्टवस्तुवृत्तित्वात् समन्वयः कर्तव्यः । त्रित्वचतुष्ट्वादौ एकत्वभिन्नपदेन त्रित्वचतुष्ट्वादिसंख्यां गृहीत्वा तदाश्रयवृत्तित्वात् समन्वयः कार्यः ।।

प्रभायां तु अनेकाश्रितत्वं अनेकनिरूपितसमवायसम्बन्धावच्छिन्न-वृत्तित्वम् । अनेकनिरूपितत्वं च न एकत्वान्यसंख्यावन्निरूपितत्वम्, किन्तु व्यक्तिद्वयनिरूपितत्वम् । तथा च व्यक्तिद्वयनिरूपितसमवायसम्बन्धा-वच्छिन्नाधेयत्वम् अनेकाश्रितत्वम् इत्युक्तं भवति । त्रित्वादिनिष्ठसमवेतत्वस्यापि "अधिकं तु" इति न्यायेन व्यक्तिद्वयनिरूपितत्वानपायात् न अव्याप्तिः । एकत्वनिष्ठसमवेतत्वस्य व्यक्तिद्वयनिरूपितत्वाभावात् न अतिव्याप्तिः । सामान्येऽतिव्याप्तिवारणाय आधेयतायां गुणनिष्ठत्वं निवेशनीयम् । एवं च व्यक्तिद्वयनिरूपितगुणनिष्ठ समवायसंबन्धावच्छिन्नाधेयत्वं वा स्वसमवेतत्वस्वान्य-निरूपितगुणनिष्ठसमवेतत्व–उभयसम्बन्धेन किञ्चिद्विशिष्टत्वं वा अनेकाश्रितत्वम् इत्युक्तम् ।।

दिनकर्यां मतान्तरमाह – **स्वाश्रय** इति । स्वाश्रयप्रतियोगिकः यः अन्योन्याभावः – भेदः तदधिकरणवृत्तित्वे सति गुणत्वम् अनेकाश्रितत्वम् । स्वं-संयोगः (घटपटसंयोगः), स्वाश्रयः-घटः, तत्प्रतियोगिकभेदाधिकरणं पटः, तद्वृत्तित्वे सति गुणत्वस्य संयोगे सत्त्वात् लक्षणसमन्वयः । एवं विभागादावपि समन्वयः बोध्यः । सामान्येऽतिव्याप्तिवारणाय गुणत्वनिवेशः ।।

केचित् इत्यनेन अस्वरसः सूचितः । तद्बीजं तु – द्वित्वादीनि द्विवृत्तीनि, त्रित्वचतुष्ट्वादिकं त्रचतुरादिवृत्ति इति लक्षणसमन्यवयप्रदर्शकमुक्तावलीग्रन्था-

ननुगुणत्वमेव । एकत्वान्यसंख्या-विशिष्टाश्रिततत्वस्य लक्षणत्वे तु तत्र तत्र लक्षणसमन्वये ''एकत्वभिन्नसंख्या'' इत्यनेन कस्याः संख्यायाः ग्रहणम् इति ज्ञापयितुं तद्ग्रन्थोपयोगः इति ॥

कारिकावली

अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ।
बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥ ९० ॥
अदृष्ट-भावना-शब्दा अमी वैशेषिका गुणाः ॥

मुक्तावली

अत इति । रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुख-दुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः । **बुद्ध्यादि इति ।** बुद्धि-सुख-दुःखेच्छाद्वेष-प्रयत्नाः इत्यर्थः । **स्पर्शान्ता इति ।** रूपरसगन्धस्पर्शा इत्यर्थः । **द्रवः** द्रवत्वम् । **वैशेषिका इति ।** विशेषा एव वैशेषिकाः, **स्वार्थे ठक्** । **विशेषगुणाः** इत्यर्थः ।

दिनकरी

एकैकवृत्तय इति मूलस्य **स्वसमानाधिकरणान्योन्याभावप्रतियोगिता-**नवच्छेदकैकत्वका इत्यर्थः । यद्वा **स्वाश्रयान्योन्याभावव्यापकात्यन्ताभाव** प्रतियोगिनः इत्यर्थः । **स्वार्थे ठक् इति ।** विनयादिभ्यः स्वार्थे ठग्विधानात् विशेषशब्दस्य तदन्तर्गतत्वात् विनयादेः आकृतिगणत्वात् इति भावः । **विशेषगुणा इत्यर्थ इति ।** विशेषगुणत्वं च भावनान्यः यः वायुवृत्तिवृत्तिस्पर्शावृत्तिधर्मसमवायी तदन्यत्वे सति गुरुत्व (अजलद्रवत्वान्य) [नैमित्तिकद्रवत्वान्य] गुणत्वम् । अत्र

जात्यादौ अतिव्याप्तिवारणाय विशेष्यम् । गुरुत्वनैमित्तिकद्रवत्वयोः वारणाय ''गुरुत्व'' इत्यादि । सांसिद्धिकद्रवत्वसङ्ग्रहाय ''अन्य'' इति । संयोगादिवारणाय सत्यन्तम् । भावनायाम् अव्याप्तिवारणाय आद्यम् अन्यान्तं सत्यन्तघटकसमवायि विशेषणम् ।। सत्तादिकम् आदाय **असंभववारणाय स्पर्शसङ्ग्रहाय च** ''स्पर्शावृत्ति'' इति ।।

राजीवोल्लासः

उभयवृत्तिसंयोगादेः एकैकवृत्तित्वानपायात् संयोगादौ अतिव्याप्तम् इत्यतः एकैकवृत्तित्वं निर्वक्ति – **स्वसमानाधिकरण** इति । स्वपदं रूपादिपरम्, स्वाधिकरणवृत्तिः योऽन्योन्याभावः तत्प्रतियोगितानवच्छेदकं यत् एकत्वं तत्काः इत्यर्थः । तत्कत्वं च तत्समानाधिकरणत्वम् । स्वपदेन रूपादिग्रहणे तत्समानाधिकरणा या एकत्वव्यक्तिः तद्वद्भेदस्य तद्रूपादिसमानाधिकरणत्वाभावात् लक्षणसमन्वयः । अत्र कर्मादौ अतिव्याप्तिवारणाय गुणत्वमपि निवेशनीयम् ।।

ननु एकत्वानां अननुगमात् लक्षणाननुगमः इत्यत आह – **स्वाश्रय** इति ।।

यद्वा ननु अनवच्छेदकत्वं अवच्छेदकत्वानधिकरणत्वम् । तथा च एकत्वपटत्वोभयवत्स्वाश्रयभेदस्य स्वसमानाधिकरणतया स्वाश्रयगतैकत्वस्य तदनवच्छेदकत्वाभावेन घटरूपादौ अव्याप्तिः । अनवच्छेदकपदेन अवच्छेदकता-पर्याप्त्यनधिकरणत्वविवक्षायां गौरवम् इति, अत आह – **स्वाश्रय** इति । स्वं - रूपादिकम्, स्वाश्रयः घटादिः तदन्योन्याभावव्यापकः रूपाद्यत्यन्ताभावः तत्प्रतियोगित्वं रूपादिषु अस्ति इति लक्षणसमन्वयः । अत्र ''स्व''पदेन घटपटादिगतद्वित्वादिग्रहणे स्वाश्रयघटभेदः पटे, तत्र च न द्वित्वाद्यत्यन्ताभावः इति न द्वित्वादौ अतिव्याप्तिः । न च – स्वाश्रयप्रतियोगिकोभयभेदम् आदाय

असम्भवः इति – वाच्यम्, ''स्वाश्रयान्योन्याभाव'' इत्यनेन स्वाश्रयावृत्तिप्रतियोगिताकभेदस्य विवक्षितत्वात् ।।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः, रूपरसगन्धस्पर्शाः, स्नेहः, सांसिद्धिकद्रवत्वम् अदृष्टभावनाशब्दाश्च विशेषगुणाः इति मूले उक्तम् । तेषां सामान्यलक्षणम् आह – **विशेषगुणत्वं च** इति । ''भावनान्यः'' इति समवायिविशेषणम्। वायुवृत्तिवृत्तिः स्पर्शावृत्तिश्च यः धर्मः तत्समवायी यः भावनान्यः तदन्यत्वे सति गुरुत्वान्यः नैमित्तिकद्रवत्वान्यश्च यो गुणः तत्त्वं विशेषगुणलक्षणम् । ''अजलद्रवत्वम्'' इत्यस्य जलावृत्तिद्रवत्वम् इत्यर्थः । तच्च अर्थात् नैमित्तिकद्रवत्वम् । लक्षणसमन्वयः इत्थम् – वायुवृत्तिः एकत्वसंयोगादिः, तद्वृत्तिः स्पर्शावृत्तिधर्मः संख्यात्वसंयोगत्वादिः तत्समवायि संख्यासंयोगादि, स च भावनान्यः, तदन्यत्वं संख्यासंयोगादिभिन्नत्वं बुद्ध्यादिविशेषगुणेषु अस्ति । एवं गुरुत्वनैमित्तिकद्रवत्वान्यगुणत्वञ्च बुद्ध्यादिषु अस्ति इति समन्वयः । अत्र गुणत्वानुपादाने जात्यादौ अतिव्याप्तिः । तद्वारणाय गुणत्वोपादानम् । गुरुत्वे नैमित्तिकद्रवत्वे च सत्यन्तविशेषणसत्त्वात् गुणत्वसत्त्वाच्च अतिव्याप्तिः । तद्वारणाय गुणे गुरुत्वान्यत्वस्य नैमित्तिकद्रवत्वान्यत्वस्य च उपादानम् । द्रवत्वान्यत्वमात्रोक्तौ विशेषगुणे सांसिद्धिकद्रवत्वे द्रवत्वान्यत्वविरहात् अव्याप्तिः । तद्वारणाय द्रवत्वे जलावृत्तित्वविशेषणम् । सत्यन्तानुपादाने संयोगादिषु सामान्यगुणेषु गुरुत्वान्यत्वस्य जलावृत्तिद्रवत्वान्यत्वस्य च सत्त्वात् अतिव्याप्तिः । तद्वारणाय सत्यन्तम् । तदुपादाने वायुवृत्तिसंयोगवृत्तिधर्मसमवायित्वमेव संयोगेऽस्ति, न तु तदन्यत्वम् इति न अतिव्याप्तिः । विशेषगुणे भावनाख्यसंस्कारे वायुवृत्ति–वेगवृत्ति–स्पर्शावृत्ति–संस्कारत्वरूपधर्मसमवायित्वमेव अस्ति, न तु तदन्यत्त्वम् इति अव्याप्तिः । तद्वारणाय सत्यन्तघटकसमवायिनि भावनान्यः

इति विशेषणम् । भावनान्यः यः तादृशधर्मसमवायी वेगः, तदन्यत्वं भावनायाम् अस्ति इति नाव्याप्तिः । सत्यन्तदले धर्मे स्पर्शावृत्तित्वविशेषणानुपादाने भावनान्येषु बुद्ध्यादिविशेषगुणेषु अव्याप्तिः । वायुवृत्तिसंयोगादिवृत्तिसत्तारूप-धर्मसमवायित्वस्यैव तेषु सत्त्वात् तदन्यत्वविरहात् । स्पर्शावृत्तित्वोपादाने च सत्तायां स्पर्शावृत्तित्वविरहात् धर्मपदेन तस्याः उपादातुम् अशक्यतया न अव्याप्तिः । एवं स्पर्शावृत्तित्वानुपादाने वायुवृत्तिस्पर्शवृत्तिस्पर्शत्वसमवायित्वस्यैव स्पर्शे सत्त्वात् तत्र अव्याप्तिः । तद्वारणाय च स्पर्शावृत्तित्वोपादानम् । संस्कारत्वस्य तादृशधर्मत्वात् न स्थितस्थापके अतिव्याप्तिः ।।

असम्भववारणाय इति । लक्ष्यैकदेशे लक्षणासम्भवरूपाव्याप्तिवारणाय इत्यर्थः । तेन भावनान्यत्वेन समवायिनः विशेषितत्वात् भावनायां लक्षणसमन्वयेऽपि न क्षतिः । ''स्पर्शसङ्ग्रहाय'' इत्येतावन्मात्रोक्तौ मनोवृत्तिवृत्तित्वमेव धर्मे निवेश्यताम् इत्याक्षेपः स्यात् । अतः असंभवप्रदर्शनम् । रूपावृत्तित्वं रसावृत्तित्वं वास्तु इति शङ्कां वारयितुं ''स्पर्शसङ्ग्रहाय च'' इति ।।

कारिकावली

संख्यादिरपरत्वान्तो द्रवो नैमित्तिकस्तथा ।। ९१ ।।
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।
संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ।। ९२ ।।
एते तु द्वीन्द्रियग्राह्य अथ स्पर्शान्तशब्दकाः ।
बाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ।। ९३ ।।
अतीन्द्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः ।
अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ।। ९४ ।।

मुक्तावली

संख्या इति । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानि इत्यर्थः । द्वीन्द्रिय इति । चक्षुषा त्वचापि ग्रहणयोग्यत्वात् । बाह्य इति । रूपादीनां चक्षुरादिग्राह्यत्वात् । विभूनाम् इति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म- भावनाशब्दाः इत्यर्थः । कारणगुणेन कार्यगुणाः उत्पद्यन्ते इति कारणगुणपूर्वकाः रूपादयः वक्ष्यन्ते, बुद्ध्यादयस्तु न तादृशाः आत्मादेः कारणाभावात् ।।

दिनकरी

संख्या आदिः यस्य, अपरत्वम् अन्ते यस्य इति व्युत्पत्त्या परिमाणपरत्वयोः एव ग्रहणम् इति भ्रमवारणाय ''आदि''पदग्राह्यगुणान् विशिष्य दर्शयति– **संख्यापरिमाण** इत्यादिना । ''गुरुत्ववेगौ'' इत्यत्र **मूले** वेगपदं भावनातिरिक्त-संस्कारपरम्, तेन स्थितस्थापकस्यापि परिग्रहः । **मूले सामान्यगुणा** इति । तत्त्वं च रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकसंयोग-विभागवेगद्रवत्वावृत्तिजातिशून्यगुणत्वम् । द्रव्यविभाजकोपाधिः पृथिवीत्वादि, तद्व्याप्यतावच्छेदकं च गन्धत्वादि, तच्छून्यत्वस्य संख्यादौ सत्त्वात् लक्षणसमन्वयः ।।

अथ जलीयशुक्लरूपे वायोः अनुष्णाशीतस्पर्शे च पृथिव्यादिशुक्लरूपस्पर्शव्या-वृत्तजातिविशेषे मानाभावात् शुक्लरूपानुष्णाशीतस्पर्शयोः अतिव्याप्तिवारणाय सत्यन्तम् । शब्दविशेषजनकतावच्छेदकजात्यवच्छिन्ने भेरीदण्डसंयोगे, तादृश-कठिनावयवद्वयविभागे, तेजोवेगातिशये, अत्यन्ताग्निसंयोगनाश्यतावच्छेदक-वैजात्यावच्छिन्नघृतादिवृत्तिद्रवत्वे च अव्याप्तिवारणाय अवृत्त्यन्तं जातिविशेषणम् । कर्मादौ तद्वारणाय विशेष्यम् । पृथिवीत्वादिव्याप्यतावच्छेदकतत्तत्संख्यात्वा-दिशून्यत्वस्य तत्तत्संख्यायाम् अभावात् अव्याप्तिवारणाय ''जाति''पदम् । द्रव्यविभाजकतावच्छेदकरूपोपाधेश्च व्यापकत्वं तत्तद्व्यक्तित्वेन विवक्षितम्, न तु तादृशोपाधित्वेन । संख्यात्वादेरपि तादृशजातित्वात् असंभवापत्तेः इति ।।

"संख्यादिः अपरत्वान्तः द्रवत्वं स्नेह एव च" इत्यत्र मूले "स्नेह"पदं वेगस्यापि उपलक्षकम् । स्थितस्थापकस्य तु अतीन्द्रियत्वं वक्ष्यते । ननु द्वीन्द्रियग्राह्यत्वं रूपादौ अतिव्याप्तम्, तेषां मनसापि ग्रहणात् । बाह्येन्द्रियद्वयग्राह्यत्वमपि तत्रैव अतिव्याप्तम्, रूपादीनां चक्षुर्द्वयादिना ग्रहणात्, अतीन्द्रियसंख्यादौ अव्याप्तं च, तत्र इन्द्रियग्राह्यत्वस्यैव अभावात्, अत आह – चक्षुषा त्वचापि इति । चक्षुस्त्वगुभयग्रहणयोग्यत्वं तदर्थः । चक्षुस्त्वगुभयग्राह्यभावनावृत्त्यन्यधर्मसमवायिगुणत्वम् इति तु निष्कर्षः । संस्कारत्वादिकम् आदाय भावनायाम् अतिव्याप्तिवारणाय "भावनावृत्त्यन्य" इति । कर्मादौ तद्वारणाय गुणत्वस्य निवेशः ।।

ननु बाह्यैकैकेन्द्रियग्राह्यत्वं संख्यादौ अतिव्याप्तम्, तेषाम् उभयग्राह्यत्वेऽपि एकग्राह्यत्वानपायात्, अव्याप्तं च अतीन्द्रियरूपादौ, तेषाम् इन्द्रियग्राह्यत्वस्यैव अभावात्, अत आह – रूपादीनाम् इति । चक्षुरादि इति । चक्षुरादिनैव इत्यर्थः । तथा च एकैकमात्रग्राह्यत्वस्य विवक्षितत्वात् संख्यादौ न अतिव्याप्तिः । ग्राह्यत्वात् – ग्रहणयोग्यत्वात् । तेन न अतीन्द्रियरूपादौ अव्याप्तिः । तथा च चक्षुस्त्वगुभयाग्राह्यबहिरिन्द्रियग्राह्यगुणसमवेतजातिमत्त्वम् एतेषां लक्षणम् इति भावः । न च - त्रसरेणुपरिमाणनिष्ठापकर्षस्य चक्षुरिन्द्रियेणैव ग्रहणात् तत्र अतिव्याप्तिः इति – वाच्यम् । परिमाणान्यत्वेनापि गुणस्य विशेषणीयत्वात् ।।

मूले "गुरुत्वादृष्टभावनाः" इत्यत्र भावनापदं वेगभिन्नसंस्कारपरम्, तेन स्थितस्थापकस्यापि संग्रहः । न च – अतीन्द्रियत्वम् इन्द्रियजन्यप्रत्यक्षाविषयत्वं यदि, तदा गुरुत्वादौ असंभवः, तेषाम् अलौकिकप्रत्यक्षविषयत्वात्, लौकिकप्रत्यक्षाविषयत्वविवक्षणे च अतीन्द्रियरूपादौ अतिव्याप्तिः इति – वाच्यम् । लौकिकसाक्षात्कारविषयगुणत्वन्यूनवृत्तिसंस्कारत्वान्यधर्मसमवाय्यन्यगुणत्वस्य विवक्षितत्वात् । सत्तादिकम् आदाय असंभववारणाय "गुणत्वन्यूनवृत्ति" इति ।

भावनास्थितस्थापकयोः अव्याप्तिवारणाय ''संस्कारत्वान्य'' इति । जात्यादौ अतिव्याप्तिवारणाय गुणपदम् ।।

मूले ''अकारणगुणोत्पन्नाः'' इत्यत्र न कारणम् अकारणं तस्य गुणाः इति भ्रमनिराकरणाय आह **मुक्तावल्यां – कारणगुणेन** इति । समवायिकारणसमवेतगुणेन इत्यर्थः । अत्र कारणत्वम् अविवक्षितम्, समवायित्वमात्रं बोध्यम् । **न तादृशाः** इति । तथा च कारणगुणैः उत्पन्नाः कारणगुणोत्पन्नाः, न कारणगुणोत्पन्ना अकारणगुणोत्पन्नाः इति विग्रहेण स्वाश्रयसमवायिसमवेतगुणजन्यत्वं कारणगुणोत्पन्नत्वं, तादृशगुणाजन्यत्वम् अकारणगुणपूर्वकत्वम् इति भावः ।।

यद्यपि इदं नित्यरूपे जन्येऽपि च पाकजरूपादौ अवयवायवयविनोः द्वित्वद्विपृथक्त्वातिरिक्तद्वित्वपृथक्त्वादौ कर्मजन्यसंयोगविभागेषु पाकजद्रवत्वे च अतिव्याप्तं, **तथापि** अकारणगुणोत्पन्नमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं विवक्षितम् इति अदोषः । अकारणगुणोत्पन्नमात्रवृत्तित्वं च **निरुक्तकारणगुणोत्पन्नावृत्तित्वम्** । **रूपनिष्ठ**पाकजन्यतावच्छेदकवैजात्यं, संयोगविभागवेगनिष्ठकर्मजन्यतावच्छेदकवैजात्यं, अणुपरिमाणनिष्ठवैजात्यं, परममहत्त्वत्वं च आदाय अतिव्याप्तिवारणाय **गुणत्वसाक्षाद्व्याप्य** इति । **संस्कारत्वान्यगुणत्वव्याप्याव्याप्यत्वे** सति गुणत्व्याप्यत्वं तदर्थः । अन्यथा भावनात्वस्य गुणत्वसाक्षाद्व्याप्यत्वाभावात् भावनायाम् अव्याप्तिप्रसङ्गात् । **इत्थमपि परत्वापरत्वयोः अतिव्याप्तिः** अवशिष्यते, सापि परत्वापरत्वावृवित्वेन जातेः विशेषणीयत्वात् निरसनीया इति ध्येयम् ।।

राजीवोल्लासः

मूले **सामान्यगुणा** इति । सामान्यं समानः धर्मः । तद्रूपाः गुणाः सामान्यगुणाः, न स्वाश्रयव्यवच्छेदाय प्रभवन्ति इत्यर्थः इति **किरणावली** । सङ्ख्यादीनां विशेषत्वं तु आश्रयविशेषकृतम् इति **कन्दलीकाराः** । तथा च

सङ्ख्यादीनां भेदकत्वम् आश्रयभेदेन परस्परभेदसिद्ध्यनन्तरमेव, न तु गुणत्वव्याप्यधर्मपुरस्कारेण साक्षात् इति भावः ।।

सामान्यगुणलक्षणम् आह **दिनकर्यां – तत्त्वञ्च** इति । द्रव्यविभागजनकतावच्छेदकः यः उपाधिः तद्व्याप्यतावच्छेदिका या संयोगविभागवेगद्रवत्वावृत्तिजातिः तच्छून्यत्वे सति गुणत्वम् इत्यर्थः । द्रव्यविभागजनकतावच्छेदकं पृथिवीत्वादि, तद्व्याप्यतावच्छेदकं गन्धत्वादि, तच्छून्यत्वे सति गुणत्वस्य संख्यादौ सामान्यगुणे सत्त्वात् लक्षणसमन्वयः । जलीयशुक्लरूपे वायोः अनुष्णाशीतस्पर्शे च पृथिव्यादिशुक्लरूपस्पर्शव्यावृत्तजातिविशेषे मानाभावात् रूपत्वस्य स्पर्शत्वस्य च द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वाभावात् तद्व्याप्यतावच्छेदकगन्धत्वादि-शून्यगुणत्वस्य शुक्लरूपानुष्णाशीतस्पर्शयोः विशेषगुणयोः सत्त्वात् अति-व्याप्तिः । तद्वारणाय "रूपस्पर्शान्यत्वे सति" इति । **जातिविशेषे मानाभावात्** इति । यदि तत्र प्रमाणं स्यात् तदा द्रव्यविभाजकतावच्छेदकवायुत्वजलत्व-व्याप्यतावच्छेदकता-दृशजातिविशेषशून्यत्वम् अनुष्णाशीतस्पर्शशुक्लरूपयोः नास्ति इति अतिव्याप्तेः अप्रसक्त्या जातिविशेषे मानाभावात् इत्युक्तम् । जातौ अवृत्तित्वान्तविशेषणस्य प्रयोजनम् आह – **शब्दविशेष** इति । "**कठिनावयवद्वय-विभागे**"त्युक्त्या तादृशविभागस्य पृथिवीमात्रवृत्तितया द्रव्यविभाजकोपाधि-व्याप्यतावच्छेदकत्वं विभागत्वस्य इति सूचितम् । द्रव्यविभाजकोपाधिः पृथिवीत्वं, तद्व्याप्यतावच्छेदकं विभागत्वं, तच्छून्यगुणत्वं विभागे नास्ति इति अव्याप्तिः । अतः जातौ "विभागावृत्ति" इति विशेषणम् । तेजोगतवेगातिशये अव्याप्तिवारणाय वेगावृत्तित्वनिवेशः । अग्निसंयोगनाश्यतावच्छेदकजातिविशेषावच्छिन्ने घृतादिवृत्तिद्रवत्वे अव्याप्तिवारणाय द्रवत्वावृत्तित्वनिवेशः । कर्मादौ अतिव्याप्तिवारणाय गुणत्वनिवेशः । जातिपदस्य प्रयोजनम् आह – **पृथिवीत्वादि**

इति । जातिपदस्थाने धर्मपदस्य निवेशे पृथिवीत्वादिव्याप्यतावच्छेदकः संयोगाद्यवृत्तिधर्मः तत्तत्संख्यात्वम् । तच्छून्यत्वस्य तत्तत्संख्यादौ अभावात् अव्याप्तिः । तद्वारणाय जातिपदोपादानम् । भेरीदण्डसंयोगे शब्दविशेष-जनकतावच्छेदकः कश्चन जातिविशेषः अस्ति । स च पृथिवीत्वव्याप्यता-वच्छेदकः, तच्छून्यत्वं भेरीदण्डसंयोगे नास्ति इति अव्याप्तिः । अतः संयोगावृत्तित्वं जातिविशेषणमिति भावः । **तत्तद्व्यक्तित्वेन** इति – पृथिवीत्वत्वादिना इत्यर्थः ।।

ननु **''संख्यादिः अपरत्वान्तः द्रवत्वं स्नेह एव च, एते तु द्वीन्द्रिय-ग्राह्याः''** इति **कारिकायां** संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानां द्वीन्द्रियग्राह्यत्वं साधर्म्यम् उक्तम् । तत्तु रूपादौ अतिव्याप्तम्। तेषामपि चक्षुषा मनसा च ग्रहणात् द्वीन्द्रियग्राह्यत्वात् । यदि तु बाह्येन्द्रियद्वयग्राह्यत्वं विवक्षितं, तत्तु रूपादौ नास्ति इति उच्यते, तथापि रूपादीनां चैत्रमैत्रचक्षुर्द्वयरूपबाह्येन्द्रियद्वय-ग्राह्यत्वात् रूपादौ अतिव्याप्तिः तदवस्था । अपि च अतीन्द्रियपरमाण्वादिगत-संख्यादौ अव्याप्तिः । तत्र इन्द्रियग्राह्यत्वस्यैव अभावात् इति आशङ्क्य **मुक्तावल्यां ''चक्षुषा त्वचापि ग्रहणयोग्यत्वात्''** इति व्याख्यानं कृतम्। एवमपि चक्षुषा त्वचा च प्रत्येकेन्द्रियग्राह्यत्वभ्रमवारणाय आह – **चक्षुस्त्वगुभयग्रहणयोग्यत्वं तदर्थ** इति । प्रत्येकग्रहणयोग्यत्वस्य रूपादौ सत्त्वात् अतिव्याप्तिः । तद्वारणाय उभयग्रहणयोग्यत्वं इति व्याख्यातम् । एवमपि अतीन्द्रियसंख्यादौ अव्याप्तिः ।।

न च – ''चक्षुस्त्वगुभयग्रहणयोग्यत्वम्'' इत्यस्य चक्षुस्त्वगुभयजन्य-ग्रह विषयजातिमत्त्वम् इत्यर्थः । संख्यात्वादिरूपतादृशजातिम् आदाय अतीन्द्रियसंख्यादौ समन्वयः इति – वाच्यम् । एवमपि चक्षुस्त्वगुभयजन्यग्रहविषयकर्मादिवृत्तिकर्मत्वा-दिजातिम् आदाय कर्मादौ अतिव्याप्तिः । एवं तादृशग्रहविषयवेगवृत्तिसंस्कार-

त्वजातिमत्यां भावनायां अतिव्याप्तिश्च इति, अत आह – **चक्षुस्त्वगुभय** इति । चक्षुस्त्वगुभयग्राह्यः भावनावृत्त्यन्यः यः धर्मः तत्समवायित्वे सति गुणत्वम् इत्यर्थः । कर्मादौ गुणत्वविरहात् न अतिव्याप्तिः । संस्कारत्वे भावनावृत्त्यन्यत्वविरहात् न संस्कारत्वम् आदाय भावनायाम् अतिव्याप्तिः ।।

कारिकायां – "अथ स्पर्शान्तशब्दकाः बाह्यैकैकेन्द्रियग्राह्याः" इति रूपरसगन्धस्पर्शशब्दानां एकैकबाह्येन्द्रियग्राह्यत्वं साधर्म्यम् उक्तम् । तच्च संख्यादौ अतिव्याप्तम् । तेषाम् इन्द्रियद्वयग्राह्यत्वेऽपि एकेन्द्रियग्राह्यत्वस्यानपायात् । एवम् अतीन्द्रियपरमाणुरूपादौ अव्याप्तिः । तेषाम् इन्द्रियग्राह्यत्वस्यैव अभावात् इति आशङ्क्य **मुक्तावल्यां "रूपादीनां चक्षुरादिग्राह्यत्वात्** इत्युक्तम् । तावतापि संख्यादौ अतिव्याप्तिवारणं न लभ्यते इति आशङ्क्य **दिनकर्यां** व्याचष्टे – **चक्षुरादिनैव इत्यर्थः** इति । **ग्राह्यत्वात् – ग्रहणयोग्यत्वात्** इति । तथा च बाह्यैकैकमात्रग्रहणयोग्यत्वस्य विवक्षितत्वात् संख्यादौ द्वीन्द्रियग्राह्ये एकैकमात्रग्राह्यत्वविरहात् न अतिव्याप्तिः । ग्रहणयोग्यत्वस्य ग्रहविषयवृत्ति-जातिमत्त्वरूपस्य विवक्षितत्वाच्च न अतीन्द्रियरूपादौ अव्याप्तिः इति भावः । **तथा च** इति । चक्षुस्त्वगुभयाग्राह्या बहिरिन्द्रियग्राह्यगुणसमवेता च या जातिः तादृशजातिमत्त्वं रूपादीनां साधर्म्यम् । रूपत्वादिकं तादृशजातिः । तदादाय रूपादौ समन्वयः । प्रभात्वजातिम् आदाय प्रभायाम् अतिव्याप्तिवारणाय "गुणसमवेत" इति जातिविशेषणम् । संख्यादौ अतिव्याप्तिवारणाय **उभयाग्राह्य** इति । ज्ञानत्वजातिम् आदाय ज्ञाने अतिव्याप्तिवारणाय "बहिरिन्द्रियग्राह्य" इति गुणविशेषणम् । त्रसरेणुनिष्ठपरिमाणस्य चक्षुरिन्द्रियेणैव ग्रहात् तद्वृत्तिजातिमत्त्वम् आदाय त्रसरेणुपरिमाणे अतिव्याप्तिः । तद्वारणाय परिमाणान्यत्वेनापि गुणः विशेषणीयः इत्याह – **न च** इत्यादिना । अत्र "अपि" शब्देन बहिरिन्द्रियग्राह्यत्वं

गुणे एव विशेषणम् इति सूचितम् । अग्राह्यत्वं तु जातौ एव विशेषणम् । अन्यथा सत्तादिकम् आदाय संख्यादौ अतिव्याप्तेः ।।

मूले गुरुत्वादृष्टभावनानाम् अतीन्द्रियत्वं साधर्म्यम् उक्तम् । तत्र स्थितस्थापक-रूपसंस्कारस्यापि अतीन्द्रियत्वात् तदनुक्त्या न्यूनता इति आशङ्क्य मूलस्थं भावनापदं वेगभिन्नसंस्कारपरं, तेन भावनास्थितस्थापकयोः द्वयोरपि सङ्ग्रहः इति आह – **मूले** इत्यादिना । **न च अतीन्द्रियत्वम्** इति । अतीन्द्रियत्वं यदि इन्द्रियजन्यप्रत्यक्षाविषयत्वं, तदा गुरुत्वादौ असम्भवः । तेषां ज्ञानलक्षणा-प्रत्यासत्तिजन्यालौकिकप्रत्यक्षविषयत्वात्, प्रत्यक्षाविषयत्वविरहात् । अतीन्द्रियत्वं यदि लौकिकप्रत्यक्षाविषयत्वं, तदा अतीन्द्रियरूपादौ अतिव्याप्तिः इति शङ्का । समाधत्ते – **लौकिकसाक्षात्कार** इत्यादिना । लौकिकसाक्षात्कारविषयः गुणत्वन्यून-वृत्तिः संस्कारत्वान्यश्च यो धर्मः समवायसम्बन्धेन तद्वद्भिन्नत्वे सति गुणत्वं गुरुत्वादृष्टभावानानां साधर्म्यत्वेन विवक्षितम् । तादृशो धर्मः रूपत्वादिः, समवायसम्बन्धेन तदाश्रयः रूपादिः, तद्भिन्नगुणत्वस्य गुरुत्वादौ सत्त्वात् लक्षणस-मन्वयः । सत्तारूपजातिम् आदाय गुणत्वम् आदाय वा तत्समवाय्यन्यत्वं गुरुत्वादौ नास्ति इति असंभवः स्यात् । तद्वारणाय गुणत्वन्यूनवृत्तित्वं धर्मस्य विशेषणम् । गुणत्वन्यूनवृत्तित्वं च गुणत्वाधिकरणवृत्तित्वे सति गुणत्वाधिकरणवृत्तिभेदप्रतियो-गितावच्छेदकत्वम् । एतादृशस्य गुणत्वन्यूनवृत्तित्वस्य सत्तागुणत्वयोः अभावात् न पूर्वोक्तदोषः । अलौकिकसाक्षात्कारविषयगुरुत्वत्वादिधर्मसमवायित्वमेव गुरुत्वादौ अस्ति इति असंभवः । तद्वारणाय ''लौकिकसाक्षात्कारविषय'' इति धर्मविशेषणम् । वेगान्तर्भावेन लौकिकसाक्षात्कारविषयः गुणत्वन्यूनवृत्तिश्च धर्मः संस्कारत्वम्, तत्समवायित्वमेव भावनास्थितस्थापकयोः अस्ति इति तयोः अव्याप्तिः । तद्वारणाय ''संस्कारत्वान्य'' इति धर्मविशेषणम् । रूपत्वादितादृश-धर्मसमवाय्यन्य-त्वस्य सामान्यादौ सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय गुणत्वनिवेशः ।।

मूले अकारणगुणोत्पन्ना इत्यनेन विभुविशेषगुणानां बुद्धिसुखदुः-खेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दानां अकारणगुणोत्पन्नत्वं साधर्म्यम् उक्तम् । तत्र न कारणम् अकारणम्, तस्य गुणाः अकारणगुणाः इति विग्रहे अकारणत्वेन अभिमतानां पारिमाण्डल्यादीनां गुणा एव अप्रसिद्धाः इति शङ्का स्यात्, तन्निराकरणाय मुक्तावल्यां प्रकारान्तरेण विग्रहप्रदर्शनपूर्वकं व्याख्यानं करोति इति आह – मूल इत्यादिना । कारणस्य गुणाः कारणगुणाः, कारणगुणैः उत्पन्नाः कारणगुणोत्पन्नाः, न कारणगुणोत्पन्नाः अकारणगुणोत्पन्नाः, इति विग्रहः । कारणशब्दः स्वाश्रयंसमवायिकारणपरः । तथा च स्वाश्रयसमवायिकारण-समवेतगुणजन्यगुणभिन्नाः गुणाः इत्यर्थः पर्यवसन्नः । कार्यगतरूपादयः गुणाः स्वाश्रयसमवायिकारणसमवेतगुणजन्याः भवन्ति । बुद्ध्यादयस्तु तद्भिन्नाः, बुद्ध्यादीनां आश्रयाः आत्मादयः, तेषां नित्यत्वात् समवायिकारणमेव नास्ति । अतः स्वाश्रयसमवायिकारणसमवेतगुणजन्यभिन्नत्वं बुद्ध्यादौ अस्ति इति समन्वयः ।।

अत्र लक्षणे समवायिकारणे इत्यत्र कारणत्वं स्पष्टप्रतिपत्त्यर्थम् उक्तम् । न तु तस्य लक्षणे निवेशः, प्रयोज़नाभावात्। तथा च स्वाश्रयसमवायि-समवेतगुणाजन्यत्वं बुद्ध्यादीनां साधर्म्यम् इति फलितम् ।

अस्यापि लक्षणस्य अतिव्याप्तिम् आशङ्कते – यद्यपि इदं इत्यादिना । नित्यरूपे जन्यत्वाभावात् उक्तलक्षणम् अस्ति इति अतिव्याप्तिः । पाकजरूपादौ स्वाश्रयसमवायि-समवेतगुणजन्यत्वं नास्ति पाकजत्वादेव, अतः तत्र अतिव्याप्तिः । अवयवावयविगतद्वित्वद्विपृथक्त्वादौ स्वाश्रयावयविसमवायिकारणावयव-कर्मजन्यसंयोगविभागवेगेषु गुणाजन्यत्वम् अस्ति इति अतिव्याप्तिः । पाकजद्रवत्वे अग्निसंयोगविशेषात् जायमाने स्वाश्रयसमवायिसमवेतगुणजन्यत्वं नास्ति इति अतिव्याप्तिः ।।

तथापि इति । अकारणगुणोत्पन्नमात्रवृत्तिः गुणत्वसाक्षाद्व्याप्या च या जातिः तद्वत्वं विवक्षितम् । नित्यरूपवृत्तिरूपत्वजातिः न अकारणगुणोत्पन्नमात्रवृत्तिः, कारणगुणोत्पन्ने घटादिरूपेऽपि सत्त्वात् अकारणगुणोत्पन्नमात्रवृत्तित्वाभावात् । अतः रूपत्वम् आदाय नित्यरूपे न अतिव्याप्तिः । एवं पाकजरूपादिवृत्तिरूपत्वादिजातिरपि न अकारणगुणोत्पन्नमात्रवृत्तिः इति न रूपत्वादिकम् आदाय पाकजरूपादौ अतिव्याप्तिः । एवं संयोगत्वविभागत्वादिजातिरपि कारणगुणोत्पन्नसंयोगादौ अकारणगुणोत्पन्नसंयोगादौ च वर्तते इति अकारणगुणोत्पन्नमात्रवृत्तिः न भवति इति न तादृशजातिम् आदाय कर्मजसंयोगादौ अतिव्याप्तिः । पाकजद्रवत्ववृत्तिद्रवत्वत्वजातिरपि कारणगुणोत्पन्नद्रवत्वपाकजद्रवत्वोभयवृत्तितया अकारणगुणोत्पन्नमात्रवृत्तित्वाभावात् न द्रवत्वत्वम् आदाय पाकजद्रवत्वे अतिव्याप्तिः ।।

अकारणगुणोत्पन्नमात्रवृत्तित्वञ्च कारणगुणोत्पन्नावृत्तित्वे सति अकारणगुणोत्पन्नवृत्तित्वम् । तत्र विशेष्यनिवेशे प्रयोजनाभावात् विशेषणमात्रं विवक्षितम् इति आह – **निरुक्तकारण** इति । स्वाश्रयसमवायिकारणसमवेतगुणजन्यावृत्तित्वम् अकारणगुणोत्पन्नमात्रवृत्तित्वम् इत्यर्थः । साक्षात्पदस्य प्रयोजनम् आह – **रूपनिष्ठ** इति । पाकजरूपे रूपत्वजातिः यथा वर्तते, तथा पाकजन्यतावच्छेदकतया सिद्धः रूपत्वव्याप्यजातिविशेषोऽपि वर्तते । अतः तादृशजातिविशेषम् आदाय पाकजरूपे अतिव्याप्तिः । एवं संयोगविभागवेगेषु कर्मजन्यतावच्छेदिकाः संयोगत्वविभागत्ववेगत्वव्याप्याः जातिविशेषाः सन्ति । तादृशजातिविशेषान् आदाय कर्मजन्यसंयोगविभागवेगेषु अतिव्याप्तिः । एवं परममहत्त्वत्वम् आदाय परममहत्वे अतिव्याप्तिः । तद्वारणाय "गुणत्वसाक्षाद्व्याप्य"इति साक्षात्पदम् उपात्तम् । गुणत्वसाक्षाद्व्याप्यत्वं च गुणत्वव्याप्याव्याप्यत्वे सति गुणत्वव्याप्यत्वम् । पूर्वोक्तजातिविशेषाणां

गुणत्वव्याप्यरूपत्वादिव्याप्यत्वात् गुणत्वव्याप्याव्याप्यत्वं नास्तीति न तान् आदाय अतिव्याप्तिः । एवमपि भावनायाम् अव्याप्तिः । तत्र हि संस्कारत्वं भावनात्वं च इति जातिद्वयम् अस्ति । तत्र संस्कारत्वं न अकारणगुणोत्पन्नमात्रवृत्तिः, कारणगुणोत्पन्नयोः स्थितस्थापकवेगयोः अपि तस्य सत्त्वात् । भावनात्वं तु गुणत्वव्याप्यसंस्कारत्वव्याप्यम् इति न गुणत्व-साक्षाद्व्याप्यम् । अतः भावनायाम् उक्तलक्षणजातिविशेषाभावात् अव्याप्तिः इति आशङ्क्य आह – **संस्कारत्वान्य** इति । संस्कारत्वापेक्षया अन्यत् यत् गुणत्वव्याप्यं रूपत्वादिकं तदव्याप्यत्वे सति इत्यर्थः । तच्च भावनात्वे अस्ति इति भावनात्वम् आदाय भावनायां लक्षणसमन्वयात् न अव्याप्तिः इति भावः । **इत्थमपि** इति । उक्तरीत्या परिष्कारे कृतेऽपि इत्यर्थः । **परत्वापरत्वयोः अतिव्याप्तिः** इति । परत्वापरत्वत्वजाती गुणत्वसाक्षाद्व्याप्ये अकारण-गुणोत्पन्नमात्रवृत्ती च, तद्वत्त्वस्य परत्वापरत्वयोः सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय ''परत्वापरत्वावृत्ति'' इति जातौ विशेषणं देयम् इत्यर्थः ।।

तथा च – स्वाश्रयसमवायिकारणसमवेतगुणोत्पन्नावृत्तिः संस्कारत्वान्य-गुणत्वव्याप्याव्याप्यत्वे सति गुणत्वव्याप्या परत्वापरत्वावृत्तिश्च या जातिः तद्वत्त्वं विभुगतविशेषगुणानां साधर्म्यम् इति ।।

कारिकावली

अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ।। ९५ ।।

स्थितस्थापक इत्येते स्युः कारणगुणोद्भवाः ।
संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ।। ९६ ।।

मुक्तावली

अपाकजास्तु इति । पाकजरूपादीनां कारणगुणपूर्वकत्वाभावात् अपाकजा इत्युक्तम् । **तथाविधम्** – अपाकजम् । **कारणगुणोद्भवा** इति । तथा एकत्वमपि बोध्यम् ।।

कर्मजा इति । कर्मजत्वं यद्यपि न साधर्म्यं, घटादौ अतिव्याप्तेः, संयोगजसंयोगे अव्याप्तेश्च, तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम् । एवम् अन्यत्रापि ऊह्यम् ।।

दिनकरी

मूले स्युः कारणगुणोद्भवाः इति । **कारणगुणोत्पन्नत्वं** च न पूर्वोक्तं स्वाश्रयसमवायिसमवेतगुणजन्यत्वम्, हस्तपुस्तकसंयोगविभागादिजन्यकायपुस्तकसंयोगविभागादौ अतिव्याप्तेः ।।

न च – **स्वाश्रयसमवायिमात्रसमवेतगुणजन्यत्वं** तत्, हस्तपुस्तकसंयोगादिश्च न स्वाश्रयसमवायिमात्रसमवेतः इति – वाच्यम् ।।

तथापि अवयवावयविनोः एकत्वाभ्यां जनिते अवयवावयविद्वित्वादौ अतिव्याप्तेः, तथापि **स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्यत्वं** तत्, अवयवैकत्वादेः अवयवावयविद्वित्वसजातीयत्वाभावेन तत्र अतिव्याप्त्यभावात् ।

न च – संख्यात्वेन तयोः साजात्यम् अस्तीति तद्दोषतादवस्थ्यम्, गुणत्वव्याप्यव्याप्यजात्या साजात्यस्य विवक्षितत्वात्, अवयवावयविरूपादीनां **नीलत्वादिना** साजात्यसत्त्वात् न असंभवः ।।

ननु तथापि नित्यरूपे संख्याप्रचयजन्यपरिमाणे, **कर्मजवेगे** च **अव्याप्तिः** इति चेत्, न । **स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्यवृत्तिजातिमत्त्वस्य**

विवक्षितत्वात्, नित्यरूपादौ तादृशरूपत्वादिकम् आदाय लक्षणसमन्वयात् ।।

अत्र च संख्यात्वपृथक्त्वत्वातिरिक्तत्वेन भावनावृत्त्यन्यत्वेन च तादृशजातिः विशेषणीया, तेन तादृशसंख्यात्वं पृथक्त्वं च आदाय द्वित्वद्विपृथक्त्वादौ न अतिव्याप्तिः, **न वा** अवयववेगजन्यावयविवेगवृत्तिसत्तागुणत्वसंस्कारत्वानि आदाय भावनायाम् अतिव्याप्तिः । न च – एवं जातिघटितलक्षणे तादृशरूपत्वादिजातिम् आदाय पाकजरूपादौ अतिव्याप्तिः इति – वाच्यम् । तादृशजातिमत्त्वे सति अपाकजत्वस्य विवक्षितत्वात् इति सर्वं चतुरस्रम् ।।

लक्ष्यतावच्छेदके अपाकजत्वविशेषणस्य प्रयोजनम् आह – **मुक्तावल्यां पाकजरूपादीनाम् इति । कारणगुणपूर्वकत्वाभावात्** – **कारणगुणपूर्वकत्व-व्यवहाराभावात् । अत्र** पाकजरूपरसगन्धस्पर्शपाकजद्रवत्वद्वित्वादिद्विपृथक्त्वादि-संयोगविभागपरत्वापरत्वानां न कारणगुणपूर्वकत्वं, न वा अकारणगुणपूर्वकत्वं साधर्म्यम् इति ध्येयम् । **एवं अन्यत्र अपि इति** ।।

अथ प्रादेशिक इत्यादिमूलेन संयोगादिद्वयविभुविशेषगुणानाम् अव्याप्यवृत्तित्वं साधर्म्यं प्रदर्शनीयम्, तत्रापि यथाश्रुते कर्मादौ अतिव्याप्तेः ईश्वरज्ञानादौ अव्याप्तेश्च अव्याप्यवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम् इत्यर्थः ।।

राजीवोल्लासः

अपाकजाः रूपरसगन्धस्पर्शाः, अपाकजं द्रवत्वं, स्नेहवेगगुरुत्वैकपृथक्त्व-परिमाणस्थितस्थापकाः कारणगुणोद्भवाः । तत्र पाकजरूपादीनां कारणगुणोद्भवत्वा-भावात् अपाकजाः इति कथितम् । तथा च तेषां कारणगुणोत्पन्नत्वं साधर्म्यम् इत्युक्तम् भवति । तत्र कारणगुणोत्पन्नत्वं परिष्करोति – **कारणगुणोत्पन्नत्वञ्च** इत्यादिना ।।

अयमत्र **प्रघट्टकार्थः** – कारणगुणोत्पन्नत्वं पूर्वोक्तरीत्या न स्वाश्रयसमवायिसमवेतगुणजन्यत्वम् । हस्तपुस्तकसंयोगजन्ये कायपुस्तकसंयोगे, हस्तपुस्तकविभागजन्ये कायपुस्तकविभागे च अतिव्याप्तेः । स्वं-कायपुस्तकसंयोगः, तद्विभागश्च, स्वाश्रयः-कायः, तत्समवायिकारणं-हस्तः, तत्समवेतगुणः-हस्तपुस्तकसंयोगः तद्विभागश्च, तज्जन्यत्वं – कायपुस्तकसंयोगविभागयोः अस्ति इति अतिव्याप्तिः ।।

न च – स्वाश्रयसमवायिमात्रसमवेतगुणजन्यत्वं कारणगुणोत्पन्नत्वम् । हस्तपुस्तकसंयोगः तद्विभागश्च कायपुस्तकसंयोगविभागाश्रयकायसमवायिहस्तसमवेतत्वेऽपि कायसमवाय्यतिरिक्तकायेऽपि समवेततया स्वाश्रयसमवायिमात्रसमवेतः न भवति इति रूपादिरेव तादृशो गुणः, तज्जन्यत्वं कायपुस्तकसंयोगविभागयोः नास्ति इति न अतिव्याप्तिः इति – वाच्यम् । तथापि अवयवावयविद्वयसमवेताभ्यां प्रत्येकैकत्वाभ्यां जनिते अवयवावयविगतद्वित्वे द्विपृथक्त्वे च अतिव्याप्तेः । अवयवगतैकत्वस्य द्वित्वाश्रयसमवायिमात्रसमवेततया तज्जन्यत्वस्य अवयवावयविगतद्वित्वादौ अनपायात् । अतः स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्यत्वं कारणगुणोत्पन्नत्वम् इति परिष्करणीयम् । स्वशब्देन यत्र कारणगुणोत्पन्नत्वं वक्तव्यं तद्ग्राह्यम् । स्वं-घटगतं रूपं, स्वाश्रयः-घटः, तत्समवायी-कपालः, तन्मात्रसमवेतः गुणः-रूपं, स च रूपत्वेन रूपेण घटगतरूपसजातीयः, तज्जन्यत्वं घटरूपे अस्ति इति लक्षणसमन्वयः ।।

अवयवावयविगतैकत्वाभ्यां जनिते अवयवावयविगतद्वित्वादौ च न अतिव्याप्तिः । एकत्वादेः द्वित्त्वत्वेन द्वित्वसजातीयत्वाभावात् । अतः द्वित्वादौ नातिव्याप्तिः । न च – एकत्वद्वित्वयोः सङ्ख्यात्वेन रूपेण समानजातीयत्वम् अस्तीति द्वित्वसजातीयैकत्वजन्यत्वम् आदाय द्वित्वादौ अतिव्याप्तितादवस्थ्यम् इति – वाच्यम् । गुणत्वव्याप्यव्याप्यजात्या सजातीयत्वस्य विवक्षितत्वात् । तथा च स्वाश्रयसमवायिमात्रसमवेतः स्वगतगुणत्वव्याप्यव्याप्यजातिमांश्च यो

गुणः तज्जन्यत्वं पर्यवसितम् । अवयवावयविगतद्वित्वगता या सङ्ख्यात्वजातिः सा गुणत्वव्याप्यापि गुणत्वव्याप्यव्याप्या न भवति । किन्तु द्वित्वत्वरूपा जातिरेव गुणत्वव्याप्यसङ्ख्यात्वव्याप्या जातिः, तद्वत्त्वञ्च अवयवावयविगतैकत्वे नास्तीति तज्जन्यत्वम् आदाय न द्वित्वादौ अतिव्याप्तिः ।।

अवयवगतनीलादिरूपजन्ये अवयविगतनीलादिरूपे समन्वयस्तु एवं कर्तव्यः । स्वं – अवयविगतनीलं, तद्गता गुणत्वव्याप्यरूपत्वव्याप्याजातिः – नीलत्वं, तद्वान् गुणः – अवयवगतनीलं, तज्जन्यत्वं – अवयविगतनीले अस्ति इति । एवं रसगन्धादावपि मधुरत्वाद्यवान्तरजातिम् आदाय समन्वयः ऊहनीयः ।।

अथ पङ्क्त्यर्थः – **स्वाश्रयसमवायिमात्रसमवेत** इति । स्वाश्रयसमवाय्यतिरिक्तासमवेतत्वे सति स्वाश्रयसमवायिसमवेत इत्यर्थः । तत् इति । कारणगुणोत्पन्नत्वम् इत्यर्थः । **नीलत्वादिना** इति । स्नेहे गुरुत्वे च गुणत्वव्याप्यव्याप्यजातिः उत्कर्षादिरेव ग्राह्यः ।।

कर्मजवेगे च इति । ''च''कारेण चित्ररूपस्यापि सङ्ग्रहः । **अव्याप्तिः** इति । नित्यरूपादौ जन्यत्वाभावप्रयुक्तं, इतरेषु जनकगुणानां सजातीयत्वाभावप्रयुक्तं, कर्मणश्च गुणत्वाभावप्रयुक्तं लक्षणासत्त्वम् अवसेयम् । **स्वाश्रयसमवायि** इत्यादि । स्वाश्रयसमवायिमात्रसमवेतः स्वसजातीयः यः गुणः तज्जन्यवृत्तिः या जातिः तद्वत्त्वं लक्षणम्। स्वं-घटरूपादिकं, स्वाश्रयः-घटः, तत्समवायी-कपालः, तत्समवेतः घटरूपादिसजातीयः गुणः कपालरूपादिः, तज्जन्यः घटरूपादिः, तद्वृत्तिरूपत्वादिजातिमत्त्वस्य नित्यानित्यरूपादौ सत्त्वात् लक्षणसमन्वयः ।।

अत्र च इति । सङ्ख्यात्वं पृथक्त्वत्वं च आदाय द्वित्वद्विपृथक्त्वादौ अतिव्याप्तिः । तद्वारणाय जातौ सङ्ख्यात्वपृथक्त्वत्वातिरिक्तत्वं विशेषणं देयम् । संस्कारत्वम् आदाय भावनायाम् अतिव्याप्तिवारणाय भावनावृत्त्यन्यत्वेन

च जातिः विशेषणीया । **न वा इति** । अवयववेगजन्यवेगवृत्तिं सत्तां गुणत्वं संस्कारत्वं च आदाय भावनायाम् अतिव्याप्तिः इति न आशङ्कनीयम् । तेषां भावनावृत्त्यन्यत्वविरहात् इति भावः । **तादृशरूपत्वादि इति** । स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्यवृत्तिरूपत्वादिजातिम् आदाय इत्यर्थः ।।

ननु पाकजरूपादीनाम् अलक्ष्यत्वम् अभिसन्धाय तत्र अतिव्याप्तिवारणाय लक्षणेऽपि अपाकजत्वविशेषणदानापेक्षया तेषां लक्ष्यत्वोक्तिरेव युक्ता इति, अत आह – **पाकजरूपादीनाम् इति** इत्यादिना । तथा च व्यावहार एव लक्ष्यतायां प्रयोजकः । तदनुसारिणा च लक्षणेन भाव्यमिति नात्र कोऽपि शङ्कावकाशः । लक्ष्यत्वस्य व्यवहाराधीनत्वादेव यथाश्रुते भावाभावरूपलक्षणद्वयस्यापि अलक्ष्यभूताः केचन गुणाः इत्याह – **अत्र पाकजरूप** इत्यादिना । यद्वा-ननु पीलुपाकवादिमते पाकजानामपि घटरूपादीनां कारणगुणपूर्वकत्वात् कारणगुणपूर्वकत्वाभावात् इति असङ्गतम् । अत आह – **कारणगुणपूर्वकत्वव्यवहाराभावात् इति** । यद्यपि तन्मते पाकजानां परमाणुरूपादीनां कारणगुणपूर्वकत्वाभावसम्भवेन व्यवहारपर्यन्तानुधावनं व्यर्थम्, तथापि तथाविधानां घटादिरूपादीनां कारणगुणपूर्वकत्वाभावस्वीकरणाय व्यवहारपर्यन्तानुधावनम् ।।

दिनकर्याम् – अथ प्रादेशिक इत्यादिमूलेन इति ।। **"अथ प्रादेशिको भवेत् । वैशेषिको विभुगुणः संयोगादिद्वयं तथा ।।"** इति **कारिकावल्या** – आकाशादिविभुद्रव्यसमवेतानां विशेषगुणानां संयोगादिद्वयस्य संयोगविभागयोश्च प्रादेशिकत्वम् – अव्याप्यवृत्तित्वं साधर्म्यम् इत्युक्तम् । यथाश्रुतमिदं कर्मादौ अतिव्याप्तम् । वृक्षादिगतायाः चलनादिकर्मणोऽपि अव्याप्यवृत्तित्वात् । एवम् ईश्वरस्य विभुत्वात् तद्गुणे ज्ञानादौ विशेषगुणे अव्याप्यवृत्तित्वाभावात् अव्याप्तिश्च भवति । अतः जातिघटितं लक्षणं वक्तव्यम् । तच्च अव्याप्यवृत्तिवृत्तिगुणत्व-

व्याप्यजातिमत्त्वम् । अव्याप्यवृत्तिपदार्थवृत्तिः गुणत्वव्याप्या या जातिः तद्वत्त्वम् । गुणत्वव्याप्यरूपत्वादिजातिमति रूपादौ अतिव्याप्तिवारणाय ''अव्याप्यवृत्तिवृत्ति''- इति जातिविशेषणम् । रूपत्वादेः व्याप्यवृत्तिरूपादिवृत्तित्वात् न दोषः । घटादेरपि भूतलादौ किंचित्प्रदेशावच्छेदेनैव वर्तमानतया अव्याप्यवृत्तित्वेन तद्वृत्तिघटत्वादि-जातिमति घटादौ अतिव्याप्तिवारणाय ''गुणत्वव्याप्य''इति जातौ विशेषणम् । घटत्वादेः गुणत्वव्याप्यत्वाभावान्न दोषः । गुणत्वव्याप्य-अव्याप्यवृत्ति-संस्कारत्वजातिम् आदाय तद्वति स्थितस्थापकभावनाख्यसंस्कारयोः अतिव्यप्ति-वारणाय संस्कारत्वान्यत्वमपि जातौ विशेषणं देयम् । तथा च अव्याप्यवृत्ति-वृत्तिगुणत्वव्याप्यसंस्कारत्वान्यजातिमत्त्वं विभुविशेषगुणानां संयोगविभागयोश्च साधर्म्यम् इति भावः ।।

कारिकावली

स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके ।
भवेदसमवायित्वम्, अथ वैशेषिके गुणे ।। ९७ ।।

आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः ।
वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ।। ९८ ।।

द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ।। ९९ ।।

मुक्तावली

भवेदसमवायित्वम् इति । घटादिरूपरसगन्धस्पर्शाः कपालादिरूप-रसगन्धस्पर्शेभ्यः भवन्ति, एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायि-

कारणत्वम्, शब्दस्यापि द्वितीयशब्दं प्रति । एवं स्थितस्थापकेऽपि ज्ञेयम् । **निमित्तत्वम्** इति । बुद्ध्यादीनाम् इच्छादिनिमित्तत्वात् इति भावः ।।

द्विधैव इति । असमवायिकारणत्वं निमित्तकारणत्वं च । तथा हि – **उष्णस्पर्शः उष्णस्पर्शस्य असमवायिकारणम्**, पाकजे निमित्तम् । **गुरुत्वं** **गुरुत्वपतनयोः** असमवायिकारणम्, अभिघाते निमित्तम् । **वेगः वेगस्यन्दनयोः** असमवायी, अभिघाते निमित्तम् । द्रवत्वं द्रवत्वस्यन्दनयोः असमवायि, **संग्रहे** निमित्तम् । भेरीदण्डसंयोगः शब्दे निमित्तम्, भेर्याकाशसंयोगः असमवायी । वंशदलद्वयविभागः शब्दे निमित्तम्, वंशदलाकाशविभागः असमवायी इति । **प्रादेशिकः** – अव्याप्यवृत्तिः ।।

दिनकरी

मूले एकपृथक्त्वस्नेहशब्दक इत्यत्र एकत्वम् एकपृथक्त्वं च इत्यर्थः बोध्यः । **वैशेषिके गुणे** इत्यत्र आत्मनः इत्यस्य अन्वयः । मुक्तावल्याम् **उष्णस्पर्श** इति । **अवयवगतः उष्णस्पर्शः इत्यर्थः** । **उष्णस्पर्शस्य** – **अवयविगतोष्ण-स्पर्शस्य** । **एवम् अग्रेऽपि** । **कारणैकार्थप्रत्यासत्त्या कार्यैकार्थप्रत्यासत्त्या** च गुरुत्वस्य असमवायिकारणत्वम् इति प्रदर्शनाय गुरुत्वपतनयोः इति उभयम् उक्तम् । **एवम् अग्रेऽपि** । **संग्रहे** सक्त्वादिसंयोगविशेषे । भेर्याकाशसंयोगः असमवायी इति प्रथमान्तसंयोगपदघटितः पाठः । **भावकार्यस्य** असमवायिकारण-जन्यत्वनियमात् भेर्याकाशसंयोगस्य शब्दं प्रति असमवायिकारणत्वम् आवश्यकम् इति भावः ।।

यद्यपि भेरीदण्डसंयोगस्य शब्दे निमित्तत्वं, न तु तत्र तस्य असमवायि-कारणत्वं, भेर्याकाशसंयोगस्य असमवायिकारणत्वं, न तत्र निमित्तत्वं इति एकव्यक्तेः न द्विविधहेतुत्वम्, तथापि संयोगजातीयस्य द्विविधहेतुत्वम् अस्त्येव इति

भावः । एवम् अग्रेऽपि । मूले ''संयोगादिद्वये तथा इत्यनन्तरं'' ''द्विधैव'' इत्यस्य प्राक् ''परापरत्वद्वित्वादिद्विपृथक्त्वादिके पुनः'' इति पाठः क्वचित्पुस्तके प्रमादात् आयातः, परत्वादीनाम् अकारणत्वेन द्विविधकारणत्वस्य तत्र अभावात् ।।

न च – परत्वादीनामपि स्वध्वंसप्रत्यक्षं प्रति हेतुत्वात्, कथम् अकारणत्वम् इति – वाच्यम् । ध्वंसप्रत्यक्षातिरिक्तं प्रति अकारणस्य उक्तत्वात् । विस्तरस्तु अन्यत्र अनुसन्धेयः ।।

मुक्तावल्यां अव्याप्यवृत्तिः इत्यस्य दैशिकेत्यादिः, तेन रूपादौ न अतिव्याप्तिः ।।

राजीवोल्लासः

मूले इत्यादि । ''स्पर्शान्त'' इत्यादिकारिकायां एकपृथक्त्वपदेन एकत्वम् एकपृथक्त्वं च ग्राह्यम् । ''वैशेषिके गुणे'' इत्यत्र उपरितनकारिकास्थस्य ''आत्मनः'' इत्यस्य अन्वयः । एवं च ''स्पर्शान्त'' इत्यारभ्य ''आत्मनः'' ''स्यात् निमित्तत्वम्'' इत्यन्तकारिकाभागस्य अयमर्थः – रूपरसगन्धस्पर्शानां परिमाण–एकत्व–एकपृथक्त्वस्नेहशब्दानां च असमवायिकारणत्वं साधर्म्यम् । आत्मगतविशेषगुणानां निमित्तकारणत्वं साधर्म्यम् इति । एकपृथक्त्वपदम् एकत्वस्यापि उपलक्षणम् इति भावः ।।

तथा हि – उष्णस्पर्शः उष्णस्पर्शस्य असमवायिकारणम् इति मुक्तावली । तत्र अवयविगतस्य उष्णस्पर्शस्य उष्णस्पर्शं प्रति कारणत्वाभावात् दिनकर्याम् – उष्णस्पर्शः – अवयवगतः उष्णस्पर्शः इति व्याख्यातम् । एवम् अवयवगतस्य उष्णस्पर्शस्य अवयवगतम् उष्णस्पर्शं प्रति कारणत्वाभावात् उष्णस्पर्शस्य – अवयविगतस्य उष्णस्पर्शस्य इति व्याख्यानं कृतम् । एवमग्रेऽपि

इति । **गुरुत्वं गुरुत्वपतनयोः** इत्युपरिग्रन्थेऽपि अवयवगुरुत्वम् अवयविगुरुत्वस्य असमवायिकारणम् इत्यर्थः ग्राह्य इति भावः । मुक्तावल्यां **गुरुत्वपतनयोः** इत्यस्य तात्पर्यम् आह – **दिनकर्यां कारणैकार्थप्रत्यासत्त्या** इति । गुरुत्वस्य गुरुत्वं प्रति असमवायिकारणत्वं कारणैकार्थप्रत्यासत्त्या भवति । अवयविगुरुत्वस्य समवायिकारणेन अवयविना सह एकस्मिन्नर्थे अवयवे समवायसंबन्धेन प्रत्यासन्नस्य अवयवगुरुत्वस्य कारणत्वात् । एवं पतनं प्रति गुरुत्वस्य कार्यैकार्थप्रत्यासत्त्या कारणत्वं भवति । कार्येण पतनेन सह एकस्मिन्नर्थे पतनवति द्रव्ये समवायेन सतः गुरुत्वस्य पतनं प्रति कारणत्वात् । उष्णस्पर्शस्य तु कारणैकार्थप्रत्यासत्त्यैव कारणत्वमिति इदं वैलक्षण्यम् अभिप्रेत्य गुरुत्वपतनयोः इत्युक्तम् इति भावः । आद्यपतनासमवायिकारणं गुरुत्वम् इति लक्षणं कार्यैकार्थप्रत्यासत्त्यभिप्रायेण इति ध्येयम् ॥

एवमग्रेऽपि इति । **वेगः वेगस्यन्दयोः** अपि इत्यत्रापि अवयवगतः वेगः अवयविगतं वेगं प्रति कारणैकार्थप्रत्यासत्त्या असमवायिकारणम् । स्यन्दनं प्रति कार्यैकार्थप्रत्यासत्त्या असमवायिकारणम् इति भावः ॥

शब्दं प्रति भेरीदण्डसंयोगः निमित्तकारणम्, भेर्याकाशसंयोगः असमवायिकारणम् इति **मूले** उक्तम् । तत्र भेरीदण्डसंयोगेनैव शब्दोत्पत्तिसंभवात् भेर्याकाशसंयोगस्य कारणत्वमेव नास्ति इति शङ्कायाम् आह – **भावकार्यस्य** इति ॥

पूर्वम् उष्णस्पर्शगुरुत्वादेः एकस्यैव असमवायिकारणत्वं निमित्तकारणत्वं चेति द्विविधकारणत्वम् उक्तम् । शब्दं प्रति तु भेरीदण्डसंयोगः निमित्तकारणम्, भेर्याकाशसंयोगः असमवायिकारणम् इति एकस्यैव द्विविधकारणत्वं नास्ति इति आशङ्क्य संयोगव्यक्तेः आश्रयभेदेन भेदेऽपि संयोगत्वरूपैकजातीयस्य द्विविध-

कारणत्वम् अस्ति इति न दोष इत्याह – **यद्यपि** इत्यादिना । **एवमग्रेऽपि** इति । वंशदलद्वयविभागः शब्दे निमित्तकारणम्, वंशदलाकाशविभागः असमवायी इत्यत्रापि विभागत्वरूपैकजातीयस्य द्विविधकारणत्वम् इति भावः ।।

ननु परत्वादीनाम् अकारणत्वम् इति कथम् उच्यते । तेषां स्वध्वंसं प्रति प्रतियोगिविधया स्वप्रत्यक्षं प्रति विषयविधया च कारणत्वात् इति शङ्कते - **न च परत्वादीनामपि** इति । तेषां ध्वंसं प्रति प्रत्यक्षं प्रति च कारणत्वेऽपि तदुभयातिरिक्तं प्रति अकारणत्वस्य मूलाभिप्रेतत्वात् इति समाधत्ते – **ध्वंसप्रत्यक्षातिरिक्तं प्रति** इति । ध्वंसप्रत्यक्षाभ्याम् अतिरिक्तं प्रति इत्यर्थः ।।

ननु "**अथ प्रादेशिको भवेत्, वैशेषिको विभुगुणः**" इति मूले रूपादौ व्याप्यवृत्तौ अतिव्याप्तिवारणाय प्रादेशिक इति उक्तम् । तत्र मुक्तावल्यां **प्रादेशिक** इत्यस्य अव्याप्यवृत्तिः इत्यर्थः उक्तः । तथा विवरणेऽपि रूपादेः कालिकाव्याप्यवृत्तित्वात् अतिव्याप्तिः इति आशङ्क्य आह **दिनकर्यां दैशिकेत्यादिः** इति । **मुक्तवलीस्थात्** "अव्याप्यवृत्तिः" इत्यतः पूर्वं "दैशिक"इति पूरणीयम् । तथा च दैशिकाव्याप्यवृत्तित्वं विभुविशेषगुणानां साधर्म्यम् । रूपादौ कालिकाव्याप्यवृत्तित्वसत्त्वेऽपि दैशिकाव्याप्यवृत्तित्वं नास्ति इति न अतिव्याप्तिः इति भावः ।।

कारिकावली

चक्षुर्ग्राह्यं भवेद्रूपं, द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ।। १०० ।।

मुक्तावली

चक्षुः इति । रूपत्वजातिस्तु प्रत्यक्षसिद्धा । रूपशब्दोल्लेखिनी प्रतीतिः नास्ति इति चेत्, मास्तु रूपशब्दप्रयोगः, तथापि नीलपीतादिषु अनुगतजातिविशेषः अनुभवसिद्ध एव । रूपशब्दाप्रयोगेऽपि ''नीलो वर्णः'', ''पीतो वर्णः'' इति वर्णविशेषोल्लेखिनी प्रतीतिः अस्त्येव । एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम् ।।

न च एकैका एव नीलारुणादिव्यक्तयः इति एकव्यक्तिवृत्तित्वात् नीलत्वादिकं न जातिः इति – वाच्यम् । ''नीलः नष्टः'', ''रक्तः उत्पन्नः'' इत्यादिप्रतीतेः नीलादेः विनाशोत्पादशालितया नानाभावात् । अन्यथा एकनीलनाशे जगत् अनीलम् आपद्येत । न च नीलसमवायरक्तसमवाययोः एव विनाशोत्पादविषयकः असौ प्रत्ययः इति – वाच्यम् । प्रतीत्या समवायानुल्लेखात् । न च – ''स एव अयं नीलः'' इति प्रत्यक्षात् लाघवात् च ऐक्यम् इति – वाच्यम् । प्रत्यक्षस्य तज्जातीयविषयत्वात् ''सैवं इयं गुर्जरी'' इतिवत् । लाघवं तु प्रत्यक्षबाधितम् । अन्यथा घटादीनामपि ऐक्यप्रसङ्गात् । उत्पादविनाशबुद्धेः समवायालम्बनत्वापत्तेः इति । एतेन रसादिकमपि व्याख्यातम् ।।

चक्षुर्ग्राह्यम् इति । चक्षुर्ग्राह्यविशेषगुणत्वम् इत्यर्थः । एवम् अग्रेऽपि । द्रव्यादेः इति । उपलम्भकम् उपलब्धिकारणम् । इदमेव विवृणोति चक्षुष इति । द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम् । शुक्लादिकमनेकधा इति । तच्च रूपं शुक्लनीलपीतरक्तहरितकपिशकर्बुरादिभेदात् अनेकप्रकारकं भवति ।।

ननु कथं कर्बुरम् अतिरिक्तं रूपं भवति । इत्थम् – नीलपीताद्यवयवारब्धः अवयवी, न तावत् नीरूपः अप्रत्यक्षत्वप्रसङ्गात् । नापि व्याप्यवृत्ति नीलादिरूपम्

उत्पद्यते, पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात् । नापि अव्याप्यवृत्तिनीलादिकम् उत्पद्यते, व्याप्यवृत्तिजातीयगुणानाम् अव्याप्यवृत्तित्वे विरोधात् । तस्मात् नानाजातीयरूपैरेव अवयविनि विजातीयं चित्रं रूपम् आरभ्यते । अत एव "एकं चित्ररूपम्" इति अनुभवोऽपि; नानारूपकल्पने गौरवात् ।।

इत्थं च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनात् अवयविनि न पीताद्युत्पत्तिः । एतेन स्पर्शोऽपि व्याख्यातः ।।

रसादिकमपि न अव्याप्यवृत्ति, किंतु नानाजातीयरसवदवयवैः आरब्धे अवयविनि रसाभावेऽपि न क्षतिः । तत्र रसनया अवयवरस एव गृह्यते, रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावात् अवयविनः नीरसत्वेऽपि क्षतेः अभावात् ।।

[नव्यास्तु – तत्र अव्याप्यवृत्त्येव नानारूपम्, नीलादेः पीतादिप्रतिबन्धकत्व-कल्पने गौरवात् । अत एव–

"लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते" ।।

इत्यादिशास्त्रमपि उपपद्यते । न च व्याप्याव्याप्यवृत्तिजातीययोः द्वयोः विरोधः, मानाभावात् । न च लाघवात् एकं रूपं अनुभवविरोधात् । अन्यथा घटादेरपि लाघवात् ऐक्यं स्यात् । एतेन स्पर्शादिकमपि व्याख्यातम् इति – वदन्ति] ।।

दिनकरी

"नीलत्वादिकम्" इति "आदि"ना रक्तत्वादिपरिग्रहः । अन्यथा-नीलादीनाम् एकव्यक्तित्वे । ननु लाघवादेव नीलारुणादिव्यक्त्यैक्यं सेत्स्यति इति, अत आह – लाघवं तु इति । प्रत्यक्षबाधितम् इति । "नीलः नष्टः" "रक्तः उत्पन्नः" इत्यादिप्रत्यक्षबाधितम् इत्यर्थः । अन्यथा इति । लाघवमात्रेण

नीलारुणादीनाम् ऐक्याभ्युपगमे इत्यर्थः । ननु ''उत्पन्नोः घटः'' ''विनष्टः घटः'' इत्यादिप्रतीतेः न घटादेः ऐक्यम् इति, अत आह – **उत्पाद** इति । **एतेन** – ईदृशजातिबाधकप्रमाणे । **रसादिकम्** – रसत्वादिकम् । ''आदि''ना गन्धत्वादिपरिग्रहः ॥

संयोगादौ अतिव्याप्तिम् आशङ्क्य आह – **चक्षुर्ग्राह्यम्** इति इति । चक्षुर्ग्राह्यम् इत्यस्य इत्यर्थः । तेन ''चक्षुः'' इति प्राक् प्रतीकधारणेऽपि न पौनरुक्त्यम् । **विशेषगुणत्वम्** इति । विलक्षणगुणत्वम् इत्यर्थः । वैलक्षण्यं च चक्षुर्भिन्नाग्राह्यत्वम् ॥

न च – तथापि प्रभाभित्तिसंयोगे अतिव्याप्तिः इति – **वाच्यम्** । चक्षुर्मात्रग्राह्यत्वस्य चक्षुर्मात्रगृहीतस्नेहविशेषे अतिव्याप्त्यापत्त्या चक्षुर्मात्रग्राह्यत्वस्य जातिविशेषणत्वं स्वीकृत्य चक्षुर्मात्रग्राह्यजातिमद्गुणत्वविवक्षणस्य **आवश्यकतया** तेनैव प्रभाभित्तिसंयोगे अतिव्याप्तिवारणात् इति । **प्रभात्वम्** आदाय प्रभायाम् अतिव्याप्तिवारणाय ''गुण''पदम् । **एवम् अग्रेऽपि** इति । स्पर्शलक्षणेऽपि एषा रीतिः बोध्या इत्यर्थः । **अप्रत्यक्षत्वप्रसङ्गात्** इति । द्रव्यचाक्षुषं प्रति समवायसंबन्धेन उद्भूतरूपस्य हेतुत्वात् इति भावः । **व्याप्यवृत्तिजातीय** इति । व्याप्यवृत्तिवृत्तिजातिश्च सविषयकावृत्तिः बोध्या, तेन व्याप्यवृत्तीश्वरज्ञानजातीयस्य अस्मदादिज्ञानस्य अव्याप्यवृत्तित्वेऽपि न क्षतिः । ननु वृक्षाणां बहुत्वेऽपि ''एकं वनम्'' इतिवत् रूपसमुदायगतम् एकत्वम् आदाय ''एकं चित्रम्'' इत्यनुभवोपपत्तिः, अत आह – **नाना** इति । **गौरवात्** इति । ''चित्रम्'' इति प्रतीतिविषयतायाः अनेकत्र कल्पने गौरवात् इत्यर्थः ॥

ननु चित्ररूपाधिकरणे घटादौ स्वाश्रयसमवेतत्वसंबन्धेन कपालनीलादीनां कारणादीनां सत्त्वात् कथं तत्र न नीलाद्युत्पत्तिः इति, अत आह – **इत्थं च**

इति । उक्तलाघवेन चित्ररूपसिद्धौ च इत्यर्थः । **प्रतिबन्धकत्वकल्पनात्** इति । समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसंबन्धेन नीलातिरिक्तरूपत्वेन, पीतरूपं प्रति पीतातिरिक्तरूपत्वेन प्रतिबन्धकत्वम् इति रीत्या प्रतिबध्यप्रतिबन्धकभाव-कल्पनात्, अन्यथा नानाजातीयरूपवत्कपालारब्धे घटे नीलकपालाद्यवच्छेदेन पीतोत्पादापत्तेः दुर्वारत्वात् इति भावः ।।

अत्र नव्याः – नानाजातीयरूपवत्कपालारब्धे घटे पीतकपालावच्छेदेन नीलापत्तिवारणाय न पूर्वोक्तः प्रतिबध्यप्रतिबन्धकभावः कल्प्यते, किन्तु अवच्छेदकतासंबन्धेन नीलादिकं प्रति समवायेन नीलादेः कारणत्वं कल्प्यते । चित्ररूपाङ्गीकारे तु समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसंबन्धेन नीलत्वादिना हेतुत्वस्य पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावस्य च कल्पनात् गौरवम् इति आहुः ।।

तन्न । अवच्छेदकतासंबन्धघटितोक्तकार्यकारणभावाङ्गीकारेऽपि अवच्छेदकतासंबन्धेन कपालादौ जायमानस्य नीलादेः समवायेन घटादौ इव गगनादावपि उत्पत्तिवारणाय समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसंबन्धेन नीलादेः हेतुत्वस्य तवापि **आवश्यकत्वात्** ।।

किंच ''चित्रम्'' इति प्रतीतिविषयताया अनेकत्र कल्पने गौरवम्, एकत्र कल्पने लाघवम् इति लाघवानुरोधेन अतिरिक्तचित्ररूपसिद्धौ पूर्वोक्तप्रतिबध्य-प्रतिबन्धकभावकल्पनागौरवस्य न दोषत्वम्, फलमुखत्वात् इति अन्यत्र विस्तरः । **स्पर्शोऽपि व्याख्यात इति** । कोमलकठिनस्पर्शवदवयवाभ्याम् आरब्धे घटादौ स्पर्शानङ्गीकारे घटस्य अस्पार्शनापत्तिः इत्यादिरीत्या चित्रस्पर्शोऽपि आवश्यक इति भावः ।।

अवयविनः नीरसत्वेऽपि क्षतेरभावात् इति । न च – ''चित्रो रसः'' इति प्रतीतिविषयातिरिक्तचित्रसिद्धिरिति–वाच्यम् । **तादृशप्रतीतेः एव अवयव-**

गतनानारसैः उपपत्तेः अतिरिक्तचित्ररसतत्प्रागभावध्वंसादिकल्पने गौरवात् । न च – एवं द्व्यणुकरसस्य अयोग्यतया मधुरादिरसप्रतीतिनियामकत्वासम्भवेन अस्तु त्र्यणुके मधुरादिरसः, चतुरणुकाद्यन्त्यावयविपर्यन्तं मधुरादिरसवत्त्वे मानाभावः, त्र्यणुकगतमधुररसेनैव मधुरादिप्रत्ययोपपत्तेः इति - वाच्यम् । समवायेन मधुररसं प्रति स्वसमवायिसमवेतत्वसंबन्धेन मधुररसत्वेन हेतुतायाः त्र्यणुकगतमधुररसान्यथा-नुपपत्त्या क्लृप्ततया तादृशकारणबलात् चतुरणुकादौ मधुरादिरसोत्पत्तेः दुर्वारत्वात् ।।

राजीवोल्लासः

"चक्षुर्ग्राह्यं भवेद्रूपम्" इति कारिका । चक्षुर्ग्राह्यत्वमात्रं यदि रूपस्य लक्षणं स्यात् तदा संख्यासंयोगादौ अतिव्याप्तिः । अतः **मुक्तावल्यां** चक्षुर्ग्राह्यविशेषगुणत्वम् इत्यर्थः इत्युक्तम् । तत्र "विशेषगुण" इति शब्दस्य यदि पारिभाषिकोऽर्थः स्यात् तदा विशेषगुणत्वेन परिभाषितेषु सांसिद्धिक-द्रवत्वस्यापि अन्तर्गतत्वात् तस्य च द्वीन्द्रियग्राह्यत्वात् - चक्षुषा त्वचा च ग्राह्यत्वात् – तत्र अतिव्याप्तिः स्यात् इत्यालोच्य **दिनकर्याम्** - **विशेषगुणत्वम्** इति प्रतीकं धृत्वा **विलक्षणगुणत्वम्** इत्यर्थ इति व्याख्यातम् । तथा व्याख्यानेऽपि द्रवत्वस्य इतरविलक्षणगुणत्वात् अतिव्याप्तितादवस्थ्यम् इत्यालोच्य वैलक्षण्यं च चक्षुर्भिन्नाग्राह्यत्वमित्युक्तम् । द्रवत्वस्य चक्षुर्भिन्नत्वगिन्द्रियग्राह्यत्वात् न अतिव्याप्तिः इति भावः । तथा च चक्षुर्ग्राह्यत्वे सति चक्षुर्भिन्नाग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणम् इति पर्यवसितम् ।।

ननु एवमपि प्रभाभित्तिसंयोगेऽतिव्याप्तिः; प्रभायाः चक्षुर्मात्रग्राह्यत्वेन तद्घटितसंयोगस्य चक्षुर्मात्रग्राह्यत्वात् इति शङ्कते – **न च तथापि** इति । चक्षुर्मात्रग्राह्यत्वं न गुणविशेषणम् । चक्षुर्मात्रग्राह्ये स्नेहाख्यगुणविशेषेऽति-

व्याप्तेः । अपि तु तस्य जातिविशेषत्वं स्वीकृत्य चक्षुर्मात्रग्राह्यजातिमद्गुणत्वं रूपस्य लक्षणम् इति वक्तव्यम् । प्रभाभित्तिसंयोगे वर्तमाना या संयोगत्वरूपा जातिः तस्याः न चक्षुर्मात्रग्राह्यत्वं, घटपटसंयोगान्तर्भावेण तस्याः त्वगिन्द्रियेणापि ग्रहणात् । अतो न तत्र अतिव्यापिः इति समाधत्ते – **चक्षुर्मात्रग्राह्यत्वस्य** इति । एतादृशजातिघटितलक्षणाकरणे परमाणुगतरूपेऽव्याप्तिः, तस्य चक्षुर्ग्राह्यत्वाभावात् इत्याशयेन **आवश्यकतया** इत्युक्तम् । रूपत्वजातेः चक्षुर्ग्राह्यत्वं च ''यो गुणो यदिन्द्रियग्राह्यः तन्निष्ठा जातिरपि तदिन्द्रियग्राह्या'' इति न्यायात् इति ध्येयम् ।।

ननु ज्ञानसामान्ये मनसः कारणत्वेन रूपे रूपत्वजातौ च चक्षुरितरमनोजन्य-ज्ञानविषयत्वस्यैव सत्त्वेन चक्षुरितराग्राह्यत्वं नास्ति इति असंभव इति चेत्, न । त्वगग्राह्यचक्षुर्ग्राह्यजातिमद्गुणत्वं रूपलक्षणमिति विवक्षितत्वात् इति ।।

गुणपदस्य प्रयोजनमाह – **प्रभात्वम् आदाय** इति । प्रभायाः चक्षुर्मात्रग्राह्यत्वात् तद्गतजातेरपि तथात्वात् तद्वत्त्वस्य प्रभायां सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय गुणत्वनिवेश इति भावः ।।

ननु मुक्तावल्यां व्याप्यवृत्तिजातीयगुणानाम् अव्याप्यवृत्तित्वं न संभवति इत्युक्तम् । ''व्याप्यवृत्तिजातीयगुणानाम्'' इत्यस्य व्याप्यवृत्तिवृत्तिजाति-विशिष्टगुणानाम् अव्याप्यवृत्तित्वं न संभवति इति तदर्थः । तर्हि व्याप्यवृत्ति यत् ईश्वरगतज्ञानं तद्वृत्तिः या ज्ञानत्वरूपा जातिः तद्विशिष्टस्य अस्मदादिज्ञानस्य अव्याप्यवृत्तित्वात् अव्याप्यवृत्तित्वविरोधात् इत्युक्तिः असंगता इत्याशङ्क्य व्याप्यवृत्तिवृत्तिजातौ सविषयकावृत्तित्वं विशेषणं विवक्षितम् । तथा च व्याप्यवृत्तिवृत्तिः सविषयकावृत्तिश्च या जातिः तद्विशिष्टगुणानाम् अव्याप्यवृत्तित्वे

विरोधात् इति आशयः । ज्ञानत्वस्य तु सविषयकवृत्तितया नोक्तदोष इति समाधत्ते – **व्याप्यवृत्तिवृत्तिजातिश्चेति** ।।

आवश्यकत्वात् इति । इदं च **अकल्पनात्** इत्यत्र हेतुः ।।

ननु अतिरिक्तचित्ररूपानङ्गीकर्तृमतेऽपि अवच्छेदकतासंबन्धेन नीलादिकं प्रति समवायेन नीलादेः कारणत्वस्य वाच्यतया साम्यम् इति – वाच्यम् । तथापि अतिरिक्तचित्ररूपानङ्गीकारेण लाघवात् इति, अत आह – **किंचेति** ।।

तादृशप्रतीतेः एव इति । "एव"कारः **नानारसैः** इत्युत्तरं संबध्यते । तथा च "एव"कारेण अवयविनि चित्ररसो व्यवच्छिद्यत इति भावः ।।

ननु "मधुरो रसः" इत्यादिप्रतीतेरपि अवयवगतमधुरादिनैव उपपत्तेः अनयविनि मधुरादिरसा अपि विलीयेरन् इति, अत आह – **अतिरिक्तचित्ररस** इति । तथा च चित्ररसाङ्गीकर्त्रापि मधुरादिरसस्य स्वीकारेण तद्ध्वंसादिकल्पन-प्रयुक्तगौरवस्य अभावात् इति भावः ।।

मुक्तावल्याम् क्षतेः अभावात् इति । एतदनन्तरं "नव्यास्तु" इत्यादिः "वदन्ति" इत्यन्तः ग्रन्थः प्रक्षिप्तः इति **सुबोधिनीकाराः** ।।

कारिकावली

जलादिपरमाणौ तन्नित्यम्, अन्यत् सहेतुकम् ।
रसस्तु रसनाग्राह्यः, मधुरादिरनेकधा ।। १०१ ।।

सहकारी रसज्ञाया नित्यतादि च पूर्ववत् ।
घ्राणग्राह्यो भवेद्गन्धः घ्राणस्यैवोपकारकः ।। १०२ ।।

सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ।

स्पर्शस्त्वगिन्द्रियग्राह्यः त्वचः स्यादुपकारकः ।। १०३ ।।

अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः ।

काठिन्यादि क्षितावेव, नित्यतादि च पूर्ववत् ।। १०४ ।।

मुक्तावली

जलादि इति । जलपरमाणौ तेजःपरमाणौ च रूपं नित्यं, पृथिवीपरमाणुरूपं तु न नित्यम्, तत्र पाकेन रूपान्तरोत्पत्तेः । नहि घटस्य पाकानन्तरं तदवयवः अपक्व उपलभ्यते । न हि रक्तकपालस्य कपालिका नीलावयवा भवति । एवं क्रमेण परमाणावपि पाकसिद्धेः ।।

अन्यत् जलतेजःपरमाणुरूपभिन्नं रूपम् । सहेतुकं जन्यम् ।।

रसं निरूपयति – रसस्तु इति । सहकारी इति । रासनज्ञाने रसः कारणम् इत्यर्थः । पूर्ववत् इति । जलपरमाणौ रसो नित्यः, अन्यः सर्वोऽपि रसः अनित्य इत्यर्थः ।।

गन्धं निरूपयति – घ्राणग्राह्य इति । उपकारक इति । घ्राणजन्यज्ञाने सहकारी स इत्यर्थः । सर्वोऽपि गन्धः अनित्य एव ।।

स्पर्शं निरूपयति – स्पर्श इति । उपकारक इति । स्पार्शनप्रत्यक्षे स्पर्शः कारणम् इत्यर्थः । अनुष्णाशीत इति । पृथिव्यां वायौ च स्पर्शः अनुष्णाशीतः, जले शीतः, तेजसि उष्णः । कठिनसुकुमारस्पर्शौ पृथिव्यामेव इत्यर्थः । कठिनत्वादिकं तु न संयोगगतः जातिविशेषः, चक्षुर्ग्राह्यत्वापत्तेः । पूर्ववत् इति । जलतेजोवायुपरमाणुस्पर्शा नित्याः, तद्भिन्नास्तु अनित्या इत्यर्थः ।।

दिनकरी

ननु घटावयवेऽपि आयातु पाकः, न तु परमाणौ, अत आह – **नहि रक्त** इति । **न संयोगगत** इति । ''कठिनः संयोग'' इति प्रतीतिस्तु कठिनस्पर्शवद्द्रव्यप्रतियोगिकत्वम् अवगाहत इति भावः ।।

।। पाकप्रक्रिया ।।

।। पीलुपाकवादनिरूपणम् ।।

कारिकावली

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् ।
तत्रापि परमाणौ स्यात् पाको वैशेषिके नये ।। १०५ ।।

मुक्तावली

एतेषां – रूपरसगन्धस्पर्शानाम् । **नान्यत्र** इति । पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिः अग्नि – संयोगात् उपलभ्यते । न हि शतधापि ध्मायमाने जले रूपादिकं परिवर्तते । नीरे सौरभम् औष्ण्यं च अन्वयव्यतिरेकाभ्यां औपाधिकमेव इति निर्णीयते, पवनपृथिव्योः शीतस्पर्शादिवत् ।।

तत्रापि पृथिवीष्वपि मध्ये परमाणावेव रूपादीनां पाकः इति **वैशेषिकाः** वदन्ति । तेषाम् अयमाशयः – **अवयविना अवष्टब्धेषु अवयवेषु पाकः न संभवति** । परन्तु वह्निसंयोगेन अवयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः, पुनश्च पक्वपरमाणुसंयोगात् द्व्यणुकादिक्रमेण पुनः महावयविपर्यन्तम् उत्पत्तिः । तेजसाम् अतिशयितवेगवशात् पूर्वव्यूहनाशः, झटिति व्यूहान्तरोत्पत्तिश्च ।।

दिनकरी

रूपादीनां पाक इति । रूपादीनां परावृत्तिः इत्यर्थः । **पाकः न संभवति इति ।** रूपादिपरावृत्तिफलकः तेजस्संयोगः न संभवति इत्यर्थः । **रूपपरावृत्तिः न संभवति इति यावत् ।** रूपादिनाशं प्रति साक्षात्परंपरासाधारणसर्वावयवावच्छेदेन तेजःसंयोगस्य हेतुतया अवयविना अवष्टब्धेषु अवयवेषु सत्सु अवयविनि रूपादिनाशः न संभवति, तद्धेतोः सर्वावयवावच्छेदेन तेजःसंयोगस्य अभावात् इति भावः ।।

न च – विद्यमानेऽपि घटादौ सर्वावयवावच्छेदेन तेजःसंयोगः कुतः न उत्पद्यत इति – वाच्यम् । तथा सति आरम्भकसंयोगावच्छेदेन अवयविनि तेजःसंयोगोत्पादकाले तदवच्छेदेन अवयवेष्वपि नोदनाभिघातयोः अन्यतरस्य उत्पादनियमेन अवयवेषु विभागहेतुक्रियोत्पादेन आरम्भकसंयोगनाशात् अवयविनाशापत्तेः ।।

न च – अवयवेषु तेजोऽभिघातानन्तरं पञ्चमक्षणे एव अवयविनाशसंभवेन तत्पूर्वम् अवयविनि रूपादिनाशोत्पादाभ्युपगमे बाधकाभावः इति – वाच्यम् । तत्र पूर्वावयविनाशावयव्यन्तरोत्पादयोः आवश्यकत्वात् पूर्वावयविनि रूपादिपरावृत्तिजनकविजातीयतेजःसंयोगस्य मानाभावेन अकल्पनात्, अवयविरूपनाशे आश्रयनाशस्य हेतुत्वात्, पाकाजन्यत्वस्य कार्यतावच्छेदककोटिप्रवेशे गौरवात्, अवयविनाशं विना पाकेन अवयविरूपनाशासंभवात्, अवयविनीलादौ अवयवनीलादेः हेतुतायां व्यभिचारापत्त्या पाकेन अवयविनि नीलाद्युत्पादासंभवाच्च इत्यभिमानः ।।

अवयविषु विनष्टेषु इति । घटाद्यारम्भककपालादिपरमाणुपर्यन्तेषु अग्निसंयोगेन पूर्वोक्तरीत्या घटादिद्व्यणुकपर्यन्तेषु नाशसंभवात् इति भावः । **स्वतन्त्रेषु –**

कार्यद्रव्यध्वंसविशिष्टेषु । ननु तत्र संस्थानभेदादिः कथं न प्रतीयते इति, अत आह – **तेजसाम्** इति । **व्यूहः** – संस्थानम् ।।

राजीवोल्लासः

लाघवादाह – **रूपादिपरावृत्तिः** इति । **साक्षात्** इति । साक्षात्परंपरा-साधारणेति अवयवविशेषणम् ।।

अवयविना अवष्टब्धेषु इति । स्वजनकसंयोगवत्त्वसंबन्धेन अवयविविशिष्टेषु इत्यर्थः । अवयव्युत्पत्त्यनुगुणदृढसंयोगवत्सु अवयवेषु इति यावत् ।।

पाको न संभवति इत्यत्र पाकपदस्य रूपदिपरावृत्तिः इत्यर्थकथनं कुतो न संभवति इति शङ्का न निवर्तेत इत्याशयेन **रूपदिपरावृत्ति-फलकस्तेजस्संयोग** इति व्याख्यातम् । रूपादिपरावृत्तेरेव अत्र प्रकृतत्वात् तत्र पर्यवसानं दर्शितं **रूपादिपरावृत्तिः न संभवति इति यावत्** इति । **सर्वावयवावच्छेदेन** इति । साक्षात् अवयवाः तदवयवावयवाश्च ये परमाणुपर्यन्ता अवयवाः तदवच्छेदेन तेजःसंयोगः रूपादिनाशं प्रति हेतुः इति भावः ।।

अवयविना अवष्टब्धेषु अवयवेषु कुतः तेजस्संयोगः न उत्पद्यते इति शङ्कते – **न च** इति । **घटादौ** इति । अवयविनि इति शेषः । समाधत्ते – **तथा सति** इति । घटादौ अवयविनि विद्यमाने सर्वावयवावच्छेदेन तेजस्संयोगः यदि भवेत्, तदा तज्जनकक्रियोत्पादस्य आवश्यकत्वात् तया विभागदिक्रमेण अवयव्यारम्भकसंयोगनाशेन अवयविनः नाशापत्तेः, अवयविविशिष्टेषु अवयवेषु सर्वावयवावच्छेदेन तेजस्संयोगः न संभवति इति भावः ।।

पुनः शङ्कते – **न चावयवेषु** इति । विजातीयतेजोऽभिघातक्रियोत्पत्त्यनन्तरं विभागादिक्रमेण पञ्चमक्षणे अवयविनाशो भवति, तत्पूर्वम् अवयविसत्त्वात् तत्र रूपादिनाशः संभवतीति शङ्का ।।

तत्र पूर्वावयविनाशावयव्यन्तरोत्पादयोः आवश्यकत्वात् पूर्वावयविनि रूपादिनाशः कल्पनीयः चेत् तत्र विजातीयतेजस्संयोगः कल्पनीयः स्यात् । तत्र मानाभावेन अवयवेष्वेव तेजस्संयोगः कल्पनीयः स्यात् । तत्र मानाभावेन अवयवेष्वेव तेजस्संयोगवशात् रूपादिनाशः कल्पनीयः इति समाधत्ते – **तत्र पूर्वावयविनाश** इति ।।

ननु बाधकाभाव एव मानम् इति, अत आह – **अवयविरूपनाश** इति । अवयविगतरूपनाशं प्रति **आश्रयनाशस्य** – आश्रयीभूतावयविनः नाशस्य हेतुत्वात् अवयविनः नाशं विना अवयविगतरूपनाशः न संभवति ।।

न च – पाकाजन्यम् अवयविगतरूपनाशं प्रत्येव आश्रयनाशः कारणं कल्पनीयम् इति– वाच्यम् । कार्यतावच्छेदककोटौ पाकाजन्यत्वनिवेशे गौरवात् । अपि च पाकवशात् अवयविन्येव रूपान्तरोत्पत्तेः स्वीकारे अवयविरूपं प्रति अवयवरूपं कारणम् इति कार्यकारणभावे व्यतिरेकव्यभिचार इति भावः ।।

मुक्तावली

अथ द्व्यणुकादिविनाशम् आरभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवति इति शिष्यबुद्धिवैशद्याय प्रक्रिया ।।

तत्र विभागजविभागानङ्गीकारे नवक्षणा । तदङ्गीकारे तु विभागः किञ्चित्सापेक्षः विभागं जनयेत्, निरपेक्षस्य तत्त्वे कर्मत्वं स्यात् । ("संयोगविभागयोः अनपेक्षं कारणं कर्म..." इति हि **वैशेषिकसूत्रम्** । स्वोत्तरोत्पन्नभावानपेक्षत्वं तस्य अर्थः । अन्यथा कर्मणोऽपि उत्तरसंयोगोत्पत्तौ पूर्वसंयोगनाशापेक्षणात् अव्याप्तिः स्यात् इति) ।।

तत्र यदि द्रव्यारंभकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्, तदा दशक्षणा ।।

अथ द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्, तदा एकादशक्षणा ।।

दिनकरी

वैशद्यम् – उत्पत्तिः । **प्रक्रिया** – द्व्यणुकनाशादिरूपाद्युत्पत्तिक्षणनिरूपणम् । क्रियते इति शेषः ।।

विभागजविभागानङ्गीकार इति । कारणाकारणविभागात् कार्याकार्यविभागवत्कारणमात्रविभागात् **कारणाकारणविभागानङ्गीकार** इत्यर्थः । **द्रव्यारम्भक** संयोगप्रतिद्वन्द्विविभागजनकक्रियायाः, तदानरम्भकसंयोगप्रतिद्वन्द्विविभागाजनकत्वनियमे **मानाभावात्** इति भावः ।।

अत्र च विभागग्रन्थे वक्ष्यमाणविकसत्कमलभङ्गभिया उक्तनियमाङ्गीकारः आवश्यकः । एवं च द्व्यणुकारम्भकपरमाणुक्रियया यत्र द्व्यणुकारम्भकसंयोगप्रतिद्वन्द्विविभागः जनितः, तत्र तया तत्परमाणुक्रियया तत्परमाण्वाकाशादिसंयोगप्रतिद्वन्द्विविभागोत्पत्तिः न संभवति ।।

न च – मास्तु तत्र परमाण्वाकाशविभागः, **का क्षतिः? इति – वाच्यम् ।** तथा सति नाशकविभागाभावेन परमाण्वाकाशसंयोगस्य **नित्यत्वापत्तेः** । **एवं** परमाण्वाकाशसंयोगरूपस्य पूर्वदेशसंयोगस्य प्रतिबन्धकस्य सत्त्वात् परमाणौ उत्तरदेशसंयोगानुत्पत्त्या परमाणुगतक्रियानाशानुपपत्तेश्च । अतः तादृशपरमाण्वाकाशविभागजनकः परमाण्वोः विभागः वाच्यः इत्यभिप्रायवान् आह – **तदङ्गीकारे तु** इति ।।

अनयोः पक्षयोः प्रथमपक्ष एव सम्यक्, यदवच्छेदेन कमलारम्भकसंयोगः तदवच्छेदेन क्रियानुत्पत्त्या च न विकसत्कमलभङ्गप्रसङ्गः इति ध्येयम् ।।

तत्त्वे – विभागजनकत्वे । **कर्मत्वम्** – कर्मलक्षणस्य अतिव्याप्तिः । ''संयोगविभागयोः अनपेक्षं कारणं कर्म...'' इति सूत्रस्य संयोगस्य विभागस्य

वा अनपेक्षं कारणं कर्म इति लक्षणद्वये द्वितीयलक्षणस्य तत्र अतिव्याप्त्यभिधानम् इदम् ।।

वस्तुतस्तु "संयोगविभागयोः अनपेक्षं कारणं कर्म" इति सूत्रम् । तत्र "संयोगस्य अनपेक्षं कारणम्" इत्युक्तौ कारणाकारणसंयोगेऽतिव्याप्तिः, तस्य कार्याकार्यसंयोगे किञ्चिदनपेक्ष्य कारणत्वात् । एवं "विभागस्य अनपेक्षम्" इत्युक्ते कारणाकारणविभागे अतिव्याप्तिः । अतः उक्तं "संयोगविभागयोः" इति ।।

अनपेक्षत्वं च स्वोत्तरोत्पन्नभावानपेक्षत्वम् । अन्यथा कर्मणोऽपि संयोगजनने द्रव्यस्य पूर्वसंयोगनाशस्य च अपेक्षणात् असंभवापत्तेः ।।

विभागासमवायिकारणत्वे सति संयोगहेतुत्वं वा तत् । पूर्वदेशविभागस्तु न उतरदेशसंयोगे कारणम्, व्यवहाराभावेन अन्यथासिद्धेः । संयोगस्य विभागं प्रति कारणत्वाभावादेव न असमवायिकारणत्वम् इति न तत्र अतिव्याप्तिः ।।

इत्थं च कारणमात्रविभागस्य पूर्वसंयोगनाशं द्रव्यनाशं च अनपेक्ष्य कारणाकारणविभागजनकत्वेऽपि न अतिव्याप्तिः, तस्य विभागजनकत्वेऽपि संयोगविभागोभयजनकत्वाभावात् इति ध्येयम् ।।

द्रव्यारम्भकसंयोगविनाशविशिष्टं कालम् अपेक्ष्य इति । द्रव्यारम्भकसंयोगनाशोत्पत्त्यधिकरणक्षणोत्तरक्षणे इत्यर्थः । कारणता तु द्रव्यारम्भकसंयोगनाशत्वेनैव लाघवात् इति ध्येयम् । एवम् अग्रेऽपि ।।

राजीवोल्लासः

कारणाकारणविभागानङ्गीकार इति । कारणक्रियायाः वैयधिकरण्याभावात् तयैव कारणाकारणविभागसंभवात् इति भावः । ननु द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियायाः तदनारम्भकसंयोगप्रतिद्वन्द्विविभागाजनकत्वम् इति नियमभङ्गात्

न कारणक्रियायाः दर्शितविभागजनकत्वसंभव इत्याक्षेपं परिहरति – **द्रव्यारम्भके** इत्यादिना । **मानाभावत्** इति । व्यभिचारशङ्कानिवर्तकतर्काभावात् इत्यर्थः ।।

विकसत्कमलभङ्गभिया इति । कमलस्य विकसत्त्वं नाम अग्रावच्छेदेन परस्परविभज्यमानदलरूपावयववत्त्वम् । तस्य भङ्गो नाम नाशः अनुत्पत्तिः वा । अग्रावच्छेदेन दलद्वयविभागजनककर्मणा कमलारम्भकमूलावच्छिन्नदलसंयोग-विरोधिविभागस्यापि जनने कमलभङ्ग एव आपद्येत इति भावः । अग्रेतनस्य **''विकसत्कमलकुड्मलभङ्गप्रसङ्ग''** इति **मुक्तावलीग्रन्थस्यापि** अत्रैव तात्पर्यम् । अत एव तत्र **''तेन कमलनाशः स्यात् इति भावः''** इति वक्ष्यते । विकासकाले कुड्मलनाशस्य सर्वाभिमतत्वेन तद्भङ्गापत्तेः अनिष्टत्वासंभवात् इति बोध्यम् । **नित्यत्वापत्तेः** इति । ननु तस्मिन् परमाणौ उत्पन्नेन क्रियान्तरेण जनितात् विभागात् तादृशसंयोगनाशसंभवेन नोक्तापत्तिः इति, अत आह – **एवम्** इति । एवं च कर्मसत्त्वात् न कर्मान्तरोत्पत्तिरपि इति भावः । **तदवच्छेदेन क्रियानुत्पत्या** इति । क्रियायाः अव्याप्यवृत्तित्वस्वीकारात् इति भावः ।।

अतिव्याप्त्यभिधानम् इति । प्रकृतानुसारेण सूत्रं व्याख्याय दर्शितदोषः यथा न भवति, तथा सूत्रं शिष्यबुद्धिवैशद्याय व्याकुरुते – **वस्तुतस्तु** इति । **अनपेक्षत्वं च** इति । अत्र स्वोत्तरोत्पन्नत्वनिवेशात् द्रव्यात्मक-समावायिकारणव्यावृत्तिः । भावत्वनिवेशाच्च पूर्वसंयोगनाशात्मकनिमित्त-कारणव्यावृत्तिः । उभयकारणताघटितैकलक्षणपक्षे सूत्रस्थस्य ''संयोगविभागयोः'' इति इतरेतरयोगद्वन्द्वस्य स्वारस्यमपि बोध्यम् ।।

लाघवं पुरस्कृत्य आह – **विभागासमवायि** इति । तथा च ''अनपेक्षं कारणम्'' इत्यस्य असमवायिकारणम् इत्येवार्थः । उभयनिरूपिता-

समवायिकारणत्वोक्तिः वस्तुस्थित्यनुरोधिनी । लक्षणे तु विभागांश एव तद्घटनम् आवश्यकम् इति भावः ।।

मुक्तावल्यां ''कर्मत्वं स्यात्'' इत्यनन्तरं ''संयोग'' इत्यादिः ''अव्याप्तिः स्यात्'' इत्यन्तः ग्रन्थः प्रक्षिप्तः इति सुबोधिनीकाराः ।।

मुक्तावली

तथा हि – वन्हिसंयोगात् परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः, ततः आरम्भकसंयोगनाशः, ततः द्व्यणुकनाशः (१), ततः परमाणौ श्यामादिनाशः (२), तत रक्ताद्युत्पत्तिः (३), ततः द्रव्यारम्भकानुगुणा क्रिया (४), ततः विभागः (५), ततः पूर्वसंयोगनाशः (६), ततः आरम्भकसंयोगः (७), ततः द्व्यणुकोत्पत्तिः (८), ततः रूपाद्युत्पत्तिः (९).

ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणा क्रिया अस्तु इति चेत्, न । अग्निसंयुक्ते परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणो – त्पत्तिमन्तरेण च परमाणौ क्रियान्तराभावात्, कर्मवति कर्मान्तरानुत्पत्तेः, निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च । तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यात् इति चेत्, न । पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात् इति ।।

दिनकरी

नवदशैकादशक्षणाः प्रक्रियाः क्रमेण दर्शयति – तथा हि इत्यादिना । परमाणौ कर्म – द्व्यणुकारम्भकपरमाण्वोः मध्ये एकस्मिन् परमाणौ कर्म । परमाण्वन्तरेण – द्व्यणुकारम्भकपरमाण्वन्तरेण । आरम्भक इति । द्व्यणुकारम्भकेत्यर्थः । ततः परमाणौ श्यामादि नाश इति ।।

परमाणुगतरूपनाशं प्रति **द्व्यणुकात्मकद्रव्यस्य** प्रतिबन्धकतया तत्पूर्वं श्यामनाशासंभवात् इति भावः । **द्रव्यारम्भक** इति । द्व्यणुकारम्भकेत्यर्थः । **आरम्भक** इति । द्व्यणुकारम्भकेत्यर्थः । **तद्विनाशमन्तरेण** इति । द्व्यणुकनाशोत्पत्तिक्षणोत्पत्तिकोत्तरसंयोगेन श्यामनाशक्षण एव पूर्वक्रियानाश इति भावः । परमाणौ क्रियान्तराभावात् इति । तस्मिन् परमाणौ क्रियान्तराभावात् इत्यर्थः । अत्र हेतुम् आह – **कर्मवति** इति । कर्मवति कर्मान्तरानुदयेन कर्मोत्पत्तौ कर्मणः प्रतिबन्धकत्वकल्पनात् इति भावः । गुणोत्पत्तिम् अन्तरेण कर्मानुत्पत्तौ हेतुम् आह – **निर्गुण** इति ।।

कारणमात्रविभागस्य कारणाकारणविभागजनकत्वाभावपक्षे एव परमाण्वन्तरे कर्मचिन्तनं विनैव **ग्रन्थान्तरे** अष्टक्षणप्रक्रिया उक्ता । सा च निर्गुणे द्रव्यारम्भानुगुण-क्रियोत्पत्तौ बाधकाभावेन रक्तोत्पत्तिक्षणे एव द्रव्यारम्भानुगुणक्रियोत्पत्तिः संभवति इत्यभिप्रायेण समर्थनीया ।।

राजीवोल्लासः

परमाणुगतरूपनाशं प्रति इति । ''द्व्यणुकवान् परमाणुः सरूपः, रूपवदाश्रयत्वात्, पटविशिष्टतन्तुवत्'' इत्यनुमानेन द्व्यणुकसत्त्वे रूपस्य अवश्यं सिद्धिः । एवं च अग्निसंयोगादिरूपनाशसामग्रीसत्त्वे तन्नाशानुत्पादस्य प्रतिबन्धकसत्त्वं विना अनुपपन्नत्वात् द्व्यणुकस्य प्रतिबन्धकत्वम् अवश्यं वाच्यम् इति भावः ।।

मुक्तावली

अथ दशक्षणा–

सा च आरम्भकसंयोगविनाशविशिष्टं कालम् अपेक्ष्य विभागेन विभागजनने सति स्यात् । तथा हि – वह्निसंयोगात् द्व्यणुकारम्भके परमाणौ कर्म, ततः

विभागः, ततः आरम्भकसंयोगनाशः, ततः द्व्यणुकनाशविभागजविभागौ (१), ततः श्यामनाशपूर्वसंयोगनाशौ (२), ततः रक्तोत्पत्त्युत्तरसंयोगौ (३), ततः वह्निनोदनजन्यपरमाणुकर्मणः नाशः (४), ततः अदृष्टवदात्मसंयोगात् द्रव्यारम्भानुगुणा क्रिया (५), ततः विभागः (६), ततश्च पूर्वसंयोगनाशः (७), ततः आरम्भकसंयोगः (८), ततः द्व्युणुकोत्पत्तिः (९), ततः रक्तोत्पत्तिः (१०) ॥

दिनकरी

विभागेन विभागजनन इति । कारणमात्रविभागेन कारणाकारणविभागजनने सति इत्यर्थः । **विभागजविभागौ इति ।** आरम्भकसंयोगनाशस्य तृतीयक्षणे एव उत्पन्नतया चतुर्थक्षणे परमाण्वाकाशविभागः संभवति इति भावः । **ततः श्यामनाश-पूर्वसंयोगनाशौ इति ।** परमाणुश्यामनाशपरमाण्वाकाशसंयोगनाशौ इत्यर्थः । परमाणुश्यामनाशं प्रति द्व्यणुकनाशस्य हेतुत्वात् पूर्वं परमाणुश्यामनाशासंभवात् इति भावः । **रक्तोत्पत्त्युत्तरसंयोगौ इति ।** उत्तरसंयोगं विना पूर्वकर्मणः नाशासंभवेन द्रव्यारम्भानुगुणक्रियानुत्पत्तेः इति भावः । एवम् अग्रेऽपि ॥

मुक्तावली

अथ एकादशक्षणा–

वह्निसंयोगात् परमाणौ कर्म, ततः विभागः, ततः द्रव्यारम्भकसंयोगनाशः, ततः द्व्यणुकनाशः (१), ततः द्व्यणुकनाशविशिष्टं कालम् अपेक्ष्य विभागजविभागश्यामनाशौ (२), ततः पूर्वसंयोगनाशरक्तोत्पत्ती (३), ततः उत्तरदेशसंयोगः (४), ततः वह्निनोदनजन्यपरमाणुकर्मनाशः (५), ततः अदृष्टवदात्मसंयोगात् द्रव्यारम्भानुगुणा क्रिया (६), ततः विभागः (७), पूर्वसंयोगनाशः (८), ततः द्रव्यारम्भकोत्तरसंयोगः (९), ततः द्व्यणुकोत्पत्तिः (१०), ततः रक्ताद्युत्पत्तिः (११) ॥

मध्यमशब्दवत् एकस्मात् अग्निसंयोगात् न रूपनाशोत्पादौ, तावत्कालम् एकस्य अग्नेः अस्थिरत्वात् । किञ्च नाशक एव यद्युत्पादकः, तदा नष्टे रूपादौ अग्निनाशे नीरूपः चिरं परमाणुः स्यात्, उत्पादकश्चेत् नाशकः, तदा रक्तोत्पत्तौ तदग्नेः नाशे रक्ततरता न स्यात् ।।

दिनकरी

अत्र य एव अग्निसंयोगः द्व्यणुकनाशकः, स एव श्यामनाशे रक्तोत्पादे च हेतुरिति केषांचिन्मतं "पुनः अग्न्यन्तरसंयोगात्" इति भाष्यविरुद्धं न आदरणीयम् इत्यभिप्रेत्य आह – **मध्यमशब्दवत्** इति । **एकस्मात्** इति । द्व्यणुकनाशकात् एकस्मात् इत्यर्थः । यथा मध्यमशब्दात् पूर्वशब्दनाशोत्तरशब्दोत्पादौ भवतः, तथा एकस्मात् द्व्यणुकनाशकात् अग्निसंयोगात् श्यामनाशरक्तोत्पादौ न भवतः इति व्यतिरेके दृष्टान्तः । **तावत्कालम्** इति । श्यामनाशोत्पत्त्यव्यवहितपूर्वक्षणपर्यन्तम् इत्यर्थः । **अग्नेः** – द्व्यणुकनाशकाग्निसंयोगस्य । एवम् अग्नेऽपि । **अस्थिरत्वात्** इति । यदा परमाणौ अग्निसंयोगात् द्व्यणुकासमवायिकारणसंयोगविनाशकं परमाणौ कर्म, तदैव नोदनाभिघातान्यतरात्मकस्य अग्निपरमाणुसंयोगस्य जनकं यदग्निकर्म तस्य विनाशः । कर्मणः स्वजन्यसंयोगविनाश्यत्वात्, तदुत्तरक्षणे पुनरग्नौ कर्म, कर्मकारणीभूतवेगाभिघातादेः स्वसमानाधिकरणकर्मध्वंसरूपसहकारिणश्च सत्त्वात्, ततः विभागः, ततः द्व्यणुकनाशसमकालम् अग्निपरमाणुसंयोगस्य नाशेन श्यामनाशोत्पत्त्यव्यवहितपूर्वक्षणपर्यन्तं तस्य अस्थिरत्वात् इति भावः ।।

ननु मास्तु द्व्यणुकनाशकाग्निसंयोगस्य परमाणुश्यामनाशकत्वं रक्तोत्पादकत्वं च, परन्तु द्व्यणुकनाशसमकालोत्पन्नाग्न्यन्तरसंयोगस्य परमाणौ श्यामनाशकत्वं रक्तोत्पादाकत्वं च अस्तु । न च – श्यामनाशकतावच्छेदकरक्तोत्पादकतावच्छेदक-

जात्योः साङ्कर्यापत्तिः इति – वाच्यम् । उत्पादकतावच्छेदकजातेः नाशकतावच्छेदकजातिव्याप्यत्वोपगमात्, अत आह – **किंच इति । नाशक एव यद्युत्पादक इति** । "एव" कारेण नाशकतावच्छेदकवद्भिन्नावृत्तित्वरूपा व्याप्तिः उत्पादकतावच्छेदके लभ्यते । तथा च यदि उत्पादकतावच्छेदकं नाशकतावच्छेदकव्याप्यं तदा इत्यर्थः । **नष्टे रूपादौ** – रूपपरंपरायां नष्टायाम् । **अग्निनाशे** चरमाग्निसंयोगनाशे ।।

परमाणौ पाकेन रूपोत्पत्तिस्थले प्रथमाग्निसंयोगादिना रूपोत्पत्तिः, तेनैव रूपनाशः, पुनः अग्निसंयोगानन्तरं पुना रूपोत्पत्तिसंभवेऽपि चरमाग्निसंयोगोत्तरं तेन रूपोत्पादे तद्रूपस्य तेनैव अग्निसंयोगेन नाशसंभवात् तदग्निसंयोगस्यापि नाशे रूपान्तरोत्पादासंभवेन नीरूपः चिरं परमाणुः स्यात् इत्यर्थः ।।

न च – चरमाग्निसंयोगेन विनश्यदवस्थेनैव रूपोत्पत्तिः, तदुत्तरक्षणे च न तद्रूपनाशः, पूर्वक्षणे अग्निसंयोगाभावात् इति – वाच्यम् । असमवायिकारणस्य कार्यसहभावेनैव हेतुताया न्यायवैशेषिकसिद्धान्तसिद्धतया विनश्यदवस्थेन चरमाग्निसंयोगेन रूपोत्पादासंभवात् इति । "परमाणुः" इति वैशेषिकमताभिप्रायेण । न्यायनये पूर्वोक्तरीत्या घटादेरपि नीरूपत्वप्रसङ्गः बोध्यः ।।

ननु रक्तोत्पादकतावच्छेदकवैजात्यं श्यामनाशकतावच्छेदकवैजात्यव्याप्यम् इति न ब्रूमः, परन्तु वैजात्ययोः अभेदम्, तेन न साङ्कर्यम्, अत आह – **उत्पादकश्चेत् इति** । नाशकः उत्पादकश्चेत् इति योजना । नाशकतावच्छेदकमेव यदि उत्पादकतावच्छेदकं तदा इत्यर्थः ।।

रक्ततरता न स्यात् इति । अयं भावः – रूपनाशकतावच्छेदकं विलक्षणाग्निसंयोगत्वम्, तदेव यदि उत्पादकतावच्छेदकम्, तदा कार्यतावच्छेदकमपि

सामान्यतः पृथिवीपरमाणुरूपत्वं त्वया वाच्यम् । तथा सति कचिद्रक्ततरता कचिच्च रक्ततमता परमाणौ न स्यात्, कार्यवैचित्र्यस्य कारणतावच्छेदकभेदाधीनत्वात् इति । सिन्दूरादौ रक्ततारतम्यस्य आनुभविकतया तत्परमाणुषु तस्य अवश्यंभावात् इति भावः ।।

इदं च पूर्वरूपनाशकाग्निसंयोगमात्रस्य उत्तररूपहेतुत्वम् इत्यभिप्रायेण "पुनरन्यस्मात् अग्निसंयोगात्..." इति भाष्यानुरोधेन च उक्तम् ।।

वस्तुतः रक्ततारतम्यस्य पूर्वरूपविशेषध्वंसकृतत्वात् भाष्यस्य द्व्यणुकनाशकाग्निसंयोगापेक्षया अन्यपरत्वात् उत्पादकविनाशकयोः अग्निसंयोगयोः एकत्वानेकत्वे अनियम्ये एव इति ध्येयम् ।।

मुक्तावली

परमाण्वन्तरे कर्मचिन्तनात् पञ्चमादिक्षणेऽपि गुणोत्पत्तिः । तथा हि– एकत्र परमाणौ कर्म, ततः विभागः, ततः आरम्भकसंयोगनाशपरमाण्वन्तर-कर्मणी, ततः द्व्यणुकनाशः, परमाण्वन्तरकर्मजन्यविभागः इति एकः कालः (१), ततः श्यामादिनाशः, विभागाच्च पूर्वसंयोगनाशश्च इति एकः कालः (२), ततः रक्तोत्पत्तिः द्रव्यारम्भकसंयोगः इति एकः कालः (३), अथ द्व्यणुकोत्पत्तिः (४), ततः रक्तोत्पत्तिः (५) इति पञ्चक्षणा ।।

द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् षष्ठे गुणोत्पत्तिः । तथा हि –

परमाणुकर्मणा परमाण्वन्तरविभागः, ततः आरम्भकसंयोनाशः, ततः द्व्यणुकनाश-परमाण्वन्तरकर्मणी (१), अथ श्यामादिनाशः परमाण्वन्तरे कर्मजः विभागश्च (२), ततः रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च (३), ततः परमाण्वन्तर-संयोगः (४), ततः द्व्यणुकोत्पत्तिः (५), अथ रक्तोत्पत्तिः (६) इति ।।

एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात् सप्तक्षणा । तथा हि–

परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः, ततः आरम्भकसंयोगनाशः, ततः द्व्यणुकनाशः (१), ततः श्यामादिनाशपरमाण्वन्तरकर्मणी (२), ततः रक्तोत्पत्तिः, परमाण्वन्तरे कर्मजविभागश्च (३), ततः परमाण्वन्तरेण पूर्वसंयोगनाशः (४), ततः परमाण्वन्तरेण संयोगः (५), ततः द्व्यणुकोत्पत्तिः (६), ततः रक्तोत्पत्तिः (७) इति ।।

एवं रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनात् अष्टक्षणा । तथा हि–

परमाणौ कर्म, ततः परमाण्वन्तरविभागः, ततः आरम्भकसंयोगनाशः, ततः द्व्यणुकनाशः (१), ततः श्यामनाशः (२), ततः रक्तोत्पत्ति-परमाण्वन्तरकर्मणी (३), ततः परमाण्वन्तरकर्मजविभागः (४), ततः पूर्वसंयोगनाशः (५), ततः परमाण्वन्तरसंयोगः (६), ततः द्व्यणुकोत्पत्तिः (७), अथ रक्तोत्पतिः (८) **इति अष्टक्षणा** ।।

दिनकरी

परमाण्वन्तर इति । द्व्यणुकनाशकक्रियावत्परमाणुभिन्नद्व्यणुकान्तरारम्भक-परमाणौ इत्यर्थः । **कर्मचिन्तनात् इति** । द्व्यणुकारम्भकसंयोगनाशाद्युत्पत्त्यादिक्षणे द्व्यणुकान्तरारम्भककर्मचिन्तनात् इत्यर्थः । "**पञ्चमादि**" इत्यत्र "आदि"ना षष्ठ-सप्तमाष्टमक्षणानां परिग्रहः ।।

इति **अष्टक्षणा** इति । ननु यत्र एकस्मिन् परमाणौ अग्निसंयोगसमकालं परमाण्वन्तरे कर्मोत्पत्तिः, तदुत्तरक्षणेषु, क्रमेण एकत्र क्रियाविभागपूर्वसंयोगनाश-द्व्यणुकनाशाः, अपरत्र विभागपूर्वसंयोगनाशोत्तरसंयोगोत्पत्तिद्व्यणुकोत्पत्तिरूपोत्पत्तयः तत्र द्विक्षणा । एवं यत्र एकस्मिन् परमाणौ कर्मोत्पत्तिसमकालं परमाण्वन्तरे

कर्मोत्पत्तिः, तत्र त्रिक्षणा । एवं यत्र एकस्मिन् परमाणौ विभागसमकालं परमाण्वन्तरे कर्मोत्पत्तिः तत्र चतुक्षणापि संभवति प्रक्रिया इति चेत् – न ।।

द्व्यणुकनाशमन्तरेण परमाणौ श्यामादिनिवृत्तिः, तामन्तरेण च रक्तोत्पत्तिः न संभवति इति उक्तप्रायम् ।।

इत्थं च द्व्यणुकनाशक्षणे परमाणुश्यामनाशक्षणे रक्तोत्पत्तिक्षणे वा द्व्यणुकान्तरोत्पत्तौ द्वित्रिचतुक्षणाः प्रक्रियाः वाच्याः । न च एतेषु क्षणेषु द्व्यणुकान्तरोत्पत्तिः संभवति । तथा सति तत्पूर्वक्षणेषु परमाणोः अरक्तत्वेन **तदारब्ध-द्व्यणुकस्यापि अरक्तत्वप्रसङ्ग** इति **अन्यत्र विस्तरः** ।।

राजीवोल्लासः

तदारब्धद्व्यणुकस्यापि अरक्तत्वप्रसङ्ग इति । ननु उत्पत्तिक्षणे सर्वेषामप्य-वयविनां नीरूपत्वस्य इष्टत्वात् परमाणौ रक्तोत्पत्तिक्षणे द्व्यणुकोत्पत्तौ बाधका-भावः । कारणगुणेन द्व्यणुके तस्मिन् उत्पत्तिद्वितीयक्षणे रक्तोत्पादस्य संभवात् । इत्थं च चतुःक्षणप्रक्रियायां न कश्चित् दोष इति चेत् – न । रूपनाशे इव रूपोत्पत्तावपि द्रव्यस्य समवायेन प्रतिबन्धकत्वेन प्रतिबन्धकाभावस्य च कार्यकालेऽप्यावश्यकत्वेन च रक्तरूपद्व्यणुकयोः युगपदुत्पादासंभवात् । एतदेव सूचितम् अन्यत्र विस्तर इत्यनेन ।।

।। पिठरपाकवादनिरूपणम् ।।

कारिकावली

नैयायिकानां तु नये द्व्यणुकादावपीष्यते ।।

मुक्तावली

नैयायिकानां मते द्व्यणुकादौ अवयविनि अपि पाकः भवति । तेषाम् अयम् अशयः—

अवयविनां सच्छिद्रत्वात् वह्नेः सूक्ष्मावयवैः अन्तःप्रविष्टैः अवयवेषु अवष्टब्धेष्वपि पाकः न विरुद्ध्यते । अनन्तावयवितन्नाशकल्पने गौरवम् । इत्थं च "सोऽयं घटः" इत्यादिप्रत्यभिज्ञा सङ्गच्छते । यत्र तु न प्रत्यभिज्ञा, तत्र अवयविनाशोऽपि स्वीक्रियते इति ।।

दिनकरी

"**अवयविनि अपि**" इति "अपि"ना परमाणुपरिग्रहः । **तेषाम्** – नैयायिकानाम् । **अयम्** – वक्ष्यमाणः । **अवष्टब्धेष्वपि** इति । अवयविना अवष्टब्धेष्वपि इत्यर्थः । **पाकः** – रूपादिपरावृत्तिः **न विरुद्ध्यत** इति । साक्षात्परंपरासाधारणसकलावयवावच्छेदेन तेजःसंयोगस्य रूपादिनाशहेतुत्वे मानाभावेन, आरम्भकसंयोगावच्छेदेन विजातीयतेजःसंयोगादेव रूपादिनाशसंभवेऽपि, आरम्भकसंयोगावच्छेदेन तेजस्संयोगस्य अभिघातादेः तदानीं तत्र सद्भावे मानाभावेन पूर्वोक्तरीत्या अवयविनाशस्य अप्रसक्तेः, सर्वावयवावच्छेदेन तेजःसंयोगस्य रूपादिनाशकत्वेऽपि नाशकतावच्छेदकवैजात्यस्य नोदनत्वाभिघातत्वविरुद्धस्यैव अङ्गीकरणीयतया नोदनाभिघातभिन्नतेजःसंयोगात् रूपादिनाशेऽपि तेन अवयविनाशस्य असंभवात् ।।

अस्तु वा रूपादिनाशकतावच्छेदकवैजात्यस्य **नोदनाभिघातत्वव्याप्यत्वम्**, तथापि अवयव्यभिघातादिकाले **अवयवाभिघातोत्पादनियमे** मानाभावः ।।

आस्तां वा तथा नियमः, तथापि अवयवाभिघातादेः नियमतः द्रव्यारम्भ-कसंयोगविरोधिविभागहेतुक्रियाजनकत्वे **मानाभाव एव** । **विभागं प्रति क्रियायाः तत्तद्व्यक्तित्वेनैव** हेतुतया तत्तत्क्रियाधीनविभागं प्रति तत्तत्पूर्वदेशस्य विशिष्य हेतुतया च **तज्जन्यक्रियायाः** तादृशविभागहेतुत्वासिद्धेः इति भावः ।।

यदपि उक्तं **वैशेषिकैः** अवयविरूपं प्रति अवयवरूपहेतुताया व्यभिचारापत्त्या न अवयविनि पाकेन रूपोत्पादः इति, तदपि न अवयवरूपादेः विजातीयरूपादिकं प्रत्येव हेतुतया व्यभिचाराप्रसक्तेः ।।

एतेन – अवयविरूपनाशे आश्रयनाशहेतुतायां व्यभिचारापत्या पाकेन अवयविरूपनाशासंभवः इति – अपास्तम् । आश्रयनाशजन्यतावच्छेदककोटौ वैजात्यस्य निवेशनीयत्वात् इति ।।

अवयविपाकानभ्युपगमे साधकाभावम् उक्त्वा तत्र बाधकमपि आह – **अनन्त** इति । **इत्थं च** – अवयविनाशानङ्गीकारे च । **प्रत्यभिज्ञा सङ्गच्छत** इति । पूर्वावयविनाशे तु उत्तरोत्पन्नावयविपूर्वावयविनोः अभेदाभावेन अभेदावगाहिनी प्रत्यभिज्ञा न स्यात् इति भावः ।।

राजीवोल्लासः

ननु कतिपयावयवावच्छेदेन तेजस्संयोगे सति तदवयवेषु क्रियया आरम्भकसंयोगनाशात् घटाद्यवयविनाशः अवश्यं भवति इति, अत आह – **आरम्भकसंयोग** इति । यथा कमलावयवदलानाम् अग्रावच्छेदेन संयोगः अनारम्भकः, मूलावच्छेदेन तु आरम्भकः, तथा घटादेरपि केषांचित् अवयवानां

किंचिद्देशावच्छेदेन अनारम्भकः, तदितरदेशावच्छेदेन च आरम्भकः संयोगः भवति इत्याशयः ।।

ननु पूर्वदर्शितया अवयवावयविनोः भिन्नरूपत्वापत्त्या सर्वावयवावच्छेदेन तेजस्संयोग एष्टव्यः । तस्य च आरम्भकसंयोगावच्छेदेन असत्त्वं शपथैकनिर्वाह्यम् इति, अत आह – **सर्वावयव** इति । **नोदनत्वाभिघातत्वविरुद्धस्यैव** इति । अन्यथा जातिसंकरप्रसङ्ग इति भावः ।।

अपसिद्धान्तप्रसङ्गात् आह – **अस्तु वा** इति । **नोदनाभिघातत्व-व्याप्यत्वम्** इति । नोदनत्वव्याप्यम् एकं वैजात्यम्, अभिघातत्वव्याप्यं च अपरम् इत्यर्थः । रूपनाशादिनिष्ठकार्यतावच्छेदककोटौ तत्तद्वैजात्यविशिष्टाव्यव-हितोत्तरत्वनिवेशात् न परस्परं व्यभिचार इति भावः ।।

अवयवाभिघातोत्पाद इति । यदा अवयवेष्वपि अभिधातः तदा अवयविनः नाश इष्यते । अत एव पाकानन्तरं कदाचित् वक्रसच्छिद्रादिघटानुभवः । समवायेन अभिघातानधिकरणानामपि अवयवानां अवयविनिष्ठाभिघाता-वच्छेदकत्वं समवायेन ज्ञानानधिकरणशरीरस्य आत्मनिष्ठज्ञानावच्छेदकत्ववत् उपपद्यत इति हृदयम् ।।

ननु अस्तु ज्ञानादिस्थले तथा । संयोगादिस्थले तु नैवं संभवति । अन्यथा अग्र एव कपिसंयोगकालेऽपि मूलस्यापि तदवच्छेदकत्वसंभवात् ''मूले वृक्षः कपिसंयोगी'' इति प्रत्ययापत्तेः इति, अत आह– **आस्तां वा** इति । **मानाभाव एव** इति । ननु क्रियात्वेन विभागत्वेन हेतुहेतुमद्भावात् क्रियादिघटितसामग्रीसत्त्वमेव मानम् इति शङ्काम् अपनुदति – **विभागं प्रति** इति । **तत्तद्व्यक्तित्वेनैव** इति । ''यद्विशेषयोः कार्यकारणभावः स तत्सामान्ययोः''इति नियमस्य अप्रयोजकत्वेन अस्वीकारात् न दर्शितसामान्यकार्य-

कारणभावः इत्याशयेन ''एव''कारप्रयोगः । यद्वा हेतुतया एव इति योजना । आस्तां कारणान्तरचिन्ता इत्याशयः ।।

दण्डिनि चैत्रे गच्छति दण्डचैत्रयोः उभयोः क्रियासत्त्वेऽपि तयोः परस्परं विभागादर्शनात् तत्तद्विभागं प्रति क्रियायाः तत्तद्व्यक्तित्वेन हेतुत्वम् आवश्यकम् । तथा च विशेषकारणाभावात् नात्र सामग्री इति भावः ।।

कारणान्तराभावमपि दर्शयति – **तत्तत्क्रियाधीन** इति । घटपटसंयुक्ते शरीरादौ क्रियया विभागे जायमाने कदाचित् घटोऽवधिः कदाचित् पटः इति अनुभवोपपत्तये तत्तत्क्रियाजन्यविभागं प्रति तत्तत्पूर्वदेशस्यापि विशिष्य कारणताया आवश्यकत्वात्, प्रकृते प्रायश एकावयवे वह्न्यभिघातजन्यक्रियाजन्यविभागं प्रति अवयवान्तररूपदेशस्य कारणत्वाकल्पनादेव आरम्भकसंयोगविरोधिविभागाभाव उपपद्यत इति भावः ।।

कार्यकारणभावश्च अवधितासंबन्धेन तत्क्रियाजन्यविभागं प्रति तद्विभागं प्रति वा तादात्म्येन तत्तद्देशः कारणम् इति रीत्या बोध्यः । अत एव एकक्रियाजन्यविभागे क्रियानधिकरणम्, उभयक्रियाजन्यविभागे च उभयं हेतुः इति संगच्छते । इत्थं च तत्तत्क्रियात्वेन तत्तद्विभागत्वेन हेतुहेतुमद्भावाभावेऽपि न क्षतिः इति बोध्यम् ।।

तज्जन्यक्रियाया इति । अग्निसंयोगजन्यक्रियाया इत्यर्थः । **विजातीयरूपादिकं प्रत्येव** इति ।।

अत्र केचित् – रूपादिगतशुक्लत्वादिना वैजात्यस्य सांकर्यवारणाय शुक्लत्वादिव्याप्यवैजात्यानि बहूनि स्वीकार्याणि इति कार्यकारणभावबाहुल्यापत्तिः न्यायनये दुरुद्धरः दोष इत्याहुः ।।

तच्चिन्त्यम् । तन्नये सांकर्यस्य जातिबाधकत्वानङ्गीकारात् । तस्य तथात्वेऽपि अनन्तावयवितन्नाशादिकल्पनाम् अपेक्ष्य कतिपयवैजात्यान्यङ्गीकृत्य

कतिपयकार्यकारणभावकल्पनस्यैव ज्यायस्त्वात् । यद्वा ''विजातीयपदम्'' अत्र विलक्षणधर्मवत्परम् । स च धर्मः तेजस्संयोगाजन्यत्वमेव । एवम् आश्रयनाशजन्यतावच्छेदककोटावपि नाशविशेषणं वैजात्यम् एतदेव । इत्थं च न कार्यकारणभावबाहुल्यम्, न वा रूपादिगतवैजात्यानां प्रत्यक्षापत्तिपरिहाराय तेषां तत्र तादात्म्येन प्रतिबन्धकत्वकल्पना च इति ।।

।। संख्यानिरूपणम् ।।

कारिकावली

गणनाव्यवहारे तु हेतुः संख्याभिधीयते ।। १०६ ।।

मुक्तावली

संख्यां निरूपयितुम् आह – गणना इति । गणनाव्यवहारासाधारणकारणं संख्या इत्यर्थः ।।

दिनकरी

कालादौ अतिव्याप्तिम् आशङ्क्य आह – असाधारणम् इति । वस्तुतः **गणनं संख्यात्वं** तत्प्रकारकः व्यवहारः तत्प्रकारकं प्रमात्मकं ज्ञानं तद्धेतुः – तद्विषय इत्यर्थात् न कालादौ अतिव्याप्तिः । तत्रापि संख्यात्वजातिरेव लक्षणम् । इतरत्तु संख्यात्वजातौ प्रमाणतया उक्तम्, एवम् अग्रेऽपि इति ध्येयम् ।।

राजीवोल्लासः

कालादौ इति । ''गणनाव्यवहारकारणं संख्या'' इत्युक्ते कालादीनामपि गणनाव्यवहारं प्रति कारणत्वात् तत्र अतिव्याप्तिः स्यात् । तद्वारणाय असाधारणेति कारणविशेषणम् । कालादीनां गणनां प्रति साधारणकारणत्वात् असाधारणकारणत्वं

नास्ति इति न तेषु अतिव्याप्तिः । असाधारणत्वं च अत्र न कार्यत्वानवच्छिन्नकार्यतानिरूपकत्वम्, गुरुभूतत्वात् । किं तु विषयतासंबन्धावच्छिन्नकार्यतानिरूपकत्वम् । विषयतासंबन्धेन संख्यारूपगणनविषयकज्ञानं प्रति विषयविधया संख्या हेतुः । विषयतासंबन्धेन संख्याविषयकं ज्ञानं संख्यायां वर्तते । तादृशज्ञानं प्रति संख्या विषयविधया हेतुः। तथा च विषयितासंबन्धावच्छिन्ना या संख्याविषयकज्ञाननिष्ठा कार्यता तन्निरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वं संख्यायाः लक्षणम् इत्याशयेन आह – **वस्तुत** इत्यादिना । व्यवह्रियते हानोपादानादि क्रियते अनेन इति व्यवहारः ज्ञानम् ''एकं'', ''द्वे'', ''त्रीणि'' इत्याकारकम्, तस्य विषयतया हेतुः इति मूलार्थः । तस्य विषय इति यावत् ।।

ननु गणनं नाम एकत्वादिसंख्या। तत्प्रकारकप्रमाविषयत्वं घटादौ एकत्वत्वादौ च अतिव्याप्तम् इति, अतः आह – **गणनम्** इति । **संख्यात्वम्** इति । एकत्वत्वादिकम् अननुगतम् इति संख्यात्वपर्यन्तानुधावनम् । **तद्विषय** इति । तद्विशेष्य इत्यर्थः । तथा च संख्यात्वप्रकारकं यत् ज्ञानम् ''इयं संख्या'' इत्याकारकं तद्विशेष्यत्वम् एकत्वादिसंख्यायाम् अस्ति इति लक्षणसमन्वयः । तथा च संख्यात्वप्रकारकप्रमाविशेष्यत्वं संख्यायाः लक्षणम् इति पर्यवसन्नम् । **प्रमाणतया उक्तम्** इति । एवम् ''अयम् एकः'', ''इमौ द्वौ'' इत्यादिप्रत्ययः एकत्वत्वद्वित्वत्वादिषु जातिषु प्रमाणं वेदितव्यम् । **अग्रेऽपि** इति । ''**मानव्यवहारस्य कारणम्**'' इत्यादावपि इत्यर्थः ।।

कारिकावली

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते ।
द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ।। १०७ ।।

मुक्तावली

नित्येषु इति । नित्येषु परमाण्वादिषु एकत्वं नित्यम् । अनित्ये घटादौ एकत्वम् अनित्यम् इत्यर्थः । **द्वित्त्वादय इति** । द्वित्वादयः संख्याः अपेक्षाबु-द्धिजन्याः ।।

दिनकरी

द्वित्वादय इति । **एकत्वान्यसंख्यामात्रम्** अपेक्षाबुद्धिरूपनिमित्तकारणजन्यम् इत्यर्थः । **असमवायिकारणं** तु द्वित्वं प्रति समवायिकारणगतयावदेकत्वम् इति बोध्यम् ।।

ननु **योग्यद्वित्वादौ** अपेक्षाबुद्धेः हेतुत्वेऽपि **अयोग्यद्वित्वादौ तद्धेतुत्वे** मानाभावः इति चेत्, न । योग्यद्वित्वादेः अपेक्षाबुद्धिजन्यत्वे अतीन्द्रियद्वित्वादौ अपि **अनेकसंख्यात्वादिना तदनुमानात्** ।।

अथ अपेक्षाबुद्धेः द्वित्वहेतुत्वे कथम् अविरलक्रमेण यावदपेक्षाबुद्धिसत्त्वं न द्वित्वाद्युत्पत्तिः ।।

अत्र केचित् – अपेक्षाबुद्धेः **उत्पत्तिसंबन्धेन** हेतुत्वात् न यावदपेक्षाबुद्धिसत्त्वं द्वित्वाद्युत्पत्तिः इति, तन्न । धारावाहिकापेक्षाबुद्धिभिः सर्वत्र धारावहिकद्वित्वाद्युत्पत्तेः दुर्वारत्वात्, **भगवदपेक्षाबुद्ध्या** द्वित्वानुत्पत्तेः दुर्वारत्वाच्च तद्बुद्धेः नित्यत्वेन उत्पत्तिसंबन्धेन तद्धेतुत्वस्य दुर्वचत्वात् ।।

वस्तुतस्तु तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसंख्यात्वाद्यवच्छिन्नं प्रति तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसंख्यादेः प्रतिबन्धकत्वाभ्युपगमात् न यावदपेक्षाबुद्धिसत्त्वं द्वित्वाद्युत्पत्तिः इति ।।

राजीवोल्लासः

एकत्वान्यसंख्यामात्रम् इति। मात्रशब्दः कात्स्न्यार्थकः । एकत्वान्य-संख्यासामान्यम् अपेक्षाबुद्धिरूपनिमित्तकारणजन्यम् इत्यर्थः । समवायसंबन्धेन

एकत्वान्यसंख्यात्वावच्छिन्नं प्रति नानैकत्वावगाहिसमूहालम्बनज्ञानं विशेष्यतासंबन्धेन हेतुः इति कार्यकारणभावः अत्र विवक्षितः । विशेषतश्च द्वित्वं प्रति एकत्वद्वयाव-गाहि, त्रित्वं प्रति एकत्वत्रयावगाहि ज्ञानं कारणम् इत्यादिरीत्या बोध्यम् ।।

अत्र एकत्वे द्वित्वादिसंख्याभावात् एकत्वद्वयावगाहीत्यादिरीत्या विशेष-सामग्रीकथनम् असंगतम् इति आक्षिप्य द्वित्वं प्रति ''अयम् एकः'', ''अयम् एकः'' इति केवलापेक्षाबुद्धिः, त्रित्वं प्रति ''इमौ द्वौ'' ''अयम् एकः'' इत्याकारिका द्वित्वविशिष्टैकत्वावगाहिनी, चतुष्ट्वं प्रति ''इमे त्रयः'', अयम् एकः'' इत्याकारिका त्रित्वविशिष्टैकत्वावगाहिनी अपेक्षाबुद्धिः कारणम् इति समाहितम् उदयनाचार्यैः । वैशिष्ट्यं च स्वविषयकज्ञानविषयत्वसंबन्धेन इति सुबोधिनीकाराः । **असमवायिकारणं तु** इति । द्वित्वं प्रति द्वित्वस्य समवायिकारणं यत् वस्तुद्वयं तद्गतम् एकत्वद्वयम् असमवायिकारणम् इत्यर्थः ।।

योग्यद्वित्वादौ इति । प्रत्यक्षयोग्ये घटादिगतद्वित्वादौ इत्यर्थः । **अयोग्यद्वित्वादौ** इति । प्रत्यक्षायोग्ये परमाण्वादिगतद्वित्वादौ इत्यर्थः । **तद्धेतुत्व** इति । अपेक्षाबुद्धेः हेतुत्वे इत्यर्थः । **''अनेकसंख्यात्वादिना''** इत्यत्र ''आदि'' पदेन द्वित्वत्वादिपरिग्रहः । **तदनुमानात्** इति । ''परमाण्वादिगतं द्वित्वादिकम् अपेक्षाबुद्धिजन्यम् एकत्वभिन्नसंख्यात्वात्, द्वित्वत्वादिमत्त्वाद्वा, घटादि-गतद्वित्वादिवत्'' इति अनुमानप्रकारः ।।

अथ इत्यादि। यत्र ''अयम् एकः'', ''अयम् एकः'' इति अपेक्षाबुद्ध्या द्वितीयक्षणे द्वित्वम् उत्पन्नं, तत्र तृतीयक्षणेऽपि द्वित्वान्तरोत्त्यापत्तिः । द्वितीयक्षणे अपेक्षाबुद्धिरूपकारणसत्त्वात् इति शङ्का ।।

अत्र कैश्चित् उक्तं समाधानं तु – अपेक्षाबुद्धिः उत्पत्तिसंबन्धेन द्वित्वं प्रति हेतुः । द्वितीयक्षणे उत्पत्तिसंबन्धेन सा नास्ति इति न तृतीयक्षणे द्वित्वान्तरोत्पत्त्यापत्तिः इति । तन्मतखण्डनप्रकारस्तु – यत्र ''अयम् एकः'', ''अयम् एकः'', इति अपेक्षाबुद्ध्या द्वित्वम् उत्पन्नम्, तत्रैव अविरलक्रमेण उत्पद्यमानाभिः धारावाहिकाभिः अपेक्षाबुद्धिभिः अनेकानि द्वित्वानि उत्पद्यन्ताम् । द्वित्वोत्पत्तिहेतूनाम् अपेक्षाबुद्धीनां सत्त्वात् इति ।।

उत्पत्तिसंबन्धेन इत्यस्य उत्पत्तिक्षणविशिष्टविषयतासंबन्धेन इत्यर्थः ।।

ननु अपेक्षाबुद्धिद्वितीयक्षणे योग्यविशेषगुणान्तरोत्पत्तेः अनङ्गीकारात् प्रथमद्वित्वसविकल्पककाले द्वित्वान्तरोत्पत्तिः पूर्वापेक्षाबुद्धिनाशश्च, ततो द्वित्वान्तरनिर्विकल्पकं पूर्वद्वित्वनाशश्च इति न युगपत् द्वित्वद्वयप्रत्यक्षादिप्रसङ्गः इति, अत आह – **भगवदपेक्षाबुद्ध्या** इति । ईश्वरसमवेतया अपेक्षाबुद्ध्या इत्यर्थः । **द्वित्वानुत्पत्तेः** इत्यस्य द्वित्वानुत्पत्तिप्रसङ्गात् इत्यर्थः ।।

वस्तुतस्तु इति । **अनेकसंख्यात्वाद्यवच्छिन्नं प्रति** इति । एकत्वभिन्नद्वित्वादिसंख्यात्वावच्छिन्नं प्रति इत्यर्थः । **अनेकसंख्यादेः** इति । एकत्वभिन्नद्वित्वादिसंख्यायाः इत्यर्थः । तथा च एकया अपेक्षाबुद्ध्या उत्पन्ना द्वित्संख्या तत्रैव अपेक्षाबुद्ध्यन्तराधीनद्वित्वसंख्यां प्रति प्रतिबन्धिका । अतः न द्वित्वपरंपरोत्पत्तिः इति भावः ।।

कारिकावली

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।
अपेक्षाबुद्धिनाशाच्च तेषां नाशः निरूपितः ।। १०८ ।।

मुक्तावली

अनेक इति । **यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादौ** अपि वर्तते, तथापि ''एकः द्वौ'' इति प्रत्ययाभावात् ''एकः न द्वौ'' इति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चित् संबन्धः अनेकाश्रयः अभ्युपेयते ।

दिनकरी

प्रत्येकं घटादौ इति । तथा च ''**अनेकाश्रयपर्याप्ता**'' इति **मूलम्** असङ्गतम् इति भावः । **ननु एकत्वस्य** न्यूनवृत्तितया द्वित्वाधारतानवच्छेदकत्वात् न तथा प्रत्यय इति, अत आह – **एकः न द्वौ इति** इति । एकत्वावच्छेदेन द्वित्ववद्भेदाभावात् एकत्वादेः न्यूनवृत्तितया द्वित्ववद्भेदानवच्छेदकत्वात् इति भावः । **अनेकाश्रय** इति । उभयाद्याश्रय इत्यर्थः । **तथा च तादृशप्रतीतेः** न द्वित्ववद्भेदाधारतावच्छेदकत्वम् एकत्वे विषयः **किंतु पर्याप्तिसंबन्धेन** (द्वित्वं) (द्वित्वाभावः) तद्वद्भेदो वा एकत्वावच्छिन्ने प्रकारः । इत्थं च पर्याप्तिसंबन्धेन द्वित्वस्य प्रत्येकम् अभावात् ''एकः द्वौ'' इति अप्रत्ययस्य, ''एकः न द्वौ'' इति प्रत्ययस्य च उपपत्तिः इति भावः ।

अथ – उभयादेः प्रत्येकानतिरिक्ततया प्रत्येकमपि पर्याप्तिसंबन्धेन द्वित्वम् अस्त्येव इति पर्याप्त्यङ्गीकारेऽपि ''एकः द्वौ'' इत्यप्रत्ययस्य ''एकः न द्वौ'' इति प्रत्ययस्य च कथम् उपपत्तिः । यदि च ''एकः न द्वौ'' इति प्रतीतिबलात् द्वित्ववद्भेदावच्छेदकत्वं स्वरूपसंबन्धविशेषरूपम् एकत्वे स्वीक्रियते, न तु द्वित्वावच्छेदकत्वम् ''एकः द्वौ'' इत्यप्रत्ययात् इति विभाव्यते, तदा समवायपक्षेऽपि तुल्यम् इति पर्याप्त्यङ्गीकारः निरर्थकः इति चेत्—

अत्र आहुः – ''आकाशौ'' इति वाक्यस्य प्रामाण्यापत्त्या पर्याप्त्यङ्गीकारः आवश्यकः । न च – समवायेनेव पर्याप्तिसंबन्धेनापि द्वित्वस्य आकाशे सत्त्वात्

पर्याप्त्यङ्गीकारेऽपि तद्वाक्यप्रामाण्यं दुर्वारम् इति – वाच्यम् । उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव द्वित्वसंबन्धत्वोपगमात्, आकाशत्वव्याप्यद्वित्वपर्याप्तेः अप्रसिद्धत्वाद्, द्वित्वपर्याप्तेः द्वित्वस्वरूपतया तस्य घटादौ अपि सत्त्वात् । न च उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य द्वित्वसंसर्गतां स्वीकृत्य ''आकाशौ'' इति प्रयोगवारणसम्भवात् अलं पर्याप्त्या इति – वाच्यम् । तथा सति ''घटौ'' इति प्रयोगस्य प्रामाण्यानुपपत्तेः, समवायस्य एकत्वेन घटत्वव्याप्यसमवायस्य अप्रसिद्धेः इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

मुक्तावल्यां **यद्यपि** इत्यादि । यदि द्वित्वादेः पर्याप्त्याख्यः विलक्षणः संबन्धः नाङ्गीक्रियते, अपि तु समवाय एव संबन्धः इत्युच्यते, तदा एकस्मिन् समवायसंबन्धेन द्वित्वस्य सत्त्वात् ''एकः द्वौ'' इति प्रमायाः प्रसङ्गः । तथा समवायेन द्वित्ववति एकस्मिन् समवायेन द्वित्ववद्भेदस्य असंभवात् ''एकः न द्वौ'' इति प्रमायाः अनुपपत्तिः । पर्याप्त्याख्यविलक्षणसंबन्धाङ्गीकारे तु एकस्मिन् पर्याप्तिसंबन्धेन द्वित्वस्य अभावात् न ''एकः द्वौ'' इति प्रमायाः प्रसङ्गः, न वा ''एकः न द्वौ'' इति प्रतीतेः प्रमात्वानुपपत्तिश्च इति भावः ।।

दिनकर्यां ननु एकत्वस्य इति । ''उत्पत्तिकालीनः घटः गन्धवान्'' इत्यादाविव ''एकः द्वौ'' इत्यादावपि उद्देश्यतावच्छेदके नियमेन विधेयाधारतावच्छेदकत्वस्य विधेयतावच्छेदकत्वस्य वा भानात् विषयबाध इति भावः ।।

यथा एकत्वस्य द्वित्वाधारत्वन्यूनवृत्तितया द्वित्वाधारतानवच्छेदकत्वात् ''एकः द्वौ'' इति प्रत्ययो न भवति, तथा द्वित्ववद्भेदाधारतान्यूनवृत्तितया द्वित्ववद्भेदानवच्छेदकं स्यात् इति भावः ।।

अथ एवं ''एकः द्वित्ववान्'' इति प्रमापि न स्यात् इति चेत् – न । तत्र अवच्छेदकत्वभानानभ्युपगमात् । कल्पनायाः अनुभवानुरोधित्वात् ।।

किं तु पर्याप्तिसंबन्धेन इति । एतदनन्तरं ''द्वित्वं'' इत्यस्य स्थाने ''द्वित्वाभावः'' इति पाठः साधुः । ''तथा च तादृशप्रतीतेः'' इति पूर्वग्रन्थेन ''एकः न द्वौ'' इत्यादिप्रतीतेरेव उपादानात्, ''किंतु'' इत्यादिग्रन्थेन ''एकः द्वौ'' इति प्रतीतिविषयस्य द्वित्वस्योक्तौ सन्दर्भविरोधापत्तेः । शिष्टं स्पष्टम् ।।

अथ इत्यादि । पर्याप्त्याख्यस्य विलक्षणस्य संबन्धस्य स्वीकारेऽपि ''एकः द्वौ'' इति प्रतीतिः दुर्वारा । तथाहि – उभयस्य प्रत्येकानतिरेकात् पर्याप्तिसंबन्धेन द्वित्वस्य उभयत्र सत्त्वे प्रत्येकमपि सत्त्वस्य आवश्यकत्वात् । तथा ''एकः न द्वौ'' इति प्रतीतेश्च अनुपपत्तिः । उक्तरीत्या एकस्मिन् पर्याप्तिसंबन्धेन द्वित्वस्य सत्त्वात् तेन संबन्धेन द्वित्ववद्भेदस्य असंभवात् ।।

यदि च ''एकः न द्वौ'' इति प्रतीतिः अस्तीति तद्बलात् एकत्वावच्छेदेन पर्याप्तिसंबन्धेन द्वित्ववद्भेदः स्वीक्रियते, ''एकः द्वौ'' इति प्रतीतिविरहात् एकत्वावच्छेदेन पर्याप्तिसंबन्धेन द्वित्वं न स्वीक्रियत इत्युच्यते, तदा समवायसंबन्धपक्षेऽपि तुल्यम् । एकत्वावच्छेदेन समवायसंबन्धेन द्वित्ववद्भेदः स्वीक्रियते ''एकः न द्वौ'' इति प्रतीतिबलात् । एकत्वावच्छेदेन समवायेन द्वित्वं तु न स्वीक्रियते ''एकः द्वौ'' इति प्रतीत्यभावात् इति वक्तुं शक्यत्वात् इति भावः । **स्वरूपसंबन्धविशेषरूपम्** इति । द्वित्ववत्यपि एकत्वस्य सत्त्वात् अनतिरिक्तवृत्तित्वरूपम् अवच्छेदकत्वं न संभवति इत्याशयेन एवमुक्तम् ।।

अत्र आहुः इत्यादि । यदि पर्याप्त्याख्यः समवायातिरिक्तः संबन्धः न स्वीक्रियते, तदा ''आकाशौ'' इति वाक्यस्य प्रामाण्यापत्तिः । घटाकाशद्वित्वस्य आकाशे समवायसंबन्धेन सत्त्वात् ।।

न च – पर्याप्तिस्वीकारेऽपि तेन संबन्धेन घटाकाशद्वित्वस्य आकाशे सत्त्वात् ''आकाशौ'' इति वाक्यस्य प्रामाण्यापत्तिः समाना इति – वाच्यम् । उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव द्वित्वप्रतियोगिक-संबन्धत्वोपगमात्, घटाकाशद्वित्वपर्याप्तौ उद्देश्यतावच्छेदकाकाशत्वव्याप्यत्वविरहात् आकाशत्वशून्ये घटेऽपि तादृशपर्याप्तेः सत्त्वात् । द्वित्वपर्याप्तेः द्वित्वस्वरूपतया तस्य द्वित्वस्येव घटेऽपि सत्त्वात् ।।

न च – तुल्यन्यायेन उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य द्वित्व-प्रतियोगिकसंबन्धत्वं स्वीकृत्य ''आकाशौ'' इति प्रयोगः वारयितुं शक्यः । द्वित्वसमवायस्य घटेऽपि सत्त्वेन आकाशत्वव्याप्यत्वविरहात् इति – वाच्यम् । तथा सति ''घटौ'' इति वाक्यस्य प्रामाण्यानुपपत्तेः । घटद्वित्वसमवायस्य पटद्वित्वसमवायस्य च एकत्वेन घटद्वित्वसमवायस्य पटेऽपि सत्त्वेन घटत्वव्याप्यत्वविरहात् इति भावः ।।

अन्यत्र विस्तर इति । ''धवखदिरौ'' इत्यादि नानोद्देश्यतावच्छेदककस्थले केवलपर्याप्तेः केवलसमवायस्यैव वा संसर्गतया भानम् । अन्यथा तत्र धवद्वयादेरेव बोधापत्तेः इत्यादिः विस्तरः इत्यर्थः । ''आकाशः द्वित्ववान्'' इति वाक्ये मतुपा समवायोल्लेखात् द्वित्वसमवायावगाहित्वमेव इत्यादिकं व्युत्पत्तिवादादौ द्रष्टव्यम् ।।

मुक्तावली

प्रथमम् अपेक्षाबुद्धिः, ततः द्वित्वोत्पत्तिः, ततः विशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकम्, ततः **द्वित्वत्वविशिष्टप्रत्यक्षम्** अपेक्षाबुद्धिनाशश्च, ततः द्वित्वनाशः इति ।।

यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वं योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुण-नाश्यत्वात्, तथापि अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वं कल्प्यते । **अन्यथा**

निर्विकल्पककाले अपेक्षाबुद्धिनाशानन्तरं **द्वित्वस्यैव नाशः स्यात्**, न तु द्वित्व-प्रत्यक्षम् । तदानीं विषयाभावात्, **विद्यमानस्यैव** चक्षुरादिना ज्ञानजननोपगमात् । **तस्मात् द्वित्वप्रत्यक्षादिकम्** अपेक्षाबुद्धेः नाशकं कल्प्यते ।।

दिनकरी

अपेक्षाबुद्धिनाशाच्च तेषां नाश इति **मूलस्य** तृतीयक्षणे अपेक्षाबुद्धिनाशात् चतुर्थक्षणे द्वित्वादीनां नाशः इति न अर्थः, परं तु चतुर्थक्षणे अपेक्षाबुद्धिनाशात् पञ्चमक्षणे इत्यर्थः इति ज्ञापनाय वैशेषिकप्रक्रियां प्रदर्शयति – **प्रथमम्** इत्यादिना । **द्वित्वत्वविशिष्टप्रत्यक्षम्** – द्वित्वत्वविशिष्टलौकिकप्रत्यक्षम् । **अन्यथा** अपेक्षाबुद्धेः द्विक्षणमात्रावस्थायित्वे । **द्वित्वस्यैव नाश** इति । द्वित्वस्य नाश एव इत्यर्थः ।।

ननु तदानीं द्वित्वाभावेऽपि तत्पूर्वक्षणे द्वित्वसत्त्वात् न द्वित्वप्रत्यक्षानुपपत्तिः, अत आह – **विद्यमानस्यैव** इति । ''संबद्धं वर्तमानं च गृह्यते चक्षुरादिना'' इत्यनुरोधात् लौकिकप्रत्यक्षं प्रति द्वित्वादेः विषयस्य **कार्यसहभावेन** हेतुत्वात् इति भावः ।।

ननु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्तिविशेषगुणत्वेन हेतुतया अपेक्षाबुद्ध्युत्तरक्षणोत्पन्नस्मृत्या संस्कारेण वा अपेक्षाबुद्धिनाशः केन वारणीयः इति आशङ्काम् उपसंहारव्याजेन परिहरति – **तस्मात्** इति । **द्वित्वप्रत्यक्षादिकम्** इति । द्वित्वद्वित्वत्वनिर्विल्पकम् इत्यर्थः । ''आदि''ना त्रित्वद्विपृथक्त्वादिप्रत्यक्ष-परिग्रहः । **योग्यविभुविशेषगुणत्वस्य स्वत्वस्य** च अनुगतस्य अभावेन स्वोत्तरोत्पन्नगुणत्वस्य अनुगतस्य अभावात् तत्तद्व्यक्तित्वेनैव नाश्यनाशकभावस्य वाच्यतया द्वित्वत्वविशिष्टप्रत्यक्षरूपकार्यानुरोधेन द्वित्वद्वित्वत्वनिर्विकल्पकस्यैव

तद्व्यक्तित्वेन अपेक्षाबुद्धिनाशकत्वं कल्प्यते, न तु द्वितीयक्षणोत्पन्नस्मरणादेः इति भावः ।।

राजीवोल्लासः

द्वित्वत्वविशिष्टलौकिकप्रत्यक्षम् इति । लौकिकत्वविशेषणेन तदानीं द्वित्वसत्त्वावश्यकता दर्शिता । **द्वित्वस्यैव नाशः स्यात्** इति । द्वित्वस्य नाश एव स्यात् इति योजना । यथाश्रुते प्रकृतोपयोगिव्यवच्छेद्याभावात् अवधारणानुपपत्तिः । योजनायां तु अयोगव्यवच्छेदार्थकेन ''एव''कारेण नाशावश्यकता प्रतिपादिता । **कार्यसहभावेन** इति । कार्यकालवृत्तितया इत्यर्थः ।।

योग्यविभुविशेषगुणत्वस्य इति । योग्यविभुविशेषगुणत्वस्य अनुगतस्य, **स्वत्वस्य** अनुगतस्य अभावेन स्वोत्तरोत्पन्नगुणत्वस्य अनुगतस्य च अभावात् इत्यर्थः । विशेषगुणत्वं रूपाद्यन्यतमत्वादतिरिक्तं दुर्वचम् । अन्यतमत्वस्य च न कार्यतावच्छेदकत्वम् इत्याशयः ।।

ननु द्रव्यत्वव्यापकतावच्छेदकगुणत्वन्यूनवृत्तिजातिशून्ययोग्यविभुविशेषगुणत्वम् अनुगतं संभवति इति, अत आह – **स्वत्वस्य** इति । **नाशकत्वं कल्प्यत** इति । इदम् उपलक्षणम् – द्वित्वप्रत्यक्षस्य विशेषसामग्रीत्वाङ्गीकारेण अपेक्षाबुद्धेः त्रिक्षणस्थायित्वं सुवचम् । एतेन साधर्म्यप्रकरणोक्तरीत्या अनुगतकार्यकारणभावसंभवेऽपि न दोषः इति ।।

दिनकरी

ननु द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षम् उपनीतभानात्मकमेव अस्तु, अलं तदुपपत्तये त्रिक्षणावस्थायित्वकल्पनेन अपेक्षाबुद्धेः ।।

न च – द्वित्वत्वांशे उपनीतभानसंभवेऽपि द्वित्वांशे न उपनीतभानत्वम्, उपनीतं च विशेषणतयैव इति नियमात् इति – वाच्यम् । यतः द्वित्वत्वविशिष्टद्वित्व-

प्रत्यक्षं हि जायमानं द्रव्यांशे द्वित्वप्रकारकमेव भवति "द्वे द्रव्ये" इत्याकारकम्, निर्विकल्पकोत्तरक्षणे "द्वे द्रव्ये" इत्याकारकं द्वित्वत्वविशिष्टद्वित्वप्रकारकं प्रत्यक्षं न संभवति, तत्पूर्वं विशेषणतावच्छेदकद्वित्वत्वप्रकारकद्वित्वज्ञानासंभवात् इति तु न, "विशेष्ये विशेषणम्" इति रीत्यैव "द्वे द्रव्ये" इत्याकारकप्रत्यक्षसंभवात् इति चेत्, न ।।

निर्विकल्पकस्य अप्रत्यासत्तितया "द्वे द्रव्ये" इति **उपनीतभानासम्भवात् तस्य उपनीत**भानरूपत्वे तदुत्तरं "द्वित्वं साक्षात्करोमि" इति अनुव्यवसायानुपपत्तेश्च । तस्मात् त्रिक्षणावस्थायित्वम् अपेक्षाबुद्धेः इति **वैशेषिकाणाम्** आशयः ।।

राजीवोल्लासः

ननु द्वित्वत्व इत्यादि । प्रथमम् अपेक्षाबुद्धिः, ततः द्वित्वोत्पत्तिः ततः द्वित्वत्वनिर्विकल्पकात्मकं विशेषणज्ञानम् अपेक्षाबुद्धिनाशश्च, ततः द्वित्वत्वविशिष्टद्वित्वविषयकम् अलौकिकप्रत्यक्षम्, द्वित्वनाशः इति क्रमः अस्तु । द्वितीयक्षणोत्पन्नसंस्कारादिना तृतीयक्षणे अपेक्षाबुद्धिनाशः । चतुर्थक्षणे तद्बलात् द्वित्वनाशेऽपि तद्विषयकम् अलौकिकप्रत्यक्षम् निर्विकल्पकात्मकज्ञानप्रत्यासत्त्या भवितुम् अर्हति । अलौकिकप्रत्यक्षे विषयस्य अकारणत्वात् । यद्यपि द्वित्वत्वांशे उपनीतभानसंभवेऽपि द्वित्वांशे उपनयमर्यादया भानं न संभवति, "उपनीतं विशेषणतयैव भासते" इति नियमात्, तथापि द्वित्वमपि द्रव्ये प्रकारतयैव भासते, न तु स्वतन्त्रविशेष्यतया । यतो हि द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षं जायमानं द्रव्यांशे द्वित्वप्रकारकमेव जायते "द्वे द्रव्ये" इत्याकारकम् ।।

"न च – द्वित्वत्वनिर्विकल्पकोत्तरक्षणे "द्वे द्रव्ये" इत्याकारकं द्वित्वत्वविशिष्टद्वित्वप्रकारकं प्रत्यक्षं न संभवति । तस्य विशिष्टवैशिष्ट्यावगाहितया तत्कारणीभूतस्य विशेषणतावच्छेदकद्वित्वत्वप्रकारकद्वित्वज्ञानस्य पूर्वक्षणे

अभावात् इति – वाच्यम् । ''विशेष्ये विशेषणं तत्रापि च विशेषणान्तरम्'' इति रीत्यैव ''द्वे द्रव्ये'' इत्याकारकप्रत्यक्षसंभवात् इति आक्षेपग्रन्थसारः ।।

उपनीतभानात्मकमेव इति । तथा च विषयस्य द्वित्वस्य न तत्र हेतुता इति भावः । **द्रव्यांशे द्वित्वप्रकारकमेव** इति । द्वित्वे लौकिकसंनिकर्षस्य तदाश्रयलौकिकसंनिकर्षनियतत्वात् सामग्रीसत्त्वे कार्यावश्यंभावाच्च द्रव्यभानं नियतम् इति भावः । शङ्काविशेषम् अनूद्य परिहरति – **निर्विकल्पकोत्तरक्षण** इति ।।

पूर्वोक्तम् आक्षेपं समाधत्ते – **निर्विकल्पकस्य** इति । निर्विकल्पकज्ञानस्य ज्ञानलक्षणाप्रत्यासत्तित्वाभावात् उपनीतभानात्मकं विशिष्टप्रत्यक्षं न भवितुम् अर्हति इति भावः । **उपनीतभानासंभवात्** इति । ज्ञानलक्षणारूपालौकिकसंनिकर्षजन्यप्रत्यक्षासंभवात् इत्यर्थः । ननु अस्तु निर्विकल्पकस्यापि ज्ञानलक्षणाप्रत्यासत्तित्वम् इति, अत्राह – **तस्य उपनीत** इति । ज्ञानलक्षणाप्रत्यासत्तिजन्यप्रत्यक्षस्य ''साक्षात्करोमि'' इत्याकारकानुव्यवसायविषयत्वं न संभवति इति भावः ।।

दिनकरी

नव्यास्तु — उत्पत्स्यमानद्वित्वस्य द्वित्वत्वसामान्यलक्षणया पूर्वानुभावात् द्वित्वोत्पत्तिसमये एव द्वित्वत्वप्रकारकम् उत्पद्यमानद्वित्वस्मरणम्, तेन तदुत्तरक्षणे ''इदानीं द्वे द्रव्ये'' इति विशिष्टवैशिष्ट्यावगाहिलौकिकप्रत्यक्षसंभवात् **अलम् अपेक्षाबुद्धेः** त्रिक्षणावस्थायित्वेन । **अन्यथा** सुखाद्युत्पादद्वितीयक्षणे सुखत्वनिर्विकल्पकम् अनन्तरक्षणे च सुखनाशात् ''अहं सुखी'' इति लौकिकप्रत्यक्षं न संभवति इति सुखशब्दादेः अपि त्रिक्षणावस्थानप्रसङ्गात् इति – प्राहुः ।।

राजीवोल्लासः

अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वम् अनङ्गीकुर्वतां नव्यानां मतम् आह – **नव्यास्तु** इत्यादिना । पूर्वं कदाचित् द्वित्वप्रत्यक्षकाले द्वित्वत्वेन सामान्यरूपेण उत्पत्स्यमानस्य द्वित्वस्यापि प्रत्यक्षम् अभूत्, तज्जन्यसंस्कारवशात् इदानीम् अपेक्षाबुद्ध्यनन्तरक्षणे द्वित्वं द्वित्वत्वप्रकारक–उत्पद्यमान-द्वित्व-विशेष्यकस्मरणं च जायते, तदनन्तरक्षणे "इदानीं द्वे द्रव्ये" इत्याकारकं द्वित्वत्वविशिष्टद्वित्ववैशिष्ट्यावगाहिलौकिकप्रत्यक्षं जायते । द्वित्वरूप-विषयसत्वात् । अतः तन्निर्वाहाय अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वं न कल्पनीयम् इति आशयः ।।

उत्पत्स्यमानद्वित्वस्य इति । तत्प्रकारकतद्विशेष्यकस्मरणं प्रति तत्प्रकारकतद्विशेष्यकानुभवस्यैव हेतुत्वात् उक्तम् – **उत्पत्स्यमान** इति । सामान्यलक्षणाजन्यज्ञानस्य सामान्याश्रययावद्विषयकत्वनियमात् उत्पत्स्यमान-द्वित्वविषयकत्वोपपत्तिः । विशिष्टतद्वैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदक-प्रकारकतज्ज्ञानस्य हेतुत्वपक्षम् अवलम्ब्य उक्तम् – **उत्पद्यमान** इति । "**इदानीम्**" इति द्वित्वान्वयि । एतत्कालिकद्वित्ववती द्रव्ये इत्यर्थः । अनेन प्रत्यक्षस्य लौकिकत्वनिर्वाहकतादात्त्विकविषयसत्ता सूचिता ।।

अलम् अपेक्षाबुद्धेः इति । ननु नियमेन तादृशस्मरणकल्पनम् अन्याय्यम् इति, अत आह – **अन्यथा** इति । तथा च "अहं सुखी" इति प्रत्यक्षोपपत्तये यथा नियमेन सुखत्वविशिष्टसुखस्मरणं त्वया कल्प्यते, तथा अत्रापि इति भावः ।।

ननु न सर्वत्र विशेषणज्ञानस्य हेतुत्वम्, यद्वा विषयस्य न कार्यसहभावेन हेतुत्वम् इति, न सुखादिस्थले अनुपपत्तिः इति चेत् – तर्हि सैव अत्रापि

गतिः । इत्थं च ''द्वे द्रव्ये' इति बुद्धेः विशिष्टवैशिष्ट्यावगाहिता, तदुत्तरं ''द्वित्वं द्रव्यं च साक्षात्करोमि'', ''द्वित्वविशिष्टं द्रव्यं साक्षात्करोमि'' इति अनुव्यवसायोपपत्तिश्च द्रष्टव्या ।।

मुक्तावली

न च – अपेक्षाबुद्धिनाशात् **कथं द्वित्वनाशः** इति – वाच्यम् । कालान्तरे द्वित्वप्रत्यक्षाभावात् **अपेक्षाबुद्धिः** तदुत्पादिका तन्नाश इति कल्पनात् ।। **अत एव** तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं **तेनैव गृह्यते** इति **कल्प्यते** ।।

न च – अपेक्षाबुद्धेः द्वित्वप्रत्यक्षे कारणत्वम् अस्तु इति – वाच्यम् । **लाघवेन** द्वित्वं प्रत्येव कारणत्वस्यैव उचितत्वात् ।।

दिनकरी

ननु अपेक्षाबुद्धेः द्वित्वोत्पादकत्वे चैत्रीयापेक्षाबुद्धिजन्यद्वित्वस्य अपेक्षाबुद्धिशून्येन मैत्रेण ग्रहणापत्तिः संनिकर्षादिघटितसामग्र्याः सत्त्वात्, तद्वारणाय विषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षे तद्भिन्नपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादेः तादात्म्येन प्रतिबन्धकत्वकल्पने च गौरवम् । अत आह — अत एव इति । पूर्वोक्तयुक्त्या अपेक्षाबुद्धेः द्वित्वोत्पादकत्वस्य आवश्यकत्वादेव । **तेनैव गृह्यत इति कल्प्यत** इति । **तद्भिन्नेन न गृह्यते** इति कल्प्यते इत्यर्थः । तथा च अन्यथानुपपत्त्या पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवं न दोषाय इति भावः ।

ननु कालान्तरे द्वित्वप्रत्यक्षवारणाय द्वित्वप्रत्यक्षं प्रत्येव अपेक्षाबुद्धेः हेतुत्वम् अस्तु, नतु द्वित्वं प्रति इति आशङ्कते — न च इति । **लाघवेन** इति । द्वित्वप्रत्यक्षत्वापेक्षया द्वित्वत्वस्य कार्यतावच्छेदकस्य लघुत्वात् इति भावः ।।

राजीवोल्लासः

मुक्तावल्यां – कथं द्वित्वनाश इति । किमर्थं द्वित्वनाशः कल्प्यते इत्यर्थः । अपेक्षाबुद्धिनाशानन्तरमपि द्वित्वानुवृत्तौ को दोष इति भावः ।।

ननु कालविशेषस्य अदृष्टविशेषस्य वा अस्तु द्वित्वनाशकारणत्वम् इति शङ्काम् अपनुदति – **अपेक्षाबुद्धिः इति** । दर्शितश्च **उदनयनाचार्यैः** अत्र प्रयोगः – "द्वित्वं निमित्तविनाशविनाश्यम्, आश्रयनाशविरोधिगुणाभ्याम् अजन्यनाशप्रतियोगित्वे सति गुणत्वात्, चरमज्ञानवत्" इति । एतदनुमानसूचनायैव मूलोक्तमपि अपेक्षाबुद्धेः निमित्तत्वम् अत्र अनूदितम् । अत्र अनुमाने हेतौ जलपरमाणुरूपादौ व्यभिचारात् जन्यनाशाप्रतियोगित्वं विहाय अजन्यनाशप्रतियोगित्वम् उक्तम् । जलपरमाणुरूपादौ नाशप्रतियोगित्वमेव नास्ति इति न व्यभिचारः । घटादौ व्यभिचारवारणाय विशेष्यदलम् । न च इदं अप्रयोजकम् । निमित्तविनाशाविनाशिनः गुणस्य आश्रयविनाश-विरोधिगुणान्यतरनाश्यत्वनियमात् । अन्यथा नित्यत्वापत्तेः इति । **चरमज्ञानवत् इति** । अत्र चरमत्वं स्वाव्यवहितोत्तरक्षणावच्छेदेन स्वाधिकरणोत्पन्नविशेष-गुणकभिन्नत्वम् । तेन सुषुप्त्यव्यवहितपूर्वक्षणोत्पन्नज्ञानस्यापि संग्रहः । अत्र अव्यवहितत्वं क्षणद्वयसाधारणम् । न अतः अपेक्षाबुद्धेः चरमत्वापत्तिःइति **सुबोधिनीकाराः** ।।

दिनकर्याम् उत्तरग्रन्थम् अवतारयति – **ननु अपेक्षाबुद्धेः इति** । अपेक्षाबुद्धेः द्वित्वोत्पत्तिहेतुत्वे यत्र "अयम् एकः" "अयम् एकः" इति चैत्रीयापेक्षाबुद्ध्या द्वयोः घटयोः द्वित्वमुत्पन्नम्, तत्र मैत्रीयचक्षुस्संयोगस्य घटयोः सत्त्वे अपेक्षाबुद्धिशून्यस्य मैत्रस्यापि तादृशद्वित्वस्य प्रत्यक्षापत्तिः । चक्षुस्संयुक्तसमवायरूपसंनिकर्षादिघटित-सामग्र्याः सत्त्वात् । तद्वारणाय विषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षं प्रति तद्भिन्नापेक्षाबुद्धिजन्यद्वित्वस्य

तादात्म्यसंबन्धेन प्रतिबन्धकत्वं कल्पनीयम् इति गौरवम् इति, अत आह – **अत एव इति । तद्भिन्नेन न गृह्यत इति इति । तेन गृह्यत** इत्यंशे विवादाभावात् ''एव''कारबोधितार्थे एव तात्पर्यम् इति अनेन स्पष्टीकृतम् ।।

कालान्तरे द्वित्वप्रत्यक्षवारणाय इति । कारणताग्राहकान्वयव्यतिरेकौ अनेन दर्शितौ । **न तु द्वित्वं प्रति इति ।** अपेक्षाबुद्धेः त्रिक्षणावस्थायित्व-कल्पनक्लेशाभावात् उपदर्शितप्रतिबध्यप्रतिबन्धकभावकल्पनक्लेशाभावाच्च इत्यर्थः । **कार्यतावच्छेदकस्य लघुत्वात् इति ।** कारणतावच्छेदकगौरववत् कार्यतावच्छेदक-गौरवस्यापि अन्यथासिद्धिसंपादकत्वात् इति भावः । अपेक्षाबुद्धेः त्रिक्षणावस्थान-कल्पनागौरवं दर्शितप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवं च फलमुखत्वात् अदोष इति हृदयम् ।।

दिनकरी

ननु द्वित्वप्रत्यक्षनिष्ठं लौकिकविषयितया द्वित्वत्वमेव कार्यतावच्छेदकम् इति न गौरवम् ।।

न च – अन्तरेणापि अपेक्षाबुद्धिं द्वित्वप्रत्यक्षापत्तिः एतावतापि अवारितैव इति – वाच्यम् । द्वित्वत्वाविषयकद्वित्वप्रत्यक्षस्य अलीकतया व्यापकीभूत-द्वित्वत्वावच्छिन्नजनकसामग्रीविरहादेव तद्वारणात् इति चेत्, न ।।

उत्पादकसामग्र्या व्यञ्जकत्वाङ्गीकारे घटाद्युत्पादकसामग्र्या अपि घटादिव्यञ्जकत्वापत्त्या **सत्कार्यवादापत्तेः** इति ।।

राजीवोल्लासः

आक्षिपति – **ननु द्वित्वप्रत्यक्षनिष्ठम्** इत्यादिना । द्वित्वप्रत्यक्षं प्रति अपेक्षाबुद्धिः कारणम् इति वदतोऽपि द्वित्वत्वमेव कार्यतावच्छेदकम् । न

च – कार्ये द्वित्वप्रत्यक्षे अविद्यमानस्य द्वित्वत्वस्य कथं कार्यतावच्छेदकत्वम् इति – वाच्यम् । द्वित्वप्रत्यक्षे द्वित्वत्वस्यापि विषयत्वेन लौकिकविषयितासंबन्धेन द्वित्वत्वस्य वर्तमानतया कार्यतावच्छेदकत्वसंभवात् ।।

न च एतावता अपेक्षाबुद्धिशून्यकाले द्वित्वप्रत्यक्षं कथं वारितं भवति इति शङ्कनीयम् । द्वित्वत्वाविषयकस्य द्वित्वविषयकप्रत्यक्षस्य अनुदयात् यत्र यत्र द्वित्वविषयकप्रत्यक्षत्वं तत्र तत्र लौकिकविषयितासंबन्धेन द्वित्वत्वमिति व्याप्तिः- लभ्यते । ततश्च व्याप्यधर्मावच्छिन्ने जननीये व्यापकधर्मावच्छिन्नजनकसामग्री अपेक्षिता इति नियमात् व्याप्यद्वित्वप्रत्यक्षत्वावच्छिन्ने जननीये व्यापकद्वित्वत्वावच्छिन्नप्रत्यक्षसामग्र्याः अपेक्षाबुद्धेः अपेक्षितत्वात् तां विना द्वित्वप्रत्यक्षोत्पत्त्यसंभवात् इति शङ्काग्रन्थभावः । **व्यापकीभूत** इति । द्वित्वप्रत्यक्षत्वं प्रति व्यापकीभूतं यत् द्वित्वत्वं तदवच्छिन्नस्य द्वित्वप्रत्यक्षस्य या सामग्री अपेक्षाबुद्धिः तस्याः अपेक्षितत्वात् इत्यर्थः । अस्मिन् आक्षेपग्रन्थे सूक्ष्मेक्षिका आवश्यकी । यथाशक्ति ताम् अवलम्ब्य व्यवृणवम् ।।

उक्तम् आक्षेपं समाधत्ते – **उत्पादकसामग्र्या** इत्यादिना । एतावता प्रयासेनापि द्वित्वस्य उत्पादिकैव अपेक्षाबुद्धिः द्वित्वस्य व्यञ्जिका इत्युक्तं भवति। तत्तु न युक्तम् । उत्पादकसामग्र्याः व्यञ्जकत्वाङ्गीकारे घटाद्युत्पादकसामग्र्या अपि घटादिव्यञ्जकत्वापत्त्या सत्कार्यवादप्रसङ्गात् ।।

तथाहि – समवायिकारणेषु कपालादिषु पूर्वं वर्तमानानामेव घटादिकार्याणां दण्डचक्रकपालसंयोगादिसमवधाने अभिव्यक्तिः भवति, न असताम् उत्पत्तिः । कदाचिन्नरविषाणादेरपि उत्पत्तिप्रसङ्गात् । इत्थं च सूक्ष्मरूपेण पूर्वं सताम् अभिव्यक्तिरेव उत्पत्तिपदेन अभिधीयते इति सांख्यादयो वदन्ति ।।

अस्तु सत्कार्यवादः । को दोष इति चेत् – श्रूयताम् । कपाले दण्डादिसाध्या घटाभिव्यक्तिः दण्डसंयोगादितः पूर्वमप्यस्ति वा न वा । अस्ति चेत् तदापि घटादिप्रत्यक्षं सर्वानुभवविरुद्धम् अङ्गीकार्यं स्यात्। नास्ति चेत्, अभिव्यक्तिरूपकार्यस्य पूर्वम् असत्त्वमपि अभ्युपगतं भवेत् । अगत्या अङ्गीकुर्म इति चेत्, घटादिना किम् अपराद्धम् । लाघवात् दण्डादिः घटस्यैव जनकोऽस्तु ।।

मुक्तावली

अतीन्द्रिये द्व्यणुकादौ अपेक्षाबुद्धिः योगिनाम्, सर्गादिकालीनपरमाण्वादौ ईश्वरीयापेक्षाबुद्धिः ब्रह्माण्डान्तरवर्तियोगिनाम् अपेक्षाबुद्धिर्वा द्वित्वादिकारणम् इति ।।

दिनकरी

ननु अपेक्षाबुद्धेः द्वित्वाद्युत्पादकत्वं न संभवति, द्व्यणुकस्य अस्मदीयप्रत्यक्षागोचरतया तत्र अपेक्षाबुद्ध्यसंभवेन तत्र त्रित्वानुत्पत्त्यापत्तेः । न च इष्टापत्तिः ।] भावकार्यस्य असमवायिकारणजन्यत्वनियमेन द्व्यणुकगतत्रित्वं विना त्र्यणुकपरिमाणानुत्पत्तेः परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमेन द्व्यणुकपरिमाणस्य तत्र असमवायिकारणत्वासंभवात्, अत आह — **अतीन्द्रिये द्व्यणुकादौ** इति । **''आदि''ना परमाणुपरिग्रहः** । सर्गादौ योगिनाम् अभावात् आह – **ईश्वरीय** इति ।।

न च – ईश्वरीयापेक्षाबुद्धेः द्वित्वत्वोत्पादकत्वे तद्द्वित्वस्य नित्यत्वप्रसङ्गः, ईश्वरीयापेक्षाबुद्धेः नित्यत्वेन तन्नाशनाश्यत्वस्य तादृशद्वित्वे वक्तुम् अशक्यत्वात् इति – वाच्यम् । **तद्द्वित्वस्य** ईश्वरीयापेक्षाबुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशोपपत्तेः । क्षणविशेषस्य ईश्वरीयापेक्षाबुद्धिसहकारित्वानङ्गीकारे सर्गाद्यकालीन-परमाणुद्वित्वोत्पत्तेः पूर्वं तद्द्वित्वोत्पादापत्तेः ।।

अपेक्षाबुद्धिनाशात् इति मूलस्य आश्रयनाशोपलक्षकत्ववत् ईश्वरीयापेक्षाबुद्धिसहकारिविशेषक्षणविशेषनाशोपलक्षकत्वस्वीकाराच्च न तद्विरोधः । एतेन घटाद्युत्प-त्तिद्वितीयक्षणे भगवदपेक्षाबुद्ध्या तत्र द्वित्वादिकं जन्यते इति परास्तम् । तदानीं सहकारिक्षणविशेषस्य अभावेन भगवदपेक्षाबुद्ध्या द्वित्वादेः अजननात् तदानीं तत्र द्वित्वोत्पादे मानाभावाच्च । एतदस्वरसात् आह — ब्रह्माण्डान्तर इति ।।

राजीवोल्लासः

उत्तरग्रन्थम् अवतारयति – ननु अपेक्षाबुद्धेः इत्यादिना । अपेक्षाबुद्धेः द्वित्वत्रित्वाद्युत्पादकत्वं न संभवति । व्द्यणुकस्य अस्मदीयप्रत्यक्षायोग्यतया तद्विषयिकायाः ''इदम् एकम्'', ''इदम् एकम्'' इत्याकारिकायाः अपेक्षाबुद्धेः असंभवात् तत्र त्रित्वोत्पत्त्यसंभवात् । तत्र त्रित्वाभावे च त्र्यणुके महत्त्वोत्पत्त्यसंभवात्, त्र्यणुकमहत्त्वं प्रति द्व्यणुकगतत्रित्वस्य असमवायिकारणत्वात् ।।

न च – द्व्यणुकगतं परिमाणमेव त्र्यणुकमहत्त्वं प्रति असमवायिकारणम् इति – वाच्यम् । परिमाणस्य स्वसमानजातीयं स्वापेक्षया उत्कृष्टं च यत्परिमाणं तज्जनकत्वम् इति नियमात् व्द्यणुकपरिमाणस्य अणुपरिमाणरूपतया त्र्यणुकगतमहत्त्वस्य स्वसजातीयत्वविरहात् स्वोत्कृष्टत्वविरहाच्च तज्जनकत्वासंभवात् । स्वसमानजातीयत्वं परिमाणविभाजकरूपेण इति पूर्वम् उक्तत्वात् परिमाणविभाजकेन अणुत्वत्वेन साजात्यं त्र्यणुकपरिमाणे नास्ति। अणोः अणुतरत्वस्यैव उत्कृष्टत्वात् व्द्यणुकपरिमाणापेक्षया उत्कृष्टत्वं च तत्र नास्ति । तथा च द्व्यणुके त्रित्वं कथम् उत्पद्येत इति आक्षेपः । ''आदि''ना परमाणुपरिग्रहः इति । तुल्यन्यायेन परमाण्वोः द्वित्वानुत्पत्त्या तद्वित्वस्य कथं द्व्यणुकपरिमाणं प्रति हेतुत्वं स्यात् इति भावः ।।

उक्ताक्षेपसमाधानं तु **मूले** एवम् उक्तम् – द्व्यणुकं तावत् योगिनां प्रत्यक्षम् । अतः योगिनां द्व्यणुके "इदम् एकम्", "इदम् एकम्" इति अपेक्षाबुद्धिः संभवति । तया च द्व्यणुके द्वित्वम् उत्पद्यते । सर्गाद्यकाले योगिनाम् अभावात् तदानीं परमाण्वादौ ईश्वरीयापेक्षाबुद्ध्या द्वित्वादिकं जायते । अथवा ब्रह्माण्डान्तरवर्तियोगिनाम् अपेक्षाबुद्ध्या एतद्ब्रह्माण्डवर्तिपरमाण्वादौ द्वित्वाद्युत्पत्तिः इति ।।

शङ्कते – **न च** इति । यदि ईश्वरीयापेक्षाबुद्धिः द्वित्वोत्पादिका, तर्हि तस्याः नित्यत्वेन तन्नाशात् द्वित्वनाश इति वक्तुम् अशक्यतया द्वित्वस्य अनश्वरत्वप्रसङ्गः इति भावः । **नित्यत्वप्रसङ्ग** इति । नाशाभावप्रसङ्ग इत्यर्थः ।।

समाधत्ते – **तद्द्वित्वस्य** इति । ईश्वरीयापेक्षाबुद्धिः क्षणविशेषं सहकारिणम् आसाद्य द्वित्वं जनयति, अन्यथा सर्वदा द्वित्वोत्पत्तिप्रसङ्गात्। तथा च सहकारिविशेषस्य क्षणविशेषस्य नाशात् द्वित्वनाशः संभवति । किं च क्षणविशेषस्य ईश्वरीयापेक्षाबुद्धिसहकारित्वानङ्गीकारे सर्गाद्यकालीनपरमाणुद्वित्वोत्पत्तेः पूर्वमपि तद्द्वित्वोत्पत्तिप्रसङ्ग इति भावः ।।

ननु क्षणविशेषनाशात् द्वित्वनाश इत्यङ्गीकारे **"अपेक्षाबुद्धिनाशाच्च तेषाम् नाशः"** इति मूलविरोध इत्यत्र आह – **अपेक्षाबुद्धि** इति । न केवलम् अपेक्षाबुद्धिनाशादेव द्वित्वनाशः, अपितु आश्रयनाशादपि इति । यथा "च"शब्दः आश्रयनाशसमुच्चायकः, तथा ईश्वरीयापेक्षाबुद्धिसहकारिक्षणंविशेषनाशस्यापि समुच्चायकः, अत्रत्य"च"कारस्य अनुक्तसमुच्चयार्थकत्वात् इति भावः ।।

मूलस्य – मूलस्थ"च"कारस्य । **उपलक्षकत्ववत्**- बोधकत्ववत् । यत्र अवयवक्रियाजन्यविभागः अपेक्षाबुद्धिश्च युगपज्जायेते, तत्र

आरम्भकसंयोगनाशद्वित्वे, ततो द्रव्यनाशद्वित्वत्वनिर्विकल्पके, तदनन्तरं द्वित्वापेक्षाबुद्ध्योर्नाशः । तत्र आश्रयनाश एव द्वित्वनाशकः । कर्मसमकालम् अपेक्षाबुद्ध्युत्पत्तौ तु आश्रयनाशः अपेक्षाबुद्धिनाशश्च द्वित्वनाशहेतुः, विनिगमकाभावात् इति भाष्यादौ स्पष्टम् ।।

द्वित्वादेरजननात् इति । ननु द्वित्वेन कार्येण कारणभूतः कालविशेषः अनुमीयताम् इति, अत आह – **तत्र द्वित्व** इति । तथा च हेत्वज्ञानात् न अनुमितिः इति भावः ।।

एतदस्वरसात् इति । घटाद्युत्पत्त्यनन्तरमपि वस्त्वन्तरारम्भकद्व्यणुकादि-परिमाणोत्पत्त्या तदुपपत्तये परमाणुद्वित्वाद्युत्पत्तिः अङ्गीकार्या । यस्य कालविशेषस्य तज्जनकत्वं तम् अपेक्ष्य घटादौ अपि द्वित्वाद्युत्पादापत्तिः अपरिहार्या, सामग्रीसत्त्वात्, इति अस्वरसादित्यर्थः ।।

कारिकावली

अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते ।

मुक्तावली

अपेक्षाबुद्धिः का इति, अत आह – **अनेकैकत्व** इति । **"अयम् एकः"**, "अयम् एकः" इत्याकारिका इत्यर्थः । इदं तु बोध्यम् – यत्र **अनियतैकत्वज्ञानं**, तत्र त्रित्वादिभिन्ना बहुत्वसंख्या उत्पद्यते, यथा सेनावनादौ इति **कन्दलीकारः** ।।

आचार्यास्तु – त्रित्वादिकमेव बहुत्वं मन्यन्ते । तथा च त्रित्वत्वादिव्यापिका बहुत्वत्वजातिः नातिरिच्यते । **सेनावनादौ उत्पन्नेऽपि त्रित्वादौ त्रित्वत्वाद्यग्रहः** दोषात् । इत्थं च "इतः बहुतरा इयं सेना" इति प्रतीतिः **उपपद्यते** । बहुत्वस्य **संख्यान्तरत्वे** तु तत्तारतम्याभावात् न उपपद्येत इति अवधेयम् ।।

दिनकरी

इति अतः – इति आकाङ्क्षातः । ननु एकत्वांशे निर्धर्मितावच्छेदकैकत्वज्ञानात् द्वित्वाद्युत्पत्त्यापत्तिः, अतः व्याचष्टे — **अयमेक इति** । तत्तद्व्यक्तिमात्रनिष्ठेदंत्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशालिनी बुद्धिः अपेक्षाबुद्धिपदार्थ इति न उक्तदोष इति भावः । क्वचित्पुस्तके "इदं तु बोध्यम्" इत्यादि "अवधेयम्" इत्यन्तः पाठः, स चैवं व्याख्येयः । **यत्र अनियतैकत्व इति** । एकत्वविशेष्यकसंख्यात्वनियतत्रित्वादिप्रकारकज्ञानशून्यकालीनम् अनेकैकत्वज्ञानम् इत्यर्थः ।।

यद्वा "एकत्वांशे निर्धर्मितावच्छेदकम् एकत्वसंख्यायोगिनः" इत्याकारकज्ञानम् इत्यर्थः । **सेनावनादौ इति** । तत्र नियतैकत्वज्ञानाभावात् तस्यैव सहस्रत्वादिसङ्ख्योत्पादकत्वात् इति भावः । **उत्पन्नेऽपि इति** । अनियतैकत्वज्ञानस्यापि त्रित्वाद्युत्पादकत्वात् इति भावः । **दोषात्** –नियतानेकैकत्वज्ञानाभावात् । अनियतानेकैकत्वज्ञानस्य त्रित्वोत्पत्तिकारणत्वेऽपि त्रित्वांशे त्रित्वत्वप्रकारकप्रत्यक्षे नियतानेकैकत्वज्ञानस्यैव हेतुतया तद्भिना न त्रित्वत्वादिप्रकारकं प्रत्यक्षम् इति भावः । **उपपद्यते इति** । "इतः बहुतरा" इत्यत्र बहुत्वे स्वसजातीयनिरूपितोत्कर्षः प्रतीयते । तथा च चतुष्ट्वादिरूपे बहुत्वे त्रित्वादिरूपस्वसजातीयनिरूपितोत्कर्षस्य सत्त्वात् तादृशप्रतीतिः उपपद्यते इति भावः । **संख्यान्तरत्वे** – त्रित्वाद्यतिरिक्तसंख्यात्वे । **तत्तारतम्याभावात् इति** । बहुत्वे स्वसजातीयोत्कर्षाभावात् तव मते तस्य एकरूपत्वात् इति भावः । न च – बहुत्वस्य त्रित्वादिरूपत्वे बहुत्वनिश्चये कथं त्रित्वादिसंशयः इति – वाच्यम् । समानप्रकारकनिश्चयस्यैव संशयविरोधितया बहुत्वत्वप्रकारकनिश्चयस्य त्रित्वत्वादिप्रकारकसंशयाविरोधित्वात् ।।

राजीवोल्लासः

ननु मूले **"अनेकैकत्वबुद्धिः"** इत्यनेन अनेकानि एकत्वानि विषयीकुर्वाणा बुद्धिः अपेक्षाबुद्धिः इत्यर्थः प्रतीयते । तथा सति "एकः एकः" इति

निर्धर्मितावच्छेदकनानैकत्वविषयकबुद्ध्यापि द्वित्वोत्पत्त्यापत्तिः । अत व्याचष्टे **मुक्तावल्यां "अयम् एकः" "अयम् एकः"** इति । तथापि "घटः एकः" "पटः एकः" इत्यादिघटत्वादिधर्मितावच्छेदककनानैकत्वप्रकारकज्ञानादपि द्वित्वाद्युत्पत्तिः । अत आह – **दिनकर्यां तत्तद्व्यक्ति** इति । तत्तद्व्यक्तिमात्रनिष्ठं यत् इदंत्वं तदवच्छिन्नविशेष्यतानिरूपिता या एकत्वनिष्ठा प्रकारता तच्छालिनी बुद्धिः अपेक्षाबुद्धिः इत्यर्थः । **अनियतैकत्वज्ञानम्** इत्यस्य अनियतं च तत् एकत्वज्ञानं च इति विग्रहः । तत्र अनियतपदस्य विविक्षितम् अर्थम् आह – **कालीनम्** इत्यन्तेन । नियतपदम् अत्र एकत्वविशेष्यकसंख्यात्व-नियतत्रित्वादिप्रकारकज्ञानलाक्षणिकम् । तत् समानकालिकत्वसंबन्धेन न विद्यते यस्मिन् इति व्युत्पत्त्या तादृशार्थलाभः ।।

यद्वा नियतेन – संख्यात्वनियतेन त्रित्वादिना, तत्प्रकारकम् इति यावत् । एकत्वस्य एकत्वविशेष्यकं ज्ञानं नियतैकत्वज्ञानं तन्न विद्यते यत्र इति अनियतैकत्वज्ञानम् इति विग्रहः । अनेकैकत्वज्ञानम् इति विशेष्यस्य अध्याहारः । तथा च यत्र "त्रीणि एकत्वानि," "चत्वारि एकत्वानि" इत्याद्याकारकज्ञानं नास्ति, परं तु "अनेकांनि एकत्वानि" इत्याकारकज्ञानम् अस्ति, तत्र त्रित्वादिभिन्ना बहुत्वसंख्या उत्पद्यते, यथा सेनावनादौ इति भावः ।।

ननु एवं सति घटादौ त्रित्वाद्युत्पादे एकत्वगतत्रित्वादेः अपेक्षाबुद्धिविशेष-विषयत्वरूपतया संख्याविशेष्यकापेक्षाबुद्धिः द्रव्यविशेष्यकापेक्षाबुद्धिश्च इति उभयम् आवश्यकं भवेत् । तच्च गुरुभूतम् अनुभवविरुद्धं च इति, अत आह – **यद्वा** इति । एतत्कल्पे अनियतपदस्य निर्धर्मितावच्छेदककेत्यर्थः । तथा च "एकत्वसंख्यायोगिनः" इत्याकारकज्ञानं सेनावनादौ त्रित्वादिभिन्न-बहुत्वसंख्योत्पत्तौ कारणम् इत्युक्तं भवति । **नियतैकत्वज्ञानाभावात्** इति । एकत्वविशेष्यकसंख्यात्वनियतत्रित्वादिप्रकारकज्ञानकालीनानेकैकत्वज्ञानाभावात्

इत्यर्थः । तस्यैव-उक्तज्ञानस्यैव । दोषात् इत्यस्य प्रकृते कारणाभावार्थकतां स्पष्टयति – **नियतानेकैकत्वज्ञानाभावात्** इति । उक्तं च **आचार्यैः** – ''नियमतस्तदप्रतीतिस्तु नियतापेक्षाबुद्धेः व्यञ्जिकायाः अभावात्'' इति । **त्रित्वादिरूप** इति । त्रित्वादिरूपं यत् स्वजातीयं बहुत्वत्वेन रूपेण चतुष्ट्वसजातीयं तन्निरूपितोत्कर्षस्य इत्यर्थः । **तादृशप्रतीतिः** – ''बहुतरा इयं सेना'' इति प्रतीतिः ।।

मुक्तावल्यां तत्तारतम्याभावात् इति । बहुत्वे तारतम्याभावात् इत्यर्थः ।।

इदमत्र चिन्त्यम् – घटकपालपरिमाणयोः महत्वत्त्वेन एकविधत्वेऽपि यथा उत्कर्षापकर्षभावात् ''कपालात् महत्तरो घट'' इत्यादिप्रतीतिः, तथा बहुत्वत्वेन एकविधत्वेऽपि उत्कर्षापकर्षभावात् ''इतो बहुतरा इयम्'' इत्यादिप्रतीतिरपि संगच्छते, बहुत्वस्य त्रित्वादिभिन्नत्वेऽपि इति । वस्तुतस्तु परिमाणस्य उत्कृष्टपरिमाणजनकत्वनियमात् परिमाणादिजन्यत्वं परिमाणोत्कर्षप्रयोजकम् इष्यते । बहुत्वे तु तथोत्कर्षप्रयोजकं दुर्वचम् इति तारतम्याभावोक्तिः संगतैव इति इति **सुबोधिनीकाराः** ।।

।। परिमाणनिरूपणम् ।।

कारिकावली

परिमाणं भवेन्मानव्यवहारस्य कारणम् ।। १०९ ।।

अणुदीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ।

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ।। ११० ।।

संख्यातः परिमाणाच्च प्रचयादपि जायते ।

अनित्यं, द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ।। १११ ।।

मुक्तावली

परिमाणं निरूपयति – **परिमाणम्** इति परिमितिव्यवहारासाधारणं कारणं परिमाणम् इत्यर्थः । तत् चतुर्विधम् – अणु महत् दीर्घं ह्रस्वं च इति । **तत्** – परिमाणम् । **नित्यम्** इत्यत्र परिमाणम् इति अनुषज्यते । जायत इत्यत्रापि परिमाणम् इति अनुवर्तते । **अनित्यम्** इति पूर्वेण अन्वितम् । तथा च अनित्यपरिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं च इत्यर्थः ।।

तत्र **संख्याजन्यम्** उदाहरति – **द्व्यणुकादौ** इति । द्व्यणुकस्य त्रसरेणोः च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणम् । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् । द्व्यणुकस्य अणुपरिमाणं तु परमाण्वणुत्वापेक्षया न उत्कृष्टम् । त्रसरेणुपरिमाणं तु न **सजातीयम्** । अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य, द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्य असमवायिकारणम् इत्यर्थः ।।

दिनकरी

यद्यपि अणुत्वमेव ह्रस्वत्वम् अस्तु महत्त्वमेव दीर्घत्वम् अस्तु इति कुतः चातुर्विध्यम्?, तथापि तदवधिकाणुतया प्रतीयमानेऽपि तदवधिकह्रस्वत्वाव्यवहारात् तदवधिकमहत्त्ववत्तया प्रतीयमानेऽपि तदवधिकदीर्घत्वाव्यवहाराच्च ह्रस्वत्वदीर्घत्वयोः अतिरिक्तपरिमाणतया तच्चातुर्विध्यं बोध्यम् ।।

संख्याजन्यम् उदाहरति इति । **संख्यामात्रजन्यम् उदाहरति** इत्यर्थः । ''न सजातीयम्'' इत्यनन्तरं ''विजातीयसंयोगरूपः प्रचयस्तु न द्व्यणुकादौ, तत्सत्त्वेऽपि वा तस्य अकिंचित्करत्वात्'' इति पूरणीयम् । **द्वित्वसंख्या** द्वित्वसंख्यामात्रम् । एवम् अग्रेऽपि ।।

राजीवोल्लासः

अणुप्रतिद्वन्द्वित्वस्य महत्येव वर्तमानत्वात् **कारिकाक्रमम्** उल्लङ्घ्य विभागं दर्शयति – **अणु महत् इति** । ननु महत्त्वाभाव एव अणुत्वम् इति चेत्, न । वैपरीत्ये विनिगमकाभावात् उभयसिद्धेः । अभावे तारतम्याभावेन अणुतरत्वादिव्यवहारानुपपत्तेश्च ॥

दिनकर्यां – यद्यपि अणुत्वमेवं इति । अणुत्वह्रस्वत्वयोः महत्त्वदीर्घत्वयोश्च सामानाधिकरण्यमेव **भाष्यादौ** उक्तम्, तन्मास्तु, तयोः अभेदस्यैव संभवात् इत्याशयः । **अव्यवहारात्** इति । तथा च यदि तयोः अभेदः स्यात्, तदा दर्शितव्यवहारापत्तिः इति भावः ॥

संख्यामात्रजन्यम् इति । ननु द्व्यणुकादिपरिमाणस्य संख्याजन्यत्वं, न परिमाणजन्यत्वम् इति **मुक्तावल्याम्** उपपादितम् । तथापि तस्य प्रचयजन्यत्वेन संख्यामात्रजन्यत्वोक्तिः असंगता इति शङ्कां परिहर्तुम् आह – **न सजातीयम् इत्यनन्तरम्** इति । **प्रचयस्तु न द्व्यणुकादौ** इति । बाधकाभावात् अस्तु इति चेत् आह – **तत्सत्त्वेऽपि** इति । प्रचयाख्यसंयोगस्य स्वाश्रयगतपरिमाण-सजातीयोत्कृष्टपरिमाणजनकत्वनियमात् द्व्यणुकपरिमाणस्य उत्कृष्टत्वा-भावात् त्र्यणुकपरिमाणस्य सजातीयत्वाभावाच्च न प्रचयजन्यत्वसंभव इति भावः ॥

यद्वा परमाणोः निरवयवत्वेन न प्रचयप्रसक्तिः । प्रशिथिलावयवसंयोगो हि प्रचयः । द्व्यणुकसंयोगस्य प्रचयत्वसंभवेऽपि प्रशिथिलावयवकतूलादौ इव त्र्यणुके परिमाणतारतम्यादर्शनात् तस्य अन्यथासिद्धत्वमेव इति भावः । **तत्सत्त्वेऽपि** इत्यस्य द्व्यणुके तत्सत्त्वेऽपि इत्येवार्थः, परमाणौ तदसंभवात् ॥

कारिकावली

परिमाणं घटादौ तु परिमाणजमुच्यते ।

मुक्तावली

परिमाणजन्यं परिमाणम् उदाहरति – परिमाणं घटादौ इति । घटादि परिमाणं कपालादिपरिमाणजन्यम् ।।

दिनकरी

परिमाणजन्यम् – परिमाणमात्रजन्यम् । **कपालादिपरिमाणजन्यम्** – कपालादिपरिणाममात्रजन्यम् इत्यर्थः ।।

अप्रचितमहाकपालद्वयारब्धे घटे यत् महत्परिमाणं तत्र कपालगतद्वित्वसंख्या न कारणम् । द्वित्वसंख्यायाः महत्त्वाजनकत्वात् । अन्यथा द्व्यणुकेऽपि महत्त्वोत्पादापत्तेः ।।

न च – उक्तापत्त्या द्वित्वत्वेन परिमाणाजनकत्वेऽपि घटगतमहत्त्वं प्रति कपालगतमहत्त्वस्य कपालगतद्वित्त्वस्य वा हेतुत्वम् इत्यत्र विनिगमनाविरह इति – वाच्यम् ।।

कपालगतमहत्त्वोत्कर्षेण घटगतमहत्त्वोत्कर्षस्य आनुभविकतया कपालमहत्त्वस्य तत्र अवश्यं हेतुतायाः वाच्यत्वात् । यत्र कपाले न प्रचयः तत्र प्रचयस्यापि हेतुत्वासंभवात् तत्र घटपरिमाणं कपालपरिमणमात्रजन्यम् इति भावः ।।

राजीवोल्लासः

ननु घटादिपरिमाणस्य कथं कपालादिपरिमाणमात्रजन्यत्वम् । कपालगतद्वित्व-संख्ययापि तज्जननात् इति शङ्कायां मात्रार्थम् उपपादयति – **अप्रचित** इत्यादिना । प्रशिथिलावयवसंयोगरहिताभ्यां महद्भ्यां कपालाभ्याम् आरब्धे घटे यत् महत्

परिमाणं दृश्यते, तत्र कपालगतद्वित्वसंख्या न कारणम् । द्वित्वसंख्यायाः महत्त्वाजनकत्वात् । अन्यथा परमाणुगतद्वित्वसंख्यया द्व्यणुकेऽपि महत्त्वोत्पत्त्यापत्तेः ।।

न च – उक्तापत्त्या द्वित्वत्वेन महत्त्वाजनकत्वेऽपि कपालगतद्वित्वत्वेन महत्त्वजनकत्वम् अस्तु, घटगतमहत्त्वं प्रति कपालगतमहत्त्वं कारणं वा, कपालगतद्वित्वं कारणं वा इत्यत्र विनिगमनाविरहात् इति – वाच्यम् । कपालगतमहत्त्वोत्कर्षेण घटगतमहत्त्वोत्कर्षस्य आनुभविकतया कपालमहत्त्वस्य घटमहत्त्वं प्रति हेतुताया आवश्यकत्वात् ।।

अपि च यत्र कपाले न प्रचयः तत्र प्रचयस्यापि हेतुत्वासंभवात् तत्र घट परिमाणं कपालपरिमाणमात्रजन्यम् इति समुदायार्थः ।।

कारिकावली

प्रचयः शिथिलाख्यः यः संयोगस्तेन जन्यते ।। ११२ ।।
परिमाणं तूलकादौ,....................

मुक्तावली

प्रचयजन्यम् उदाहर्तुं प्रचयं निर्वक्ति – प्रचय इति ।।

दिनकरी

मूले शिथिलाख्य इति । किञ्चिदवयवावच्छेदेन अवयवान्तरासंयोगिनि महत्यवयवे वर्तमानः संयोगः प्रचय इति एके ।।

अत्र महत्पदं न देयम्, परमाणुसंयोगस्य प्रचयत्वे क्षतिविरहात् इति अन्ये ।।

भूयोऽवयवावच्छेदेन अवयवान्तरासंयोगिनि अवयवे वर्तमानः संयोगः प्रचयः, तेन परमाणुसंयोगः द्व्यणुकसंयोगः वा न प्रचय इति अपरे ।।

अत्र प्रचयरहितैः त्रिभिः महावयवैः आरब्धस्य यत् महत्परिमाणम्, तत् संख्यापरिमाणोभयजन्यम्, महदवयवद्वयारब्धमहत्त्वात् अतिशयितत्वात्, अल्पत्र्यवयवारब्धमहत्त्वात् अतिशयितत्वाच्च ।।

प्रचिताभ्यां महावयवाभ्याम् आरब्धं यत् महत्परिमाणम् अतिशयितं तत् परिमाणप्रचयोभयजन्यम्, अप्रचितमहावयवारब्धमहत्त्वात्, प्रचिताल्पावयवारब्ध-महत्वाच्च अतिशयदर्शनात् ।।

प्रचितैः महद्भिः आरब्धस्य महत्परिमाणं संख्यापरिमाणप्रचयजन्यम्, प्रचितमहावयवद्वयारब्धमहत्त्वादपि तस्य उत्कृष्टत्वात् इति ध्येयम् ।।

दिङ्मात्रस्य मूले प्रदर्शितत्वात् इति अन्यत्र विस्तरः ।।

केचित्तु – ''दीर्घम्'' इति प्रतीतेः अवयवसंयोगविशेषेणैव उपपत्तेः दीर्घत्वं न परिमाणम् । अन्यथा वर्तुलत्वचतुरस्रत्वादीनां परिमाणान्तरत्वापत्तेः इति – आहुः ।।

राजीवोल्लासः

किंचिदवयवावच्छेदेन इति । किंचिदवयवावच्छेदेन यः अवयवान्तरसंयो-गाभावः तद्विशिष्टे महति अवयवे वर्तमानः संयोगः इत्यर्थः । **परमाणुसंयोगस्य प्रचयत्वे** इति । ननु परमाणोः अवयवाप्रसिद्ध्या किंचिदवयवावच्छेदेन परमाण्वन्तरसंयोगाभावः असंभवी इति कथं परमाणुसंयोगस्य प्रचयत्वम् ।।

न च – किंचिदवयवावच्छेदेन अवयवान्तरसंयोगि यद्यत् तत्तद्भिन्नम् इत्येव असंयोगिपर्यन्तस्यार्थः, इत्थं च परमाणोः अपि तद्भिन्नत्वम् अक्षतम्

इति – वाच्यम् । तूलाद्यवयवानां तद्भिन्नत्वासंभवेन तत्संयोगस्य प्रचयत्वानुपपत्त्या अवयवान्तरसंयोगाभाव एव किंचिदवयवावच्छिन्नत्वस्य निवेश्यत्वात् इति चेत्, न । ''किंचिदवयव''इत्यत्र अवयवपदं न समवायिपरम्, किं तु देशपरम् इत्याशयात् । इत्थं च परमाणोः एकस्य परमाण्वन्तरसंयोगे प्राच्यादेः अवच्छेदकत्वसंभवात् न अनुपपत्तिः इति प्राहुः ।।

मतान्तरेण प्रचयशब्दार्थम् आह – भूयोऽवयव इति । भूयोऽवयवावच्छेदेन यः अवयवान्तरसंयोगाभावः तद्विशिष्टे अवयवे वर्तमानः संयोगः प्रचयः । परमाणोः द्व्यणुकस्य बहुतरावयवाभावात् परमाणुसंयोगस्य द्व्यणुकसंयोगस्य च न प्रचयत्वम् इत्यर्थः । अत्र कल्पे अवयवपदं समवायिपरमेव इति अवधेयम् ।।

महदवयवद्वयारब्धमहत्त्वात् इत्यादि । एतदनुसारेण–

प्रचयरहितैः त्रिभिः महावयवैः आरब्धस्य यत् महत्परिमाणं तत् संख्यापरिमाणोभयजन्यम्, महदवयवद्वयारब्धमहत्त्वात् अतिशयितत्वात्, अल्पत्र्यवयवारब्धमहत्त्वात् अतिशयितत्वाच्च;

प्रचिताभ्यां महावयवाभ्याम् आरब्धं यत् महत्परिमाणम् अतिशयितं तत् परिमाणप्रचयोभयजन्यम्, अप्रचितमहावयवारब्धमहत्त्वात्, प्रचिताल्पावयवारब्धमहत्त्वाच्च अतिशयदर्शनात् इति च अनुमानद्वयं लभ्यते ।।

अत्र प्रथमानुमानेन महत्परिमाणस्य संख्यापरिमाणोभयजन्यत्वं, द्वितीयानुमानेन महत्परिमाणस्य परिमाणप्रचयोभयजन्यत्वं सिध्यति ।।

अथ तृतीयम् अनुमानम् – ''प्रचितैर्महद्भिः आरब्धस्य महत्परिमाणं संख्यापरिमाणप्रचयजन्यम्, प्रचितमहावयवद्वयारब्धमहत्त्वादपि तस्य उत्कृष्टत्वात्'' इति ।। अनेन संख्यापरिमाणप्रचयत्रितयजन्यत्वं महत्परिमाणस्य सिध्यति इति विवेकः ।।

दिङ्मात्रस्य मूले प्रदर्शितत्वात् इति । ननु त्र्यणुकोपादाने द्व्यणुके द्व्यणुकोपादाने परमाणौ च परिमाणसत्त्वे प्रमाणाभावः । त्र्यणुकमहत्त्वादिना कार्येण तत्र त्रित्वादिसंख्याया एव अनुमानात् इति चेत्, न । ''त्र्यणुकोपादानं तदुपादानं च परिमाणवत्, द्रव्यत्वात्, घटवत्'' इति अनुमानेन तत्सिद्धेः । न चायं हेतुः अप्रयोजकः । रूपादौ परिमाणाभावे द्रव्यभेदस्यैव प्रयोजकत्वे लाघवम् इति लाघवतर्कानुगृहीतत्वात् । तदेतदनुचिन्त्य उक्तम् – **अन्यत्र विस्तर इति** ।।

केचित्तु दीर्घम् इति । मुनिवचनाननुसारित्वमेव मतेऽस्मिन् अस्वर-सबीजम् । अपि च ''अवयवसंस्थानानुपलम्भेऽपि ''दूरात् दीर्घात्'' इत्यादिप्रत्ययस्य दर्शनात् चतुरश्रादिप्रत्ययादर्शनाच्च दीर्घत्वादिः परिमाणम् । चतुरश्रादिश्च अवयवसंस्थानविशेषः'' इति युक्तिमपि प्रादर्शयन् कन्दलीकाराः ।।

कारिकावली

.............नाशस्तु आश्रयनाशतः ।

मुक्तावली

परिमाणं च आश्रयनाशादेव नश्यति इति आह – **नाश इति** । **अर्थात्** परिमाणस्यैव ।।

न च – अवयविनाशः कथं परिमाणनाशकः, सत्यपि अवयविनि त्रिचतुरादिपरमाणुविश्लेषे तदुपचये वा अवयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्यैव प्रत्यक्षसिद्धत्वात् इति – वाच्यम् । परमाणुविश्लेषे हि द्व्यणुकस्य नाशः अवश्यम् अभ्युपेयः, तन्नाशे च त्र्यणुकनाशः । एवंक्रमेण महावयविनो नाशस्य

आवश्यकत्वात् । सति च नाशके अनभ्युपगममात्रेण नाशस्य अपलपितुम् अशक्यत्वात् । शरीरादौ अवयवोपचये समवायिकारणनाशस्य आवश्यकत्वात् अवयविनाशः आवश्यकः ।।

न च-पटादिनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं न स्यात् इति-वाच्यम् । तत्रापि वेमाद्यभिघातेन असमवायिकारणतन्तुसंयोगनाशात् पटनाशस्य आवश्यकत्वात् ।।

किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात्, तन्त्वन्तररूप-कारणाभावात् । तन्त्वन्तरस्य अवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् । तस्मात् तत्र तन्त्वन्तरसंयोगे सति पूर्वं पटनाशः, ततः पटान्तरोत्पत्तिः इति अवश्यं स्वीकार्यम् । अवयविनः प्रत्यभिज्ञानं तु साजात्येन दीपकलिकादिवत् ।।

न च – पूर्वतन्तव एव तन्त्वन्तरसहकारात् पूर्वपटे सत्येव पटान्तरम् आरभन्ताम् इति – वाच्यम् । मूर्तयोः समानदेशताविरोधात्, तत्र पटद्वयासंभवात् एकदा नानाद्रव्यस्य तत्र उपलम्भस्य वाधितत्वाच्च । तस्मात् पूर्वस्य द्रव्यस्य प्रतिवन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिः इत्यस्य अवश्यम् अभ्युपेयत्वात् ।।

दिनकरी

अर्थात् इति । प्रकरणात् इत्यर्थः । यद्वा अर्थात् परिशेषात् इत्यर्थः ।।

न च – परिशेषः असिद्धः । **रूपादेः अपि** आश्रयनाशनाश्यत्वात् इति – वाच्यम् । **आश्रयनाशतः** इति **मूलस्य आश्रयनाशमात्रात्** इत्यर्थकतया रूपादेः आश्रयनाशमात्रनाश्यत्वाभावेन परिशेषसंभवात् ।।

न च – **मूलस्य तादृशार्थकत्वे** प्रयोजनाभावः इति – वाच्यम् । क्रियाविभागादिक्रमेण यत्किंचिदवयवनाशेऽपि शरीरादिनाशस्य मीमांसकैः

अनभ्युपगतत्वात् तत्र परिमाणनाशस्य आनुभविकत्वाच्च आश्रयनाशमात्रनाश्यत्वस्य च परिमाणे तैः अनङ्गीकारात् तन्मतनिराकरणाय **मूलस्य** तादृशार्थकत्वात् इति ध्येयम् ।।

राजीवोल्लासः

अर्थशब्दस्य प्रकराणार्थकत्वं न अतिप्रसिद्धम् इति, अत आह **यद्वा** इति ।।

यद्वा प्रकरणस्य रूपादावपि तुल्यत्वात् आह–**यद्वा** इति । **परिशेषात्** इति । चतुर्विंशतिगुणेषु रूपादिगुणानाम् आश्रयनाशनाश्यत्वाभावात् परिशेषात् परिमाणस्यैव आश्रयनाशनाश्यत्वम् इति भावः । आश्रयनाशनाश्यत्वं नाम आश्रयनाशजन्यनाशप्रतियोगित्वम् । **रूपादेः अपि** इति । आश्रयस्य घटादेः नाशे तद्गतरूपादेः नाशात् इति भावः । **आश्रयनाशमात्रात्** इति । आश्रयनाशेतरानाश्यत्वे सति आश्रयनाशनाश्यत्वं विवक्षितम् । रूपादेस्तु आश्रयनाशेतरपाकनाश्यत्वम् इति भावः ।।

न च – तथापि जलरूपादेः आश्रयनाशमात्रनाश्यत्वम् अस्ति इति परशेषासिद्धिः । जले पाकात् रूपादेः अनाशात् इति – वाच्यम् । रूपत्वादेः आश्रयनाशभिन्ननाश्यवृत्तित्वेन इत्यर्थस्य विवक्षितत्वात् ।।

परिशेषसंभवात् इति । परिशेषाकारश्च इत्थम् – आश्रयनाशेतरजन्यनाश-प्रतियोग्यवृत्तिरूपादिपरिमाणान्तान्यतमवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्प्रतियोगिकनाशः परिमाणप्रतियोगिकः परिमाणान्याप्रतियोगिकत्वे सति सप्रतियोगिकत्वात् इति । पाकजरूपादिनाशः अत्र व्यतिरेकदृष्टान्तः । रूपादिप्रतियोगिकनाशे परिमाण-प्रतियोगिकत्वरूपसाध्याभावात् बाधः, तद्वारणाय पक्षतावच्छेदकघटकजातौ

अवृत्तित्वान्तं विशेषणम् । स्नेहत्वादिकम् आदाय स्नेहादिनाशे बाधवारणाय वृत्तित्वान्तम् । भास्वरत्वादिकम् आदाय बाधवारणाय गुणत्वसाक्षाद्व्याप्यत्वं जातिविशेषणम् ।।

मूलस्य इति । **आश्रयनाशतः** इति मूलस्य इत्यर्थः । **तादृशार्थकत्वे** इति । आश्रयनाशमात्रात् इत्यर्थकत्वे इत्यर्थः । **क्रियाविभागादिक्रमेण** इत्यादि । क्रिया, क्रियातो विभागः, ततः पूर्वदेशसंयोगनाशः, तत उत्तरदेशसंयोगः इति क्रमेण यत्किंचिदङ्गुल्यादिशरीरावयवनाशेऽपि शरीरनाशस्य मीमांसकैः अनभ्युपगमात्, तत्र शरीरे पूर्वतनपरिमाणनाशस्य दृश्यमानत्वाच्च आश्रयनाशमात्र-नाश्यत्वस्य परिमाणे तैः अनङ्गीकारात् तन्मतनिराकरणाय मूलस्य तादृशार्थकत्वम् इति भावः ।।

मुक्तावल्यां **''न च अवयविनाशः''** इत्यारभ्य **''अवश्यम् अभ्युपेयत्वात्''** इत्यन्तः ग्रन्थः प्रक्षिप्तः, दिनकरभट्टादिभिः अव्याख्याततत्वात्, **''न च मूलस्य''** इत्यादि दिनकरीयस्थशङ्कानुत्थितेश्च इति सुबोधिनीकाराः ।।

।। पृथक्त्वनिरूपणम् ।।

कारिकावली

संख्यावत्तु पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम् ।। ११३ ।।

मुक्तावली

पृथक्त्वं निरूपयति – **संख्यावत्** इति । पृथक्प्रत्ययासाधारणकारणं पृथक्त्वम् । तन्नित्यतादिकं संख्यावत् । यथाहि नित्येषु एकत्वं नित्यम्, अनित्येषु अनित्यम्, अनित्यम् एकत्वं तु आश्रयद्वितीयक्षणे च उत्पद्यते, आश्रयनाशात् नश्यति, तथा एकपृथक्त्वमपि । द्वित्वादिवच्च द्विपृथक्त्वादिकमपि इत्यर्थः ।।

दिनकरी

द्वितीयक्षणे च उत्पद्यते इत्यनन्तरं स्वाश्रयावयवगतैकत्वासमवायिकारणकं च इति **पूरणीयम्** । **एकपृथक्त्वम्** – **एकसमवेतपृथक्त्वम्** । **द्वित्वादिवच्च** इति । तथा च द्विपृथक्त्वादौ समानाधिकरणानि एकपृथक्त्वानि असमवायिकारणानि ''इदम् एकं पृथक्'', ''इदम् एकं पृथक्'' इति नानैकपृथक्त्वविषयिणी अपेक्षाबुद्धिः निमित्तकारणम् । तादृशबुद्धिनाशात् क्वचित् आश्रयनाशात् क्वचिदुभाभ्यां द्विपृथक्त्वं नश्यति इति भावः । अत्र उभयसमवेतं पृथक्त्वं द्विपृथक्त्वम् त्रितयसमवेतं पृथक्त्वं त्रिपृथक्त्वम् इति रीत्या बोध्यम् ।।

ननु ''घटौ पटात् पृथक्'' इत्यादिप्रतीतेः पटावधिकैकपृथक्त्वद्वयादिनापि उपपत्तेः उभयसमवेतपृथक्त्वादौ मानाभाव इति चेत्, न ।।

''घटौ पटात् पृथक्'' इति प्रतीत्या उभयसमवेतपृथक्त्वे सिद्धे तेनैव ''घटः पटात् पृथक्'' इति प्रतीत्युपपत्तेः एकपृथक्त्वे प्रमाणाभाव इत्यपि वक्तुं शक्यत्वात् । तस्मात् विनिगमनाविरहात् उभयमङ्गीकार्यम् ।।

राजीवोल्लासः

आश्रयद्वितीयक्षणे च उत्पद्यत इत्यत्र एकत्वस्य स्वाश्रयावयवगतैकत्वासमवायिकारणानुक्तेः एकपृथक्त्वस्यापि तद्दृष्टान्तेन स्वाश्रयावगतैकपृथक्त्वासमवायिकारणकत्वम् न सिध्येत् इत्यतः पूरयति – **पूरणीयम्** इति । तथा च अनित्यपदार्थेषु एकत्वं स्वाश्रयोत्पत्तिद्वितीयक्षणे स्वाश्रयस्य योऽवयवः तद्गतैकत्वरूपात् असमवायिकारणात् जायते इत्यर्थः । स्वम् – अनित्यपदार्थगतम् एकत्वम् ।।

एकपृथक्त्वादेः भाष्ये निराकरणात् आह – **एकपृथक्त्वम् एकसमवेतपृथक्त्वम्** इति । एकस्मिन् वस्तुनि समवायसंबन्धेन वर्तमानं पृथक्त्वम् इति

तदर्थः । ''अयमेकः पृथक्'', ''इमौ द्वौ पृथक्'' इत्यादौ सर्वत्र पृथक्त्ववत्त्वेन अनुगतरूपेणैव पृथक्त्वप्रत्ययः जायते । एकपृथक्त्वादिव्यवहारस्तु पृथक्त्वे एकत्वादिसंख्याविशेषसामानाधिकरण्यभानकृत इति भावः ।।

तथा च इत्यादि । उभयसमवेतं पृथक्त्वं द्विपृथक्त्वम्, त्रितयसमवेतम् पृथक्त्वं त्रिपृथक्त्वम् । द्विपृथक्त्वं प्रति द्विपृथक्त्वाश्रयद्रव्यवृत्ति एकपृथक्त्वद्वयम् असमवायिकारणम् । ''इदमेकं पृथक्'', ''इदमेकं पृथक्'' इति एकपृथक्त्वद्वयविषयिणी अपेक्षाबुद्धिः निमित्तकारणम् । क्वचित् अपेक्षाबुद्धिनाशात् क्वचिदाश्रयनाशात् क्वचित् उभाभ्यां उक्तनाशाभ्याम् द्विपृथक्त्वम् नश्यति । एवं त्रिपृथक्त्वादावपि द्रष्टव्यम् ।।

ननु घटौ इत्यादि । ''घटौ पटात् पृथक्'' इत्यादिप्रतीतिर्हि द्विपृथक्त्वे प्रत्येकसमवेतपृथक्त्वाभ्याम् अतिरिक्ते उभयसमवेतपृथक्त्वे प्रमाणम् । सा च प्रतीतिः प्रत्येकसमवेताभ्यां पृथक्त्वाभ्यामेव निर्वहति इति तदतिरिक्ते उभयसमवेतपृथक्त्वे प्रमाणाभावः इति शङ्का ।।

समाधत्ते – घटौ इति । ''घटौ पटात् पृथक्'' इति प्रतीत्या उभयसमवेतम् पृथक्त्वं सिध्यति । तेनैव ''घटः पटात् पृथक्'' इति प्रतीतेः उपपत्तौ एकत्वे प्रमाणाभाव इत्यपि वक्तुं शक्यते । अतः विनिगमनाविरहात् प्रत्येकसमवेतं पृथक्त्वं उभयसमवेतम् पृथक्त्वं च भिन्नं स्वीकरणीयम् इति भावः । एकपृथक्त्वद्वया-दिना इति । ''इमौ शुक्लौ'' इत्यादिप्रतीतेः यथा शौक्ल्यद्वयाद्यवगाहितया उपपत्तिः तद्वत् इति भावः । तेनैव इति । द्विपृथक्त्वस्य समवायेन प्रत्येकवृत्तित्वात् इति भावः ।।

न च एकपृथक्त्वानङ्गीकारे द्विपृथक्त्वस्य असमवायिकारणम् किम् इति शङ्कनीयम् । परमते एकपृथक्त्वद्वये यत् असमवायिकारणम् स्वाश्रयावयवगतम्

एकत्वं तदेव द्विपृथक्त्वस्यापि असमवायिकारणम् इति सुवचत्वात् । एवं द्विपृथक्त्वावगाहने समानेऽपि "घटः पटात् पृथक्" इति बुद्धिः न अपेक्षाबुद्धिम् अपेक्षते, अपेक्षते तु तां "घटौ पटात् पृथक्" इति बुद्धिः । अपेक्षाबुद्धिनाशाच्च न द्विपृथक्त्वस्य नाशः, किं तु प्रत्यक्षविशेषस्यैव । समानम् एतत् सर्वम् एकपृथक्त्वमात्राङ्गीकर्तुः अपि इति सुबोधिनीकाराः ।।

कारिकावली

अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ।
अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ।। ११४ ।।

मुक्तावली

ननु "अयम् अस्मात् पृथक्" इत्यादौ अन्योन्याभाव एव भासते । तत् कथं पृथक्त्वं गुणान्तरं स्वीक्रियते? न च – अस्तु पृथक्त्वम्, न तु अन्योन्याभाव इति – वाच्यम् । "रूपं न घटः" इति प्रतीत्यनापत्तेः ।।

न हि रूपे घटावधिकं पृथक्त्वं गुणान्तरम् अस्ति, न वा घटे घटावधिकं पृथक्त्वमस्ति, येन **परम्परासंबन्धः कल्प्यत** इति, अत आह – **अन्योन्याभावत** इति ।।

विलक्षणा इति । ननु शब्दवैलक्षण्यमेव, न तु अर्थवैलक्षण्यम् इति चेत्, न – विना अर्थभेदं "घटात् पृथक्" इतिवत् "घटो न पटः" इत्यत्रापि **पञ्चमीप्रसङ्गात्** । तस्मात् यदर्थयोगे पञ्चमी सोऽर्थः नञर्थान्योन्याभावतः भिन्नः गुणान्तरं कल्प्यत इति ।।

दिनकरी

परम्परासंबन्धः कल्प्यत इति । सामानाधिकरण्यरूपपरम्परासंबन्ध विषयकत्वम् उक्तप्रतीतेः कल्प्यम् इत्यर्थः ।।

इदम् उपलक्षणम् । प्रतीतेः सामानाधिकरण्यरूपपरम्परासंबन्धविषयकत्वम् अङ्गीकृत्य अन्योन्याभावानङ्गीकारे ''एतद्घटरूपम् एतद्घटात् पृथक्'' इति प्रतीत्यनुपपत्तेः, ''एतद्रूपम् एतद्रूपात् पृथक्'' इति प्रतीत्यापत्तेश्च । **अन्योन्याभावस्य अतिरिक्तस्य** अभ्युपगमे तु पृथक्त्वपदस्य अन्योन्याभावलक्षणया सर्वम् उपपादनीयम् इति ।।

पञ्चमीप्रसङ्गात् इति । अन्योन्याभावार्थकपदयोगस्य पञ्चमी प्रयोजकस्य तत्र सत्त्वात् इति भावः ।।

अत्र नव्याः – अन्योन्याभाव एव पृथक्त्वम्, न तु गुणान्तरम् । न च ''घटो न'' इत्यत्र पञ्चम्यापत्तिः, अन्योन्याभावविशिष्टार्थकपदयोग एव ''अन्यारादितरर्ते'' इत्यादिसूत्रेण पञ्चमीविधानात् । नञस्तु न अन्योन्याभावविशिष्टार्थकत्वम्, परन्तु अन्योन्याभावार्थकत्वम् इत्यस्य **अन्यत्र सिद्धान्तितत्वात्** । यदि च ''घटाद्भेदः'' इत्यादौ पञ्चम्यनुपपत्त्या भेदार्थपदयोगः पञ्चमीप्रयोजकतया ''अन्यारात्...'' इति सूत्रेण बोध्यत इति ''घटो न'' इत्यत्र पञ्चम्यापत्तिः दुर्वारा इति विभाव्यते, तथापि निपातातिरिक्तान्योन्याभावार्थक-पदयोगस्यैव पञ्चमीप्रयोजकत्वं कल्प्यते, अनुशासनस्य प्रयोगानुरोधित्वात् इति – आहुः ।।

राजीवोल्लासः

ननु – ''अयमस्मात् पृथक्'' इति प्रतीतौ अन्योन्याभाव एव विषयः न तु तदतिरिक्तः पृथक्त्वाख्यो गुणः । न च – अस्तु पृथक्त्वं, मास्तु

अन्योन्याभाव इति – वाच्यम् । तथा सति ''रूपं न घट'' इति प्रतीत्यनापत्तिः । रूपे घटावधिकपृथक्त्वस्य अभावेन तादृशप्रतीतेः पृथक्त्वविषयकत्वासंभवात् । न च – घटावधिकं पृथक्त्वं सामानाधिकरण्यसंबन्धेन रूपे अस्ति इति – वाच्यम् । घटे स्वावधिकपृथक्त्वाभावेन तद्वृत्तिरूपे सामानाधिकरण्येन पृथक्त्वाभावात् इति मुक्तावल्याम् उक्तम् । मुक्तावलीस्थपरंपरासंबन्धपदस्य सामानाधिकरण्यरूपसंबन्धपरत्वात् ।।

एवमपि ''रूपं न घट'' इत्यत्र यत्किंचिद्घटावधिकपृथक्त्वस्य सामानाधिकरण्यसंबन्धेन घटान्तरवृत्तिरूपे भानात् न अनुपपत्तिः इति शङ्कायाम् आह दिनकर्याम् इदमुपलक्षणम् इति । प्रतीतेः इति । ''रूपं न घट'' इत्यादिप्रतीतेः सामानाधिकरण्यसंबन्धेन यत्किंचिद्घटावधिकपृथक्त्वविषयकत्वम् अङ्गीकृत्य अन्योन्याभावापलापे ''एतद्घटरूपम्, एतद्घटात् पृथक्'' इति प्रतीतेः अनुपपत्तिः । एतद्घटे एतद्घटावधिकपृथक्त्वस्य अभावेन एतद्घटवृत्तिरूपे सामानाधिकरण्यसंबन्धेनापि एतद्घटावधिकपृथक्त्वस्य अभावात् इति भावः ।।

ननु एतद्घटरूपे एतद्घटावधिकपृथक्त्वस्य कालिकसंबन्धेन वा स्वाश्रयसमवेतसमवेतत्वसंबन्धेन वा सत्त्वात् ''एतद्घटरूपम् एतद्घटात् पृथक्'' इति प्रतीतेः नानुपपत्तिः । स्वं–एतद्घटावधिकपृथक्त्वं तदाश्रयः एतद्घटावयवः तत्समवेतः – एतद्घटः, तत्समवेतत्वं एतद्रूपे इति आशङ्क्य आह – एतद्रूपम् एतद्रूपात् पृथक् इति । एतद्रूपे एतद्रूपावधिकपृथक्त्वस्य अन्यत्र विद्यमानस्य कालिकसंबन्धेन सत्त्वात्, एतद्रूपावधिकपृथक्त्वाश्रय – एतद्घटावयवसमेवत – एतद्घटसमवेतत्वस्य एतद्रूपे सत्त्वाच्च ''एतद्रूपम् एतद्रूपात् पृथक्'' इति प्रतीतिप्रसङ्ग इति भावः । तथा च अन्योन्याभावोऽतिरिक्तः अङ्गीकार्यः ।।

न च – तर्हि ''एतद्घटरूपम् एतद्घटात् पृथक्'' इति प्रतीतिः कथम् उपपादनीया, गुणे गुणानङ्गीकारेण रूपे पृथक्त्वरूपगुणाभावात् इति – वाच्यम् । तत्रत्यपृथक्पदस्य अन्योन्याभावलाक्षणिकत्वात् एतद्घटरूपे एतद्घटान्योन्याभावस्य सत्त्वेन तादृशप्रतीतेः उपपत्तेः । एतद्रूपे एतद्रूपान्योन्याभावस्य असत्त्वेन ''एतद्रूपम् एतद्रूपात् पृथक्'' इति प्रतीतिश्च न प्रसजति । तदेतदभिप्रेत्य आह – **अन्योन्याभावस्य अतिरिक्तस्य** इति ।।

मुक्तावल्याम् – पृथक्पदयोगे ''अयमस्मात् पृथक्'' इति, पञ्चमीविभक्तिः दृश्यते । नञ्पदयोगे तु ''घटः पटो न'' इति प्रथमाविभक्तिरेव प्रयुज्यते, न, पञ्चमी । अतः नञर्थः अन्यः, पृथक्पदार्थोऽन्यः । तस्मात् यदर्थकशब्दयोगे पञ्चमी सोऽर्थः नञर्थान्योन्याभावात् अतिरिक्तः पृथक्त्वाख्यो गुण इत्युक्तम् ।।

पृथक्त्वाख्यगुणानङ्गीकारे अन्योन्याभावार्थकपृथक्पदयोग इव तदर्थकनञ्-योगेऽपि पञ्चमी स्यात् । ''अन्यारादितरर्ते'' इत्यादिसूत्रेण अन्योन्याभावार्थकपदयोगे पञ्चम्या अनुशासनात् इत्याशयेन आह **दिनकर्यां अन्योन्याभावार्थक** इति । ''अन्यारादितरर्ते'' इति सूत्रे इतरग्रहणवैयर्थ्यपरिहाराय अन्यपदम् अन्योन्याभावार्थकम् । इतरपदम् अन्योन्याभावविशिष्टार्थकम् इत्यभ्युपगन्तव्यत्वात् इत्याशयः ।।

पृथक्त्वरूपगुणाङ्गीकारे तु अन्यपदं पृथक्त्वविशिष्टार्थकमिति न नञ्पदयोगे पञ्चम्यापत्तिः । ''पृथग्विनानानाभिस्तृतीयान्यतरस्याम्'' इति सूत्रे पृथक्पदं तु वैकल्पिकतृतीयासिद्ध्यर्थम् इति च ज्ञेयम् ।।

अत्र नव्या इत्यादि **आहुः** इत्यनेन अन्वयः । अन्योन्याभाव एव पृथक्त्वम्, न अतिरिक्तः गुणः । न च – ''घटः पटो न'' इत्यत्र पञ्चम्या-पत्तिः । अन्योन्याभावार्थकनञ्योगसत्त्वात् इति – वाच्यम् । अन्योन्याभाव-

विशिष्टार्थकान्यादिपदयोग एव ''घटादन्य'' इत्यादौ पञ्चम्याः सूत्राभिप्रेतत्वात् । नञस्तु नान्योन्याभावविशिष्टार्थकत्वम्, अपि तु अन्योन्याभावार्थकत्वम् । अतः ''घटः पटो न'' इत्यादौ न पञ्चमी । पृथक्पदस्य तु अन्योन्याभावविशिष्टार्थकत्वात् तद्योगे ''घटः पटात् पृथक्'' इत्यादौ पञ्चमी उपपद्यते । तर्हि सूत्रे इतरपदं व्यर्थम् इति न शङ्क्यम् । तस्य प्रपञ्चार्थत्वात् इति भावः । **अन्यत्र सिद्धान्तितत्वात्** इति । लाघवान्नञः भेदत्वविशिष्टे शक्तिः, ननु भेदविशिष्टे इति **नञ्वाददीधितौ** सिद्धान्तितत्वात् इत्यर्थः ।।

यदि च इत्यादि । ''अन्यारादितरर्ते'' इति सूत्रेण अन्योन्याभावविशिष्टार्थकपदयोग एव पञ्चमी इत्युच्यते चेत् ''पटस्य घटाद्भेद'' इत्यत्र भेदशब्दयोगे पञ्चमी न स्यात्; भेदशब्दस्य अन्योन्याभाववाचकत्वेन तद्विशिष्टवाचकत्वाभावात् । अतः तत्र पञ्चमीसमर्थनाय भेदार्थकपदयोग एव पञ्चमी निमित्ततया सूत्राभिप्रेत इति वक्तव्यम् । एवं सति ''घटः पटो न'' इत्यत्रापि पटपदोत्तरं पञ्चमी स्यात्, भेदार्थकनञ्योगसद्भावात् इति यद्याशङ्क्यते, तदेत्थं समाधेयम् – निपातातिरिक्तान्योन्याभावार्थकपदयोग एव पञ्चम्याः निमित्तम् । भेदपदस्य निपातातिरिक्तत्वात् तद्योगे ''घटात् भेद'' इत्यादौ पञ्चम्याः उपपत्तिः । नञस्तु निपातत्वात् तद्योगे ''घटः पटो न'' इत्यादौ न पञ्चमी इति । प्रयोगानुरोधित्वात् अनुशासनस्य । ''प्रयुक्तानामिदमन्वाख्यानम्'' इति **महाभाष्यकारेण** उक्तत्वात् इति भावः । ''घटात् भेद'' इत्यादौ अपादानपञ्चम्यैवोपपत्तिः इत्यस्वरसं सूचयितुं यदि च इत्युक्तम् । तथा च अन्योन्याभावविशिष्टार्थकपदयोग एव पञ्चमी अनुशासनसंमता । अतः ''घटः पटो न'' इत्यादौ न पञ्चमी । पृथक्पदस्य अन्योन्याभावविशिष्टार्थकत्वात् तद्योगे पञ्चमी उपपद्यते । अतः न पृथक्त्वं गुणान्तरम् इति **नव्यानाम्** आशयः ।।

।। संयोगनिरूपणम् ।।

कारिकावली

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।
कीर्तितः त्रिविधस्त्वेषः, आद्योऽन्यतरकर्मजः ।। ११५ ।।

तथोभयक्रियाजन्यो भवत्संयोगजोऽपरः ।
आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः ।। ११६ ।।

मेषयोः संनिपातो यः स द्वितीय उदाहृतः ।
कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ।। ११७ ।।

तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः ।
अभिघातो नोदनं च, शब्दहेतुरिहादिमः ।। ११८ ।।

शब्दाहेतुः द्वितीयः स्यात्............

मुक्तावली

संयोगं निरूपयति – अप्राप्तयोः इति । तं विभजते – कीर्तित इति । एषः – संयोगः । सन्निपातः – संयोगः । द्वितीयः – उभयकर्मजः । तृतीय इति । संयोगजसंयोग इत्यर्थः । तृतीयः स्यात् इति पूर्वेण अन्वितम् । आदिमः – अभिघातः । द्वितीयः – नोदनाख्यः संयोग इति ।।

दिनकरी

मूले अप्राप्तयोः इत्यादिना संयोगस्वरूपम् उक्तम् । तत्र प्राप्तिः संबन्धः । स च समवायोऽपि इति अत उक्तम् – अप्राप्तयोः इति । लक्षणं तु संयोगत्वं जातिः इति ।।

मूले आद्योऽन्यतरकर्मज इति । ननु संयोगत्वं न अन्यतरकर्मणः कार्यतावच्छेदकम्, उभयकर्मजसंयोगे संयोगजसंयोगे च व्यभिचारात् इति चेत्, न । विजातीयकर्मत्वेन विजातीयसंयोगत्वेन समवायेन हेतुहेतुमद्भावात् उभयकर्मजसंयोगादौ च तादृशवैजात्याभावेन व्यभिचाराभावात् । एवम् उभयकर्मणः संयोगस्यापि च संयोगं प्रति हेतुत्वं बोध्यम् ।।

राजीवोल्लासः

परममूले – **अप्राप्तयोस्तु या प्राप्तिः** इति । अप्राप्तयोः इत्यस्य संबन्धात् पूर्वं विद्यमानयोरपि असंबद्धयोः इत्यर्थः । अवयव्यादीनाम् उत्पत्तिसमय एव अवयवादिषु समवायसंबन्ध इति समवायस्य न अप्राप्तप्रतियोग्यनुयोगिकत्वम् । एवं कालिकादिस्वरूपस्यापि इति न तेषु अतिव्याप्तिः ।।

यद्यपि भूतलघटाभावयोः अप्राप्तयोः एव तत्तत्कालघटितस्वरूपसंबन्धविशेष इति न तन्निरासः, तथापि भावयोः इति विशेषणात् तद्व्युदासः । गोनिष्ठाश्वत्वाभावादिवारणाय प्राप्तिः इति । संबन्ध इत्यर्थः । अस्य लक्षणत्वसंभवेऽपि लाघवम् अभिसन्धाय उक्तं दिनकर्यां – **लक्षणं तु संयोगत्वं जातिः** इति ।।

ननु संयोगत्वम् इत्यादि । संयोगत्वावच्छिन्नं प्रति अन्यतरकर्मणः कारणत्वं न संभवति । अन्यतरकर्माभावेऽपि उभयकर्मणा संयोगेन च संयोगस्य जायमानतया व्यतिरेकव्यभिचारात् । एवम् उभयकर्मणोऽपि हेतुत्वं न संभवति, उक्तरीत्या व्यभिचारात् इति शङ्का ।।

संयोगत्वावच्छिन्नं प्रति अन्यतरकर्मादीनां न हेतुत्वम् । किं तु विजातीयसंयोगत्वावच्छिन्नं प्रति । त्रिषु संयोगेषु परस्परासमानाधिकरणानि वैजात्यानि स्वीकृत्य तादृशवैजात्यावच्छिन्नकार्यतानिरूपितकारणत्वम् अन्यतरकर्मादीनां स्वीक्रियते । अतो न व्यतिरेकव्यभिचार इति भावः । तथा

च समवायेन विजातीयसंयोगं प्रति समवायेन विजातीयम् अन्यतरकर्म कारणम्, विजातीयम् उभयकर्म कारणं, विजातीयसंयोगः कारणम् इति त्रयः कार्यकारणभावा भवन्ति, तृणारणिमणिन्यायात् इति भावः । वैजात्यं कार्यतायां कारणतायां च अवच्छेदकम् ।।

ननु कुतो न एतेषाम् संयोगगतानां वैजात्यानाम् प्रत्यक्षम् इति चेत्, न । तृणादिजन्यतावच्छेदकवैजात्यानाम् इव एतेषाम् प्रत्यक्षम् प्रति तादात्म्येन प्रतिबन्धकत्वात् । यद्वा नोदनत्वाभिघातत्वयोः प्रत्यक्षे वेगाभाववेगयोः प्रत्यक्षं यथा सहकारि, तथा प्रकृतवैजात्यानां प्रत्यक्षेऽपि अन्यतरकर्मादिसाक्षात्कारस्य सहकारित्वाङ्गीकारात् न तेषां प्रत्यक्षम् इति ।।

दिनकरी

मूले भवेत् संयोगजोऽपर इति । ननु संयोगजसंयोगे मानाभावः । यत्र कपालक्रियया कपालतरुसंयोगः ततः कुम्भतरुसंयोगः, तत्र कपालक्रियाया एव कुम्भतरुसंयोगं प्रति कारणत्वम्, न तु कपालतरुसंयोगस्य इति चेत्, न–

समवायेन संयोगं प्रति समवायेन क्रियायाः कारणत्वात् कुम्भे समवायेन क्रियाया अभावेन कुम्भे तरुसंयोगानुपपत्तेः, क्रियायाः सामानाधिकरण्यसंबन्धेन हेतुत्वान्तरकल्पनापेक्षया समवायेन संयोगस्यैव हेतुत्वकल्पनौचित्यात् ।

वस्तुतः यत्र कपालक्रियया कपालान्तरेण तरुणा च एकस्मिन् क्षणे संयोगः, तदुत्तरक्षणे घटोत्पत्तिः कपालक्रियानाशश्च, नाशकस्य उत्तरसंयोगस्य पूर्वं सत्त्वात्, तदुत्तरक्षणे कुम्भतरुसंयोगानुपपत्तिः, पूर्वक्षणे कपालक्रियायाः नाशात् । तस्मात् कपालसंयोग एव तत्र कारणम् इति संयोगजसंयोगसिद्धिः निराबाधैव इति ।।

अत्र केचित् – कथं संयोगस्य त्रैविध्यम् । अन्यतरकर्मजन्यसंयोगस्य अप्रसिद्धेः । यत्र इषुक्रियया इषुवृक्षयोः संयोगः, तत्र संयोगाधिकरणे वृक्षे क्रियाविरहेण

व्यभिचारात्, अन्यतरकर्मणः संयोगं प्रति कारणत्वस्य वक्तुम् अशक्यत्वात् इति – आहुः ।।

तन्न । कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किञ्चिद्व्यक्त्यधिकरणीभूतयावद्व्यक्तिवृत्तिकाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव **कारणताघटकम्** । एवं च कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किंञ्चिद्व्यक्त्यधिकरणयावद्व्यक्तिषु कारणाभाववत्त्वमेव व्यभिचारः । न च एवंविधः व्यभिचारः प्रकृते, इषोरपि तादृशयावदन्तर्गततया तत्र क्रियाभावासत्त्वात् इति दिक् ।।

ननु एवं यत्र हस्तक्रिया, ततः द्वितीयक्षणे शरीरक्रिया, तत्र चतुर्थक्षणे हस्ततरुसंयोगः, तस्मिन्नेव क्षणे शरीरक्रियाजन्यशरीरपूर्वदेशसंयोगनाशः, तदुत्तरक्षणे शरिरतरुसंयोगः जायते, तस्य च हस्ततरुसंयोगजन्यत्वं शरीरक्रियाजन्यत्वं वा इत्यत्र विनिगमनाविरहः ।।

न च उभयमेव तत्र हेतुः, जातिसङ्करप्रसङ्गात् इति चेत्, न । तत्र संयोगद्वयस्यैव उपगमात् । द्वित्वाग्रहस्तु सादृश्यदोषात् इति एके ।

तत्र चित्रसंयोग एव उत्पद्यते । कारणत्वं तु तत्र संयोगकर्मोभयत्वेन इति चित्रसंयोगः विजातीय एव इति न साङ्कर्यम् इति अपरे, इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

ततः कुम्भतरुसंयोग इति । तस्मिन्नेव क्षणे कुम्भतरुसंयोग इत्यर्थः, न तु तदनन्तरम् इत्यर्थः । तदानीम् कपालक्रियानाशेन असमवायिकारणत्वस्य कपालक्रियायाम् असंभवात् । न च – क्रियायाः संयोगजनकत्वे पूर्ववृत्तित्वमेव अपेक्षितम्, न तु कार्यकालवृत्तित्वम् इति – वाच्यम् । कपालतरुसंयोगक्षण

एव पूर्वं कारणसत्त्वेन कुम्भतरुसंयोगस्यापि संभवात्, अनन्तरक्षणपर्यन्तानुधावनस्य अनुपपन्नत्वात् । अतः ततः **कुम्भतरुसंयोग** इत्यस्य तस्मिन्नेव क्षणे कुम्भतरुसंयोग इत्येवार्थः । तथा च कपालक्रिययैव कपालतरुसंयोगक्षणे कुम्भतरुसंयोगस्यापि संभवात् कपालतरुसंयोगस्य कुम्भतरुसंयोगम् प्रति कारणत्वाभावात् संयोगजसंयोगः अप्रामाणिक इति प्रष्टुः आशयः ।।

समाधत्ते – **समवायेन** इति । क्रियायाः संयोगं प्रति हेतुत्ववादिना समवायेन संयोगं प्रति समवायेन क्रिया कारणम् इति कार्यकारणभावः वक्तव्यः । तथा च कुम्भे क्रियायाः समवायेन अभावे कथं तत्र तरुसंयोगः संभवेत् ? अतः कपालक्रियाजन्यः कपालतरुसंयोग एव कुम्भतरुसंयोगं प्रति असमवायिकारणम् इति वक्तव्यतया संयोगजसंयोगोऽपि अवश्यम् स्वीकरणीय इति भावः ।।

ननु कुम्भतरुसंयोगं प्रति कपालक्रिया एकाधिकरणवृत्तित्वसंबन्धेन कारणम् । समवायेन कुम्भतरुसंयोगः कुम्भे वर्तते, तत्रः कपालगतक्रिया एकाधिकरणवृत्तित्वसंबन्धेन वर्तते । कपालक्रियाकुम्भयोः कपालरूपैकाधिकरण-वृत्तित्वात् इति चेत्, न । तथा सति कार्यकारणभावाधिक्यस्य अवर्जनीयत्वात् । तथा हि – कपाले समवायेन तरुसंयोगं प्रति समवायेन कपाले क्रिया कारणम् इत्येकः कार्यकारणभावः । कुम्भे तरुसंयोगम् प्रति कपालक्रिया स्वाधिकरणवृत्ति-त्वसंबन्धेन कारणम् इत्यपरः कार्यकारणभावः । एतदपेक्षया कुम्भतरुसंयोगम् प्रति कपालतरुसंयोगः कारणम् इति कल्पनमेव युक्तमिति भावः ।।

ननु तवापि संयोगगतवैजात्ये संयोगकारणतावच्छेदकत्वम् कल्प्यम् इति गौरवम् इति, अत आह – **वस्तुत** इति ।।

अत्र केचित् इत्यादि । अन्यतरकर्मजः संयोग एव नास्ति । अतः तद्घटितम् विधात्रयम् संयोगस्य नास्ति । तथाहि – इषुतरुसंयोगम् प्रति

इषुतर्वन्यतरेषुगतक्रिया कारणम् इति हि अन्यतरकर्मजसंयोगस्य उदाहरणम् । तत्रापि व्यतिरेकव्यभिचारः भवति । यत्र इषुक्रियया इषुतर्वोः संयोगः, तत्र संयोगस्य द्विनिष्ठत्वेन संयोगाधिकरणे वृक्षे इषुगतक्रियाया अभावेन व्यतिरेक-व्यभिचारः । अतः अन्यतरकर्मणः संयोगम् प्रति हेतुत्वम् असंभवि इति केचित् आहुः ॥

तन्न । कारणत्वं नाम कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किंचिद्व्यक्त्यधिकरणीभूतयावद्व्यक्तिवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् । एतदनुसारेण व्यतिरेकव्यभिचारो नाम कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किंचिद्व्यक्त्यधिकरणीभूतयावद्व्यक्तिवृत्त्यत्यन्ताभावप्रतियोगित्वम् । एतादृशः व्यतिरेकव्यभिचारः प्रकृते न संभवति । इषुतरुसंयोगत्वं इषुतरुसंयोगगतवैजात्यम् वा कार्यतावच्छेदकम्, तदवच्छिन्नेषुतरुसंयोगव्यक्त्यधिकरणयावदन्तर्गते इषौ क्रियायाः सत्त्वेन तत्र क्रियाभावः न संभवति इति अन्य एव अभावः, तद्वृत्तिः तत्प्रतियोगित्वस्य इषुक्रियायाम् अभावात् । तथा च उक्तव्यतिरेकव्यभिचाराभावात् इषुक्रियायाः इषुतरुसंयोगम् प्रति कारणत्वं संभवतीति घट्टार्थः ॥

अत्र तद्घटम् प्रत्यन्यथासिद्धत्वेऽपि घटत्वावच्छिन्नम् प्रति अनन्यथासिद्धत्वेन सिद्धान्तितस्य रासभस्य घटत्वावच्छिन्ननिरूपितकारणत्वापत्तिः । रासभाभावस्य घटत्वावच्छिन्नयावद्व्यक्त्यन्तर्गत, रासभसमानाधिकरणघटव्यक्त्यधिकरणे वृत्तित्वाभावात् । अतः यत्किंचित् इति । इत्थम् च रासभासमानाधिकरणघटव्यक्तिमादाय रासभे नैयत्यभङ्गात् व्यभिचारः सुवचः ॥

कारणताघटकम् इति । कारणत्वस्य अनन्यथासिद्धत्वघटितत्वात् घटकम् इत्युक्तम् । तथा च कारणत्वघटकम् नियतपूर्ववृत्तित्वम् उक्तरूपम् इति भावः ॥

जातिसंकरप्रसङ्गात् इति । क्रियाजन्यतावच्छेदकस्य संयोगजन्यता-वच्छेदकस्य च वैजात्यस्यैकत्र समावेशसम्भवात् इति भावः । चित्रसंयोगो विजातीय एव इति । तथा च संयोगश्चतुर्विध इति तदाशयः ।।

इदमत्रालोचनीयम् – क्रियायाः व्याप्यवृत्तित्वम्, सत्यां क्रियायां क्रियान्तरम् न उत्पद्यते इति च सिद्धान्तात् हस्तक्रियोत्पत्तिद्वितीयक्षणे शरीरक्रियोत्पत्तिः न संभवति । शरीरक्रियायाम् उत्पद्यमानायाम् सर्वावयवेषु क्रियोत्पत्तेः आवश्यकत्वात्, हस्ते च तदानीम् क्रियोत्पत्तेः असंभवात् ।।

न च – क्रियाया व्याप्यवृत्तित्वम् न समानकालोत्पन्नक्रियावत्सर्वावयवा-वच्छेद्यत्वम्, किं तु क्रियावत्सर्वावयवावच्छेद्यत्वमेव । तच्च पूर्वोत्पन्नक्रियाया हस्ते सत्त्वादेव उपपद्यत इति – वाच्यम् ।। शरीरतरुसंयोगोत्पत्तिक्षणे हस्तक्रियानाशः शरीरक्रिया च वर्तत इति व्याप्यवृत्तित्वभङ्गस्य अपरिहारात् । अतः पूर्वहस्तक्रियानाशानन्तरमेव शरीरे तदीयनिखिलावयवेषु च क्रिया जायते इति अभ्युपेयम् । इत्थं च न सामग्री-संवलनमिति ।।

यदि च अविनश्यदवस्थापन्नक्रियाया एव व्याप्यवृत्तित्वनियम इत्युच्यते, तदा संभवेदेव दर्शितसामग्रीसंवलनम् इति ध्येयम् । एकस्मात् संयोगात् द्वाभ्यां बहुभ्यश्च एकः संयोगजसंयोगो भवति । एकस्मात् संयोगात् द्वयोः संयोगयोः उत्पत्तिः भवति । एवं संयोगजाभ्यां संयोगाभ्याम् एकः संयोगो भवति । नित्यः संयोगो नास्तीत्यादिकम् भाष्यादितः अवगन्तव्यम् इति ज्ञापयितुम् अन्यत्र विस्तर इत्युक्तम् इति सुबोधिनीकाराः ।।

।। विभागनिरूपणम् ।।

कारिकावली

.... विभागोऽपि त्रिधा भवेत् ।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ।। ११९ ।।

विभागजः तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थः हेत्वहेतुविभागजः ।। १२० ।।

मुक्तावली

विभक्तप्रत्ययासाधारणकारणं विभागं निरूपयति – विभाग इति । एककर्म इति । तदुदाहरणं तु श्येनशैलविभागादिकं पूर्ववत् बोध्यम् । तृतीयोऽपि विभागजविभागः कारणमात्रविभागजन्यः, कारणाकारणविभागजन्यश्च इति द्विविधः ।।

आद्यः तावत् यत्र एककपाले कर्म, ततः कपालद्वयविभागः, ततः घटारम्भकसंयोगनाशः, ततः घटनाशः, ततः तेनैव सकर्मणः कपालस्य आकाशविभागः जन्यते, ततः आकाशसंयोगनाशः, ततः उत्तरदेशसंयोगः, ततः कर्मनाशः इति ।।

न च – तेन कर्मणैव कथं देशान्तरविभागः न जन्यत इति – वाच्यम् । एकस्य कर्मणः आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात् । अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् । तस्मात् यदि इदम् अनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्, तदारम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत् ।।

न च – **कारणविभागेनैव पूर्वं कुतः** देशान्तरविभागः न जन्यत इति – वाच्यम् । आरम्भकसंयोगप्रतिद्वन्द्विविभागवतः अवयवस्य सति द्रव्ये **देशान्तरविभागासंभवात्** ।।

द्वितीयः तावत् यत्र हस्तक्रियया हस्ततरुविभागः ततः शरीरेऽपि क्वचित् विभक्तप्रत्ययः भवति । तत्र शरीरतरुविभागे हस्तक्रिया न कारणम्, व्यधिकरणत्वात् । शरीरे तु क्रिया नास्त्येव, अवयविकर्मणः **यावदवयवकर्मनियतत्वात्** । अतः तत्र कारणाकारणविभागेन कार्याकार्यविभागः जन्यत इति । **अत एव** विभागः गुणान्तरम्, अन्यथा **शरीरे विभक्तप्रत्ययः न स्यात्** । **अतः** संयोगनाशेन विभागः न अन्यथासिद्धः भवति ।।

दिनकरी

पूर्ववत् इति । संयोगवत् इत्यर्थः । **तेनैव** इति । कपालविभागेनैव इत्यर्थः । ''एव''कारेण कर्मणः व्युदासः । **कपालस्य आकाशविभागः** जन्यत इति । अन्यथा कपालाकाशसंयोगस्य **नाशकाभावेन** नित्यत्वापत्तिः ।।

एवं कपालाकाशसंयोगस्य **प्रतिबन्धकस्य सत्त्वेन** उत्तरसंयोगानुत्पत्त्या कर्मणोऽपि नित्यत्वापत्तिः, उत्तरसंयोगस्यैव स्वजनककर्मनिवर्तकत्वात् इति भावः । **अमुमर्थं हृदि निधाय उक्तं ततः उत्तरदेशसंयागः ततः कर्मनाशः** इति ।।

तेन कर्मणैव इति । कपालद्वयविभागजनककर्मणैव इत्यर्थः । **देशान्तरविभागः** – कपालाकाशादिविभागः । **आरम्भक** इत्यादि । आरम्भकसंयोगः कपालद्वयसंयोगादिः तत्प्रतिद्वन्द्वी – तद्विरोधी तन्नाशक इति यावत् । एवम् अग्रेऽपि । **अनारम्भकसंयोगः** – कपालाकाशसंयोगादिः । **अन्यथा** इति । आरम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणश्च ऐक्ये इत्यर्थः । **विकसत्** इति । तत्र अग्रावच्छेदेन अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः सत्त्वात्, तेन कर्मणा मूलावच्छिन्नारम्भक-

संयोगविरोधिविभागोत्पत्तिः, तेन च आरम्भकसंयोगनाशः, तेन कर्मनाशः स्यात् इति भावः । **कारणविभागेनैव – कारणमात्रविभागेनैव** । कपालद्वयविभागादिना इति यावत् । **पूर्वम्** – घटाद्यात्मकद्रव्यनाशात् पूर्वम् । तथा च पूर्वोक्तं "ततः घटनाशः, ततः कपालस्य आकाशविभागः जन्यते" इति असङ्गतम् इति भावः । **सति द्रव्ये** – द्रव्यनाशं विना । देशान्तरविभागासंभवात् इति । अन्यथा कारणमात्रविभागे कर्मलक्षणस्य अतिव्याप्त्यापत्तेः इति भावः ।।

वस्तुतः कर्मलक्षणस्य तत्र न अतिव्याप्तिः । तत्प्रकारस्तु पाकप्रक्रियायां सप्रपञ्चं प्रदर्शितः अस्माभिः ।।

द्वितीय इति । कारणाकारणविभागजन्य इत्यर्थः । **यावदवयवकर्मनियतत्वात्** इति । क्रियाया व्याप्यवृत्तित्वनियमात् इति भावः । **अत एव** – वक्ष्यमाणयुक्तेरेव । **शरीरे विभक्तप्रत्ययः न स्यात्** इति । यत्र हस्तक्रियया हस्ततरुविभागः, तत्र शरीरे विभागप्रत्ययः सर्वानुभवसिद्धः । स च विभागं विना न उपपद्यते ।।

न च – शरीरतरुसंयोगनाश एव तद्विषय इति – वाच्यम् । विभागानङ्गीकारे शरीरतरुसंयोगनाशस्यैव असंभवात् । न हि तत्र हस्तक्रिया शरीरतरुसंयोगनाशिका, व्यधिकरणत्वात् । अतः तत्र हस्ततरुविभागेन शरीरतरुविभागः जन्यते । तेन च शरीरतरुसंयोगनाशः जन्यते इति उपेयते इति विभागसिद्धिः ।।

ननु हस्ततरुसंयोगनाश एव शरीरतरुसंयोगनाशकः अस्तु, तरौ तदुभयसामानाधिकरण्यसत्त्वात् । मास्तु विभागजविभागः, हस्ततरुविभागस्तु कर्मजन्यः शरीरतरुसंयोगनाशकतया सिद्ध्यति इत्यपि अत एव अपास्तम् । हस्ततरुसंयोगनाशेनैव तदुपपत्तेः ।।

किञ्च हस्तक्रियैव स्वसमवायिसमवेतत्वसंबन्धेन शरीरनिष्ठा शरीरतरुसंयोगनाशे हेतुरस्तु, वैयाधिकरण्याभावात् इति चेत्, न । आश्रयनाशाजन्यगुणनाशस्य

विरोधिगुणजन्यत्वनियमेन शरीरकर्मजन्यशरीरतरुसंयोगं प्रति हस्ततरुसंयोगस्य अकारणत्वेन च शरीरतरुसंयोगनाशे हस्ततरुसंयोगनाशस्य अजनकत्वात् ।।

यच्च उक्तम् – हस्तक्रियैव स्वसमवायिसमवेतत्वसंबन्धेन तत्र कारणम् इति, तदपि न । साक्षात्संबन्धेन जनकत्वनियमस्य असति बाधके सङ्कोचकल्पनानुपपत्तेः ।।

वस्तुतस्तु संयोगाभावः विभागः, विभागाभावो वा संयोगः इत्यत्र विनिगमनाविरहेण उभयोरपि अतिरिक्तत्वम् । अत एव "घटात् पटः विभक्तः" इति प्रत्ययः उपपद्यते । संयोगनाशात्मकत्वे नाशस्य सावधिकत्वाभावेन तथाप्रत्ययानुपपत्तेः इति । तदिदम् अभिप्रेत्य उक्तम् – अतः संयोग इत्यादि ।।

राजीवोल्लासः

नाशकाभावेन इति । ननु आश्रयनाश एव नाशकः भविष्यति इति चेत्, न । आश्रयनाशाजन्यनाशप्रतियोगित्वाभावस्यैव अत्र नित्यत्वपदेन विवक्षणात्, कपालपदस्य अवयवसामान्योपलक्षकतया घटपदस्य द्व्यणुकाद्युपलक्षकतया च परामाण्वाकाशसंयोगस्य नित्यत्वापत्तेः संभवाच्च ।।

ननु कपालपरमाण्वादौ क्रियान्तरेणैव दर्शितसंयोगनाशः भविष्यति इति, अत आह – **एवम्** इति । **प्रतिबन्धकस्य सत्त्वेन** इति । पूर्वदेशसंयोगनाशानन्तरमेव उत्तरसंयोगस्य अनुभवात् इति भावः । उक्तं च **न्यायकन्दलीकारैः** – पूर्वदेशावस्थितस्य द्रव्यस्य देशान्तरप्राप्तेः असंभवात् –इति । **हृदि निधाय उक्तम्** इति । अन्यथा प्रकृतानुपयोगात् तद्वचनम् अयुक्तम् स्यात् इति भावः ।।

"सति द्रव्ये" इत्यस्य विवरणम् **"द्रव्यनाशं विना"** इति । **तदुभयसामानाधिकरण्यसत्त्वात्** इति । ननु शरीरतरुसंयोगनाशाय विभागजविभागः मा स्वीक्रियताम्, तथापि तत्संयोगनाशार्थं विभागः अङ्गीकार्य एव इति आशङ्काम् अपनुदति – **मास्तु** इति ।।

अत एव इति । उक्ताभिन्नवक्ष्यमाणयुक्त्यैव इत्यर्थः । कारण-तावच्छेदकलाघवम् अनुसन्धाय आह – **किञ्च** इति ।।

विरोधिगुणजन्यत्वनियमेन इति । ननु अपेक्षाबुद्धिनाशात् द्वित्वादि-नाशदर्शनात् नायम् नियम इति, अत आह – **शरीरकर्मजन्य** इति । तथा च आश्रयनाशाजन्यगुणनाशस्य विरोधिगुणकारणनाशान्यतरजन्यत्वनियमः अस्त्येव, तस्य च भङ्गः ।।

यद्वा, "**आश्रयनाशाजन्य**" इत्यत्र आश्रयपदम् कारणमात्रबोधकम् । इत्थम् च कारणनाशाजन्यगुणनाशम् प्रति विरोधिगुणः कारणम् इत्येव नियमाकारः । तथा च न द्वित्वादिनाशे व्यभिचारः ।।

न च – एवम् करतोयातिलङ्घनादिचेष्टया कथम् धर्मनाशः उपपद्यते इति – वाच्यम् । आत्मनिष्ठतया समानाधिकरणायाः तदनुकूलकृतेरेव धर्मनाश-कत्वाङ्गीकारात् ।।

अथ एवम् नियमपरिष्कारेऽपि तद्भङ्गः दुष्परिहरः इति दर्शयति – **शरीरकर्मजन्य** इति ।

अकारणत्वेन इति । शरीरे तदवयवेषु च यदा कर्मोत्पत्तिः, तदनन्तरं हस्तक्रियया हस्ततरुसंयोगः, शरीरक्रियया च हस्तावच्छेदेन शरीरतरुसंयोगः समकालम् जायते, तत्र हस्ततरुसंयोगस्य पूर्वभावित्वाभावात् न कारणत्वसंभवः इति भावः ।।

अयम् अत्र प्रयोगः – "कर्मजशरीरतरुसंयोगस्य नाशः किञ्चिज्जन्यः, नाशत्वात्, घटनाशवत्" इति । अत्र हस्ततरुसंयोगनाशादिजन्यत्वबाधात् विभागसिद्धिः ।। अत्र अनुमाने कर्मणा सिद्धसाधनम् आक्षिप्य परिहरति – **यच्च उक्तम्** इति । दर्शितः गुणजन्यत्वनियमश्च अप्रयोजकः इत्याशयः ।।

सङ्कोचकल्पनानुपपत्तेः इति । तथा च हस्तक्रियायाः न कारणत्वसंभवः इति भावः ।।

ननु अनन्तविभागतत्प्रागभावादिकल्पनागौरवरूपबाधकस्य सत्त्वात् नियमसङ्कोचः उपपद्यत एव इति न विभागसिद्धिः इति, अत आह – वस्तुतस्तु इति । **संयोगाभाव** इति । संयोगनाश इत्यर्थः । अन्यथा गुणादावपि विभक्तप्रत्ययापत्तेः । एवम् अग्रेऽपि ।।

ननु कपालद्वयसंयोगादीनाम् घटाद्यसमवायिकारणत्वान्यथानुपपत्त्या गुणकर्मान्यतरत्वम् स्वीकार्यम् । तत्र च कर्मत्वम् प्रत्यक्षबाधितम् इति संयोगस्य गुणत्वे विनिगमकम् अस्ति इत्याशयेन आह – **अत एव** इति ।।

इदमत्र अवधेयम् – संयोगः चिरस्थायी, संयुक्तप्रत्ययस्य अनुवृत्तिदर्शनात् । विभागस्तु उत्तरसंयोगनाश्यः । जाते उत्तरसंयोगे विभक्तप्रत्ययादर्शनात् । स्पष्टञ्च इदम् भाष्यादौ । तथा च ज्ञायते विभागः न संयोगनाशात्मकः, किन्तु क्षणिकम् गुणान्तरम् इति – इति सुबोधिनीकाराः ।।

।। परत्वापरत्वनिरूपणम् ।।

कारिकावली

परत्वं चापरत्वं च द्विविधं परिकीर्तितम् ।
दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् ।। १२१ ।।

परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ।। १२२ ।।

तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ।। १२३ ।।

परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः ।। १२४ ।।

अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।

मुक्तावली

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति – परत्वं चापरत्वं च इति । दैशिकम् इति । दैशिकपरत्वं बहुतरमूर्तसंयोगान्तरितत्वज्ञानात् उत्पद्यते । एवं तदल्पीयस्त्वज्ञानात् अपरत्वम् उत्पद्यते । अत्र अवधित्वार्थं पञ्चम्यपेक्षा । यथा पाटलिपुत्रात् काशीम् अपेक्ष्य प्रयागः परः, पाठलिपुत्रात् कुरुक्षेत्रम् अपेक्ष्य प्रयागः अपर इति ।।

तयोः – दैशिकपरत्वापरत्वयोः । असमवायी – असमवायिकारणम् । तदाश्रये – दैशिकपरत्वापरत्वाश्रये । दिवाकर इति । अत्र परत्वापरत्वं कालिकं ग्राह्यम् । यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दः अधिकः, सः ज्येष्ठः; यस्य न्यूनः सः कनिष्ठः । कालिकपरत्वापरत्वे जन्ये एव । अत्र – कालिकपरत्वापरत्वयोः ।।

तेषां – कालिकदैशिकपरत्वापरत्वानाम् ।।

दिनकरी

मूले – मूर्त एव तु दैशिकम् इति । विभुद्रव्ये विप्रकृष्टदेशमात्रवृत्तित्वसन्निकृष्टदेशमात्रवृत्तित्वबुद्धेः निमित्तकारणस्य, दिक्संयोगस्य असमवायिकारणस्य च अभावात् इति भावः ।।

दैशिकपरत्वस्य निमित्तकारणम् आह – बहुतर इति । बहुतरसंयोगान्तरितत्वं तदेव विप्रकृष्टत्वं तद्विषयिणी अपेक्षाबुद्धिः दैशिकपरत्वं प्रति निमित्तकारणम् इत्यर्थः । तदल्पीयस्त्व इति । अल्पसंयोगान्तरितत्वरूपसन्निकृष्टत्वविषयिणी अपेक्षाबुद्धिः दैशिकापरत्वं प्रति निमित्तकारणम् इत्यर्थः ।।

''कालिकपरत्वापरत्वे जन्ये एव'' इत्यत्र जन्यपदं सप्तम्यन्तम् । नित्ये तत्पूर्वोत्पन्नत्वरूपज्येष्ठत्वबुद्धेः तदनन्तरोत्पन्नत्वरूपकनिष्ठत्वबुद्धेः निमित्तकारणस्य कालसंयोगरूपासमवायिकारणस्य च अभावात् इति भावः ।।

मूले – अपेक्षाबुद्धिनाशेन इति । स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेन इत्यर्थः ।।

नव्याः पुनः – बहुतरसंयोगान्तरितत्वरूपविप्रकृष्टत्वाल्पसंयोगान्तरितत्वरूप-सन्निकृष्टत्वाभ्यां दैशिकपरत्वापरत्वादिव्यवहारस्य, बहुतरस्पन्दान्तरितजन्यत्वरूप-ज्येष्ठत्वाल्पतरस्पन्दान्तरितजन्यत्वरूपकनिष्ठत्वाभ्यां च कालिकपरत्वादिव्यवहारस्य उपपत्तेः न तयोः गुणान्तरत्वम् । अत्र च यत्काले ज्येष्ठत्वबुद्धिः उत्पद्यते, तत्कालम् आदाय स्पन्दानां न्यूनाधिकता अवसेया । अतः न कनिष्ठे अधिकजीविनि परत्वव्यवहारापत्तिः इति – वदन्ति ।।

राजीवोल्लासः

वदन्ति इति । न च – एवं कालिकपरत्वादिः जन्यगुणादावपि स्यात् इति – वाच्यम् । प्राचीनमते कालिकपरत्वादिजनकापेक्षाबुद्धेः तत्र अनिवार्यतया स्वमते तत्र इष्टापत्तौ बाधकाभावात् ।।

आचार्यास्तु – संयोगबह्वल्पभावस्य अविशेषेऽपि ''वाराणसी किञ्चिदपेक्ष्य मत्तः परा अपरा वा'' इति, ''अहमपि तस्याः परोऽपरो वा'' इति च प्रत्ययाभावात् परापरत्वे न विप्रकृष्टत्वसन्निकृष्टत्वरूपे, किन्तु गुणान्तरे ।।

न च – परत्वापरत्वकारणस्य विप्रकृष्टत्वसन्निकृष्टत्वबुद्धेः प्रमातृविषयत्व-संभवात् कारणसत्त्वात् कार्यं तत्र कुतः न उत्पद्यते इति – वाच्यम् । भेर्या-काशसंयोगस्य असमवायिकारणस्य उभयाश्रयत्वाविशेषेऽपि यथा नभ एव समवायिकारणं शब्दस्य, तथा संयोगबहुत्वाद्यविशेषेऽपि प्रमेय एव परत्वापरत्वयोः समवायिकारणं न तु प्रमाता इति अभ्युपगमसंभवात् इति – आहुः । तच्चिन्त्यम् ।

इदम् तु बोध्यम् – ''घट'' इत्यादिप्रतीतिविषयताया अनेकत्र कल्पना-गौरवभिया यथा अवयवातिरिक्तावयविसिद्धिः, तथा ''पर'' इत्यादिप्रतीति-विषयताया अपि इति विप्रकृष्टत्वादिव्यतिरिक्ते गुणान्तरे एव परत्वापरत्वे सिद्ध्येते इति ।।

अथ द्विपृथक्त्वादिवत् द्विपरत्वादयोऽपि किं न स्युः इति चेत्, न । अन्योन्यावधित्वानवधित्वरूपविरुद्धधर्माधिकरणत्वाद्धि द्विपृथक्त्वादीनाम् एकपृथक्त्वात् वैलक्षण्यम् उपपादितम् । तथा न अत्र संभवति । घटनिष्ठपरत्वे पटावधिकत्ववत् तयोः समानदेशतास्थले पटावधिकत्वाभावस्यापि सत्त्वात् विरोधाभावात्, असमानदेशस्थौ घटपटौ अवलम्ब्य ''इमौ कुड्यात् परौ'' इति धीसत्त्वेऽपि एकस्य परत्वात् अपरस्य परतरत्वात् परत्वस्य तत्र प्रत्येकविश्रान्तेः अवश्याभ्युपेयत्वात्, एकस्यैव द्विपरत्वस्य तत्र स्वीकारे उत्कर्षापकर्षप्रतीतेः अनुपपन्नत्वाच्च । उक्तश्च इदं पृथक्त्वकिरणावल्याम् इति सुबोधिनी-काराः ।।

।। भ्रमप्रमा–निश्चयनिरूपणम् ।।

कारिकावली

बुद्धेः प्रपञ्चः प्रागेव प्रायशः विनिरूपितः ।। १२५ ।।

अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते ।
अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते ।। १२६ ।।

तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ।
तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः ।। १२७ ।।

आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः ।
भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते ।। १२८ ।।

किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तदभावाप्रकारा धीः, तत्प्रकारा तु निश्चयः ।। १२९ ।।

मुक्तावली

क्रमप्राप्तां बुद्धिं निरूपयितुम् आह – बुद्धेः इति । तत्र अप्रमां निरूपयति – तच्छून्य इति । तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः । तत्प्रपञ्चः – अप्रमाप्रपञ्चः ।।

आद्य इति । विपर्यास इत्यर्थः । शरीरादौ निश्चयरूपं यत् आत्मत्वप्रकारकं ज्ञानं ''गौरोऽहम्'' इत्याकारकम् । एवं शङ्खादौ ''पीतः शङ्खः'' इत्याकारकं यत् ज्ञानं निश्चयरूपं तत् भ्रम इति । किंस्वित् इति वितर्के ।।

निश्चयस्य लक्षणम् आह – तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः ।।

दिनकरी

तदभाववति इति । इदं च प्रमायाम् अतिव्याप्तिवारणाय । तदभाववद्विशेष्यकतदभावप्रकारकप्रमायाम् अतिव्याप्तिवारणाय **तत्प्रकारकम्** इति । इच्छायाम् अतिव्याप्तिवारणाय **ज्ञानम्** इति । **तदभावप्रकारकम्** इति संशये अतिव्याप्तिवारणाय ।।

अत्र च **तद्विशेष्यकत्वावच्छिन्नतदभावप्रकारकताशून्यतद्विशेष्यकत्वावच्छिन्न** तत्प्रकारकत्ववज्ज्ञानत्वं यत्र तत्र तन्निश्चयत्वम् अवसेयम्, न तु यथाश्रुतम् । "**महानसोऽयं वह्निमान् न वा, पर्वतो वह्निमान्**" इत्यस्य पर्वते वह्निनिश्चयत्वानापत्तेः ।।

ज्ञानपदं च इच्छायाम् अतिव्याप्तिवारणाय ।।

राजीवोल्लासः

कारिकावल्यां – बुद्धेः प्रपञ्च इति । ननु परत्वापरत्वादेरिव बुद्धेः अपि विभाग एव कर्तव्यः । किं मध्ये प्रतिज्ञया इति चेत्, न । बुद्धिविभागस्य प्रागेव प्रत्यक्षखण्डे "**बुद्धिस्तु द्विविधा मता**" इत्यादिना दर्शितत्वेन तत्र पुनः जिज्ञासानुदयात् तत्संपादनार्थं तस्या आवश्यकत्वात् । **प्रपञ्चः** – प्रकारः । अवशिष्टभागस्य अल्पत्वात् आह – **प्रायश** इति । अप्रमायाः प्रथमतो निर्देशश्च तद्भिन्नत्वस्यैव प्रमालक्षणतया वक्ष्यमाणत्वात् ।।

दिनकर्याम् – इदम् च इत्यादि । तच्छब्देन प्रकारीभूतः धर्मः गृह्यते । तथा च तदभाववद्विशेष्यकतत्प्रकारकज्ञानम् अप्रमा (भ्रमः)। यथा शुक्तौ "इदं रजतम्" इति ज्ञानं रजतत्वाभाववच्छुक्तिविशेष्यकं रजतत्वप्रकारकं च भवति इति भ्रमः भवति । तत्र "तदभाववद्विशेष्यक" इत्यनुपादाने "तत्प्रकारकं ज्ञानम् अप्रमा" इत्युक्तौ रजते रजतत्वप्रकारके "इदं रजतम्" इति प्रमात्मकज्ञाने

अतिव्याप्तिः । तदुपादाने तु उक्तप्रमायाः रजतत्ववद्विशेष्यकत्वेन रजतत्वाभाववद्विशेष्यकत्वं नास्ति इति न अतिव्याप्तिः । रजतत्वाभाववद्विशेष्यके रजतत्वाभावप्रकारके ''इदं रजतत्वाभाववत्'' इत्याकारके प्रमात्मकज्ञाने अतिव्याप्तिवारणाय ''तत्प्रकारकम्'' इति । उक्तप्रमायाः रजतत्वप्रकारकत्वाभावात् न अतिव्याप्तिः । विसंवादिन्यां तदभाववद्विशेष्यकतत्प्रकारकेच्छायाम् अतिव्याप्तिवारणाय ''ज्ञानम्'' इति भावः ।।

तदभावाप्रकारकत्वे सति तत्प्रकारकं ज्ञानं निश्चयः इति मूले उक्तम् । तत्र सत्यन्तस्य प्रयोजनम् आह – **तदभाव** इति । स्थाणुत्वतदभावप्रकारके ''अयं स्थाणुर्वा न वा'' इति संशये अतिव्याप्तिः । तद्वारणाय सत्यन्तम् । उक्तसंशयस्य स्थाणुत्वाभावप्रकारकत्वेन तदप्रकारकत्वं नास्ति इति न अतिव्याप्तिः । **''तत्प्रकारकम्''** इति स्वरूपकथनम् । ज्ञानपदम् इच्छायाम् अतिव्याप्तिवारणाय ।।

ननु ''महानसोऽयं वह्निमान् न वा, पर्वतो वह्निमान्'' इत्याकारके समूहालम्बनज्ञाने महानसे वह्निसंशयरूपे पर्वते वह्निनिश्चयरूपे अव्याप्तिः, तस्य वह्नयभावाप्रकारकत्वाभावात् इत्यतः परिष्करोति – **तद्विशेष्यकत्व** इति । पर्वते वह्निनिश्चयत्वं नाम पर्वतनिष्ठविशेष्यतानिरूपित-वह्न्यभावनिष्ठप्रकारताशून्य-पर्वतनिष्ठविशेष्यतानिरूपितवह्निनिष्ठप्रकारतानिरूपकज्ञानत्वम् । उक्तसमूहालम्बने महानसनिष्ठविशेष्यतानिरूपित – वह्नयभावनिष्ठप्रकारतायाः सत्त्वेऽपि पर्वतनिष्ठविशेष्यतानिरूपितवह्न्यभावनिष्ठप्रकारताशून्यत्वे सति पर्वतनिष्ठविशेष्यतानिरूपित–वह्निनिष्ठप्रकारताकत्वम् अस्ति इति पर्वते वह्निनिश्चयत्वोपपत्तिः इति भावः ।।

।। संशयनिरूपणम् ।।

कारिकावली

स संशयो मतिर्या स्यादेकत्राभावभावयोः ।
साधारणादिधर्मस्य ज्ञानं संशयकारणम् ।। १३० ।।

मुक्तावली

संशयं लक्षयति – स संशय इति । **एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः । साधारण** इति । उभयसाधारणः यः धर्मः तज्ज्ञानं संशयकारणम् । यथा उच्चैस्तरत्वं स्थाण्वस्थाणुसाधारणं ज्ञात्वा अयं ''स्थाणुर्न वा'' इति सन्दिग्धे ।।

एवम् असाधारणधर्मज्ञानं कारणम् । यथा शब्दत्वस्य नित्यानित्यव्यावृत्तत्वं शब्दे गृहीत्वा ''शब्दः नित्यः न वा'' इति सन्दिग्धे ।।

दिनकरी

एकधर्मिक इति । ''ह्रदपर्वतौ वह्नितदभाववन्तौ'' इति ज्ञाने अतिव्याप्तिवारणाय **एकधर्मिक** इति ।।

एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः । तेन ''पर्वतो वन्हिमान्, द्रव्यं वन्ह्यभाववत्'' इति ज्ञानव्युदासः । ''वृक्षः संयोगवान् तदभाववांश्च'' इति समुच्चयवारणाय ''**विरुद्ध**'' इति । **विरोधावगाहित्वं तदर्थः** । ''घटः अद्रव्यं पृथिवी च'' इति ज्ञानवारणाय ''भावाभाव'' इति । **इच्छाव्युदासार्थं विशेष्यभागः** ।।

वस्तुतस्तु – एकधर्मावच्छिन्नविशेष्यकत्वनिवेशे विभिन्नरूपेण एकधर्मितावच्छेदककज्ञानस्य संशयत्वापत्तिः, एकधर्मावच्छिन्नविशेष्यतावच्छेदकताकत्वनिवेशे च निरवच्छिन्नविशेष्यतावच्छेदकताकसंशयासंग्रहप्रसङ्गः, विभिन्नरूपेण

धर्मितावच्छेकतावच्छेदकावगाहिज्ञानस्य संशयत्वप्रसङ्गश्च इति स्वीयैककोटि-प्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतापरकोटि-प्रकारताशालिज्ञानत्वं संशयत्वम् इति ध्येयम् ।।

यत्तु संशयत्वं जातिविशेष इति, तन्न । चाक्षुषत्वादिना सङ्करप्रसङ्गात् ।।

सन्दिग्ध इति क्रियापदम् । सन्देहवान् भवति इत्यर्थः । एवम् अग्रेऽपि ।।

राजीवोल्लासः

एकधर्मिकविरुद्धभावाभावप्रकारकज्ञानं संशय इत्युक्तं मुक्तावल्याम्। तत्र दलप्रयोजनादिकम् आह – ह्रदपर्वतौ इत्यादिना । भावाभावप्रकारकज्ञानं संशयः इत्युक्तौ ''ह्रदपर्वतौ वन्हितदभाववन्तौ'' इत्याकारकनिश्चये अतिव्याप्तिः । तस्य वह्निवह्न्यभावरूपभावाभावप्रकारकत्वात् । तद्वारणाय ''एकधर्मिक'' इत्युक्तम् । ''एकविशेष्यकः'' इति तदर्थः । उक्तनिश्चयस्य ह्रदपर्वतरूपानेक-विशेष्यकत्वात् एकविशेष्यकत्वं नास्ति इति न अतिव्याप्तिः ।।

एवमपि ''पर्वतो वह्निमान्, द्रव्यं वह्न्यभाववत्'' इति ज्ञाने अतिव्याप्तिः । वह्निं प्रति पर्वतस्य पर्वतत्वेन, वह्न्यभावं प्रति द्रव्यत्वेन च विशेष्यत्वात् एकविशेष्यकत्वसत्त्वात् । तद्वारणाय एकधर्मितावच्छेदक-विशिष्टविशेष्यकत्वावच्छिन्नं ज्ञानं इति परिष्करणीयम् । उक्तज्ञानस्य पर्वतत्वद्रव्यत्वरूपनानाधर्मविशिष्टपर्वत-विशेष्यकत्वात् एकधर्मविशिष्टविशेष्यकत्वं नास्ति इति न अतिव्याप्तिः ।।

''वृक्षः संयोगवान् तदभाववांश्च'' इति समुच्चयात्मके निश्चये वृक्षत्वरूपैकधर्मावच्छिन्नविशेष्यकत्वस्य संयोगतदभावरूपभावाभावप्रकारकत्वस्य च सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय ''विरुद्ध'' इति भावाभावयोः विशेषणम् । ''परस्परासमानाधिकरण'' इति तदर्थः । संयोगतदभावयोः परस्परम् एकाधिकरणवृत्तित्वात् न तत्प्रकारकोक्तसमुच्चये अतिव्याप्तिः ।।

''भावाभाव''इत्यनुक्तौ एकधर्मिकविरुद्धप्रकारकज्ञानं संशयः इति लक्षणं स्यात् । तथा सति ''घटः द्रव्यं पृथिवी च'' इत्याकारकसमुच्चये अतिव्याप्तिः । तद्वारणाय ''भावाभाव''इत्युक्तम् । उक्तसमुच्चयस्य द्रव्यत्वपृथिवीत्वरूपभावद्वयप्रकारकत्वेन भावाभावप्रकारकत्वं नास्ति इति न अतिव्याप्तिः ।।

न च – द्रव्यत्वपृथिवीत्वयोः एकस्मिन् घटादौ सत्त्वात् असामानाधिकरण्यरूपविरोधाभावात् उक्तसमुच्चये विरुद्धधर्मप्रकारकत्वाभावादेव अतिव्याप्तेः अप्रसक्त्या ''भावाभाव''इति व्यर्थम् इति – वाच्यम् । यतः ''विरुद्ध'' इत्यस्य विरोधावगाही इत्यर्थः । अन्यथा संयोगतदभावयोः विरोधभ्रमकाले ''वृक्षः संयोगवान् तदभाववांश्च'' इति ज्ञानस्य संशयत्वाङ्गीकारात्, तयोस्तु वस्तुतः विरुद्धत्वाभावात् विरुद्धभावाभावप्रकारकत्वं नास्ति इति अव्याप्तिवारणाय ''विरुद्ध'' इत्यस्य विरोधावगाही इत्यर्थः वर्णनीयः । एवं सति एकधर्मिक-विरोधज्ञानविषय–भावाभावप्रकारकज्ञानं संशयः इति लक्षणं पर्यवस्यति । तथा च संयोगतदभावयोः वस्तुतः विरोधाभावेऽपि विरोधज्ञानविषयत्वम् अस्ति इति तत्प्रकारकज्ञानस्य संशयत्वोपपत्तिः ।।

इत्थं च ''भावाभाव''इत्यनुपादाने द्रव्यत्वपृथिवीत्वयोः विरोधभ्रमकाले ''घटः द्रव्यं पृथिवी च'' इति समुच्चये अतिव्याप्तिः । विरोधज्ञानविषयीभूतद्रव्यत्वपृथिवीत्वरूपनानाधर्मप्रकारकत्वात् ।।

यद्वा ''घटः अद्रव्यं पृथिवी च'' इति अद्रव्यत्वांशे भ्रमात्मके समुच्चये अतिव्याप्तिः । अद्रव्यत्वपृथिवीत्वयोः वस्तुतः विरुद्धत्वात् । तद्वारणाय ''भावाभाव'' इति प्रकारविशेषणम् इति घट्टार्थः ।।

ह्रदपर्वतौ इति । यद्यपि ''पर्वतह्रदौ वह्नितदभाववन्तौ'' इति प्रमायामपि अतिव्याप्तिः संभवति, तथापि ज्ञानत्वस्थाने भ्रमत्वनिवेशेनापि तद्वारणं कर्तुं शक्यम् इत्याशयेन ''ह्रदपर्वतौ'' इति विशेष्यनिर्देशः । अस्य च ज्ञानस्य

भ्रमत्वात् तन्निवेशेऽपि अतिव्याप्तिसंभवः इत्याशयः । संयोगतदभावयोः विरोधभ्रमकाले "वृक्षः संयोगवान् तदभाववांश्च" इति ज्ञानस्य संशयत्वमेव, न तु समुच्चयत्वम् इति, अत आह – **विरोधावगहित्वं तदर्थ** इति ।।

इच्छाव्युदासार्थं विशेष्यभाग इति । ज्ञानत्वम् इत्यर्थः । इच्छायाम् एकधर्मावच्छिन्नविशेष्यकविरुद्धभावाभावप्रकारकत्वं कथम् इति चेत् – श्रूयताम्। यस्य तृप्तौ अभ्युदये च कामना, तस्य "एकादश्यां भुनजै न वा" इति विरुद्धभोजनतदभावविषयकेच्छा अनुभवसिद्धा इति । एवं बुभुक्षोः शत्रुगृहप्रवेशस्थले "अस्मिन् गृहेऽहं भुनजै न वा" इति भोजनतदभावप्रकारकेच्छा अनुभवसिद्धा इति ।।

उक्तरीत्या मुक्तावल्यनुसारिपरिष्कारे कांश्चिद्दोषान् आशङ्क्य स्वयं परिष्कारान्तरं वक्तुम् आरभते – **वस्तुतस्तु** इत्यादिना । "एकधर्मावच्छिन्न-विशेष्यकभावाभावप्रकारकज्ञानं संशयः" इत्युक्तौ "पर्वतत्ववान् वह्निमान् जातिमान् वह्न्यभाववान्" इत्यत्र पर्वतत्वम् एकं पर्वतत्वत्वेन जातित्वेन च विशेष्यता-वच्छेदकम् । तथापि पर्वतनिष्ठा विशेष्यता पर्वतत्वरूपैकधर्मावच्छिन्ना भवति इति उक्तज्ञानस्य एकधर्मावच्छिन्नविशेष्यताकभावाभावप्रकारकत्वम् अस्ति इति तत्र अतिव्याप्तिः प्रसजति । तद्वारणाय एकधर्मावच्छिन्ना या विशेष्यतावच्छेदकता तन्निरूपकविशेष्यताकभावाभावप्रकारकज्ञानत्वं संशयत्वम् इति वक्तव्यम् । उक्तज्ञानीयपर्वतत्वनिष्ठविशेष्यतावच्छेदकतायाः पर्वतत्वत्वजातित्वाभ्याम् अवच्छिन्नत्वात् एकधर्मावच्छिन्नत्वं नास्ति इति उक्तज्ञाने अतिव्याप्तिः यद्यपि वारयितुं शक्यते, तथापि पर्वतत्वनिष्ठनिरवच्छिन्नविशेष्यतावच्छेदकताकस्य "पर्वतः वह्निमान्न वा" इति संशयस्य असंग्रहः स्यात् । एवं विभिन्नरूपेण धर्मितावच्छेदकतावच्छेदकम् अवगाहमानस्य "द्रव्यावयवावयवः पाषाणत्ववान्, पर्वतावयवावयवः पाषाणत्वाभाववान्" इति ज्ञानस्य संशयत्वप्रसङ्गः । अत्र

ज्ञाने द्रव्यत्वेन पर्वतत्वेन च पर्वतः धर्मितावच्छेदकः भवति । पर्वतावयवावयवः धर्मी, पर्वतावयवः धर्मितावच्छेदकः, पर्वतः धर्मितावच्छेदकतावच्छेदकः । स द्रव्यत्वेन पर्वतत्वेन च भिन्नरूपेण भासते। तादृशज्ञाने अतिव्याप्तिः ।।

अतः संशयलक्षणम् एवं वक्तव्यम् – स्वीय (स्वविषय) एककोटिनिष्ठ-प्रकारतावच्छिन्ना या प्रतिबध्यता तन्निरूपिता या प्रतिबन्धकता तदवच्छेदकीभूता या अपरकोटिनिष्ठा प्रकारता तन्निरूपकज्ञानत्वं संशयत्वम् इति । स्वं "पर्वतो वह्निमान् न वा" इति संशयः । तन्निरूपिता या वह्निरूपैककोटिनिष्ठा प्रकारता तदवच्छिन्ना या "पर्वतः वह्निमान्" इति बुद्धिनिष्ठा प्रतिबध्यता तन्निरूपिता या "पर्वतः वह्न्यभाववान्" इति निश्चयनिष्ठा वह्न्यभावनिष्ठा प्रकारता तन्निरूपकज्ञानत्वं "पर्वतो वह्निमान्न वा" इति संशये अस्ति इति लक्षणसमन्वयः ।।

ननु निरूपकतासंबन्धेन संशयनिष्ठायाः वह्न्यभावनिष्ठप्रकारतायाः "वह्न्यभाववान्" इति निश्चये अभावात् कथं तस्या निश्चयनिष्ठ-प्रतिबन्धकतावच्छेदकत्वम् इति चेत् – न । ज्ञानभेदेन प्रकारतारूपविषयता-भेदानभ्युपगमात् संशयनिष्ठवह्न्यभावप्रकारताया अपि निश्चयवृत्तिप्रतिबन्धकता-वच्छेदकत्वोपपत्तिः । विस्तरः संशयपक्षतागदाधरीये द्रष्टव्यः ।।

चाक्षुषत्वादिना संकरप्रसङ्गात् इति । चाक्षुषत्वं विहाय संशयत्वं त्वाचसंशये, संशयत्वं विहाय चाक्षुषत्वं चाक्षुषनिश्चये, उभयोः चाक्षुषसंशये समावेशात् संकर इति भावः ।।

मुक्तावली

विप्रतिपत्तिस्तु "शब्दः नित्यः न वा" इत्यादि शब्दात्मिका न संशयकारणम् । शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात् । किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते, संशयस्तु मानस एव इति ।।

दिनकरी

''समानानेकधर्मोपपत्तेः विप्रतिपत्तेः ....'' इत्यादिसूत्रे विप्रतिपत्तिवाक्य-जन्यशाब्दसंशयस्य उक्तत्वात् साधारणधर्मासाधारणधर्मज्ञानजन्यसंशयवत् विप्रतिपत्ति-वाक्यजन्यः तृतीयोऽपि संशयः इति मतनिरासाय आह – **विप्रतिपत्तिस्तु** इति । **''व्याप्तिज्ञानादीनाम्''** इति ''आदि''ना अतिदेशवाक्यार्थज्ञानपरिग्रहः ।।

ननु तर्हि सूत्रस्थपञ्चम्यनुपपत्तिः इति, अत आह **किन्तु** इति । तथा च सूत्रस्थपञ्चमी **प्रयोजकतायाम्** इति भावः ।।

राजीवोल्लासः

समानानेकधर्मोपपत्तेः विप्रतिपत्तेः इत्यादि सूत्रे इत्यादि । अस्य सूत्रस्यार्थं स्वयं पश्चात् वक्ष्यति । साधारणधर्मज्ञानजन्यसंशयवत् असाधारणधर्मज्ञानजन्यसंशयवच्च विप्रतिपत्तिवाक्यजन्यः तृतीयोऽपि संशय इति केचित् आहुः । तन्मतं निरस्यति इत्यर्थः । विरुद्धार्थप्रतिपादकं वाक्यद्वयं विप्रतिपत्तिः । यथा आत्मा अस्ति, आत्मा नास्ति इति । एतद्वाक्यद्वयश्रोतुः ''आत्मा अस्ति वा नास्ति वा'' इति संशयः जायते इति मतं न युक्तम् । शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात् । किंतु तादृशवाक्यद्वयात् आत्मास्तित्वतन्नास्तित्वरूपकोटिद्वयज्ञानं भवति । ततः कोटिद्वयविषयकः मानसः संशयः भवति इति भावः ।।

प्रयोजकतायाम् इति । कारणकारणत्वं प्रयोजकत्वम् । संशयं प्रति कोटिद्वयज्ञानं कारणम् । कोटिद्वयज्ञानं प्रति विप्रतिपत्तिवाक्यं कारणम् इति विप्रतिपत्तिवाक्यस्य संशयप्रयोजकत्वम् ।।

मुक्तावली

एवं ज्ञाने प्रामाण्यसंशयात् विषयसंशयः इति । एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् । संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणम् इति ।।

दिनकरी

एवं ज्ञाने प्रामाण्यसंशयात् विषयसंशय इति इति । अथ प्रामाण्यपदम् अप्रामाण्यस्याप्युपलक्षकम् । तेन प्रामाण्यसंशयस्य अप्रामाण्यसंशयस्य च विषयसन्देहे स्वातन्त्र्येण हेतुत्वम् इति भावः ।।

एवं व्याप्य इति । अथ व्याप्यसंशस्य व्यापकसंशयहेतुत्वे किं मानम्? कोटिस्मरणादित एव तत्संभवात् । क्वचित् तदनुविधानस्य तु व्याप्यतदभावयोः व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरण एव उपक्षीणत्वात् । तदग्रहे तु व्याप्यसंशयात् व्यापकसंशयस्यापि अभावात् इति चेत्–

अत्राहुः – "महानसे हुताशनः, न जलह्रदे" इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात् तस्यापि तद्धेतुत्वम् आवश्यकम् । अत एव उत्कटकोटिकव्याप्यसंशयात् व्यापकस्यापि उत्कटकोटिकः संशयः, कारणोत्कर्षेणैव कार्योत्कर्षात् ।।

न च – एतत् भगवत्सूत्रकृदनभिमतम् इति – वाच्यम् । सूत्रस्थ"च"कारस्य अनुक्तसमुच्चायकत्वात् । तथाहि– "समानानेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" इति सूत्रम् । तस्य च अर्थमाहुः भाष्यकृत्प्रमुखाः – समानधर्मः – कोटिद्वयसहचरितधर्मः, अनेकस्मात् सपक्षविपक्षात् व्यावृत्तः धर्मः अनेकधर्मः तयोः उपपत्तिः ज्ञानम् । तस्मात् विप्रतिपत्तिः – विरुद्धकोटिप्रतिपादकं वाक्यम् । तस्मात् अत्र पञ्चम्याः प्रयोजकत्वम् अर्थः, न हेतुत्वम् ।।

उपलब्धिः प्रामाण्यम्, अनुपलब्धिः प्रामाण्यविरोधिभ्रमत्वम् । **तयोः अव्यवस्थातश्च** संशयः । एवं च प्रामाण्यसंशयजन्यः भ्रमत्वसंशयजन्यश्च विषयसंशयः । ''च''कारः व्याप्यसन्देहादिजन्यव्यापकसन्देहादेः संग्राहकः ।।

विशेषापेक्षः विमर्श इति लक्षणम् । एकधर्मिकभावाभावप्रकारकत्वरूपविशेषवान् विमर्शः ज्ञानम् इत्यर्थः ।।

इत्यादिकम् इति ''आदि''ना साधनाव्यापकव्याप्यत्वसन्देहतः साध्यव्यापकत्वसन्देहः **बोध्यः** ।।

साधारणज्ञानादेः कार्यतावच्छेदके च अव्यवहितोत्तरत्वं देयम् । तेन परस्परं **न व्यभिचारः** ।।

ननु साधारणधर्मज्ञानादेरिव धर्मिज्ञानस्यापि संशयहेतुत्वात् तत्कृतः संशयविभागः कथं न प्रदर्शित इति, अत आह – **संशये धर्मिज्ञानम्** इति । संशये – संशयमात्रे । **तथा च** धर्मिज्ञानजन्यतावच्छेदकस्य संशयत्वसमव्याप्यत्वात् न तद्विभाजकतावच्छेदकम् इति भावः ।।

ननु धर्मिज्ञानस्य संशयहेतुत्वे मानाभावः । न च – धर्मिज्ञानमन्तरेण संशयः स्यात् इति – वाच्यम् । सति धर्मीन्द्रियसन्निकर्षे इष्टत्वात्, अत आह – **धर्मीन्द्रिय** इति ।।

राजीवोल्लासः

अप्रमाणस्याप्युपलक्षकम् इति । अत्र अप्रामाण्यं भ्रमत्वम्, न तु प्रमात्वाभावः । तत्संशयस्य प्रमात्वसंशयेनैव संग्रहात् पृथगुक्त्यसंगतेः । भ्रमत्वं तु न प्रमात्वाभाव इत्यवधेयम् ।।

अथ इत्यादि । ''पर्वतः वह्निव्याप्यवान् न वा'' इति व्याप्यविषयकसंशयात् ''पर्वतः वह्निमान् न वा'' इति व्यापकवह्निविषयकः संशयः जायते । तथा

च व्याप्यसंशयस्यापि संशयहेतुत्वम् अस्ति इति सूत्रे तदकथनात् न्यूनता इति न शङ्कनीयम्, सूत्रस्थेन अनुक्तसमुच्चयार्थकेन तस्यापि संग्रहात् इत्याशयेन **मूलकारेण व्याप्यसंशयादपि व्यापकसंशय** इत्युक्तम् । तत्र शङ्का – व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे किं प्रमाणम्? इति । वह्नितदभारूप-कोटिस्मरणादेव वह्नितदभावकोटिकसंशयसंभवात् । क्वचित् व्याप्यसंशयात् व्यापकसंशयो यत्र जायते तत्रापि व्याप्यतदभावयोः व्यापकतदभावसाहचर्य-रूपसंबन्धस्य गृहीतत्वेन व्याप्यसंशये सति तस्य एकसंबन्धिज्ञानम् अपर-संबन्धिस्मारकम् इति रीत्या व्यापकतदभावरूपकोटिद्वयोपस्थितिजनन एव **उपक्षीणत्वात्** – उपयुक्तत्वात् तदनन्तरं कोटिद्वयस्य स्मरणादेव व्यापकतदभाव-विषयकसंशयः जायते । येन तु व्याप्यतदभावयोः व्यापकतदभावसाहचर्यं पूर्वं न ज्ञातं तस्य व्यापकसंशयः न भवत्येव । तथा च व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे प्रमाणाभावः – इति ।।

ननु तर्हि व्याप्यसंशयात् व्यापकसंशय इति प्रवादः न स्यात्, अत आह – **तदनुविधानस्य** इति । व्याप्यसंशयोत्तरत्वस्य इत्यर्थः । यद्वा अन्वय-व्यतिरेकाभ्यां व्याप्यसंशयस्य व्यापकसंशयहेतुत्वम् इति, अत आह – **तदनुविधानस्य** इति ।।

इमां शङ्कां परिहरति – **अत्र आहुः** इत्यादिना । ''महानसे वह्निः, न जलह्रदे'' इति स्मरताम् पर्वतं च पश्यतां पुंसां व्याप्यधूमसंशये व्यापकवह्निसंशयः, तदभावे तदभाव इति अनुभवसिद्धत्वात् व्याप्यसंशयस्यापि व्यापकसंशयहेतुत्वम् आवश्यकम् इति भावः । ननु कोट्युपस्थितिमात्रं न संशयजनकं, अति-प्रसङ्गात् । तथा च यथा कोट्युपस्थितिविशेषार्थं विप्रतिपत्तिवाक्यस्य उपयोगः, तथा व्याप्यसंशस्य उपयोग इति व्याप्यसंशयस्य प्रयोजकत्वमेव, न जनकत्वम् इति, अत आह – **अत एव** इति ।।

महानसे हुताशन इति । तथा च हुताशनहुताशनाभावरूपकोटिद्वयस्मरणस्य व्याप्यसंशयपूर्वभावित्वेन न तत्र अन्वयव्यतिरेकाभ्यां व्याप्यसंशयस्य उपक्षीणत्वम् इति अगत्या व्यापकसंशयहेतुत्वं व्याप्यसंशयस्य आवश्यकम् इति भावः । **उत्कटकोटिक** इति । उत्कटत्वं च धूमादिनिष्ठेच्छाविषयत्वम् ।।

व्यावृत्तो धर्म इति । तथा च सूत्रस्थम् अनेकधर्मपदं अनेकव्यावृत्तो धर्मः अनेकधर्म इति मध्यमपदलोपी समास इति भावः । **अत्र पञ्चम्या** इति । विप्रतिपत्तिपदप्रकृतिकपञ्चम्या इत्यर्थः । **तयोः** – प्रमात्वभ्रमत्वयोः, **अव्यवस्थातः** – संशयात्, **संशयः** – विषयसंशय इत्यर्थः। **विशेषवान्** इति । अयं च विशेषापेक्ष इत्यंशस्य अर्थः ।।

बोध्य इति। ''धूमवान् वह्नेः'' इत्यादौ साध्ये धूमे साधनवह्न्य-व्यापकार्द्रेन्धनसंयोगव्याप्यत्वसंदेहात् वह्न्यव्यापकत्वसंदेहः इति भावः ।।

न व्यभिचार इति । न व्यतिरेकव्यभिचार इत्यर्थः । साधारणधर्मज्ञाना-साधारणधर्मज्ञानादीनां संशयत्वं यदि कार्यतावच्छेदकं स्यात् तदा साधारणधर्मज्ञानं विना असाधारणधर्मज्ञानात्, असाधारणधर्मज्ञानं विना साधारणधर्मज्ञानाच्च संशयस्य जायमानतया व्यतिरेकव्यभिचारः कारणं विना कार्योत्पत्तिरूपो दोषः स्यात् । तद्वारणाय कार्यतावच्छेदकेऽव्यवहितोत्तरत्वं निवेश्य साधारणधर्मज्ञानाव्यवहितोत्तरसंशयं प्रति साधारणधर्मज्ञानं कारणम्, असाधारणधर्मज्ञानाव्यवहितोत्तरसंशयं प्रति असाधारणधर्मज्ञानं कारणम् इति रीत्या कार्यकारणभावः वक्तव्य इति भावः ।।

मूले संशये इत्यस्य संशयसामान्ये इत्यर्थः । धर्मिज्ञानं धर्मितावच्छेदक-विशिष्टधर्मिज्ञानम् । निर्विकल्पकोत्तरसंशयः निर्धर्मितावच्छेदककसंशयश्च अप्रसिद्ध इति भावः ।।

धर्मिज्ञानस्य संशयकारणत्वं स्वातन्त्र्येण वा, संशयसामान्यस्य विशिष्ट-वैशिष्ट्यावगाहित्वनियमेन विशेष्यतावच्छेदकप्रकारकनिर्णयत्वेन वा कारणत्वम्। दर्शितसंशयद्वयमपि अङ्गीकुर्वतां मतेन आह – **धर्मीन्द्रियसंनिकर्षो वा इति** ।।

दिनकर्यां – तथा च इति । विभाज्यतावच्छेदकव्याप्यधर्मस्यैव विभाजकतावच्छेदकत्वम् । यथा विभाज्यतावच्छेदकपदार्थत्वव्याप्यद्रव्यत्वादेः पदार्थविभाजकतावच्छेदकत्वं, न तु पदार्थत्वसमव्याप्यस्य प्रमेयत्वादेः । तथा विभाज्यतावच्छेदकसंशयत्वसमव्याप्तत्वात् धर्मिज्ञानजन्यसंशयत्वस्य न तद्विभाजकतावच्छेदकम् इति भावः ।।

।। अप्रमाजनकदोषनिरूपणम् ।।

कारिकावली

दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषः नानाविधो मतः ।। १३१ ।।

मुक्तावली

दोष इति । अप्रमां प्रति दोषः कारणम्, प्रमां प्रति गुणः कारणम् । तत्र पित्तादिरूपा दोषाः अननुगताः, तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यां सिद्धम् । गुणस्य प्रमाजनकत्वं तु अनुमानात् सिद्धम् । यथा – ''प्रमा ज्ञानसामान्य-कारणभिन्नकारणजन्या, जन्यज्ञानत्वात्, अप्रमावत्'' ।।

न च – दोषाभाव एव कारणम् अस्तु इति – वाच्यम् । ''पीतः शङ्खः'' इति ज्ञानस्थले पित्तरूपदोषसत्त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् । विनिगमनाविरहात् अनन्तदोषाभावकारणत्वम् अपेक्ष्य गुणस्य कारणतायाः न्याय्यत्वात् ।।

न च – गुणसत्त्वेऽपि पित्तेन प्रतिबन्धात् शङ्खे न श्वैत्यज्ञानम् । अतः पित्तादिदोषाभावानां कारणत्वम् अवश्यं वाच्यम् । तथा च किं गुणस्य हेतुत्वकल्पनेन इति – वाच्यम् ।।

तथापि अन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः । एवं भ्रमं प्रति गुणाभावः कारणम् इत्यस्यापि सुवचत्वात् ।।

तत्र दोषः कः इत्याकाङ्क्षायाम् आह – पित्त इति । क्वचित् पीतादिभ्रमे पित्तादिः दोषः, क्वचित् चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः, क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनम् इत्येवं दोषाः अननुगता एव भ्रान्तिजनका इत्यर्थः ।।

दिनकरी

''पित्तादि'' इति''आदि''ना मण्डूकवसाञ्जनादेः परिग्रहः । अनुमान-सिद्धत्वमेव प्रदर्शयति – यथा इति । भगवज्ज्ञाने व्यभिचारवारणाय हेतौ जन्य इति ।।

अर्थान्तरं निराकुरुते – न च इति । ननु पित्तात्मकदोषाभावः श्वैत्यप्रमायामेव कारणम्, न शङ्खत्वप्रमायाम्, अत आह – विनिगमनाविरहात् इति । प्रमायां दोषाभावः कारणम्, गुणो वा कारणम् इत्यत्र विनिगमनाविरहात् इति भावः । वस्तुतः गुणहेतुतायामेव लाघवं विनिगमकम् अस्ति इत्याह – अनन्त इति । न्याय्यत्वात् इति । अनुगतगुणत्वस्य अग्रे वक्ष्यमाणत्वात् न तद्धेतुत्वमते अयं दोषः इति भावः ।।

तथा च – दोषाभावानां हेतुत्वस्य आवश्यकत्वे च । गुणस्यापि इति । तथा च पित्तादिदोषाभावसत्त्वेऽपि विशेषणवद्विशेष्यसन्निकर्षरूपगुणाभावात् न शङ्खे पीतत्वप्रमा इति दोषाभावेन न गुणस्य अन्यथासिद्धिः इति भावः ।।

एवं – एवं सति । अन्वयव्यतिरेकसत्त्वेऽपि यदि अन्यथासिद्धत्वं तदा इत्यर्थः । **गुणाभावः** गुणाभाव एव, न तु दोषः कारणं स्यात् इति भावः ।।

राजीवोल्लासः

ज्ञानसामान्य इति । प्रमायाः उत्पत्तौ परतस्त्वसाधकम् अनुमानम् एतत् । ''प्रमा प्रमाभ्रमोभयनिष्ठकार्यतानिरूपितकारणतावच्छेदकभिन्नधर्मावच्छिन्न-कारणतानिरूपितकार्यतावती, जन्यज्ञानत्वात्, अप्रमावत्'' इत्यनुमानप्रयोगः । ज्ञानत्वावच्छिन्ना ज्ञानत्वव्यापिका वा या कार्यता तन्निरूपितकारणतावद्भिन्नजन्या इति यथाश्रुतमूललभ्यं साध्यं न युक्तम् । ज्ञानसामान्यकारणभिन्नचक्षुरादिजन्यत्वम् आदाय सिद्धसाधनापत्तेः । उक्तपरिष्कृतसाध्ये तु चक्षुष्ट्वादेः प्रमाभ्रमोभयकारणता-वच्छेदकत्वात् न दोषः । वक्ष्यमाणरीत्या दोषाभावस्यापि प्रमाहेतुत्वात् तम् आदाय सिद्धसाधनवारणाय द्वितीयकारणतायां भाववृत्तित्वमपि निवेशनीयम् । **जन्यज्ञानत्वात्** इति । भगवज्ज्ञाने व्यभिचारवारणाय जन्यत्वनिवेशः । फलेच्छां प्रति फलज्ञानमेव कारणम् । तस्य च विशेषणज्ञानविधया प्रमाऽप्रमोभयनि-रूपितकारणत्वात् तद्भिन्नकारणजन्यत्वस्य फलेच्छायाम् अभावात् व्यभिचारवारणाय हेतौ ज्ञानत्वप्रवेशः ।।

दिनकर्यां – अनुगतगुणत्वस्य इति । प्रत्यक्षप्रमादिकं प्रति विशेषण-वद्विशेष्यसंनिकर्षत्वादिरूपगुणत्वस्य इत्यर्थः । **न शङ्खे पीतत्वप्रमा** इति । अत्र शङ्खपदं स्थाण्वादेः पीतत्वपदं च पुरुषत्वादेः उपलक्षकम् । अत एव पित्तादिदोषाभाव इत्यत्र दूरत्वादिसंग्राहक ''आदि'' पदोपादानं संगतम् । **न गुणस्य अन्यथासिद्धिः** इति । कार्याभावप्रयोजकीभूताभावाप्रतियोगित्वं हि अन्यथासिद्धत्वे तन्त्रम् । गुणस्य तु तादृशाभावप्रतियोगित्वमेव इति न अन्यथासिद्धिः इति भावः ।।

मुक्तावल्यां – सुवचत्वात् इति । गुणे सति भ्रमासंभवात् भ्रमं प्रति गुणाभावः कारणं, न तु दोष इति सुवचत्वात् इति भावः ।।

अत्र मथुरानाथतर्कवागीशाः – पित्तादिदोषाणां प्रतिबध्यतावच्छेदकं न श्वैत्यादिप्रमात्वम्, किं तु श्वैत्यादिप्रत्यक्षत्वमेव । तत्सत्त्वे श्वैत्यादिनिर्विकल्पकस्यापि अनुत्पत्तेः । अतः प्रमात्वावच्छिन्नं प्रति गुणस्यैव हेतुत्वम् इति प्राहुः ।।

।। प्रमाजनकगुणनिरूपणम् ।।

कारिकावली

प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ।। १३२ ।।

पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ।। १३३ ।।

शाब्दबोधे योग्यतायाः तात्पर्यस्य अथ वा प्रमा ।
गुणः स्यात्...............

मुक्तावली

अथ के गुणाः इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमेण गुणान् दर्शयति – प्रत्यक्षे तु इति । प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः । अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यं गुणः । एवम् अग्रेऽपि ज्ञेयम् ।।

दिनकरी

एवम् अग्रेऽपि ज्ञेयम् इति । उपमितौ शक्ये सादृश्यज्ञानम्, शाब्दबोधे योग्यतायाः तात्पर्यस्य वा प्रमैव गुणः इति भावः ।।

।। प्रमानिरूपणम् ।।

कारिकावली

.... भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ।। १३४ ।।

अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ।

तत्प्रमा..............

मुक्तावली

प्रमां निरूपयति – भ्रमभिन्नम् इति ।

ननु यत्र शुक्तिरजतयोः ''इमे रजते'' इति ज्ञानं जातम्, तत्र रजतांशेऽपि प्रमा न स्यात् । तज्ज्ञानस्य भ्रमभिन्नत्वाभावात्, अत आह – अथवा इति । तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः ।।

अथ एवं स्मृतेरपि प्रमात्वं स्यात् । ततः किम्? इति चेत्, तथा सति तत्करणस्यापि प्रमाणान्तरत्वं स्यात् इति चेत्, न । यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् ।।

इदं तु बोध्यम् – येन संबन्धेन यद्वत्ता, तेन संबन्धेन तद्वद्विशेष्यकत्वं तेन संबन्धेन तत्प्रकारकत्वं वाच्यम् । तेन कपालादौ संयोगादिना घटादिज्ञाने न अतिव्याप्तिः ।।

दिनकरी

ननु एवं रङ्गरजतयोः ''इमे रजतरङ्गे'' इति ज्ञाने अतिव्याप्तिः, अत आह– तद्वद्विशेष्यकत्वे सति इति । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानम् इत्यर्थः । सतिसप्तम्या अवच्छिन्नार्थकत्वात् । तत्प्रकारकभ्रमेऽतिव्याप्तेः तद्वद्विशेष्यक इति । ''रजत एव द्रव्यम्'' इति ज्ञाने रजतत्वप्रमात्वापत्तिः । अतः तत्प्रकारक इति । ज्ञानपदं च तथाविधेच्छायाम् अतिव्याप्तिवारणाय ।।

राजीवोल्लासः

कारिकावल्यां – अथवा तत्प्रकारम् इति । अत्रायं विवेकः – विभाजकं प्रमात्वं भ्रमभिन्नत्वमेव । तच्च निर्विकल्पकेऽप्यक्षतम् । अत एव ज्ञानं द्विविधमिति विभागसंगतिः । "रजतत्वप्रमा" इत्यादिव्यवहारौपयिकम् "अथवा" इत्यादिना दर्शितम् इति ।।

दिनकर्यां – तद्वद्विशेष्यकत्वावच्छिन्ने इत्यादि । "तद्वद्विशेष्यकं तत्प्रकारकं च ज्ञानं प्रमा" इति यथाश्रुते रङ्गरजतयोः "इमे रजतरङ्गे" इत्याकारकसमूहालम्बनभ्रमेऽतिव्याप्तिः । तत्रापि रजतत्ववद्विशेष्यकत्वरजतत्व-प्रकारकत्वयोः रङ्गत्ववद्विशेष्यकत्वरङ्गत्वप्रकारकत्वयोश्च सत्त्वात् । अतः तद्वद्विशेष्यकत्वावच्छिन्नं यत् तत्प्रकारकत्वं तद्वत् ज्ञानं प्रमा इति निष्कर्षः कार्यः । तथा सति उक्तसमूहालम्बनभ्रमे न अतिव्याप्तिः । तथा हि – ययोःविषयतयोः निरूप्यनिरूपकभावः तन्निरूपितविषयितयोः अवच्छेद्यावच्छेदकभाव इति सिद्धान्तः । दर्शितभ्रमे रङ्गत्वनिष्ठप्रकारतायां रङ्गत्वाभाववद्रजतनिष्ठविशेष्यता-निरूपितत्वेऽपि रङ्गत्ववद्रङ्गनिष्ठविशेष्यतानिरूपितत्वस्य अभावात्, रजतत्वनिष्ठ-प्रकारतायां रजतत्वाभाववद्रङ्गनिष्ठविशेष्यतानिरूपितत्वेऽपि रजतत्ववद्रजतनिष्ठ-विशेष्यतानिरूपितत्वस्य च अभावात् रङ्गविशेष्यकत्वावच्छिन्नरङ्गत्वप्रकारकत्वरजत-विशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वयोश्च अभावात् न अतिव्याप्तिः इति । रजतत्वप्रकारकरङ्गविशेष्यकभ्रमेऽतिव्याप्तिवारणाय "तद्वद्विशेष्यक" इति । रजतविशेष्यकद्रव्यत्वप्रकारकज्ञाने रजतत्वप्रमात्ववारणाय "तत्प्रकारक" इति । इच्छायाम् अतिव्याप्तिवारणाय ज्ञानपदम् ।।

मुक्तावल्याम् "अथ एवम्" इत्यारभ्य "न अतिव्याप्तिः" इत्यन्तः ग्रन्थः प्रक्षिप्तः, दिनकरभट्टादिभिः अव्याख्यानात् इति **सुबोधिनीकाराः** ।।

कारिकावली

...... न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ।। १३५ ।।

प्रकारतादिशून्यं हि संबन्धानवगाहि तत् ।

मुक्तावली

एवं सति निर्विकल्पकं प्रमा न स्यात्, तस्य सप्रकारकत्वाभावात्, अत आह – **न प्रमा** इति ।।

ननु वृक्षे कपिसंयोगज्ञानं **भ्रमः प्रमा च स्यात्** इति चेत्, न – प्रतियोगिव्यधिकरणकपिसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् ।।

न च – वृक्षे कपिसंयोगानवच्छेदेन संयोगज्ञानं भ्रमः न स्यात्, तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वात् इति – वाच्यम् । तत्र संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् लक्ष्यस्य अननुगमात् लक्षणस्य अननुगमेऽपि न क्षतिः ।।

दिनकरी

एवं सति – तत्प्रकारकत्वस्य प्रमात्वघटकत्वे संति । **भ्रमः प्रमा च स्यात्** इति । लक्षणद्वयस्य तत्र सत्त्वात् इति भावः ।।

ननु एवं लक्षणाननुगम इति, अत आह – **लक्ष्यस्य** इति । **अथ पाकरक्ते** घटे श्यामरूपवत्ताप्रतीतेः प्रमात्वं स्यात् इति चेत्, इष्टम् एव एतत् । घटस्य कदाचित् श्यामत्वात् वर्तमानत्वस्य प्रमात्वाघटकत्वात् ।।

अत्र यद्यपि स्मृत्यन्यज्ञानत्वरूपानुभवत्वस्य निवेशे वैयर्थ्यात् ज्ञानत्वघटितमेव प्रमात्वं सुवचम्, तथापि तस्य स्मृतिसाधारणतया तत्करणस्य प्रमाणान्तरतापत्त्या शास्त्रे प्रमाणव्यवहारौपयिकरूपम् अनुभवत्वघटितमेव **अनुमन्यन्ते तान्त्रिकाः** ।।

वस्तुतस्तु विशिष्टवैशिष्ट्यानुभवे विशेषणतावच्छेदकप्रकारकनिर्णयस्य कारणतया तज्जन्यतावच्छेदककोटिप्रविष्टतया अनुभवत्वस्य जातिविशेषत्वे सिद्धे ज्ञानत्वस्य (अनुभवत्वाघटकत्वात्) [प्रमात्वाघटकत्वात्] न अनुभवत्वस्य वैयर्थ्यम् इति कृतं पल्लवितेन ।।

राजीवोल्लासः

लक्षणद्वयस्य इति । प्रमालक्षणस्य भ्रमलक्षणस्य च ''वृक्षः कपिसंयोगी'' इति ज्ञाने सत्त्वात् इत्यर्थः ।।

वृक्षे कपिसंयोगतदभावयोः वस्तुतः सत्त्वेन तादृशज्ञाने कपिसंयोगवद्वृक्ष-विशेष्यककपिसंयोगप्रकारकत्वरूपस्य प्रमालक्षणस्य, कपिसंयोगाभाववद्वृक्ष-विशेष्यककपिसंयोगप्रकारकत्वरूपभ्रमलक्षणस्य च सत्त्वात् इति भावः । अत्र समाधानम् आह **मूले प्रतियोगिव्यधिकरण** इति । प्रतियोगिव्यधिकरणतद-भाववद्विशेष्यकतत्प्रकारकज्ञानत्वं भ्रमलक्षणम् । ''वृक्षः कपिसंयोगी'' इति ज्ञाने यः विशेष्यः वृक्षः तस्य प्रतियोगिसमानाधिकरणकपिसंयोगाभाववत्त्वमेव अस्ति, न प्रतियोगिव्यधिकरणकपिसंयोगाभाववत्त्वम् इति ''वृक्षः कपिसंयोगी'' इति ज्ञानस्य प्रतियोगिव्यधिकरणकपिसंयोगाभाववद्विशेष्यकत्वं नास्तीति न भ्रमत्वप्रसङ्ग इति भावः ।।

ननु किमिदं प्रतियोगिव्यधिकरणत्वम् । न तावत् प्रतियोग्यसमानाधिकरण-त्वम् । ''गुणः संयोगी'' इति ज्ञानस्य भ्रमत्वानुपपत्तेः । नापि प्रतियोग्यनधिकरण-वृत्तित्वरूपं तदभाववति प्रतियोग्यनधिकरणत्वपर्यवसन्नम् । तदभाववत्त्वांशस्य वैयर्थ्यापातात् इति चेत्, न । निरवच्छिन्नदैशिकविशेषणतासंबन्धेनतदभाव-वत्त्वविवक्षणे तात्पर्यात् इति **सुबोधिनीकाराः** ।।

दिनकर्याम् – **अथ पाकरक्त इत्यादि** । यत्र श्यामे घटे विजातीयतेजस्संयोग-रूपपाकवशात् रक्तं रूपम् उत्पन्नं, तत्र रक्ततादशायां ''घटः श्याम'' इति श्यामरूपवत्ताप्रतीतेः प्रमात्वं स्यात् । घटस्य पूर्वकालावच्छेदेन श्यामरूपवत्त्वेन तादृशज्ञानस्य श्यामरूपवद्विशेष्यकश्यामरूपप्रकारकत्वेन प्रमालक्षणाक्रान्तत्वात् इति चेत् – मैवम् । तादृशज्ञाने प्रमात्वस्य इष्टत्वात् । न च – वर्तमानकाला-वच्छेदेन श्यामरूपवत्त्वाभावात् कथं प्रमात्वम् इति – वाच्यम् । वर्तमानकालि-कत्वस्य तद्वत्त्वविशेषणतया प्रमालक्षणे प्रवेशाभावात् इति भावः ।।

ननु तद्वति तत्प्रकारकानुभवः प्रमा इति ग्रन्थान्तरेषु प्रमालक्षणं दृश्यते । अत्र तु अनुभवत्वस्थाने ज्ञानत्वं निविष्टम् । कथम् उभयोः सांगत्यम् इति आशङ्कां वारयितुम् आह – **अत्र यद्यपि इत्यादिना** । तद्वति तत्प्रकारकज्ञानत्वं प्रमात्वम् इत्युक्तौ यथार्थस्मृतौ अतिव्याप्तिः । तद्वारणाय ज्ञानत्वस्थाने अनुभवत्वं निवेशनीयम् । अनुभवत्वस्य स्मृत्यन्यज्ञानत्वरूपत्वात् न स्मृतौ अतिव्याप्तिः इति **केषांचित् आशयः** । न च स्मृतेः प्रमात्वम् अस्तु नाम, का क्षतिः इति शङ्कनीयम् । स्मृतेः प्रमात्वे तत्करणस्य पञ्चमप्रमाणत्वापत्तेः इति तेषाम् आकूतम् ।।

अन्ये तु स्मृतेः यथार्थत्वरूपं प्रमात्वम् अङ्गीकुर्वन्ति । तन्मते ज्ञानत्व-मात्रमेव अलम् । स्मृत्यन्यज्ञानत्वनिवेशस्य गुरुत्वेन वैयर्थ्यात् इत्याहुः ।।

वस्तुतस्तु स्मृतेः यथार्थत्वव्यवहारेऽपि तत्करणे प्रमाणत्वव्यवहाराभावात् तत्र प्रमात्वव्यवहारो न भवति इति प्रमात्वव्यवहारोपयोगि अनुभवत्वघटितमेव लक्षणं साधु इति भावः । **अनुमन्यन्ते तार्किका** इति । तथा च स्मृतिः अनुभवः च इति ज्ञानं द्विविधम् इति विभागानुसारेण अत्र ग्रन्थे स्मृतिसाधारणप्रमात्वनिरुक्तिः । प्रमाणत्वव्यवहारौपयिकं तु प्रमात्वम् अनुभवत्वघटितम् इति भावः ।।

वस्तुतस्तु इत्यादि । अनुभवत्वं नाम जातिः, न तु स्मृतिभिन्न-ज्ञानत्वम् । अनुभवत्वजातिसिद्धिस्तु – ''विशिष्टवैशिष्ट्यावगाह्यनुभवनिष्ठा विशेषणतावच्छेदकप्रकारकनिर्णयनिष्ठकारणतानिरूपिता कार्यता, किंचिद्धर्मावच्छिन्ना, कार्यतात्वात्'' इत्यनुमानेन । विशिष्टवैशिष्ट्यावगाह्यनुभवं प्रति विशेषणतावच्छेदक-प्रकारकनिर्णयस्य कारणत्वात् । तथा च स्मृतिभिन्नज्ञानत्वं न अनुभवत्वम् इति स्मृतिभिन्नत्वांशवैयर्थ्यशङ्का न अवतरति इति भावः । **''अनुभवत्वा-घटकत्वात्''**इत्यस्य स्थाने **''प्रमात्वाघटकत्वात्''** इति पाठः साधुः इति प्रतीयते । **न अनुभवत्वस्य वैयर्थ्यम्** इति । प्रमात्वस्य अनुभवत्वजातिघटितत्वात् स्मृतौ अनुभवत्वाभावादेव तत्र प्रमात्ववारणसंवात् इति भावः । अपि च ज्ञानत्वापेक्षया स्मृत्यन्यज्ञानत्वरूपानुभवत्वस्य गुरुत्वेन तन्निवेशनवैयर्थ्यं यत् आपादितं तत् नास्तीति भावः ॥

॥ प्रामाण्यग्रहनिरूपणम् ॥

कारिकावली

प्रामाण्यं न स्वतो ग्राह्यं संशयानुपपत्तितः ।

मुक्तावली

प्रामाण्यम् इति । **मीमांसका हि प्रमात्वं स्वतो ग्राह्यम् इति वदन्ति ॥**

तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति ॥

भट्टानां मते ज्ञानम् अतीन्द्रियम्, ज्ञानजन्यज्ञातता प्रत्यक्षा, तया च ज्ञानम् अनुमीयते ॥

मुरारिमिश्राणां मते अनुव्यवसायेन ज्ञानं गृह्यते ।।

विषयनिरूप्यं हि ज्ञानम् । सर्वेषाम् अपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते । अतः ज्ञानवित्तिवेद्यः विषयः । तन्मतं दूषयति – न स्वतो ग्राह्यम् इति ।।

संशय इति । यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यं स्यात्, तदा अनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयः न स्यात् । तत्र हि यदि ज्ञानं ज्ञातं तदा त्वन्मते प्रामाण्यं ज्ञातमेव इति कथं संशयः? यदि तु ज्ञानं न ज्ञातं तर्हि धर्मिज्ञानाभावात् कथं संशयः? तस्मात् ज्ञाने प्रामाण्यम् अनुमेयम् ।।

तथा हि – "इदं ज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवम्, यथा अप्रमा"; "इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा, गन्धवत्ति पृथिवीत्वप्रकारकज्ञानत्वात्"; एवम् "इदं जलत्वप्रकारकं ज्ञानं प्रमा, स्नेहवर्ति जलत्वप्रकारकज्ञानत्वात्" ।।

न च – हेतुज्ञानं कथं जातम् इति – वाच्यम् । पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात्, तत्र गन्धग्रहेण गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात् । तत्प्रकारकत्वावच्छिन्न-तद्वद्विशेष्यकत्वं परं न गृह्यते, संशयानुरोधात् ।।

दिनकरी

प्रामाण्यं न स्वतो ग्राह्यम् इति मूलेन स्वतो ग्राह्यत्वं निषिध्यते । तत्र स्वतस्त्ववादिनः के? इति आकाङ्क्षायाम् आह – मीमांसका हि इति । स्वप्रकाशत्वात् इति । स्वविषयकत्वात् इत्यर्थः । तेनैव गृह्यत इति । ज्ञाने गृह्यमाणे तन्निष्ठज्ञानत्वादिधर्मवत् तन्निष्ठप्रामाण्यस्यापि ग्रहे बाधकाभावात्, तन्मते सर्वं ज्ञानम् "अयं घटः घटमहं जानामि" इत्याकारकम् इति भावः ।।

तया च इति । अयम् अत्र अनुमानप्रकारः – ''इयं ज्ञातता घट विशेष्यकघटत्वप्रकारकज्ञानजन्या, घटवृत्तिघटत्वप्रकारकज्ञाततात्वात्; या यद्वृत्तिः यत्प्रकारिका ज्ञातता, सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या, यथा पटे पटत्वप्रकारिका ज्ञातता'' इति ।।

अनुव्यवसायेन इति । ननु ज्ञानज्ञानस्य विषयाविषयकत्वात् कथं विषयघटितप्रामाण्यं तस्य विषय इति, अतः ज्ञानज्ञानस्य विषयविषयकत्वे प्रमाणम् आह – **विषयनिरूप्यम्** इति । **विषयाविषयकप्रत्यक्षाविषय** इत्यर्थः । **ज्ञानवित्तिवेद्यः विषय** इति । विषयविषयकतानियतस्वविषयताकप्रत्यक्षकं ज्ञानम् इत्यर्थः । अतः न साध्यहेत्वोः वैयधिकरण्यम् । तथा च ''ज्ञानं विषयविषयकतानियतस्वविषयकताकप्रत्यक्षकम्, विषयाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वात्'' इति अनुमानं ज्ञानप्रत्यक्षस्य विषयविषयकत्वे प्रमाणम् इति भावः । भट्टमते तु प्रत्यक्षस्थानाभिषिक्ता ज्ञाततालिङ्गकानुमितिरेव बोध्या इति अन्यत्र विस्तरः ।।

अनभ्यासदशापन्न इति । अनवधृतप्रामाण्यसजातीयेत्यर्थः । ज्ञातमेव – निश्चितमेव । **गन्धवति** इति । व्याप्यवति व्यापकप्रकारकत्वस्य व्यापकवति व्यापकप्रकारकत्वव्याप्यत्वात् इति भावः ।।

ननु कथं तर्हि प्रामाण्यस्य अनुमेयता, गन्धवति पृथिवीत्वप्रकारकत्वस्येव पृथिवीत्ववति पृथिवीत्वप्रकारकत्वादेरपि प्रत्यक्षसंभवात्, अत आह– **तत्प्रकारकत्व** इति ।।

संशयानुरोधात् इति । यद्यपि ज्ञाने प्रामाण्यनिश्चयः धर्मितावच्छेदकसामानाधिकरण्येन जायते, सन्देहस्तु धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्याभावावगाही धर्मितावच्छेदकावच्छेदेन प्रामाण्यावगाही इति कथं संशयानुपपत्तिः? तथापि

प्रवृत्त्युपयुक्तस्य धर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्य स्वतस्त्वे संशयानुपपत्तिः दूषणम् इति ध्येयम् ।।

न च – **प्रामाण्याग्राहकसामग्रीसत्त्वात्** कथम् अग्रिमसंशयानुरोधेन प्रामाण्याग्रह इति – वाच्यम् । तत्र अग्रिमसंशयानुरोधेन **संशयजनकदोषस्य** प्रामाण्यनिश्चय-प्रतिबन्धकत्वकल्पनात् इति आशयात् ।।

ननु यदि प्रामाण्यम् अनुमेयम्, तदा प्रामाण्यग्रहवैयर्थ्यम् । तथा हि – ''अयं पुरुषः'' इति निश्चये प्रामाण्यसन्देहेन अर्थसन्देहस्य ''अयं पुरुषः न वा'' इत्याकारकस्य उत्पत्या पुरुषार्थिनः प्रवृत्तिः न संभवति, तत्र प्रामाण्यनिश्चये च न तत्संशयाधीनः अर्थसन्देहः इति प्रामाण्यग्रहस्य प्रवृत्तौ उपयोगः, प्रामाण्यग्रहस्य अनुमित्यात्मकत्वे च प्रामाण्यानुमापककरादिमति पुरुषत्वप्रकारकत्वादिरूपहेतुग्रहे **तद्घटकतया** पुरोवर्तिनि पुरुषत्वव्याप्यकरादिग्रहस्य आवश्यकतया तेनैव ''अयं पुरुषः न वा'' इति सन्देहप्रतिबन्धसंभवात् अलं प्रामाण्यानुमानेन इति चेत्, न –

करादौ पुरुषत्वव्याप्यत्वग्रहं विनापि करादिमति पुरुषत्वप्रकारकत्वहेतोः पुरुषत्वघटितप्रामाण्यव्याप्यत्वग्रहसंभवेन प्रामाण्यानुमानसंभवात् । एवं न्यायमते अनुमितेरिव **द्वितीयानुव्यवसायस्यापि** प्रामाण्यग्राहकत्वम् इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

मूले मीमांसका इत्यादि । गुरवः भाट्टाः मुरारिमिश्राः इति त्रयो मीमांसकाः । एते त्रयोऽपि ज्ञानगतं प्रमात्वं स्वतो ग्राह्यम् इति वदन्ति । स्वतोग्राह्यत्वं नाम ज्ञानग्राहकसामग्रीग्राह्यत्वम् । ज्ञानं यया सामग्र्या ज्ञायते तयैव सामग्र्या ज्ञानगतं प्रमात्वमपि ज्ञायते। ज्ञानविषयकज्ञाने एव प्रमात्वं विषय इत्यर्थः ।।

तत्र गुरुमते ज्ञानं त्रिपुटीरूपम् अङ्गीक्रियते । ''त्रिपुटी'' इत्यस्य ज्ञातृ-ज्ञेय-ज्ञानैतत्त्रितयविषयकम् इत्यर्थः । तन्मते आदौ ''अयं घट'' इति व्यवसायात्मकं ज्ञानम्, ततः ''घटमहं जानामि'' इति अनुव्यवसायात्मकं ज्ञानम् इति न अङ्गीक्रियते । अपि तु प्रथमत एव ''अयं घटः, घटमहं जानामि'' इत्याकारकमेव ज्ञानं जायते । तदेव व्यवसायात्मकम् । तस्मिन् ज्ञाने विषयः घटः, ज्ञाता अहमर्थः, ज्ञाधात्वर्थज्ञानं च इति त्रयं विषयः । अत एव ज्ञानस्य स्वविषयकत्वरूपं स्वप्रकाशत्वम् । तथा च ज्ञानविषयकं स्वात्मकं ज्ञानं स्वगतप्रमात्वमपि विषयीकरोति, यथा ज्ञानगतं ज्ञानत्वमपि विषयीकरोति तद्वत् । ज्ञानत्वविशिष्ट-ज्ञानविषयकत्ववत् प्रमात्वविशिष्टज्ञानविषयकत्वमपि व्यवसायस्य स्वीक्रियते ।।

न च – विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् पूर्वम् अनुपस्थितस्य प्रमात्वस्य कथं भानम् इति – वाच्यम् । तादृशकारणताया अनङ्गीकारात् । तथा च ज्ञानविषयकज्ञानविषयत्वस्यैव स्वतस्त्वरूपतया गुरुमते ज्ञानविषयकं ज्ञानं स्वयमेव, तद्विषयत्वं प्रमात्वस्य अस्ति इति स्वतस्त्वोपपत्तिः ।।

मुरारिमिश्राणां मते – आदौ ''अयं घट'' इति व्यवसायात्मकं ज्ञानम्, ततः ''घटत्वेन घटमहं जानामि'' इत्याकारकः अनुव्यवसायः । तस्य घटत्वप्रकारकघटविशेष्यकज्ञानवान् इत्यर्थः । तथा च तन्मते ज्ञानविषयकं ज्ञानम् अनुव्यवसायः । तेन ज्ञाने विषयीक्रियमाणे तद्विशेषणतया घटत्वप्रकारकत्वावच्छिन्नघटविशेष्यकत्वरूपं प्रमात्वमपि विषयीक्रियते। अतः ज्ञानविषयकज्ञानविषयत्वरूपस्वतस्त्वोपपत्तिः ।।

भाट्टानां मते ज्ञानस्य अतीन्द्रियतया ऐन्द्रियकं घटादिज्ञानं ज्ञानविषयकं न भवति इति प्रथमतः ''अयं घट'' इत्येव ज्ञानम् उदेति । तेन ज्ञानेन घटे

ज्ञातताख्यः कश्चित् सविषयकः धर्मः जायते । तया ज्ञाततया ज्ञानम् अनुमीयते । अनुमानप्रकारः **दिनकर्यां** वक्ष्यते । तथा च ज्ञाततालिङ्गकानुमितिरेव तन्मते ज्ञानविषयकज्ञानम् । तया अनुमित्या ज्ञानगतं प्रमात्वमपि विषयीक्रियत इति ज्ञानविषयकज्ञानविषयत्वरूपस्वतस्त्वोपपत्तिः इति ।।

ननु प्रामाण्यप्रकारकज्ञाने प्रामाण्यरूपविशेषणज्ञानस्य हेतुतया तेन विना कथं व्यवसायेनैव प्रामाण्यग्रह इति आशङ्क्य आह – **दिनकर्यां ज्ञाने गृह्यमाणे** इति ।।

इयं ज्ञातता इति । गुरुमुरारिमिश्रमतयोरिव आत्मविशेष्यकमेव ज्ञानज्ञानम् इति पक्षे ''अहं घटज्ञानवान् घटज्ञाततावत्'' इति अनुमानाकारः । तत्तज्ज्ञाततायाः तत्तदात्मनैव ग्रहणात् तत्तज्ज्ञाततायाः तत्तदात्मना सह संबन्धविशेषो वाच्यः, स एव अत्र हेतुतावच्छेदकसंबन्ध इति प्राहुः । **यथा पटे** इति । न च – पटत्वप्रकारकज्ञातताया: पक्षसमत्वात् कथं दृष्टान्तत्वम् इति – वाच्यम् । उपदेशेन व्यतिरेक्यनुमानेन वा तत्र साध्यस्य निश्चितत्वाभिप्रायात् । **विषयाविषयकप्रत्यक्षाविषय** इति । **विषयनिरूप्यम्** इति पदं सावधारणम् । असति बाधके सर्वं वाक्यं सावधारणम् इति न्यायात् । इत्थं च विषयेणैव निरूप्यम् इत्यर्थः । निरूप्यं – प्रत्यक्षविषयः । ''निरूपणं साक्षात्कारः, एवं वित्तिरपि'' इति **दीधित्युक्तेः** । अवधारणेन विषयं विना निरूप्यत्वाभावबोधनात् विषयाविषयकप्रत्यक्षाविषयत्वे सति विषयविषयकप्रत्यक्षविषयत्वलाभः । तत्र विशेष्यकोटौ विषयविषयकत्वांशस्य प्रवेशे प्रयोजनाभावेन तत्त्यागात् दर्शितहेतुलाभः । ''हि'' इत्यस्य ''यत'' इत्यर्थः ।।

ननु विषयाविषयकप्रत्यक्षाप्रसिद्ध्या हेत्वप्रसिद्धिरिति चेत् – अत्र **सुबोधिनीकाराः** – ''घटज्ञानं घटत्वविशिष्टविषयितानियतस्वविषयिताकप्रत्यक्षकम्,

घटत्वविशिष्टाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वात्, यत् यद्विशिष्टाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयः, तत् तद्विशिष्टविषयितानियतस्वविषयिताकप्रत्यक्षकम्, यथा पटज्ञानम्'' इति विशेषरूपेण अनुमाने तात्पर्यात् । ''ज्ञानं गुण'' इत्याद्यनुमितिशाब्दबोधयोः विषयाविषयकयोः संभवात् व्याप्तिभङ्गपरिहाराय प्रत्यक्षत्वेन प्रत्यक्षस्य हेतुकोटौ प्रवेशः । घटविषयकेश्वरप्रत्यक्षादिविषयपटादौ व्यभिचारवारणाय नञ्द्वयघटितहेतूपन्यासः । अतीन्द्रिये व्यभिचारवारणाय हेतौ विशेष्यभागः । प्रामाण्यस्य सर्वत्र अनुव्यवसायग्राह्यत्वरूपेष्टसिद्धये साध्यकोटौ सामानाधिकरण्यम् उपेक्ष्य नियतत्वप्रवेशः ।।

अथ एवमपि व्यवसायीययावद्विषयनिरूप्यत्वासिद्ध्या प्रामाण्यघटकरजतत्वादिवैशिष्ट्यभानासिद्धिः इति चेत् – न । व्यवसायरूपज्ञानलक्षणाप्रत्यासत्तेःतुल्यत्वेन सामग्रीसम्पत्त्या तस्यापि भानावश्यंभावात् । एतादृशशङ्कासमाधानसूचनाय उक्तं **अन्यत्र विस्तर** इति – इति प्राहुः ।।

तथा च ज्ञानम् इत्यादि **दिनकरीयग्रन्थप्रदर्शितानुमानप्रकार एव सुबोधिनीकारैः** स्पष्टीकृतः ।।

विषयविषयकतानियत इति । विषयः घटादिः तद्विषयकता अनुव्यसायनिष्ठा तन्नियता तद्व्याप्या या स्वविषयकता तदाश्रयप्रत्यक्षकम् इत्यर्थः । यत्र यत्र ज्ञानविषयकत्वं तत्र विषयविषयकत्वम् इति व्याप्तिः नियतपदेन विवक्षिता । **ज्ञानवित्तिवेद्य** इत्यस्य यथाश्रुतार्थपरित्यागे बीजमाह – **अत** इति । तत्र अनुमानप्रकारं दर्शयति – **तथा च** इत्यादिना । **प्रत्यक्षविषयत्वात्** इति । एतेन विषयाविषयकप्रत्यक्षाविषयपरमाण्वादौ हेतुमति साध्याभावेऽपि न व्यभिचारः ।।

ननु एवं **भट्टमते** ज्ञानस्य अतीन्द्रियतया प्रत्यक्षविषयत्वघटितहेत्वभावेन ज्ञानग्राहकानुमितेः विषयविषयकत्वासिद्ध्या कथं विषयघटितप्रामाण्यग्राहकत्वम्

इति, अत आह – **भट्टमते तु** इति । एतन्मते च ''ज्ञानविषयविषयकतानियतस्व-विषयकताकज्ञानकं विषयाविषयकप्रत्यक्षाविषयत्वे सति ज्ञानविषयत्वात्'' इत्यनुमानं ज्ञानज्ञानस्य विषयविषयकत्वे प्रमाणम् इति भावः ।।

ननु अभ्यासदशा अभ्यासकालः तदापन्नं ज्ञानम् अभ्यासदशापन्नं ज्ञानं तद्भिन्नं ज्ञानम् अनभ्यासदशापन्नज्ञानम् । तथा च प्रामाण्यसंशयपूर्वकालस्य अभ्यासकालतया तत्कालापन्नज्ञाने कथम् अनभ्यासदशापन्नत्वम् इति, अत आह – **अनवधृत** इति । तथा च अनवधृतप्रामाण्यसजातीयत्वस्य अस्मिन् ज्ञाने सत्त्वात् न असङ्गतिः इति भावः । यद्यपि ''अनवधृतप्रामाण्यक'' इत्यनेन एव सामञ्जस्ये ''सजातीय'' इत्युक्तिः विफला, तथापि संशयपूर्वकालीनज्ञानस्य अनवधृतं निश्चयाविषयीभूतं यत् प्रामाण्यं तत्कत्वस्य अगृहीततया अनवधृतप्रामाण्यकत्वं न संभवति इति ''तत्सजातीय'' इत्युक्तिः सफला । तथा च ज्ञानोत्तरं प्रामाण्यसंशयः स्वेन अनुभूतः तत्र अनवधृत-प्रामाण्यकत्वस्य गृहीततया प्रामाण्यसंशयपूर्वकालिकस्यापि अनवधृतप्रामाण्य-सजातीयत्वम् इति भावः ।।

अत्र **सुबोधिनीकाराः – अनभ्यासदशापन्न** इति । अभ्यासः – घटवत्तादिज्ञानानन्तरं सफलप्रवृत्तेः पौनः पुन्यम्, तद्दशापन्नं – तस्मिन् सति या दशा पूर्वजातज्ञाने प्रामाण्यव्याप्यसफलप्रवृत्तिजनकत्वज्ञानसाहित्यं तद्विशिष्टम्; तन्न भवति इति अनभ्यासदशापन्नम् इत्यर्थः । न च – प्रथमज्ञानात् अनिश्चितप्रामाण्यात् प्रवृत्तिरेव कथम् इति – शङ्क्यम् । प्रामाण्यावगमस्य प्रवृत्तौ अनुपयोगात् । न च – तर्हि ज्ञाने प्रामाण्यावगमः निरर्थक इति – वाच्यम् । तत्समानाकारभाविज्ञानात् निष्कम्पप्रवृत्तौ तस्य उपयोगात् । उपदर्शितसफलप्रवृत्तिजनकत्वं प्रामाण्यव्याप्यगुणजन्यत्वादेः-उपलक्षकम् इति दर्शयितुं

फलितार्थम् आह – **अनवधृत** इति । अवधृतप्रामाण्यस्य पूर्वं निश्चितप्रमात्मकज्ञानस्य सजातीयं समानधर्मविशेषवत् न भवति इति अनवधृतप्रामाण्यसजातीयम् । अवधृतप्रामाण्यसजातीयत्वस्य प्रामाण्यव्याप्यत्वात् तज्ज्ञानस्य विशेषदर्शनत्वेन प्रामाण्यसंशयप्रतिबन्धकत्वम् अवसेयम् । ''अनभ्यासदशापन्न'' इत्यस्य ''प्रामाण्यव्याप्यवत्तानिश्चयकालीन इत्यर्थः'' इति **तर्कवागीशाः** – इत्याहुः ।।

ननु गन्धवति पृथिवीत्वप्रकारकज्ञानस्य कथं पृथिवीत्ववति पृथिवीत्व-प्रकारकत्वरूपप्रामाण्यग्राहकत्वम् इति, अत आह – **व्याप्यवति** इति । व्याप्यो गन्धः व्यापकं पृथिवीत्वम् । यत्र यत्र व्याप्यवद्विशेष्यकव्यापकप्रकारकत्वं तत्र व्यापकवद्विशेष्यकव्यापकप्रकारकत्वम् इति व्याप्तेः भङ्गप्रसङ्ग एव अत्र अनुकूलतर्क इति भावः ।।

ननु **कथं तर्हि** इति । **अनुमेयता** इति । प्रामाण्याश्रयग्राहका-तिरिक्तलिङ्गग्राह्यता इत्यर्थः ।।

मुक्तावल्यां – **तत्प्रकारकत्वावच्छिन्न** इति । रङ्गरजतयोः ''इमे रजतरङ्गे'' इति भ्रमे अतिव्याप्तिवारणाय प्रकारकत्वविशेष्यकत्वयोः अवच्छेद्यावच्छेदकभावस्यापि प्रमालक्षणघटकत्वात् इति भावः । **परम्** इति अवधारणार्थकम् । उक्तं च **दीधितिकृता** – '' 'पुरोवर्तिनि रजतत्वप्रकारकम्' इति ग्रहेऽपि 'रजते रजतत्व-प्रकारकम्' इति न ग्रहः'' – इति । **संशयानुरोधात्** इति । प्रामाण्यसंशयानुरोधात् इत्यर्थः । **दिनकर्यां यद्यपि** इत्यादि । प्रामाण्यस्य स्वतोग्राह्यत्ववादिभिः ज्ञानत्वावच्छेदेन प्रामाण्यं ज्ञानग्रहकाले एव निश्चितम् इति न उच्यते। किं तु प्राथमिकस्य ज्ञानग्रहस्य, धर्मितावच्छेदकीभूतज्ञानत्वसामानाधिकरण्येन प्रामाण्यावगाहित्वं स्वीक्रियते । प्रामाण्यसंशयस्तु ज्ञानत्वावच्छेदेन प्रामाण्यं

ज्ञानत्वसामानाधिकरण्येन प्रामाण्याभावं च अवगाहते। तादृशसंशयं प्रति ज्ञानत्वसामानाधिकरण्येन प्रामाण्यनिश्चयस्य प्रतिबन्धकत्वाभावात् कथं प्रामाण्यसंशयानुपपत्तिः इति शङ्का । निष्कम्पप्रवृत्तिं प्रति ज्ञानत्वावच्छेदेन प्रामाण्यग्रहस्यैव हेतुत्वात् तादृशप्रामाण्यग्रहस्य स्वतस्त्वे संशयानुपपत्तिः दोषः । ज्ञानत्वावच्छेदेन प्रामाण्यग्रहस्य ज्ञानत्वसामानाधिकरण्येन प्रामाण्याभावभानं प्रति विरोधित्वात् इति समाधानम् ।

प्रामाण्यग्राहकसामग्रीसत्त्वात् इति । मनस्संयुक्तात्मसमवेत-ज्ञानसमवायेन यथा ज्ञानत्वं गृह्यते, यथा च तद्विशेषणतया प्रकारितादि च गृह्यते, तथा तद्विशेषणविशेषणतया विषयितानिष्ठमवच्छिन्नत्वमपि गृह्यतैव, लौकिकमानस-प्रत्यक्षसामग्र्याः सत्त्वात् इति भावः । न च – तथापि रजतत्ववत्त्वं विशेष्यिताविशे-षणधर्मिणि कथं विषयीक्रियत इति – शङ्क्यम् । इदन्त्ववत् रजतत्वेऽपि ज्ञानलक्षणाप्रत्यासत्तेःअविशेषेण तदुपपत्तेः । **संशयजनकदोषस्य** इति । प्रामाण्यादिनिश्चयासमानकालीनव्यवसाय एव अत्र दोषः ।।

ननु यदि इत्यादि । प्रामाण्यं यदि अनुमानग्राह्यं तदा प्रामाण्यग्रहस्य वैयर्थ्यम् । तथा हि – ''अयं पुरुष'' इति निश्चयविशेष्यकप्रामाण्यप्रकारकसंदेहे ''अयं निश्चयः प्रमा न वा'' इत्याकारके सति ''अयं पुरुषो न वा'' इत्याकारकः अर्थसंदेहः जायते । तेन प्रवृत्तिः न स्यात् इति प्रवृत्तिजननाय निश्चयधार्मिकप्रामाण्यग्रहः [निश्चयः] आवश्यक इति वक्तव्यम् । प्रामाण्यज्ञानस्य अनुमितिरूपत्वे च प्रामाण्यानुमितिजनकं यत् करादिमति पुरुषत्वप्रकारकत्व-रूपहेतुज्ञानं तस्मिन् सति तादृशहेतुघटकतया पुरोवर्तिनि पुरुषत्वव्याप्यकरादिग्रहस्य आवश्यकतया तेन ग्रहेणैव ''अयं पुरुषो न वा'' इति संदेहस्य प्रतिबन्धसंभवात् प्रामाण्यानुमानं व्यर्थम् इति शङ्का । **तद्धटकतया** इति । करादिमति पुरुषत्व-प्रकारकत्वरूपहेतुघटकतया इत्यर्थः । तथा च करादिमति पुरुषत्वप्रकारकत्वरूपहेतोः

व्याप्यवति व्यापकप्रकारकत्वेनैव प्रामाण्यानुमापकतया व्याप्तेः व्यापकघटितत्वेन तद्धटकत्वं पुरुषत्वव्याप्यकरादेः आवश्यकम् इति भावः । उक्तशङ्कां परिहरति – **करादौ** इत्यादिना । तथा च व्याप्यवति व्यापकप्रकारकत्वत्वेन न अस्य हेतुत्वम्, येन तद्धटकतया तज्ज्ञानापेक्षा स्यात् । किं तु करादिमति पुरुषत्वप्रकारकत्वत्वेनैव । न च ह्रदत्ववति वह्निप्रकारकत्वरूपहेतोः वह्निमति वह्निप्रकारकत्वरूपप्रामाण्यानुमापकत्वापत्तिः । व्याप्यवति व्यापकप्रकारकत्वत्वस्य स्वरूपसत एव उपयुक्तत्वात् इति भावः ।।

अत्र सुबोधिनीकाराः – **तद्धटकतया** इति । करादेः पुरुषत्वाव्याप्यत्वे करादिघटितहेतोः स्थाण्वादिविशेष्यकपुरुषत्वप्रकारकज्ञानेऽपि प्रसङ्गेन व्यभिचारित्वापत्त्या पुरुषत्वव्याप्यकरादिमति पुरुषत्वप्रकारकत्वादेरेव हेतुतया पुरुषत्वव्याप्यकरादेः हेतुघटकत्वम् इत्यभिमानः । **करादौ पुरुषत्व** इति । अयं भावः – करादौ पुरुषत्वव्याप्यत्वं न हेतुघटकम् । वस्तुतः करादेः तथात्वेन व्यभिचारासंभवात् । परं तु तत्र हेतौ प्रामाण्यव्याप्यत्वशङ्काविघटकतर्कोत्थापकतया क्वचित्तज्ज्ञानस्य उपयोगः । एवं च शङ्कासामग्र्यभावस्थले तज्ज्ञानं विनापि प्रामाण्यव्याप्यत्वग्रहः संभवत्येव इति – व्याचक्षते ।।

द्वितीयानुव्यवसायस्यापि इति । प्रथमानुव्यवसायानन्तरं पुरोवर्तिनि गन्धादिज्ञानोत्तरं ''पृथिव्यादिरेव मया पृथिवीत्वादिना पूर्वं ज्ञात'' इति द्वितीयानुव्यवसायाकारः । तत्र स्मृत्युपनीतपूर्वव्यवसाये ज्ञानोपनीततद्वद्विशेष्यकत्वतत्प्रकारकत्वे इव तयोः एकस्मिन् अपरवैशिष्ट्यम् अवच्छिन्नत्वरूपं मनसा गृह्यते एव । प्रतिबन्धकस्य व्यवसायरूपदोषस्य अपगमात् इति भावः ।।

ननु तर्हि प्रामाण्यस्य स्वतोग्राह्यत्वमेव आपतितम् इति चेत्, न । स्वाश्रयविषयकयावद्ग्रहविषयत्वस्यैव स्वतस्त्वात् । तस्य च प्रामाण्ये अभावात्,

प्रथमानुव्यवसायस्य यावदन्तर्गतत्वात् । स्वाश्रयव्यवसायसामग्र्यघटकज्ञानान्तरजन्य-ज्ञानविषयत्वस्यैव प्रामाण्ये सत्त्वेन परतस्त्वानपायाच्च ॥

ननु तत्प्रकारकत्वादेः प्रथमानुव्यवसायजन्यस्मृत्यात्मकज्ञानोपनीतत्वं तदा भवेत्, यदि प्रथमानुव्यवसाये ज्ञानविशेषणतया तत् भासेत; तदेव कथं, पूर्वं तदात्मकविशेषणस्य ज्ञानाभावात् इति चेत्, – न । अनुभवबलात् तत्र विशेषणज्ञानस्य हेतुत्वाकल्पनात्। अन्यथा ''घट'' इत्यादिव्यवसायकाले ज्ञानत्वस्यापि अज्ञातत्वेन अनुव्यवसाये तस्यापि प्रकारतया भानानुपपत्त्या ''जानामि'' इत्याकारतापि न स्यात् ॥

अथ प्रामाण्यस्य परतस्त्वे प्रामाण्यग्राहकज्ञाने प्रामाण्यनिश्चयाय अनुमानान्तरम्, एवं तस्यापि इति अनवस्था इति चेत् – न । सर्वत्र प्रामाण्यसंशयोदये प्रमाणाभावात् । धर्मिज्ञानकोटिस्मरणादिरूपायाः संशयसामग्र्याः अनियतत्वात् । यावदप्रामाण्यशङ्कोदयं तन्निश्चयश्च परत आवश्यक एव । एतत्सूचनाय उक्तम् – अन्यत्र विस्तर इति ॥

॥ अन्यथाख्यातिनिरूपणम् ॥

मुक्तावली

ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम् । न च – रङ्गे रजतार्थिनः प्रवृत्तिः भ्रमजन्या न स्यात्, तव मते भ्रमस्य अभावात् इति – वाच्यम् । तत्र हि दोषाधीनस्य पुरोवर्तिनि स्वतन्त्रो-पस्थितरजतभेदाग्रहस्य हेतुत्वात् । सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणम् ॥

अस्तु वा तत्रापि रजतभेदाग्रहः स एव कारणम् इति । न च अन्यथाख्यातिः संभवति, रजतप्रत्यक्षकारणस्य रजतेन्द्रियसन्निकर्षस्य अभावात्, रङ्गे रजतबुद्धेः अनुपपत्तेः इति चेत्, न । सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात् ।।

न च – संवादिप्रवृत्तौ तत्कारणम्, विसंवादिप्रवृत्तौ च भेदाग्रहः कारणम् इति – वाच्यम् । लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् । इत्थं च रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणप्रत्यासत्तिकल्पनेऽपि न क्षतिः, फलमुखगौरवस्य अदोषत्वात् ।।

किञ्च यत्र रङ्गरजतयोः ''इमे रजते'' इति ज्ञानं जातं, तत्र न कारणबाधोऽपि ।।

अपि च यत्र रङ्गरजतयोः ''इमे रजतरङ्गे'' इति ज्ञानं, तत्र उभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम् । रङ्गे रङ्गभेदग्रहे रजते रजतभेदग्रहे च अन्यथाख्यातिभयात् दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात् ।।

किञ्च अनुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वन्हिव्याप्यधूमवद्भेदाग्रहात् अनुमितिः निराबाधा । यदि च विशिष्टज्ञानं कारणं तदा अयोगोलके वन्हिव्याप्यधूमज्ञानम् अनुमित्यनुरोधात् आपतितम्, सेयम् उभयतःपाशा रज्जुः ।

इत्थं च अन्यथाख्यातौ प्रत्यक्षमेव प्रमाणम् । ''रङ्गं रजततया अवेदिषम्'' इति अनुभवात् इति संक्षेपः ।।

दिनकरी

गुरुः शङ्कते – ननु इति । व्यर्थम् इति । व्यावर्त्याया अन्यथाख्यातेः अभावात् इति भावः । भ्रमजन्या इति । न्यायनये भ्रमजन्या प्रवृत्तिः तव मते न स्यात् इत्यर्थः । भ्रमस्य – अन्यथाख्यातेः ।।

तत्र – रङ्गगोचरविसंवादिरजतार्थिप्रवृत्तौ । रजते ''इदं रजतम्'' इति ज्ञान-काले रजतभेदाग्रहसत्त्वात् विसंवादिप्रवृत्त्यापत्तिवारणाय ''दोषाधीनस्य'' इत्युक्तम् । न्यायनये दोषाधीनः यः रजतभ्रमः तत्स्थानाभिषिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रहस्य दोषानधीनत्वात् इति भावः । यत्र ''रङ्गगोचरम् एतद्रजतवद्भूतलम्'' इति ज्ञानं तत्र विसंवादितादृशप्रवृत्तिवारणाय ''स्वतन्त्रो-पस्थित'' इति रजतविशेषणम् । मुख्यविशेष्यतया उपस्थितत्वं तदर्थः ।।

वस्तुतः रङ्गगोचरात् एतद्रजतवद्भूतलम् इति ज्ञानादपि प्रवृत्तिः इष्टैव इति स्वतन्त्रोपस्थितत्वं न देयम् इति ध्येयम् ।।

हेतुत्वात् इति । न्यायनयेऽपि ''इदं रजतम्'' इति भ्रमे हेतुतया रजतभेदाग्रहस्य तत्र आवश्यकतया तस्यैव हेतुत्वं युक्तम्, ''तद्धेतोः'' इति न्यायात् इति भावः ।।

कार्यकारणभावद्वयकल्पनापेक्षया लाघवात् आह – अस्तु वा इति । तत्रापि – सत्यरजतगोचरप्रवृत्तावपि । ''अपि''ना रङ्गगोचरप्रवृत्तिपरिग्रहः । रजतभेदाग्रहः – रजतभेदासंसर्गाग्रहाभावः । यथाश्रुते रजते ''नेदं रजतम्'' इति ग्रहेऽपि प्रवृत्त्यापत्तेः, प्राभाकरमते तत्र रजतभेदग्रहाभावस्य सत्त्वात् । अन्यथा अन्यथाख्यात्यापत्तेः इति ।।

यद्यपि – पुरोवर्तिविशेष्यकस्य रजतभेदासंसर्गग्रहस्य समवायेन अभावः विशेषणतया आत्मनिष्ठः प्रतिबन्धकः तदभावः कारणम् इति फलितम् । तथा च रङ्गे ''इदं न रजतम्'' इति ग्रहेऽपि प्रवृत्त्यापत्तिः, रङ्गविशेष्यकरजतभेदासंसर्गग्रहस्य अन्यथाख्यात्यनङ्गीकर्तृमते अप्रसिद्धत्वेन तदभावस्य प्रतिबन्धकत्वासंभवात्, तथापि विषयतासंबन्धेन प्रवृत्तिं प्रति रजतभेदासंसर्गग्रहस्य विशेष्यतासंबन्धावच्छिन्नप्रतियोगि-

ताकः यः अभावः, स विशेषणतासंबन्धेन प्रतिबन्धकः इति विषयनिष्ठतया प्रतिबध्यप्रतिबन्धकभावकल्पनात् न उक्तदोषः ।।

एवं च तत्पुरुषीयत्वं प्रतिबध्यप्रतिबन्धकत्वयोः अवच्छेदककोटौ निवेशनीयम्, अतः न पुरुषभेदमादाय दोषः ।।

न च – एवं रङ्गे ''इदं रजतम्'' इति भ्रमानन्तरं तत्र प्रवृत्तिः न स्यात्, रजतभेदासंसर्गग्रहस्य अन्यथाख्यात्यापत्त्या तत्र अनङ्गीकारेण तदभावरूपस्य प्रतिबन्धकस्य सत्त्वात् इति – वाच्यम् । रजतभेदोपस्थितिविशिष्टस्यैव रजतभेदासंसर्गग्रहाभावस्य प्रतिबन्धकत्वोपगमात् ।।

न च – एवमपि रङ्गे ''इदं रजतम्'', ''घटः न रजतम्'' इति ज्ञानानन्तरम् अप्रवृत्त्यापत्तिः इति – वाच्यम् । रजतभेदग्रहप्रतिबन्धकदोषस्य उत्तेजकत्वकल्पनात् तत्र रङ्गे रजतभेदग्रहानुत्पत्त्या तत्प्रतिबन्धकदोषस्य स्वीकरणीयत्वात् ।।

न च – रङ्गे रजतभ्रमजनकदोष एव उत्तेजकः अस्तु, किं रजतभेदग्रहप्रतिबन्धक-दोषस्य उत्तेजकत्वस्वीकारेण । एवं च रजतभेदोपस्थितिवैशिष्ट्यमपि प्रतिबन्धके विशेषणं न देयम् । रजतभेदानुपस्थितिकाले रङ्गे ''इदं रजतम्'' इति ज्ञानात् अप्रवृत्तिप्रसङ्गाभावात् । तत्र रजतभेदासंसर्गाग्रहस्य प्रतिबन्धकस्य रङ्गे रजतभ्रमजनकदोषरूपोत्तेजकविशिष्टत्वात् इति – वाच्यम् । रङ्गे ''इदं रजतम्'' इति भ्रमस्य न्यायमतसिद्धस्य तन्मतेऽभावेन तत्र तादृशदोषस्य अनङ्गीकारात् ।।

''संभवति'' इन्यनन्तरं ''येन विसंवादिप्रवृत्तौ तद्धेतुत्वं स्यात्'' इति पूरणीयम् ।।

सन्निकर्षस्य अभावात् इति । ज्ञानलक्षणायाः प्रत्यासत्त्यन्तरस्य कल्पनं तु गौरवदुष्टम् इति अभिमानः । हेतुतायाः इत्यस्य अन्वयव्यतिरेकाभ्याम्

इति शेषः । **अन्यत्रापि** – रङ्गगोचररजतार्थिप्रवृत्तावपि । **तत्कल्पनात्** – विशिष्टज्ञानहेतुत्वकल्पनात् । **न च – अत्र मानाभाव इति – वाच्यम्** । "रङ्गे रजतार्थिप्रवृत्तिः इष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्या, प्रवृत्तित्वात्, रजतत्वप्रकारकप्रवृत्तिवत्" इति अनुमानस्यैव तत्र मानत्वात् ।।

अत्र अप्रयोजकत्वम् आशङ्कते – **न च** इति । **लाघवेन** इति । संवादि-विसंवादिभेदेन कार्यकारणभावद्वयमपेक्ष्य प्रवृत्तिमात्रे विशिष्टज्ञानस्यैव हेतुत्वकल्पना-लाघवेन इत्यर्थः । तथा च लाघवज्ञानरूपानुकूलतर्कस्य सत्त्वात् न अप्रयोजकत्वम् इति भावः ।।

रजतांशेऽपि सन्निकर्षाभावात् न अन्यथाख्यातिः संभवति इति प्राभाकरोक्तं दूषणम् उद्धरति – **इत्थं च** इति । प्रवृत्तिमात्रे विशिष्टबुद्धेः हेतुत्वसिद्धौ इत्यर्थः । **फलमुख** इति । कार्यकारणभावग्रहात्मकफलात् पूर्वं गौरवस्य अनिर्णयात् गौरवसन्देहस्य च अप्रतिबन्धकत्वात् इति भावः ।।

ननु अस्तु संवादिविसंवादिप्रवृत्तिसाधारणप्रवृत्तित्वावच्छिन्नं प्रत्येव भेदाग्रहः कारणम् इति न कार्यकारणभावद्वयकल्पनागौरवम् ।।

न च – विशिष्टज्ञानत्वापेक्षया इष्टभेदग्रहाभावत्वस्य कारणतावच्छेदकत्वे गौरवम् इति – वाच्यम् । रजतत्वविशिष्टानुमित्यादौ रजतभेदाग्रहत्वेन कारणत्वे तत्रैव प्रवृत्तिसाधारणरजतत्वविशिष्टविषयकत्वस्यैव कार्यतावच्छेदकत्वकल्पनेनैव निर्वाहात् । न्यायनये तु प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानत्वेन हेतुत्वान्तर-कल्पने गौरवम् इति न तदनुरोधेन कल्पनीयभ्रमात्मकरजतज्ञानार्थं ज्ञानलक्षणा-प्रत्यासत्त्यादरः इति कारणबाधात् बाधितमेव मिथ्याज्ञानम् इति आशङ्काम् मनसि निधाय स्थलविशेषे कारणबाधाभावात् अनिवार्यमेव मिथ्याज्ञानम् इति आह – **किंच** इत्यादिना । यत्र रजते न रजतभेदग्रहः, न वा रङ्गे रजतभेदग्रहः, तत्र

सति युगपदिन्द्रियसन्निकर्षे रजतरङ्गयोः ''इमे रजते'' इति ज्ञाने न किमपि बाधकम्, रजतत्वेन समं संयुक्तसमवायस्य सत्त्वात्, तादृशं च ज्ञानं रङ्गांशे न प्रमात्मकम्, विशेषणवद्विशेष्यसन्निकर्षरूपप्रमासामग्र्यभावात्, किन्तु अन्यथाख्यातिरेव इति भावः ।।

ननु तत्तद्विशेष्ये तत्तद्विशिष्टबुद्धिं प्रति तत्तद्विशेषणे तत्तद्विशेष्यघटितसन्निकर्षः हेतुः, अन्यथा अतिप्रसङ्गात् । तथा च कथं **रजतघटितसंयुक्तसमवायेन रङ्गे** रजतत्वग्रहः इति, अत आह – **अपि च** इति । **''अन्यथाख्यातिभयात्''** इत्यनन्तरं **''रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्य''** इति पूरितस्य **''सत्त्वात्''** इत्यनेन अन्वयः । अनेन रङ्गे अनिष्टभेदाग्रहरूपा निवृत्तिसामग्री, रजते इष्टभेदाग्रहरूपा प्रवृत्तिसामग्री च प्रदर्शिता । **रङ्गे रजतभेदाग्रहस्य** इत्यादिना च रङ्गे इष्टभेदाग्रहरूपा प्रवृत्तिसामग्री, रजते अनिष्टभेदाग्रहरूपा निवृत्तिसामग्री च प्रदर्शिता । **दोषादेव** इति । तन्मते न्यायाभिमतभ्रमस्थलाभिषिक्तभेदाग्रहं प्रति दोषस्य हेतुत्वात् इति भावः ।।

इदं च इष्टभेदाग्रहः प्रवृत्तिकारणम्, अनिष्टभेदाग्रहः निवृत्तिकारणम् इति यथाश्रुताभिप्रायेण । इष्टभेदोपस्थितिविशिष्टेष्टभेदासंसर्गाग्रहः प्रतिबन्धकः तदभावः कारणम् इति दर्शितनिष्कर्षे तु **रजतभेदोपस्थितिविशिष्टरजतभेदासंसर्गाग्रहस्य प्रतिबन्धकस्य रङ्गे अभावात्** इति रीत्या सामग्री बोध्या ।।

ननु **रङ्गे रजतभेदाग्रहप्रयोजकदोषस्य** प्रतिबन्धकत्वात् न रङ्गे निवृत्तिः, एवं रजते रङ्गभेदासंसर्गग्रहप्रयोजकदोषस्य प्रतिबन्धकत्वात् न रजते प्रवृत्तिरिति कथं युगपत् प्रवृत्तिनिवृत्त्योः आपादनम् इति, अत आह – **किञ्च** इति । **भेदाग्रहस्य** – व्याप्यवद्भेदाग्रहस्य । **अनुमितिः निराबाधा** इति । **सति बाधाभावे** अन्यथाख्यातिरूपा अनुमितिः निराबाधा इत्यर्थः । **आपतितम्** इति । अन्यथाख्यातिरूपम् आपतितम् इत्यर्थः ।।

ननु ह्रदे वन्हिव्याप्यधूमवद्भेदाग्रहात् न ''ह्रदो वन्हिमान्'' इति अन्यथाख्यातिरूपा अनुमितिः, परन्तु अगृहीतासंसर्गकं ज्ञानद्वयमेव अत्र उत्पद्यते ।।

न च – तत्र विशिष्टज्ञानोत्पत्तौ बाधकाभावः । व्याप्यवद्भेदाग्रहस्य ''ह्रदो वन्हिमान्'' इति अन्यथाख्यातिरूपानुमितिकारणस्य सत्त्वात् इति – वाच्यम् । अन्यथाख्यातौ प्रमाणाभावेन तादृशकार्यकारणभावस्य अकल्पनात् । अतः तत्र प्रमाणं प्रदर्शयति – इत्थं च इति ।।

यद्वा – ननु अनुमितिं प्रति विशिष्टज्ञानस्यैव हेतुत्वम्, यत्र च न तादृशविशिष्टबोधस्य सामग्री तत्र लिङ्गासंसर्गाग्रहात् लिङ्ग्यसंसर्गाग्रहस्यैव परैः उपगमात् न अयःपिण्डे वन्ह्यनुमित्यनुरोधात् अन्यथाख्यातिः इति, अत आह– इत्थं च इति । ''च''कारः अप्यर्थः ।।

ननु तादृशानुव्यवसायः न इदंविशेष्यकज्ञाने रजतत्वप्रकारकत्वविशिष्टबुद्धिरूपः, परन्तु रजतत्वप्रकारकत्वासंसर्गाग्रहरूप एव इति, अत आह – संक्षेप इति । विद्यमानेऽपि भेदग्रहे आहार्यप्रत्यक्षोत्पादात् इच्छाया उत्तेजकत्वं वाच्यम् । इच्छानाम् उत्तेजकत्वानुरोधेन च अनुमितित्वादीनामेव कार्यतावच्छेदकत्वात् प्रवृत्तित्वावच्छिन्नं प्रति भेदग्रहाभावत्वेन पृथक्कारणत्वे गौरवापत्त्या विशिष्टज्ञानत्वेनैव तत्र हेतुता कल्पनीया इति विसंवादिप्रवृत्त्यनुरोधेन अन्यथाख्यातिः दुर्वारैव इति भावः ।।

राजीवोल्लासः

मुक्तावल्यां – तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम् इति । भ्रमेऽतिव्याप्तिवारणाय हि तत् । भ्रमस्यैव अभावेन अतिव्याप्त्यप्रसक्तेः इति भावः । न च– तत्प्रकारकत्वमपि व्यर्थम् इति – वाच्यम् । निर्विकल्पकेऽतिव्याप्तिवारणाय

तस्य आवश्यकत्वात् । निर्विकल्पकं हि न प्रमा, नापि भ्रम इति पूर्वम् उक्तत्वात् तस्य अलक्ष्यता । तदाह – **दिनकर्याम् – व्यावर्त्यायाया** इति । तद्वद्विशेष्यकत्वदलेन व्यावर्त्या अन्यथाख्यातिः । सा च गुरुमते नास्तीति तद्व्यर्थम् इति भावः । **भ्रमजन्या इति** इति । तद्विशेष्यकतत्प्रकारकप्रवृत्तिं प्रति तद्विशेष्यकतत्प्रकारकज्ञानस्य साक्षाद्वा तादृशेच्छाद्वारा वा प्रवृत्तिं प्रति हेतुत्वात् तादृशभ्रमात्मकज्ञानजन्या प्रवृत्तिः न्यायमते भवितुम् अर्हति, गुरोः तव मते तु न भवितुम् अर्हति । तादृशभ्रमस्य अनङ्गीकारात् इत्यर्थः ।।

ननु तव मते भ्रमस्य अभावात् इत्युक्तिः असंगता । अख्यातेः गुरुणा भ्रमपदवाच्यत्वाङ्गीकारात् इत्यतः **भ्रमस्य** इति पदस्य अर्थम् आह – **अन्यथाख्यातेः** इति । यद्वा विसंवादिप्रवृत्तिजनकग्रहणस्मरणात्मकज्ञानरूपस्य भ्रमस्य गुरुमतेऽपि स्वीकारात् आह – **अन्यथाख्यातेः** इति । तदभाववति तत्प्रकारकज्ञानरूपान्यथाख्यातेः तन्मतेऽभावात् इति भावः ।।

रङ्गगोचर इति । रङ्गविषयिण्यां विफलायां रजतेच्छोः प्रवृत्तौ इत्यर्थः । गुरोः मम मते अन्यथाख्यात्यभावेऽपि विसंवादिर्नी रङ्गे रजतार्थिनः प्रवृत्तिं प्रति स्वातन्त्र्येण पुरोवर्तिविशेषणत्वं विना स्मृतं यत् रजतं तद्भेदाग्रहः दोषाधीनः कारणम् । न्यायनयेऽपि दोषाधीनः रङ्गे रजतभ्रमः विसंवादिर्नी रङ्गे रजतार्थिनः प्रवृत्तिं प्रति कारणम् इति अङ्गीक्रियते । भ्रमस्थानाभिषिक्तः दोषाधीनः रजतभेदाग्रहः तादृशप्रवृत्तिं प्रति कारणम् इति गुरुमते अङ्गीक्रियते । अतः गुरुमतेऽपि न अनुपपत्तिः इति भावः ।।

रजते ''इदं रजतम्'' इति प्रमात्मकज्ञानकाले रजतभेदाग्रहस्य सत्त्वात् तदानीमपि विसंवादिप्रवृत्त्यापत्तिः । तद्वारणाय दोषाधीनस्य रजतभेदाग्रहस्य विसंवादिप्रवृत्तिहेतुत्वम् उक्तम् । रजते ''इदं रजतम्'' इति ज्ञानकालीनस्य

रजतभेदाग्रहस्य दोषाधीनत्वाभावात् न तस्य विसंवादिप्रवृत्तिहेतुत्वम् इति भावः । **स्वतन्त्रोपस्थित** इति विशेषणस्य प्रयोजनम् आह – **यत्र रङ्गगोचरम्** इति । यस्य पुंसः रजतत्वेन रूपेण रङ्गं विषयीकुर्वन् ''एतत् रजतवत् भूतलम्'' इत्याकारकं ज्ञानम् उत्पन्नम्, तदनन्तरं रजतार्थिनः विसंवादिप्रवृत्तिः स्यात्, तत्रत्ये रङ्गे रजतभेदाग्रहस्य सद्भावात् । अतः ''स्वतन्त्र'' इति रजत-विशेषणम् । तत्र रजतस्य भूतलविशेषणतया उपस्थितत्वात् न दोषः ।।

अत्र **सुबोधिनीकाराः** – **यत्र रङ्ग** इति । **मुक्तावल्यां ''पुरोवर्तिनि''** इत्यनेन सूचितविसंवादिप्रवृत्तिसामग्र्यन्तर्गतस्य रङ्गप्रत्यक्षस्य सत्त्वं बोधयितुं ज्ञाने रङ्गगोचरम् इति विशेषणम् । इदन्त्वादिना रङ्गविषयकं समूहालम्बनम् इत्यर्थः । ''एतत्'' इति विशेष्यकवाचकं वस्तुतः रङ्गविशिष्टं देशं परामृशति । पुरोवर्तिविशिष्टत्वेन तस्य विशेष्यत्वे समूहालम्बनरूपता ज्ञानस्य न आवश्यकी इति – आहुः । रजतोपस्थितिः रजतभेदग्रहाभावश्च कारणम् इत्यपि ध्येयम् ।।

ननु ''एतद्रजतवत् भूतलम्'' इत्यत्र विसंवादिप्रवृत्तेः आनुभाविकतया इष्टापत्तिः इति, अत आह – **वस्तुत** इति । न च – भ्रमस्थले यदि पुरोवर्तिनः प्रत्यक्षं रजतस्य स्मरणम् इति ज्ञानद्वयम् उच्यते, तदा भ्रमानन्तरं ''रजतं पश्यामि'' इत्यनुभवः कथम् उपपद्यत इति – वाच्यम् । प्रत्यक्षस्मरणयोः दोषाधीनात् भेदाग्रहात् तदुपपत्तेः । **न्यायनयेऽपि** इति । गुरुमते इव न्यायमतेऽपि प्रथमतः ''इदम्'' इति प्रत्यक्षम्, ततः पुरोवर्तिसादृश्यादिना रजतस्मरणम्, ततः तद्विषयीभूतं यद्रजतं तद्भेदाग्रहः, तदनन्तरम् ''इदं रजतम्'' इति विशिष्टज्ञानम् इत्यङ्गीक्रियते । तत्र विशिष्टज्ञानहेतुभूतात् भेदाग्रहसहितात् ज्ञानद्वयादेव प्रवृत्त्यादेः

निर्वाहे मध्ये विशिष्टज्ञानं कुतः । "तद्धेतोरेव तत्सिद्धौ मध्ये किं तेन" इति न्यायात् इति भावः । तद्धेतोः इति पञ्चमी । **मूले रजतभेदाग्रह एव** इति । पुरोवर्तिविषयकप्रत्यक्षरजतस्मृतिभ्यां सहकृतः रजतभेदाग्रह इत्यर्थः । तेन तयोः अभावकाले प्रवृत्तेः नापत्तिः । अवधारणेन विशिष्टज्ञानव्यवच्छेदः ।।

दिनकर्यां – कार्यकारणभावद्वय इति । सत्यरजतस्थलीयप्रवृत्तिं प्रति विशिष्टज्ञानं कारणम्, भ्रमस्थलीयप्रवृत्तिं प्रति भेदाग्रहः कारणम् इति कार्यकारण-भावद्वयकल्पनापेक्षया उभयत्र भेदाग्रहस्यैव कारणत्वे लाघवात् इत्यर्थः ।।

ननु उभयत्र रजतभेदग्रहाभावस्य प्रवृत्तिकारणत्वे रजते "नेदं रजतम्" इति ग्रहकालेऽपि प्रवृत्त्यापत्तिः । रजते "नेदं रजतम्" इति ज्ञानं हि रजतभेदाभाववति रजते रजतभेदावगाहितया अन्यथाख्यातिरूपं प्राभाकरैः न अङ्गीक्रियत इति तज्ज्ञानकालेऽपि तन्मते रजते रजतभेदग्रहस्याभावात् इति अतः व्याचष्टे – **रजतभेदासंसर्गाग्रहाभाव** इति । रजतभेदासंसर्गः रजतभेदसंबन्धाभावः रजतनिष्ठः तस्य योऽयमग्रहः स प्रवृत्तिप्रतिबन्धकः तदभावः प्रवृत्तिं प्रति कारणम् इत्यर्थः । **प्रवृत्त्यापत्तेः** इति । रजतार्थिप्रवृत्त्यापत्तेः इत्यर्थः । तत्र हेतुम् आह – **प्राभाकरमत** इति । न्यायमते इष्टभेदज्ञानरूप-प्रतिबन्धकसत्त्वेन न प्रवृत्तिः इति भावः । रजतभेदग्रहसत्त्वे बाधकम् आह– **अन्यथाख्यात्यापत्तेः** इति ।।

पुरोवर्तिविशेष्यकस्य इति । आपणस्थरजतविशेष्यकासंसर्गस्मरणकाले पुरोवर्तिनि "नेदं रजतम्" इति ज्ञानकालेऽपि प्रवृत्त्यापत्तिवारणाय **पुरोवर्तिविशेष्यकस्य** इति । तथा च पुरोवर्तिविशेष्यकरजतभेदासंसर्गग्रहस्य समवायेन आत्मन्यभावेन तदभावरूपप्रतिबन्धकसत्त्वात् न प्रवृत्तिः इति । न उक्तदोष इति । पुरोवर्तिविशेष्यकत्वस्य इह अनिवेशेन रङ्गे "नेदं रजतम्"

इति ज्ञानकाले रजतभेदासंसर्गग्रहस्य विशेष्यतासंबन्धेन रजतादौ प्रसिद्धस्य रङ्गेऽभावस्य सत्त्वेन न प्रवृत्तिः इति भावः ।।

ननु विषयनिष्ठप्रत्यासत्त्या प्रतिबध्यप्रतिबन्धकभावे चैत्रस्य असंसर्गग्रहकाले रजतभेदासंसर्गाग्रहाभावरूपकारणस्य रजते सत्त्वेन मैत्रस्य तत्र विषयतया प्रवृत्त्यापत्तिः इति, अत आह – एवं च इति । **रजतभेदोपस्थितिविशिष्टस्यैव** इति । समवाय-अभावीयदैशिकविशेषणता-उभयघटितसामानाधिकरण्येन रजतभेदोपस्थिति-विशिष्टस्यैव इत्यर्थः । **न च एवम्** इति । एवं पुरोवर्तिविशेष्यकत्वम् अनिवेश्य रजतभेदोपस्थितिविशिष्टस्य असंसर्गाग्रहस्य प्रतिबन्धकत्वे ।।

ननु रङ्गे ''इदं रजतं'', ''घटः न रजतम्'' इति ज्ञानकाले रजतभेद-ग्रहप्रतिबन्धकदोषसत्त्वे मानाभाव इति, अत आह – **तत्र** इति । ननु रजत-भेदोपस्थितिवैशिष्ट्यानिवेशे रङ्गे ''इदं रजतम्'' इति ज्ञानकाले प्रवृत्त्यापत्तिः उक्तैव इति, अत आह – **रजतभेदानुपस्थितिकाल** इति । ननु प्रतिबन्धकसत्त्वात् कथं प्रवृत्तिप्रसङ्ग इति, अत आह – **तत्र रजतभेदासंसर्गाग्रहस्य** इति । **तादृशदोषस्य** – भ्रमजनकदोषस्य ।।

पूरणीयम् इति । पूरणाभावे रङ्गे रजतत्वविशिष्टबुद्धेः अनुपपत्तेः इति हेत्वनुपपत्तिः । अन्यथाख्यात्यसंभवे रजतप्रत्यक्षकारणस्य रजतसंनिकर्षस्य अभावात् इत्यस्यैव हेतुतया रङ्गे रजतत्वविशिष्टबुद्धेः अनुपपत्तेः इत्यस्य हेतुत्वासंभवात् । ''येन'' इत्यादिपूरणे कृते **न च अन्यथाख्यातिः संभवति** इत्यस्य **येन तद्धेतुता स्यात्** इत्यनेन अन्वितत्वेन अन्वये सति रङ्गे रजतत्वविशिष्टबुद्धि-रूपान्यथाख्यातिः कुतः न भविष्यति इति आकाङ्क्षायां कारणाभावेन रङ्गे रजतत्व-विशिष्टबुद्धिः न संभवति इत्युत्तरतया तादृशहेतूपन्यास उपपन्न इति भावः ।।

ननु मूले रङ्गे रजतभ्रमे रजतभानं प्रति हेतुभूतसंनिकर्षाभावात् अन्यथाख्यातिः न संभवति इति यदुक्तं, तन्न । रजतस्मरणात्मकज्ञानलक्षणाप्रत्यासत्त्या तद्भानसंभवात् इति अत्र आह – **ज्ञानलक्षणाया इति** । ननु मास्तु रजते संनिकर्षः, प्रत्यक्षप्रकारता तु अस्तु इति चेत् – न । प्रत्यक्षप्रकारताया इन्द्रियसंनिकर्षप्रयोज्यत्वस्य उभयसंमतत्वात्। स्वमते फलमुखगौरवस्य अदोषत्वात् इति वक्ष्यमाणत्वात् **अभिमान इत्युक्तम्** । **अन्वयव्यतिरेकाभ्याम् इति** । विशिष्टज्ञानस्य सत्त्वे प्रवृत्तिः, तदभावे तदभाव इति अन्वयव्यतिरेकाभ्याम् इत्यर्थः । **लाघवाच्च इत्यपि पूरणीयम्** । तेन अन्वयव्यतिरेकयोः भेदाग्रहेऽपि तुल्यत्वेऽपि न क्षतिः । **विशिष्टज्ञान इति** । पुरोवर्तिविशेष्यकरजतप्रकारकज्ञानस्य प्रवृत्तिहेतुत्वकल्पनात् इत्यर्थः । **न च अत्र मानाभाव इति** । रङ्गगोचररजतार्थिप्रवृत्तौ विशिष्टज्ञानस्य हेतुत्वे मानाभाव इत्यर्थः । **इष्टप्रवृत्तिविषय इति** । इष्टस्य रजतादेः प्रवृत्तिविषये प्रवृत्तिविशेष्यपुरोवर्तिनि यत् विशिष्टज्ञानम् इदंत्वावच्छिन्नविशेष्यकरजतादि-प्रकारकज्ञानं तत्साध्येत्यर्थः । **अत्र अप्रयोजकत्वम् इति** । अस्मिन् अनुमाने प्रवृत्तित्वरूपहेतुः अस्तु, विशिष्टज्ञानजन्यत्वरूपसाध्यं मास्तु इति व्यभिचारम् आशङ्कत इत्यर्थः । **संवादि इति** । संवादिप्रवृत्तिं प्रति विशिष्टज्ञानं कारणं, विसंवादिप्रवृत्तिं प्रति भेदाग्रहः कारणम् इति कार्यकारणभावद्वयापेक्षया प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानं कारणम् इति एककार्यकारणभावकल्पने लाघवेन इत्यर्थः । एतावता अप्रयोजकत्वाशङ्कायाः कः परिहार इत्यत्र आह – **तथा च इति** ।।

रजतांशेऽपि इति । यदि विशिष्टप्रत्यक्षात्मकः भ्रमः अङ्गीक्रियेत, तदा प्रत्यक्षविषये इदमर्थशुक्तौ इव रजतेऽपि संनिकर्षः आवश्यकः, प्रत्यक्षविषयतायाः संनिकर्षव्याप्यत्वात् इति प्राभाकरेण उक्तं दूषणं परिहरति इत्यर्थः । रजतांशे

लौकिकसंनिकर्षाभावेऽपि ज्ञानलक्षणात्मकालौकिकसंनिकर्षात् रजतस्य प्रत्यक्ष-विषयत्वम् इति परिहारः । **कार्यकारण** इति । ''रङ्गे रजतार्थिप्रवृत्तिजनकं प्रत्यक्षं, ज्ञानात्मकरजतसंनिकर्षजन्यं, ज्ञानेतररजतसंनिकर्षाजन्यत्वे सति रजतप्रत्यक्षत्वात्'' इत्यनुमानेन हि ज्ञानस्य संनिकर्षत्वलाभः । अत्र यत् यदितरसंनिकर्षाजन्यत्वे सति यद्विषयकप्रत्यक्षत्ववत् तत् तदात्मकसंनिकर्षजन्यं, यथा चक्षुस्संयोगजन्यं घटप्रत्यक्षम् इति सामान्यमुखी व्याप्तिः । एवं च ज्ञानस्य प्रत्यासत्तित्वरूपं यत् गौरवं तत् ज्ञानस्य अनुमितिरूपस्य पक्षज्ञानाधीनत्वात् पक्षघटककारणताज्ञानस्य पूर्वमेव जातत्वात् न तत्प्रतिबन्धकत्वं, भ्रमस्थले तदधीनविशिष्टज्ञानकल्पनाप्रतिबन्धकत्वं च संभवति इति भावः । ननु गौरवनिश्चयाभावेऽपि गौरवसंदेह एव प्रतिबन्धक इति, अत आह – **गौरवसन्देहस्य च** इति ।।

किं च इत्याद्युत्तरग्रन्थम् अवतारयति – **ननु अस्तु** इत्यादिना। प्राभाकरमतेऽपि सत्यस्थलीयप्रवृत्तिं प्रति विशिष्टज्ञानं कारणं, भ्रमस्थलीयप्रवृत्तिं प्रति भेदग्रहाभावः कारणम् इति कार्यकारणभावद्वयं न कल्प्यते। प्रवृत्तिद्वयसाधारण-प्रवृत्तित्वावच्छिन्नं प्रति इष्टभेदग्रहाभावः कारणम् इति एक एव कार्यकारणभावः स्वीक्रियते। अतः न गौरवावकाशः । न च – विशिष्टज्ञानत्वापेक्षया इष्टप्रतियोगिकभेदग्रहाभावत्वस्य गुरुत्वात् कारणतावच्छेदकत्वं न संभवति इति – वाच्यम् । रजतत्वविशिष्टविषयकानुमितिं प्रति रजतभेदग्रहस्य बाधज्ञानत्वेन प्रतिबन्धकतया रजतभेदग्रहाभावस्य कारणत्वम् आवश्यकम् । तत्र कार्यता-वच्छेदकशरीरे अनुमितित्वम् अनिवेश्य अनुमितिप्रवृत्त्युभयसाधारणरजत-विषयकत्वावच्छिन्नं प्रति रजतभेदग्रहाभावस्य कारणत्वस्वीकारेण गौरवा-भावात् । न्यायनये तु रजतानुमितौ रजतभेदग्रहाभावः कारणम् । रजतप्रवृत्तौ

च विशिष्टज्ञानं कारणम् इति अपरः कार्यकारणभाव इति कार्यकारणभावद्वयस्य कल्पनीयतया गौरवम् । एवं च प्रवृत्तौ विशिष्टज्ञानस्य कारणत्वेन तन्निर्वाहार्थं ज्ञानलक्षणा प्रत्यासत्तिः इत्यपरं गौरवम् इति आक्षेपसारः ।।

उक्ताक्षेपसमाधानं विवृणोति – **यत्र रजत इति** । यत्र रजते न रजतभेदग्रहः न वा रङ्गे रजतभेदग्रहः तत्र एककाले रङ्गरजतयोः इन्द्रियसंनिकर्षे सति ''इमे रजते'' इत्याकारकं रजतांशे प्रमात्मकं रङ्गांशे भ्रमात्मकं च रजतत्वप्रकारकं ज्ञानं जायते । बाधकस्य रजतभेदग्रहस्य अभावात् रङ्गरजतयोः चक्षुस्संयोगस्य, रजतत्वे चक्षुस्संयुक्तसमवायस्य च संनिकर्षस्य च सत्त्वात् । विशेषणवद्विशेष्यसंयोगरूपप्रमासामग्रीसत्त्वात् रजतांशे प्रमात्वं, तादृशसंनिकर्षाभावाच्च रङ्गांशे भ्रमत्वम् । अत्र स्थले संनिकर्षरूपकारणाभावात् न रजतत्वभानम् इति शङ्कायाः नावसरः । उक्तरीत्या संनिकर्षस्य उपपादितत्वात् । संनिकर्षात् रजतत्वभाने निरूढे सति आंशिकप्रमात्वाप्रमात्वयोः उपपत्तिः उक्तरीत्या निरूढा इति भावः ।।

उत्तरग्रन्थम् अवतारयति – **ननु तत्तद्विशेष्ये इति** । घटादिरूपविशेष्ये घटत्वादिविशिष्टबुद्धिं प्रति घटत्वादिरूपे विशेषणे घटादिविशेष्यघटितसंनिकर्षः संयुक्तघटत्ववद्धटसमवेतत्वं हेतुः । अन्यथा चक्षुस्संयुक्तघटत्ववद्धटसमवायरूप-संनिकर्षात् परमाणौ पृथिवीत्वादिप्रत्यक्षापत्तिः स्यात् । एवं च रजतत्वे रजतत्ववद्रङ्गसमवायाभावात् कथम् ''इमे रजते'' इति रङ्गांशे रजतत्वप्रत्यक्षं भवेत् इति शङ्कायां अन्यथाख्यातौ साधकान्तरम् आह इत्यर्थः । **रजतघटितसंयुक्त-समवायेन** – चक्षुस्संयुक्तरजतसमवायेन । तथा च ''इमे रजते'' इत्यत्र रजतांशे विशिष्टज्ञानं, रङ्गांशे रजतभेदाग्रह एव इन्द्रियसंनिकर्षस्य अभावात् इति भावः । **अन्यथाख्यातिभयात् इति** । रङ्गे रङ्गभेदाग्रहस्य रजतभेदाग्रहस्य च

सत्त्वात् इति पूरणीयम् । रङ्गे रङ्गभेदग्रहे सति तस्य रङ्गभेदाभाववति रङ्गे रङ्गभेदावगाहितया अन्यथाख्यातित्वं स्यात् । एवं रजते रजतभेदग्रहे सति तस्य रजतभेदाभाववति रजते रजतभेदावगाहितया भ्रमत्वं स्यात् । तथा च रङ्गे अनिष्टरङ्गभेदग्रहाभावस्य निवृत्तिकारणस्य, रजते इष्टरजतभेदग्रहाभावस्य प्रवृत्ति-कारणस्य च सत्त्वेन युगपत् प्रवृत्तिनिवृत्ती स्याताम् । एवं रङ्गे रजतभ्रमस्थाने रजतभेदाग्रहस्य रजते रङ्गभ्रमस्थले रङ्गभेदाग्रहस्य च स्वीकारात् तदुभयम् अस्ति इति आयातम् । रङ्गभेदाग्रहश्च निवृत्तिसामग्री रजतभेदाग्रहश्च प्रवृत्तिसामग्री इति तदुभयबलात् युगपत् प्रवृत्तिनिवृत्ती स्याताम् इति भावः । एवं पूरयित्वा व्याख्याने बीजं तु "दोषादेव" इत्यस्य "च" कारस्य च सार्थक्यसंपादनमेव बीजम् इत्यवधेयम् ।।

रजतभेदोपस्थितिविशिष्ट इत्यादि । तथा च विशेषणाभावप्रयुक्तः विशिष्टाभावः रङ्गे प्रवृत्तिहेतुः वर्तते । एवम् अनिष्टभेदोपस्थितिविशिष्ट-अनिष्ट-भेदासंसर्गाभावः अनिष्टभेदोपस्थितिरूपविशेषणाभावप्रयुक्तः निवृत्तिहेतुरपि रङ्गे वर्तत इति युगपत् प्रवृत्तिनिवृत्ती स्याताम् इति भावः ।।

अत्र इदं तत्त्वम् – रङ्गे रजतभेदोपस्थितेः दोषकाले विशेष्यतासंबन्धेन अभावेन रजतभेदासंसर्गाग्रहस्य अभावीयविशेषणतया तत्र सत्त्वे विशेष्यतादैशिक-विशेषणतोभयघटितसामानाधिकरण्येन तस्य इष्टभेदोपस्थितिविशिष्टत्वाभावात् प्रतिबन्धकाभावरूपकारणसत्त्वेन रङ्गे प्रवृत्तिः, तत्र निवृत्तिसामग्री तु अनिष्ट-भेदोपस्थितिविशिष्ट–अनिष्टभेदासंसर्गाग्रहस्य अभावरूपा । रङ्गे रङ्गभेदासंसर्गाग्रह-रूपविशेष्यस्य दोषकाले सत्त्वेऽपि अन्यथाख्यातिभयात् रङ्गे रङ्गभेदोपस्थित्यसत्त्वेन तथाविधविशेष्यस्य उक्तसंबन्धेन रङ्गे रङ्गभेदोपस्थितिविशिष्टत्वाभावेन तथाविध-प्रतिबन्धकाभावरूपा बोध्या ।।

रजते निवृत्तिसामग्री च दोषेण, रजते रङ्गभेदोपस्थित्यसत्त्वेन रङ्गभेदासंसर्गाग्रहस्य रजतनिष्ठस्य तथाविधोपस्थितिविशिष्टत्वाभावेन प्रतिबन्धकाभावरूपा बोध्या । तत्र प्रवृत्तिसामग्री च दोषेण रजते रजतभेदासंसर्गाग्रहस्य सत्त्वेऽपि अन्यथाख्यातिभयात् रजते रजतभेदोपस्थित्यसत्त्वेन तथाविधविशेष्यस्य रजतभेदोपस्थितिविशिष्टत्वाभावेन विशिष्टप्रतिबन्धकाभावरूपा बोध्या इत्यभिप्राय इति ।।

रजतभेदाग्रहप्रयोजकदोषस्य इति । यत्र प्रतियोगिज्ञानादिकारणवैकल्याधीनः रजतभेदाग्रहः, तत्र "इदं रङ्गम्" इति प्रमास्थले निवृत्तिनिर्वाहाय दोषपर्यन्तानुधावनम् । **सति बाधाभाव** इति । अन्यथा व्याप्यवद्भेदाग्रहरूपकारणसत्त्वेऽपि "ह्रदो वह्न्यभाववान्" इति बाधे सति अनुमित्यनुदयेन अनुमितेर्निराबाधत्वे अस्य असंगत्यापत्तेः । अत उक्तं - **सति बाधाभाव** इति । **तादृशकार्यकारणभावस्य** इति । "ह्रदो वह्निमान्" इत्यनुमितित्वेन वह्निव्याप्यधूमवद्भेदाग्रहत्वेन कार्यकारणभावस्य इत्यर्थः ।।

विशिष्टज्ञानस्य प्रवृत्तिहेतुत्वम् आश्रित्य इत्थं च इति ग्रन्थम् अवतारयति – **यद्वा** इति । **विशिष्टज्ञानस्यैव हेतुत्वम्** इति । लाघवात् इति शेषः । **लिङ्गासंसर्गाग्रहः** – हेत्वाभावग्रहाभावः, हेतुमद्भेदाग्रहो वा । **लिङ्ग्यसंसर्गाग्रहः** – साध्याभावाग्रहः, साध्यवद्भेदाग्रहो वा । ननु "**इत्थं च अन्यथाख्यातौ प्रत्यक्षमेव प्रमाणम्**" इत्युक्तिः अयुक्ता, प्रत्यक्षस्य प्रमाणतायां पूर्वोक्तस्य अप्रयोजकत्वात् इति शङ्काम् अपनुदति – **चकारोऽप्यर्थ** इति । इत्थम् इत्यनेन पूर्वदर्शितयुक्तीनाम् असाधकत्वं बुद्धिस्थं परामृश्यते । इत्थं – पूर्वयुक्तिवत् । इत्थं प्रत्यक्षमपि अन्यथाख्यातौ प्रमाणमेव इति योजना इत्यपि वदन्ति । **मुक्तावल्यां इत्यनुभवात्** इति । सत्यरजतस्थले "इदं रजतम्"

इति ज्ञाने रजतविशेष्यकत्वं रजतत्वप्रकारकत्वं च अस्ति इत्यत्र ''इदं रजततया अवेदिषम्'' इत्याकारकः अनुव्यवसायः यथा प्रमाणम्, तथा भ्रमस्थलेऽपि तदाकारकः अनुव्यवसाय एव व्यवसायस्य रजतत्वप्रकारकत्वे प्रमाणं भवति इति भावः ।।

ननु अन्यथाख्यातिभिया यथा रङ्गे ''इदं रजतम्'' इति ज्ञानकाले स्वतन्त्रोपस्थितरजतासंसर्गाग्रह एव दोषवशात् इत्युक्तम्, तथा अनुव्यवसायकालेऽपि स्वतन्त्रोपस्थितरजतत्वप्रकारकत्वस्य असंसर्गाग्रह एव इत्याशयेन शङ्कते **दिनकर्यां – ननु तादृश इति । इदंविशेष्यकज्ञान इति ।** इदंत्वेन रङ्गविशेष्यकज्ञान इत्यर्थः । समाधत्ते – **विद्यमानेऽपि** इत्यादिना । रङ्गे ''नेदं रजतम्'' इति भेदग्रहे विद्यमानेऽपि ''रजतप्रत्यक्षं मे भूयात्'' इति इच्छायां सत्यां रजतत्वप्रकारकाहार्यप्रत्यक्षोत्पत्त्या रजतत्वप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति रजतत्वप्रकारकप्रत्यक्षेच्छाविरहविशिष्टः यो भेदग्रहः तदभावः कारणम् इति वक्तव्यम् । आहार्यपरोक्षानङ्गीकारात् अनुमितित्वाद्यवच्छिन्नं प्रति भेदग्रहाभावस्य पृथक् कारणत्वं वाच्यम् ।।

एवं प्रवृत्तित्वावच्छिन्नं प्रति भेदग्रहाभावः कारणमिति पृथक् वक्तव्यम् । एवं रीत्या कार्यकारणभावकल्पने गौरवात् प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानं कारणम् इति कल्पनं युक्तम्। एवं च भ्रमस्थलीयप्रवृत्तिं प्रति विशिष्टज्ञानरूपकारणसंपत्तये अन्यथाख्यातिः अङ्गीकरणीया इति भावः । न च पूर्वोपदर्शितकार्यतावच्छेदककोटौ प्रत्यक्षातिरिक्तत्वनिवेशेन अनुमितिशाब्द-प्रवृत्त्यादिसाधारणैककार्यकारणभावनिर्वाह इति वाच्यम् । विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुभूतानेककार्यकारणभावकल्पनापत्त्या गौरवात् ।।

।। व्याप्तिग्रहोपायनिरूपणम् ।।

कारिकावली

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा ।
हेतुः व्याप्तिग्रहे,............

मुक्तावली

पूर्वं व्याप्तिः उक्ता, तद्ग्रहोपायस्तु न प्रदर्शित इति, अतः तं दर्शयति – व्यभिचारस्य इति । व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणम् इत्यर्थः । व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात् तदभावः कारणम् । एवम् अन्वय-व्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता । भूयोदर्शनं तु न कारणम्, व्यभिचारास्फूर्तौ सकृद्दर्शनेऽपि क्वचित् व्याप्तिग्रहात्, क्वचित् व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनम् उपयुज्यते ।।

दिनकरी

ननु प्रामाण्यम् अनुमानगम्यं तदा भवेत्, यदि अनुमानं प्रमाणं भवेत् । तदेव न संभवति । व्याप्तेः ग्राहकाभावेन अज्ञानात् इति, अतः प्रामाण्यानुमितिप्रयोजकतया "व्यभिचारस्य अग्रहोऽपि सहचारग्रहस्तथा" इति मूलेन व्याप्तिग्रहोपायः दर्श्यते । स च अयुक्तः । स्वकारणीभूतव्याप्ति-स्वरूपज्ञानाभावात् इति, अत आह – पूर्वं व्याप्तिः उक्ता इति । व्यभिचाराग्रहस्य व्याप्तिग्राहकताम् उपपादयति – व्यभिचारग्रहस्य इति । सहचारग्रहस्य ताम् उपपादयति – एवम् इति । भूयोदर्शनस्य कारणत्वं खण्डयति – भूयोदर्शनं तु इति । व्यतिरेकव्यभिचारम् आह – सकृद्दर्शनेऽपि इति । भूयोदर्शनस्य अहेतुत्वेऽपि क्वचित्प्रयोजकतया तदादर इत्याह – क्वचित् इति ।।

राजीवोल्लासः

व्याप्तेः इति। ग्राहकाभावेन व्याप्तेः अज्ञानात् इति अन्वयः । तथा च व्याप्तिज्ञानाभावे अनुमितिः न जायते । अनुमित्यभावे तज्जनकम् अनुमानं न प्रमाणं भवेत् इति भावः । **स्वकारणीभूत** इति । स्वं – व्याप्तिग्रहोपायप्रदर्शनं तत्र कारणीभूतं यत् व्याप्तिस्वरूपज्ञानं तदभावात् इत्यर्थः ।।

।। तर्कनिरूपणम् ।।

कारिकावली

.... तर्कः क्वचिच्छङ्कानिवर्तकः ।। १३७ ।।

मुक्तावली

यत्र तु भूयोदर्शनादपि शङ्का नापैति, तत्र विपक्षे बाधकतर्कः अपेक्षितः । तथा हि – वन्हिविरहिण्यपि धूमः स्यात् इति यदि आशङ्का भवति, तदा सा वन्हिधूमयोः कार्यकारणभावस्य प्रतिसन्धानात् निवर्तते – "यदि अयं वन्हिमान् न स्यात्, तदा धूमवान् न स्यात् – कारणं विना कार्यानुत्पत्तेः । यदि च क्वचिद्वन्हिं विनापि धूमः भविष्यति, अहेतुक एव वा भविष्यति" इति तत्रापि आशङ्का भवेत्, तदा सा व्याघातात् अपसारणीया । यदि हि कारणं विना कार्यं स्यात्, तदा धूमार्थं वन्हेः, तृप्त्यर्थं भोजनस्य वा नियमतः उपादानं तवैव न स्यात् इति । यत्र स्वत एव शङ्का न अवतरति तत्र न तर्कापेक्षापि इति । तदिदम् उक्तम् – तर्कः क्वचिच्छङ्कानिवर्तक इति ।।

दिनकरी

तर्कः अपेक्षित इति । शङ्कापनयनार्थं तर्कः अपेक्षितः इत्यर्थः । तं दर्शयति – **तथा हि** इत्यादिना । **यदि अयम्** इति । अयं - धूमवान् पर्वतः । **कारणं**

विना इति । तथा च "धूमः वह्निव्यभिचारी स्यात्, वन्हिजन्यो न स्यात्" इति तर्काकारः बोध्यः । यथाश्रुते "वन्हिमान् न स्यात् धूमवान् न स्यात्" इति तर्कस्य विषयपरिशोधकस्य व्याप्तिग्रहानौपयिकतया असङ्गतेः । तत्रापि– तादृशतर्ककारणीभूतकार्यकारणभावग्रहेऽपि । आशङ्का भवेत् – आशङ्का प्रतिबन्धिका भवेत् । व्याघातमेव दर्शयति – यदि हि इत्यादिना ।।

ननु तर्कं प्रति आपाद्यव्याप्यापादकवत्ताज्ञानं कारणम् । तत्र व्याप्तिज्ञानप्रतिबन्धकव्यभिचारशङ्कानिवर्तकः तर्कः अपेक्षितः, एवम् अग्रेऽपि इति अनवस्था इति आह – यत्र इति । स्वत एव – शङ्कासामग्रीविरहादेव । "न तर्कापेक्षा" इति अनन्तरम् "अतः न अनवस्था" इति शेषः ।।

ननु तर्कस्य न व्यभिचारशङ्कानिवर्तकत्वम्, तर्ककारणीभूतव्याप्तिज्ञानेनैव तन्निवृत्तेः संभवात् इति चेत्–

अत्र केचित् – अनाहार्यशङ्कायाः तर्ककारणीभूतव्याप्तिज्ञानेन निराससंभवेऽपि आहार्यशङ्कायाः ततः निवृत्तिः न संभवति । आहार्यज्ञानस्य तदप्रतिबध्यत्वात्, किन्तु तर्केणैव । तथा हि – अनिष्टप्रसञ्जनात्मकेन तर्केण आपादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारा आपादकज्ञाने द्वेषो जन्यते । तेन च आपादकज्ञाने इच्छाप्रतिबन्धः क्रियते । एवं च इच्छारूपकारणविरहादेव न आहार्यशङ्कोत्पत्तिः इति अर्थवशसंपन्नमेव तर्के तन्निवर्तकत्वम् इति ।।

केचित्तु – तर्कस्य शङ्कानिवर्तकत्वं व्याप्तिज्ञानकारणीभूतः यः व्यभिचार-शङ्काविरहः तत्संपादकत्वम् । एवं च व्यभिचारशङ्काप्रतिबन्धकतायां तर्कस्य उत्तेजकतया उत्तेजकाभावविशिष्टव्यभिचारशङ्काविरहसंपादकत्वम् अक्षुण्णमेव तर्कस्य इति – आहुः ।।

परे तु – तदापादकापत्तित्वेन आहार्यानाहार्यसाधारणतद्विशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकतया तर्कस्य व्यभिचारशङ्कानिवर्तकत्वम् इति – आहुः ।।

तर्कश्च आहार्यारोपविशेषः । तत्त्वं च मानसत्वव्याप्यः जातिविशेषः "तर्कयामि" इत्यनुभवात् जिज्ञासा–विशेषनिवर्तकतया वा सिद्ध इति ।।

तर्कश्च द्विविधः–विषयपरिशोधकः, व्याप्तिग्राहकश्च इति । तत्र विषयपरिशोधकः "निर्वन्हिः स्यात् निर्धूमः स्यात्" इत्यादिः । "धूमः यदि वन्हिव्यभिचारी स्यात्, वन्हिजन्यो न स्यात्" इत्यादिश्च व्याप्तिग्राहकः । विस्तरस्तु अन्यत्र अनुसन्धेयः ।।

राजीवोल्लासः

विषयपरिशोधकस्य इति । विषयस्य – वह्न्यादिरूपानुमितिविधेयस्य परिशोधकः – अभाववत्ताज्ञाननिवर्तकः तस्य इत्यर्थः । **व्याप्तिग्रहानौपयिकतया** इति । साक्षात् इत्यादिः । तेन परंपरया कथंचिदुपयोगेऽपि न क्षतिः । **व्याघातम्** इति । स्वक्रियायाः स्वोक्तेः स्वसिद्धान्तस्य च विरोधः व्याघातः । प्रकृते स्वक्रियायाः विरोधः प्रदर्शितः ।।

ननु एवं "वह्निजन्यो न स्यात्" इत्यत्र व्याघातेन हेतुना इष्टापत्तिशङ्कायाः परिहारेऽपि आपत्तिहेतुभूतव्याप्त्यंशे संशयात् अनवस्था इत्याशयेन शङ्कते – **ननु तर्कं प्रति** इति । **तर्ककारणीभूत** इति । अयम् अत्र आशयः — अनुमितिं प्रति यथा हेतौ साध्यव्याप्तिज्ञानं कारणं, तथा तर्करूपाम् आपत्तिं प्रति आपादके आपाद्यनिरूपितव्याप्तिज्ञानं कारणम् । यथा च अनुमितिं प्रति पक्षता हेतुः, तथा आपत्तौ आपाद्याभावनिश्चयो हेतुः । इत्थं च "यदि धूमः वह्निं विनापि स्यात् – वह्निव्यभिचारी स्यात्, तदा वह्निजन्यः न स्यात्" इत्यापत्तेः पूर्वं "वह्निजन्यत्वाभावव्याप्यं वह्निव्यभिचारित्वम्" इति ज्ञानं

"वह्निजन्यः धूमः" इति ज्ञानं च आवश्यकम् । वह्निव्यभिचारित्वे वह्निजन्यत्वाभावव्याप्तिश्च वह्निव्यभिचारित्वव्यापकवह्निजन्यत्वाभावसामानाधिकरण्यम् । इत्थं च वह्निव्यभिचारित्वव्यापकत्वेन गृह्यमाणः भवति वह्निजन्यत्वाभावः । तदभाववत्ताज्ञानरूपं भवति "धूमो वह्निजन्य" इति ज्ञानम् । तद्वत्ताज्ञानं प्रति तदभावव्याप्यवत्ताज्ञानमिव तद्व्यापकाभाववत्ताज्ञानमपि प्रतिबन्धकम् । सा च प्रतिबन्धकता वह्निव्यभिचारित्वव्यापकः वह्निजन्यत्वाभावः इति ज्ञानविशिष्ट-वह्निजन्यत्वाभाववांश्च अयम् इति ज्ञानत्वावच्छिन्ना भवति । इत्थं च प्रकृते दर्शितज्ञानद्वयसत्त्वे "धूमः वह्निव्यभिचारी" इति ज्ञानं न उदेतुम् अर्हति । अतः तत्र आपाद्यनिरूपितव्याप्तिज्ञानेनैव शङ्कानिवृत्तिः इति । इत्थं तादृशव्याप्तावपि शङ्कायां व्याप्त्यन्तरम् अनुसरणीयम् इति अनवस्था इति । समाधानं तु – यत्र स्वत एव – शङ्कासामग्रीविरहादेव शङ्का न अवतरति तत्र न तर्कापेक्षा । अतः न अनवस्था इति ।।

तत इति । तर्ककारणीभूतव्याप्तिज्ञानात् इत्यर्थः । **तदप्रतिबध्यत्वात्** इति । तर्ककारणीभूतव्याप्तिज्ञानाप्रतिबध्यत्वात् इत्यर्थः । **तर्केणैव** इति । निवृत्तिः भवति इति शेषः । **अर्थवशसंपन्नम्** इति । अर्थः – शङ्काकारणाभाव-संपादनम्, तत्प्रयोज्यम् इत्यर्थः । **तन्निवर्तकत्वम्** इति । व्यभिचारशङ्का निवर्तकत्वम् इत्यर्थः । **आहुः** इति द्वयम् अस्वरसं सूचयति । तद्बीजं तु पूर्वोक्तरीत्या क्लृप्तेनैव इष्टसिद्धौ तदर्थं तर्कस्य उत्तेजकत्वं प्रतिबन्धकत्वं वा न कल्पनीयम्, गौरवात् इति । परं तु पूर्वमते आपत्त्युत्तरम् आपादकज्ञाने नियमेन अनिष्टसाधनत्वज्ञानं कल्पनीयम् । तन्नैयत्ये वैमत्येन प्रकारान्तरम् अन्यैः आदृतम् इति ध्येयम् । अत्र उत्तेजकतावादिमते तर्कनिष्ठं शङ्कानिवर्तकत्वं शङ्कावृत्तिव्याप्तिग्रहप्रतिबन्धकताविघटकत्वम् ।।

तदापादक इति । तत् वह्निव्यभिचारित्वं आपादकं यस्याः सा आपत्तिः वह्निजन्यत्वापत्तिः तद्रूपत्वेन – तादृशापत्तिरूपत्वेन तर्कस्य **तद्विशिष्टबुद्धित्वावच्छिन्नं** प्रति – व्यभिचारित्वविशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकतया व्यभिचारशङ्कानिवर्तकत्वम् इत्यर्थः ।।

तर्कयामि इत्यनुभवात् इति । अनाहार्ये उत्कटैककोटिकसंशयेऽपि ''तर्कयामि'' इत्यनुभवात् न आपत्तिरूपतर्के जातिविशेषसिद्धिः इति, अत आह– **जिज्ञासा** इति । प्रथमे पक्षे ''आपादकवत्ताज्ञानं मे भूयात्'' इति इच्छा जिज्ञासाविशेषः । तद्विषयकज्ञाने द्वेषोत्पादनद्वारा तद्विघटकतया, द्वितीये जिज्ञासाविशेषः व्याप्तिनिर्णयेच्छानुकूलव्यभिचारसंशयः, तन्निष्ठनिश्चयप्रतिबन्धकत्वविघटकतया, तृतीये तादृशसंशयविघटकतया इत्यर्थः । **निवर्तकतया** – निवर्तकतावच्छेदकतया । ''तर्कनिष्ठजिज्ञासानिवर्तकता किंचिद्धर्मावच्छिन्ना, निवर्तकतात्वात्'' इत्यनुमानेन, सिध्यतः धर्मस्य जातित्वे लाघवम् इति लाघवज्ञानसहकृतेन सिद्धः जातिविशेषः इति भावः । ''जिज्ञासा'' इत्यादिस्थाने ''जनकज्ञानविशेषनिवर्तकतया वा सिद्ध'' इति केरलीयग्रन्थपाठः । जनकं – व्याप्तिज्ञानं तत्प्रतिबन्धकः यो ज्ञानविशेषः व्यभिचारज्ञानविशेषः तन्निवर्तकतया इत्यर्थः । आपादकवत्ताज्ञानम् आपत्तेः जनकम्; तया च निवर्तत इति तन्निवर्तकतावच्छेदकं तर्कत्वं जातिरूपं सिध्यति । निवर्तकत्वं च स्वोत्तरं तदनुत्पत्तिप्रयोजकत्वम्, न तु तन्नाशकत्वम् । स्वजनकविशेषणज्ञाननाशजनकत्वस्य विशिष्टज्ञानसामान्ये सत्त्वेन तर्कत्वजात्यसिद्धेः इति ।।

।। उपाधिनिरूपणम् ।।

कारिकावली

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिः भवेत्, तस्य निष्कर्षोऽयं प्रदर्श्यते ।।

मुक्तावली

इदानीम् उपाधिं निरूपयति – साध्यस्य इति । साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः उपाधिः इत्यर्थः ।।

ननु "सः श्यामः, मित्रातनयत्वात्" इत्यत्र शाकपाकजन्यत्वं न उपाधिः स्यात्, तस्य साध्यव्यापकत्वाभावात्, श्यामत्वस्य कोकिलादावपि सत्त्वात् । एवं "वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वात्" इत्यत्र उद्भूतरूपवत्त्वं न उपाधिः स्यात् । प्रत्यक्षत्वस्य आत्मादिषु सत्त्वात् तत्र च उद्भूतरूपवत्त्वाभावात् । एवं "ध्वंसः विनाशी, जन्यत्वात्" इत्यत्र भावत्वं न उपाधिः स्यात् । विनाशित्वस्य प्रागभावेऽपि सत्त्वात्, तत्र भावत्वाभावात् इति चेत्, न–

यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वम् इत्यर्थे तात्पर्यात् ।।

मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं तदवच्छिन्न-साधनाव्यापकं च । एवं पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकम् उद्भूतरूपवत्त्वम्, बहिर्द्रव्यत्वावच्छिन्नसाधनस्य अव्यापकं च । एवं "ध्वंसः विनाशी, जन्यत्वात्" इत्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वम् । सद्धेतौ एतादृशधर्मः नास्ति, यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य च अव्यापकं किञ्चित् स्यात् । व्यभिचारिणि तु उपाध्यधिकरणं यत् साध्याधिकरणं, यच्च उपाधिशून्यं साध्यव्यभिचाराधिकरणं तदन्यतरत्वाव-

च्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य च अव्यापकत्वम् उपाधेः **अन्ततः** संभवति इति ।।

दिनकरी

इदानीम् – व्याप्तिग्रहोपायनिरूपणोत्तरं व्याप्तिनिश्चयाभावप्रयोजकव्यभिचार शङ्काकारणज्ञानविषयत्वेन उपाधेः स्मरणे सति । तथा च प्रसङ्गसङ्गत्या उपाधि निरूपणम् इति भावः ।।

सिद्धिविषयत्वरूपसाध्यत्वस्य सिद्धिजनकत्वरूपसाधनत्वस्य च **सोपाधौ अभावात् अभिमत** इति । यः यदवच्छिन्नव्यापकत्वे सति यदवच्छिन्नाव्यापकः सः तदवच्छिन्नसाध्यकतदवच्छिन्नहेतौ उपाधिः इत्यर्थः । यथाश्रुते अभिमतस्य विशेषणत्वे यत्र न तदभिमानः, तत्र अव्याप्तिः स्यात् । यदवच्छिन्नत्वविवक्षणात् ''गुणकर्मान्यत्वविशिष्टसत्तावान्, जातिमत्त्वात्'' इत्यादौ ''संयोगी गुणकर्मान्यत्व-विशिष्टसत्त्वात्'' इत्यादौ च न अव्याप्त्यतिव्याप्ती ।।

व्यापकत्वाव्यापकत्वे एकप्रकारेण एकसंबन्धेन च विवक्षिते । तेन द्रव्यत्वत्वेन समवायसंबन्धेन च वन्हिं प्रति व्यापकस्य द्रव्यत्वस्य द्वित्वादिना संयोगादिसंबन्धेन च धूमं प्रति अव्यापकत्वेऽपि ''वन्हिमान् धूमात्'' इत्यत्र द्रव्यत्वादौ नातिव्याप्तिः ।।

स श्याम इति । **''काकः श्यामः, मित्रातनयत्वात्''** इत्यादौ इत्यर्थः । तेन वक्ष्यमाणेन ''ध्वंसः विनाशी जन्यत्वात्'' इत्यनेन न पौनरुक्त्यम् । **अस्य** साधनावच्छिन्नसाध्यव्यापकत्वात् **अग्रिमस्य** साधनरूपपक्षधर्मावच्छिन्नसाध्यव्यापक-त्वात् । साध्याव्यापकत्वम् उपपादयति – **श्यामत्वस्य** इति ।।

ननु साधनावच्छिन्नसाध्यव्यापकत्वं विवक्षणीयम्, अतः न उक्ताव्याप्तिः, अतः पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधौ अव्याप्तिम् आह – **एवं वायुः** इति । अत्र प्रत्यक्षत्वं प्रति उद्भूतरूपस्य व्यापकत्वे रूपस्य सुतरां व्यापकत्वम् इति

उद्भूतपदं व्यर्थम्, तथापि उपाधेः **साध्यव्यापकत्वे** कार्यकारणभावलक्षणानुकूल-तर्कदर्शनार्थं तत् इति ध्येयम् । **पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोक्तौ तु** पूर्वोक्तशाकपाकजत्वादौ अव्याप्तिः इति भावः ।।

अव्याप्तीः परिहरति – **मित्रातनयत्व** इत्यादिना । **व्यभिचारिणि तु** इत्यादि । "**वायुः प्रत्यक्षः द्रव्यत्वात्**" इत्यादौ प्रत्यक्षत्वरूपसाध्याधिकरणम् आत्मा, उद्भूतरूपात्मकोपाधिशून्यं साध्यव्यभिचाराधिकरणं गगनम्, तदन्यतरत्वाव-च्छिन्नसाध्यव्यापकत्वस्य उद्भूतरूपे अभावात् उक्तम् **उपाध्यधिकरणम्** इति । उद्भूतरूपाधिकरणपरमाण्वाकाशान्यतरत्वावच्छिन्नसाध्याप्रसिद्ध्या तद्दोषतादवस्थ्यम्, अतः **साध्याधिकरणम्** इति ।।

उद्भूतरूपाधिकरणं यत् प्रत्यक्षत्वाधिकरणं घटादिः तद्वृत्तिद्रव्यत्वात्मकधर्माव-च्छिन्नसाध्यव्यापकत्वाभावात् उक्तं **यच्च** इत्यादि । तत्रापि साध्यव्यभिचाराधि-करणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वात् **उपाधिशून्यम्** इति ।।

तत्रैव उपाध्यधिकरणं साध्याधिकरणं घटः, उपाधिशून्यम् अधिकरणम् आत्मा, तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावात् **साध्यव्यभिचाराधिकरणम्** इति ।।

उद्भूतरूपाधिकरणं यत् प्रत्यक्षत्वाधिकरणं घटः, यच्च उद्भूतरूपशून्यं प्रत्यक्षत्वभावाधिकरणम् अतीन्द्रियरूपादि तदन्यतरत्वावच्छिन्नद्रव्यत्वरूपसाध-नाव्यापकत्वस्य उद्भूतरूपे अभावात् "साध्याभावाधिकरणम्" इति परित्यज्य **साध्यव्यभिचारधिकरणम्** इत्युक्तम् । तदर्थश्च **साधननिष्ठसाध्यव्यभिचारनि-रूपकाधिकरणत्वम्** । **अन्तत** इति । तादृशधर्मान्तरस्य अस्फूर्तौ इत्यर्थः ।।

न च – साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वम् । तथा च शुद्धसाध्यव्यापके धूमादिनिष्ठव्याप्तेः केवलधूमत्वावच्छिन्नत्वात् कथं तादृशधर्मान्तराव-

च्छिन्नधूमादिनिष्ठव्याप्तिनिरूपकत्वम् आर्द्रेन्धनादीनाम् इति – वाच्यम् । तद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठाभावाप्रतियोगित्वरूपस्यैव तद्धर्मावच्छिन्नसाध्यव्यापकत्वस्य लक्षणे प्रवेशः, न तु यद्धर्मावच्छिन्नसाध्यनिष्ठव्याप्तिनिरूपकत्वस्य इत्याशयात् । "धूमवान् वन्हेः" इत्यादौ अयःपिण्डमहानसान्यतरत्वावच्छिन्नसाध्यव्यापकं व्यञ्जनवत्त्वादिकं सङ्ग्राह्यमेव इति ध्येयम् ।।

राजीवोल्लासः

इदानीम् इति व्याख्येयं पदम् । व्याप्तिनिश्चयाभावस्य प्रयोजिका या व्यभिचारशङ्का तत्कारणं यत् ज्ञानम् उपाधिज्ञानं तद्विषयत्वेन हेतुना उपाधेः स्मरणे सति स्मृतस्य उपेक्षानर्हत्वरूपप्रसङ्गसंगत्या उपाधिनिरूपणम् इति भावः । **सोपाधौ अभावात्** इति । सोपाधिकत्वप्रकारकज्ञानविशेष्यहेतुकस्थले अभावात् इत्यर्थः । तज्ज्ञाने जाते हेतौ साध्यव्यभिचारज्ञानसंभवात् प्रकृतसाध्यानुमित्यनुत्पत्त्या सिद्धिविषयत्वादिरूपसाध्यत्वादिकं धूमादौ न संभवति इति भावः ।।

साध्यव्यापकत्वे सति साधनाव्यापकः उपाधिः इत्युक्तौ – "घटः गुणकर्मान्यत्वविशिष्टसत्तावान्, जातेः" इत्यत्र व्यभिचारिणि द्रव्यत्वरूपोपाधौ अव्याप्तिः । साध्यपदेन विशिष्टशुद्धयोः अनतिरेकात् शुद्धसत्तापि ग्रहीतुं शक्यते । तद्व्यापकत्वं तु द्रव्यत्वे नास्ति । सत्तावति गुणादौ द्रव्यत्वाभावात् । एवं "वृक्षः संयोगी, गुणकर्मान्यत्वविशिष्टसत्त्वात्" इति सद्धेतौ द्रव्यत्वे उपाधिलक्षणातिव्याप्तिः । द्रव्यत्वस्य संयोगरूपसाध्यव्यापकत्वात् उक्तरीत्या सत्तारूपसाधनाव्यापकत्वात् च । तदुभयवारणाय यद्धर्मपदे । प्रथमयद्धर्मपदं साध्यतावच्छेदकपरम् । द्वितीययद्धर्मपदं साधनतावच्छेदकपरम् । "गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः" इत्यत्र द्रव्यत्वे विशिष्टसत्तात्वरूपसाध्यतावच्छेदकावच्छिन्न-

व्यापकत्वम् अस्ति इति न अव्याप्तिः । ''संयोगी गुणकर्मान्यत्वविशिष्टसत्त्वात्'' इत्यत्र द्रव्यत्वे साधनतावच्छेदकविशिष्टसत्तात्वावच्छिन्नाव्यापकत्वं नास्ति इति न अतिव्याप्तिः । **साध्यत्वाभिमतेत्यत्र** अभिमानविषयत्वस्य विशेषणत्वे यत्र धूमादौ साध्यत्वप्रकारकाभिमानः नास्ति, तत्रत्योपाधौ अभिमतत्त्वघटितलक्षणाभावात् अव्याप्तिः स्यात् । तस्मात् अभिमतत्वम् उपलक्षणम्, अतः न अव्याप्तिः इति भावः । तथा च ''पर्वतो धूमवान् वह्नेः'' इत्यत्र धूमत्वावच्छिन्नव्यापकः वह्नित्वावच्छिन्नाव्यापकश्च आर्द्रेन्धनसंयोगः धूमत्वावच्छिन्नसाध्यकवह्नित्वावच्छिन्नहेतौ उपाधिः । **इत्यादौ च** इति । द्रव्यत्वादौ इति शेषः । **व्यापकत्वाव्यापकत्वे** इत्यादि । ''यद्धर्मावच्छिन्न''इत्यादिरीत्या परिष्कारेऽपि ''पर्वतो वह्निमान् धूमात्'' इति सद्धेतौ द्रव्यत्वम् उपाधिः स्यात् । तथा हि – वह्नित्वावच्छिन्नवह्निं प्रति द्रव्यत्वत्वेन समवायसंबन्धेन च द्रव्यत्वस्य व्यापकत्वम् अस्ति । वह्निमति महानसादौ द्रव्यत्वत्वेन रूपेण समवायसंबन्धेन च द्रव्यत्वस्य सत्त्वात् साध्यवन्निष्ठाभावाप्रतियोगित्वात् । एवं धूमत्वावच्छिन्नं प्रति द्रव्यत्वघटोभयत्वेन रूपेण संयोगसंबन्धेन च द्रव्यत्वस्य अव्यापकत्वम् अस्ति । धूमवति महानसादौ द्रव्यत्वघटोभयाभावस्य संयोगेन द्रव्यत्वाभावस्य च सत्त्वेन साधनवन्निष्ठतादृशाभावप्रतियोगित्वात् द्रव्यत्वस्य। तथा च येन रूपेण येन संबन्धेन च उपाधेः साध्यव्यापकत्वं भवति तेनैव रूपेण तेनैव संबन्धेन च साधनाव्यापकत्वं तस्य विवक्षितम् इति फलति । तथा च सति भिन्नरूपेण भिन्नसंबन्धेन च साध्यव्यापकत्वं साधनाव्यापकत्वं च आदाय द्रव्यत्वादौ न अतिव्याप्तिः इति भावः । इत्थं च यद्धर्मावच्छिन्नसमानाधिकरणाभावीय – – यत्संबन्धावच्छिन्नप्रतियोगितानवच्छेदकं यदवच्छिन्नसमानाधिकरणाभावीय – तत्संबन्धावच्छिन्नप्रतियोगितावच्छेदकं च यत् तद्वत्त्वं तदवच्छिन्नसाध्यकतदवच्छिन्नहेतुकस्थलीयोपाधिलक्षणम् इति पर्यवसितम् अपाधिलक्षणम् ।।

काकः श्यामो मित्रातनयत्वात् इत्यादि । मूले स श्यामो मित्रातनयत्वात् इति पाठो दृश्यते । तत्र अयमाशयः – मित्रानाम्न्याः कस्याश्चित् आदौ श्यामवर्णाः द्वित्राः पुत्राः जाताः । अनन्तरं कश्चित् पुत्र उत्पन्नः । तम् अदृष्ट्वैव कश्चित् अनुमिनोति "सः पुत्रः श्यामः मित्रातनयत्वात्, पूर्वोत्पन्नपुत्रवत्" इति । शाकपाकजत्वम् अस्मिन् अनुमाने उपाधिः भवति इति वक्तव्यम् । परं तु तत्र उपाधिलक्षणं नास्ति । साध्यस्य श्यामत्वस्य कोकिलादावपि सत्त्वेन तत्र शाकपाकजत्वाभावेन साध्यव्यापकत्वाभावात् इति तदाशयः । परं तु अत्र व्याख्याने उपरितनेन "ध्वंसो विनाशी" इति ग्रन्थेन पौनरुक्तत्यं भवति । तथा हि – "ध्वंसो विनाशी जन्यत्वात्" इत्यत्र भावत्वस्य उपाधित्वं न स्यात्, विनाशित्वस्य प्रागभावेऽपि सत्त्वेन तत्र भावत्वाभावेन तस्य साध्यव्यापकत्वाभावात् इति हि वक्तव्यम् । तथा च पौनरुक्त्यम् । उदाहरणभेदेऽपि अव्याप्तौ प्रकारभेदाभावात् । उभयत्र साध्यव्यापकत्वाभावादेव अव्याप्तेः कथनात् । अतः काकस्य पक्षतया निर्देशः । एवं सति सिद्धान्ते जन्यत्वस्य ध्वंसरूपपक्षधर्मतया पक्षधर्मरूपं यत् साधनं तदवच्छिन्नसाध्यव्यापकत्वं भावत्वस्य । काकपक्षकानुमाने तु साधनस्य मित्रातनयत्वस्य काकरूपपक्षवृत्तित्वाभावात् पक्षवृत्तित्वरहितं यत् साधनं मित्रातनयत्वं तदवच्छिन्नश्यामत्वसाध्यव्यापकत्वं शाकपाकजत्वरूपोपाधेः इति वैलक्षण्यात् न पौनरुक्त्यम् इति भावः । काकपक्षकानुमाने उपाधेः स्वरूपासिद्धिसंकीर्णत्वम् इत्यपि बोध्यम् । **अस्य इति ।** शाकपाकजत्वस्य इत्यर्थः । **अग्रिमस्य इति।** भावत्वस्य इत्यर्थः ।।

ननु साधनावच्छिन्न इति । साधनावच्छिन्नसाध्यव्यापकत्वम् उपाधिलक्षण-घटकम् । मित्रातनयत्वरूपसाधनावच्छिन्नं श्यामत्वरूपं यत् साध्यं तत् कोकिलादौ नास्ति, अपि तु श्यामे मित्रातनय एवास्ति । तत्र च शाकपाकजत्वम् अस्त्येव

इति तस्य उपाधित्वोपपत्तिः । अतः न अव्याप्तिः इत्याशयेन स्थलान्तरे अव्याप्तिकथनम् इति भावः । साधनावच्छिन्नत्वं च सामानाधिकरण्येन साधनविशिष्टत्वम् । ''वायुः प्रत्यक्षविषयः द्रव्यत्वात्'' इत्यत्र उद्भूतरूपवत्त्वम् उपाधिः न स्यात् । प्रत्यक्षविषयत्वस्य आत्मतद्गुणज्ञानादिष्वपि सत्त्वेन तत्र उद्भूतरूपाभावेन उद्भूतरूपवत्त्वे साध्यव्यापकत्वविरहात् इति शङ्का । साध्ये साधनावच्छिन्नत्वनिवेशेऽपि इयम् अव्याप्तिः भवति । तथा हि – साधनं – द्रव्यत्वं तद्विशिष्टं यत् साध्यं – प्रत्यक्षविषयत्वं, तत् आत्मादौ अस्ति; तत्र च उद्भूतरूपाभावात् उद्भूतरूपे साधना-वच्छिन्नसाध्यव्यापकत्वं नास्ति इति अव्याप्तिः इति ।।

अत्र इदम् अवधेयम् – अयं **दिनकरीग्रन्थः** ''वायुः प्रत्यक्षः द्रव्यत्वात्'' इति **मुक्तावलीपाठमनुसृत्य** प्रवृत्तः । **प्रत्यक्षस्पर्शाश्रयत्वात्** इति पाठे प्रत्यक्षस्पर्शाश्रयत्वरूपसाधनावच्छिन्नप्रत्यक्षविषयत्वरूपसाध्यव्यापकत्वस्य उद्भूतरूपे संभवात् अव्याप्त्यभिधानानुपपत्तेः इति । **प्रति उद्भूतरूपस्य** इति । अयं भावः – ''वायुः प्रत्यक्षः द्रव्यत्वात्'' इत्यत्र रूपम् उपाधिः इत्येव वक्तुं शक्यम् । प्रत्यक्षत्वं प्रति उद्भूतरूपस्य व्यापकत्वे रूपस्य सुतरां व्यापकत्वात् । स्वव्यापकव्यापकस्य सुतरां स्वव्यापकत्वात् । घटत्वव्यापकपृथिवीत्वव्यापकस्य द्रव्यत्वस्य घटत्वव्यापकत्वात् । तथा च उद्भूतपदं व्यर्थम् इति शङ्का । तथापि बहिर्द्रव्यत्वविशिष्टप्रत्यक्षत्वम् अस्तु, रूपं मास्तु इति शङ्कायां तत्परिहाराय बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपं कारणम् इति कार्यकारणभावरू-पानुकूलतर्कप्रदर्शनाय उद्भूतपदम् इति समाधानम् । **साध्यव्यापकत्वे** इति । बहिर्द्रव्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वे इत्यर्थः । **तत्** इति । उद्भूतपदम् इत्यर्थः ।।

ननु पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोक्तौ ''वायुः प्रत्यक्षः द्रव्यत्वात्'' इत्यत्र उद्भूतरूपे न अव्याप्तिः । अत्र पक्षवायुवृत्तिधर्मः बहिर्द्रव्यत्वं तदवच्छिन्नं प्रत्यक्षत्वम् आत्मादौ नास्ति । तत्र बहिर्द्रव्यत्वविरहात् । अपि तु घटादावेव, तत्र उद्भूतरूपसद्भावेन पक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्य उद्भूतरूपेऽक्षतत्वात् इत्याशङ्क्य आह – **पक्षताधर्मावच्छिन्नसाध्यव्यापकत्वोक्तौ** इति । **पूर्वोक्त** इति । ''काकः श्यामः मित्रातनयत्वात्'' इत्यत्र शाकपाकजत्वरूपोपाधौ अव्याप्तिः इत्यर्थः । तत्र हि मित्रातनयत्वं न पक्षधर्मः, काके मित्रातनयत्व-विरहात् । अपि तु काकत्वं पक्षधर्मः, तदवच्छिन्नश्यामत्वव्यापकत्वं तु शाकपाकजत्वे नास्ति इति अव्याप्तिः इति भावः ।।

अव्याप्तीः इति । पूर्वोक्तस्थलेषु पूर्वोक्तरीत्या प्रसक्ताः अव्याप्तीः परिहरति इत्यर्थः । तथा हि – ''यद्धर्मावच्छिन्न'' इत्यस्य सामानाधिकरण्येन यद्धर्म-विशिष्टेत्यर्थः । तथा च तद्धर्मविशिष्टसाध्यव्यापकत्वे सति तद्धर्मविशिष्टसाधनाव्यापकः उपाधिः । ''स श्यामो मित्रातनयत्वात्'' इत्यत्र मित्रातनयत्वविशिष्टश्यामत्व-रूपसाध्यव्यापकत्वं शाकपाकजत्वेऽस्ति । तथा मित्रातनयत्वविशिष्टं साधनं मित्रातनयत्वमेव, स्वस्यापि स्वसमानाधिकरणत्वेन स्वविशिष्टत्वात्, तदव्यापकत्वं च शाकपाकजत्वेऽस्ति, गौरे मित्रातनये तदभावात् इति लक्षणसमन्वयः । एवं ''वायुः प्रत्यक्षः द्रव्यत्वात्'' इत्यत्र यद्धर्मपदेन पक्षवृत्तिबहिर्द्रव्यत्वं गृह्यते । तद्विशिष्टप्रत्यक्षत्वव्यापकत्वम् उद्भूतरूपेऽस्ति । तथा बहिर्द्रव्यत्वविशिष्टं यत् साधनं द्रव्यत्वं तदव्यापकत्वं च उद्भूतरूपेऽस्ति । आकाशादौ द्रव्ये तदभावात् इति लक्षणसमन्वयः । एवं ''ध्वंसः विनाशी, जन्यत्वात्'' इत्यत्र यद्धर्मपदेन जन्यत्वं गृह्यते । तद्विशिष्टविनाशित्वव्यापकत्वं भावत्वेऽस्ति । तथा तद्विशिष्टजन्यत्वाव्यापकत्वं च तत्र अस्ति इति समन्वयः ।।

तथा च एवम् उपाधिलक्षणं संपन्नम् – धर्मविशिष्टधर्मवत्त्वम् । वैशिष्ट्यं च स्वविशिष्टसाध्यव्यापकतावच्छेदकत्व-स्वविशिष्टसाधनव्यापकतानवच्छेदकत्व-उभयसंबन्धेन । साध्ये साधने च स्ववैशिष्ट्यं सामानाधिकरण्यसंबन्धेन ।।

उक्तलक्षणः उपाधिः सद्धेतौ न भवति, व्यभिचारिणि तु भवति इति प्रतिपादयति मूले – **सद्धेतौ** इत्यादिना । **व्यभिचारिणि तु** इत्यादि । ''पर्वतः धूमवान् वह्नेः'' इत्यत्र उपाधेः आर्द्रेन्धनसंयोगस्य अधिकरणं साध्यस्य धूमस्य अधिकरणं महानसं, आर्द्रेन्धनसंयोगरूपोपाधिशून्यं धूमव्यभिचारनिरूपकाधिकरणं अयोगोलकं, तदन्यतरत्वावच्छिन्नस्य महानसायोगोलकान्यतरत्वावच्छिन्नस्य धूमस्य व्यापकः तादृशान्यतरत्वविशिष्टस्य वह्नेश्च अव्यापकः आर्द्रेन्धनसंयोग उपाधिः । महानसायोगोलकान्यतरत्वविशिष्टः धूमः महानसे वर्तते, तत्र आर्द्रेन्धनसंयोगः अस्ति इति तस्य तादृशान्यतरत्वविशिष्टसाध्यव्यापकता । महानसायोगोलकान्यतरत्वविशिष्टो वह्निः अयोगोलकेऽस्ति । तत्र आर्द्रेन्धनसंयोगो नास्ति इति तस्य तादृशसाधनाव्यापकता इति भावः । अत्र सर्वत्र वैशिष्ट्यं सामानाधिकरण्यसंबन्धेन ।।

दिनकर्यां उपाध्यधिकरणम् इत्यादिविशेषणानां प्रयोजनम् आह – **वायुः प्रत्यक्ष** इत्यादिना । ''वायुः प्रत्यक्षः द्रव्यत्वात्'' इत्यत्र प्रत्यक्षविषयत्वरूप-साध्याधिकरणम् आत्मा, तस्य मानसप्रत्यक्षविषयत्वात्, एवम् उद्भूतरूपोपाधिशून्यं साध्यव्यभिचाराधिकरणं प्रत्यक्षविषयत्वव्यभिचारनिरूपकम् अधिकरणं गगनं, तदन्यतरत्वावच्छिन्नस्य आत्मगगनान्यतरत्वविशिष्टस्य साध्यस्य प्रत्यक्षविषयत्वस्य व्यापकम् उद्भूतरूपं न भवति, आत्मनि तदभावात् इति तस्य उपाधित्वं न, स्यात् इत्याशयेन **उपाध्यधिकरणम्** इति साध्याधिकरणे विशेषणम्। तस्मिन् दत्ते सति साध्याधिकरणस्य आत्मनः उद्भूतरूपात्मकोपाध्यधिकरणात्वाभावात्

आत्मा साध्याधिकरणपदेन ग्रहीतुं न शक्यते । अपितु उद्भूतरूपाधिकरणं प्रत्यक्षविषयत्वरूपसाध्याधिकरणं घटादि, उपाधिशून्यं साध्यव्यभिचारनिरूपकाधिकरणं गगनम् । तदन्यतरत्वावच्छिन्नस्य घटगगनान्यतरत्वविशिष्टस्य प्रत्यक्षत्वस्य व्यापकम् उद्भूतरूपं, घटगगनान्यतरत्वविशिष्टस्य द्रव्यत्वस्य अव्यापकं च तत्, गगने उद्भूतरूपाभावात् इति समन्वयः ।।

साध्याधिकरणम् इति दलस्य प्रयोजनम् आह – उद्भूतरूप इत्यादिना । तदनुपादाने उक्तस्थल एव उद्भूतरूपात्मकोपाध्यधिकरणं परमाणुः, साध्यव्यभिचाराधिकरणं गगनं, तदन्यतरत्वविशिष्टस्य परमाणुगगनान्यतरत्वविशिष्टस्य प्रत्यक्षत्वस्य अप्रसिद्ध्या उद्भूतरूपे उपाधिलक्षणं न स्यात् इति तत्र लक्षणसंगमनाय **साध्याधिकरणम्** इत्युक्तम् । तथा सति परमाणुः प्रत्यक्षत्वरूपसाध्याधिकरणं न भवति इति उपाध्याधिकरणं साध्याधिकरणं घटादि, उपाधिशून्यं साध्यव्यभिचाराधिकरणं गगनं तदन्यतरत्वविशिष्टप्रत्यक्षत्वव्यापकत्वम् उद्भूतरूपेऽस्ति इति न दोषः ।।

यच्च इत्यारभ्य **तदन्यतरत्वावच्छिन्नस्य** इत्यन्तस्य प्रयोजनम् आह – **उद्भूतरूपाधिकरणम्** इति । **यच्च** इत्यादेः अनुपादाने उपाध्यधिकरणं यत् साध्याधिकरणं तद्वृत्तिधर्मावच्छिन्नस्य साध्यस्य व्यापकः तादृशस्य साधनस्य च अव्यापकः उपाधिः इति स्यात् । तथा सति उक्तस्थल एव उद्भूतरूपात्मकोपाध्यधिकरणं यत् प्रत्यक्षत्वरूपसाध्याधिकरणं घटादि तद्वृत्तिद्रव्यत्वरूपधर्मविशिष्टस्य प्रत्यक्षत्वस्य व्यापकम् उद्भूतरूपं न भवति, तादृशप्रत्यक्षत्वाधिकरणे आत्मनि तदभावात् । तथा च उद्भूतरूपस्य उपाधित्वं न स्यात् इति तत्संपादनाय **यच्च** इत्यादि । तदुपादाने च उद्भूतरूपाधिकरणं प्रत्यक्षत्वाधिकरणं घटादि, उद्भूतरूपशून्यं साध्यव्यभिचाराधिकरणं गगनं तदन्यतरत्वविशिष्टसाध्यव्यापकत्वं तादृशसाधनाव्यापकत्वं च उद्भूतरूपे अस्ति

इति न दोषः इति भावः । तत्रापि उपाधिशून्यम् इत्यस्य प्रयोजनम् आह – **तत्रापि** इत्यादिना । तथा च **उपाधिशून्यम्** इत्यस्य अनुपादाने उपाध्यधिकरणं साध्याधिकरणं घटादि साध्यव्यभिचाराधिकरणं परमाणुः तदन्यतरत्वविशिष्टस्य प्रत्यक्षत्वस्य व्यापकं यद्यपि उद्भूतरूपं भवति, तथापि तदन्यतरत्वविशिष्टस्य साधनस्य द्रव्यत्वस्य अव्यापकं न भवति । तादृशान्यतरत्वविशिष्टद्रव्यत्वाधिकरणे परमाणौ घटादौ च उद्भूतरूपसत्त्वेन तादृशसाधनव्यापकत्वात् । अतः **उपाधिशून्यम्** इत्युक्तम् । तदुक्तौ च परमाणुः उद्भूतरूपवत्वात् तच्छून्यो न भवति इति न दोषः इति भावः । अत्र संदर्भे परमाणौ उद्भूतरूपसत्त्वे तस्य प्रत्यक्षत्वं कुतः न भवति इति न आशङ्कनीयम् । प्रत्यक्षं प्रति महत्त्वस्यापि कारणत्वात् परमाणौ च तदभावात् ।।

साध्यव्यभिचाराधिकरणम् इत्यस्य प्रयोजनम् आह – **तत्रैव** इति । ''वायुः प्रत्यक्षः द्रव्यत्वात्'' इत्यत्रैव उद्भूतरूपात्मकोपाध्यधिकरणं प्रत्यक्षत्वात्मकसाध्याधिकरणं च घटः, उद्भूतरूपात्मकोपाधिशून्यः आत्मा, तदन्यतरत्वावच्छिन्नस्य घटात्मान्यतरत्वविशिष्टस्य साध्यस्य प्रत्यक्षत्वस्य व्यापकत्वम् उद्भूतरूपे नास्ति इति अव्याप्तिः । अतः **साध्यव्यभिचाराधिकरणम्** इत्युक्तम् । तदुक्तौ च आत्मा साध्यव्यभिचारनिरूपकाधिकरणं न भवति । तत्र साध्यस्य प्रत्यक्षत्वस्य सत्त्वात् साध्याभावविरहात् । अपि तु गगनमेव । तदन्यतरत्वविशिष्टस्य प्रत्यक्षत्वस्य व्यापकम् उद्भूतरूपम् इति न अव्याप्तिः इति भावः ।।

साध्याभावाधिकरणम् इत्यनुक्त्वा साध्यव्यभिचाराधिकरणम् इत्युक्तेः प्रयोजनम् आह – **उद्भूतरूपाधिकरणम्** इत्यादिना । तथा च साध्यव्यभिचाराधिकरणम् इत्यस्य स्थाने साध्याभावाधिकरणम् इत्युक्तौ उक्तस्थले एव उपाध्यधिकरणं –

उद्भूतरूपाधिकरणं यत् साध्यस्य प्रत्यक्षत्वस्य अधिकरणं घटः, यच्च उपाधिशून्यं-उद्भूतरूपशून्यं साध्याभावाधिकरणं – प्रत्यक्षत्वाभावाधिकरणम् अतीन्द्रियरूपादि तदन्यतरत्वावच्छिन्नं यत् साधनं द्रव्यत्वं तद्व्यापकत्वम् उद्भूतरूपे नास्ति । प्रत्यक्षत्वाभावातीन्द्रियरूपान्यतरत्व-विशिष्टद्रव्यत्वं यत्र अस्ति पृथिव्यादिपरमाणौ, तत्र उद्भूतरूपस्य सत्त्वेन तादृशद्रव्यत्वव्यापकत्वात् उद्भूतरूपस्य । तथा च अव्याप्तिः । तद्वारणाय साध्याभावाधिकरणम् इति अनुक्त्वा **साध्यव्यभिचाराधिकरणम्** इत्युक्तम् । तदुक्तौ च अतीन्द्रियरूपादिकं न साध्यव्यभिचारनिरूपकाधिकरणम् । तत्र द्रव्यत्वहेत्वसत्त्वात् । साध्याभाववति यत्र हेतुः अस्ति तदेव व्यभिचारनिरुपकाधिकरणम् इति न दोष इति भावः । **साधननिष्ठ** इति । हेतुनिष्ठः यः साध्यव्यभिचारः साध्याभाववद्वृत्तित्वं तन्निरूपकम् अधिकरणम् इत्यर्थः । साध्याभाववत्पदेन यत् गृहीत्वा हेतोः साध्याभाववद्वृत्तित्वम् उपपाद्यते, तत् साधननिष्ठसाध्यव्यभिचारनिरूपकाधिकरणम् । साधननिष्ठाधेयतानिरूपकं साध्याभावाधिकरणम् इति यावत् ॥

शङ्कते – **न च साध्यव्यापकत्वम्** इति । उपाधौ साध्यव्यापकत्वं नाम साध्यनिष्ठव्याप्तिनिरूपकत्वम् । तथा च "धूमवान् वह्नेः" इत्यादौ शुद्धसाध्यव्यापकः आर्द्रेन्धनसंयोगः उपाधिः । उपाधिनिरूपिता धूमनिष्ठा व्याप्तिः शुद्धधूमत्वावच्छिन्ना, न तु महानसायोगोलकान्यतरत्वावच्छिन्ना । धूमत्वापेक्षया गुरोः महानसायोगोलकान्यतरत्वस्य अवच्छेदकत्वाभावात् । तथा च उक्तान्यतरत्वावच्छिन्नव्याप्तिनिरूपकत्वरूपम् अन्यतरत्वविशिष्टसाध्यव्यापकत्वं तत्र आर्द्रेन्धनसंयोगे नास्ति इति अव्याप्तिः इति शङ्का । साध्यनिष्ठा उपाधिनिरूपिता व्याप्तिः उपाधिसामानाधिकरण्यावच्छेदकधर्मवत्त्वरूपा । तत्र च अवच्छेदकत्वं स्वरूपसंबन्धरूपं विवक्षितम् इति मत्वा इयं शङ्का । व्याप्तिनिरूपकत्वरूपं व्यापकत्वं न अत्र विवक्षितम् इत्याशयेन समाधत्ते – **तद्धर्माधिकरणीभूत** इति । तद्धर्मः

महानसायोगोलकान्यतरत्वम् तदधिकरणीभूतं यत् साध्यधूमाधिकरणं महानसं, तन्निष्ठाभावाप्रतियोगित्वम् आर्द्रेन्धनसंयोगेऽस्ति इति न अव्याप्तिः इति भावः ।।

यद्धर्मावच्छिन्नसाध्यव्यापकत्वम् इत्यादि रीत्या उपाधिलक्षणोक्तौ "धूमवान् वह्नेः" इत्यादौ यद्धर्मपदेन महानसायःपिण्डान्यतरत्वादिकम् आदाय व्यञ्जनवत्त्वादौ अतिव्याप्तिः इति शङ्काम् इष्टापत्त्या परिहरति – धूमवान् इत्यादिना ।।

कारिकावली

सर्वे साध्यसमानाधिकरणास्ते उपाधयः ।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ।। १३९ ।।

मुक्तावली

अत एव लक्ष्यमपि उपाधिस्वरूपम् एतदनुसारेण दर्शयति – सर्वे इत्यादिना । स्वसाध्य इति । स्वं च साध्यं च स्वसाध्ये, तयोः व्याभिचारिता इत्यर्थः ।।

दिनकरी

अत एव – यद्धर्मावच्छिन्नत्वघटितनिरुक्तलक्षणस्य तात्पर्यविषयत्वादेव । एतदनुसारेण – निरुक्तलक्षणानुसारेण । स्वस्य साध्यम् इति षष्ठीतत्पुरुषभ्रमं व्यावर्तयितुम् आह – स्वं च इति ।।

नव्यास्तु – यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभावः उन्नीयते, स उपाधिः लाघवात् । अत एव जलत्वतेजस्त्वयोः तदुभयत्वेन रूपेण न क्वचिदपि उपाधित्वम् इति – आहुः ।।

राजीवोल्लासः

यद्धर्मावच्छिन्नसाध्यव्यापकत्वम् इत्यादिरीत्या लक्षणकरणे ''धूमवान् वह्नेः'' इत्यादौ यद्धर्मपदेन महानसायःपिण्डान्यतरत्वादिकम् आदाय व्यञ्जनवत्त्वादौ अतिव्याप्तिशङ्कां तस्य लक्ष्यत्वेन परिहरिष्यन् लक्ष्यस्वरूपपरिचायक-रूपप्रदर्शकं मूलम् अवतारयति – अत एव इति । ''हेतोः'' इत्यादिभागस्य ''यत्संबन्धिहेतुनिष्ठा एकाश्रयनिरूपितस्वसाध्यव्यभिचारिता'' इति बोधाकारः । यत्संबन्धित्वं च सामानाधिकरण्येन, एकज्ञानविषयत्वादिना वा । एकाश्रयनिरूपितत्वोक्त्या स्वाभावाधिकरणं यत् साध्याभावाधिकरणं तद्वृत्तितालाभः । तथा च साध्याभाववद्धेत्वधिकरणनिष्ठाभावप्रतियोगित्वे सति साध्यसामानाधिकरण्यं, सामानाधिकरण्यस्वाभाववद्धेत्वधिकरणनिष्ठाभावप्रतियोगित्वोभयसंबन्धेन साध्यविशिष्टत्वपर्यवसन्नं लक्ष्यपरिचायकं बोध्यम् इति **सुबोधिनीकाराः** ।।

दिनकर्यां षष्ठीतत्पुरुषभ्रमम् इति । षष्ठीतत्पुरुषाश्रयणे ''धूमवान् वह्नेः'' इत्यादौ सत्तादेः उपाधिलक्षणलक्ष्यत्वापत्तिः । हेतोः वह्नेः आश्रये अयोगोलके सत्तायां धूमव्यभिचारित्वसद्भावात् । कर्मधारये तु सत्तायां साध्यव्यभिचारित्वस्य सत्त्वेऽपि स्वव्यभिचारित्वविरहात्, स्वस्याः सत्तायाः तत्र सद्भावात् । स्वपदेन उपाधिः ग्राह्यः ।।

नव्यास्तु इत्यादि । ''धूमवान् वह्नेः'' इत्यादौ यदभावेन – आर्द्रेन्धनसंयोगाभावेन, यद्वदन्यत्वेन – आर्द्रेन्धनसंयोगवदन्यत्वेन वा साधनवति – वह्निमति पर्वतेऽयोगोलके वा साध्याभावः – धूमाभावः उन्नीयते – अनुमीयते इति आर्द्रेन्धनसंयोगः उपाधिः । ''पर्वतो धूमाभाववान् आर्द्रेन्धनसंयोगाभावात् आर्द्रेन्धनसंयोगवदन्यत्वाद्वा'' इत्यनुमानाकारः । तथा च साधनवद्विशेष्यकसाध्याभावोन्नायकाभावप्रतियोगित्वं, साधनवद्विशेष्यकसाध्या-

भावोन्नायकभेदप्रतियोगितावच्छेदकत्वं वा उपाधित्वम् इति पर्यवसन्नम् । साध्याभावोन्नायकत्वं च साध्याभावविधेयकानुमितिजनकज्ञानविषयत्वम् । एवं ''वायुः प्रत्यक्षः द्रव्यत्वात्'' इत्यत्र द्रव्ये उद्भूतरूपाभावेन उद्भूतरूपवद्भेदेन वा बहिर्द्रव्यत्वरूपपक्षधर्मावच्छिन्नप्रत्यक्षत्वरूपसाध्याभावस्य, बहिर्द्रव्यत्वप्रत्यक्षत्वोभयाभावस्य वा अनुमाने विशेषणीभूतबहिर्द्रव्यत्ववति वायौ विशेष्यभूतप्रत्यक्षत्वाभावे उभयघटकैकविशिष्टे अपराभावे वा पर्यवसानम् इति तत्र उद्भूतरूपे समन्वयः । एवं ''स श्यामः मित्रातनयत्वात्'' इत्यत्र, ''ध्वंसः विनाशी जन्यत्वात्'' इत्यत्र च क्रमशः शाकपाकजत्वाभावेन भावत्वाभावेन च मित्रातनयत्वविशिष्टश्यामत्वाभावस्य जन्यत्वविशिष्टविनाशित्वाभावस्य च अनुमाने उक्तदिशा श्यामत्वाभावविनाशित्वाभावयोः अनुमानपर्यवसानम् इति समन्वयः इति भावः । **लाघवात् इति।** ''यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वम् उन्नीयते'' इति **मणिकारदर्शितप्रकारापेक्षया** लाघवात् इत्यर्थः । तच्च लाघवं साध्योपाध्यभावयोः अधिकरणद्वयस्य वृत्तित्वद्वयस्य च अनिवेशप्रयुक्तम् इति वेदितव्यम् ।।

ननु ''द्रव्यं सत्त्वात्'' इत्यादौ उपाधित्वेन अभिमते संयोगेऽव्याप्तिः । संयोगाभावस्य अव्याप्यवृत्तितया द्रव्येऽपि सत्त्वात् तेन द्रव्यत्वाभावानुमानासंभवात् इति, अत आह – **यद्वदन्यत्वेन वा इति** । तथा च अन्योन्याभावस्य व्याप्यवृत्तितया संयोगवदन्यत्वस्य द्रव्ये असत्त्वात् गुणादावेव सत्त्वात् तेन द्रव्यत्वाभावानुमानं संभवति इति न अव्याप्तिः इति भावः ।।

अत एव इति । ''यद्धर्मावच्छिन्न'' इत्यादिलक्षणं त्यक्त्वा ''यदभावेन'' इत्यादि लक्षणकथनादेव इत्यर्थः । **न क्वचिदपि उपाधित्वम् इति** । अन्यथा उक्तान्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्य अन्यतरत्वाधिकरणसाध्याधिकरणनिष्ठाभावाप्रतियोगित्वरूपतया तद्घटकाभावे प्रतियोगिवैयधिकरण्यस्य ''द्रव्यं सत्त्वात्'' इत्यादौ संयोगेऽव्याप्तिवारणाय आवश्यकतया ''जलतेजसी

स्नेहभास्वररूपान्यतरवती, द्रव्यत्वात्'' इत्यत्र जलत्वतेजस्त्वयोः तदुभयत्वेन रूपेण उपाधितापत्तिः । उभयाभावस्य प्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावान्तराप्रतियोगित्वरूपव्यापकत्वस्य उभयत्वावच्छिन्नजलत्वतेजस्त्वोभयस्मिन् सत्त्वात् इति भावः ।।

कारिकावली

व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् ।

मुक्तावली

उपाधेः दूषकताबीजम् आह – **व्यभिचारस्य** इति । उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारम् अनुमानम् उपाधेः प्रयोजनम् इत्यर्थः । तथा हि–

यत्र शुद्धसाध्यव्यापक उपाधिः, तत्र शुद्धेनैव उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् । यथा ''धूमवान् वन्हेः'' इत्यादौ वन्हिः धूमव्यभिचारी, तद्व्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात् इति । व्यापकव्यभिचारिणः व्याप्यव्यभिचारावश्यकत्वात् ।।

यत्र तु किञ्चिद्धर्मावच्छिन्नसाध्यस्य व्यापक उपाधिः, तत्र **तद्धर्मवति उपाधिव्यभिचारेण** साध्यव्यभिचारानुमानम् । यथा ''स श्यामः मित्रातनयत्वात्'' इत्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि, मित्रातनये शाकपाकजत्वव्यभिचारित्वात् इति ।।

दिनकरी

तद्धर्मवति उपाधिव्यभिचारेण – **तद्धर्माधिकरणीभूतं** यत् उपाध्यभावाधिकरणं तद्वृत्तित्त्वेन । ''वायुः प्रत्यक्षः, प्रमेयत्वात्'' इत्यादौ तु प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि, बहिर्द्रव्ये उद्भूतरूपव्यभिचारित्वात्'' इत्यादि द्रष्टव्यम् ।।

राजीवोल्लासः

तद्धर्माधिकरणीभूतम् इत्यादि । ''वायुः प्रत्यक्षः द्रव्यत्वात् प्रमेयत्वाद्वा'' इत्यत्र उद्भूतरूपवत्त्वं पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिः । अत्र तद्धर्मः पक्षधर्मः बहिर्द्रव्यत्वम्, तदधिकरणीभूतं यत् उद्भूतरूपात्मकोपाध्यभावाधिकरणं आकाशादि तद्वृत्तित्वेन साध्यव्यभिचारानुमानम् इत्यर्थः । तथा च ''द्रव्यत्वं प्रत्यक्षत्वव्यभिचारि, बहिर्द्रव्यत्वाधिकरणीभूतोद्भूतरूपाभावाधिकरणगगनादिवृत्तित्वात्'' इत्यनुमानाकारः ।।

मुक्तावली

बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात् स्वव्याघातकत्वाच्च न उपाधिः । बाधोन्नीतस्तु उपाधिः भवत्येव, यथा ''वन्हिः अनुष्णः, कृतकत्वात्'' इत्यादौ प्रत्यक्षेण वन्हौ उष्णत्वग्रहे वन्हीतरत्वम् उपाधिः ।।

यस्य तु उपाधेः साध्यव्यापकत्वादिकं सन्दिह्यते, सः सन्दिग्धोपाधिः । पक्षेतरस्तु **सन्दिग्धोपाधिरपि** न उद्भावनीयः, कथकसंप्रदायानुरोधात् ।।

दिनकरी

ननु पक्षेतरत्वे अतिव्याप्तिः । न च तस्य लक्ष्यत्वमेव । **''एकाश्रये येषाम्''** इत्यादिमूलेन प्रदर्शितस्य लक्ष्यतावच्छेदकस्य तत्र अभावात् । तत्र हेतौ पक्षेतरत्वव्यभिचारस्य पक्षमादायैव संभवात् साध्यव्यभिचारस्य तम् आदाय असंभवात्, अत आह – **बाधानुन्नीत** इति । **स्वव्याघातकत्वात्** इति । **उपाधिमात्रस्य** दूषकत्वव्याघातकत्वात् इत्यर्थः । पक्षेतरत्वस्य उपाधित्वे सर्वत्र अनुमाने पक्षेतरत्वस्य उपाधेः संभवात् अनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्य उपाधेः दूषकत्वस्य असंभवात् इति भावः ।।

ननु तथापि यत्र साध्यव्यापकताग्राहकं प्रमाणम् अस्ति, तत्र पक्षेतरत्वे लक्षणातिव्याप्तिः दुर्वारा इति, अत आह – **बाधोन्नीतस्तु** इति । बाधेन पक्षे साध्याभाववत्तया उन्नीतः – साध्यव्यापकत्वेन निश्चितः इत्यर्थः । **सन्दिग्धोपाधिरपि** इति । पक्षे साध्यसन्देहेन साध्यव्यापकतासन्देहस्य पक्षेतरत्वे संभवात् इति भावः ।

न च – स्वव्याधातकत्वेन अनुपाधित्वादेव अनुद्भावनसंभवे संप्रदायमात्रे तद्धेतुत्वकथनम् असङ्गतम् इति – वाच्यम् । **यत्र साध्यव्यापकता** – ग्राहकतर्कावतारः तत्र व्यापकव्यभिचारिणः व्याप्यव्यभिचारावश्यंभावेन व्यभिचारानुमापकत्वरूपस्य दूषकत्वस्य व्याघातासंभवात् ।।

राजीवोल्लासः

उत्तरग्रन्थम् अवतारयति – **ननु पक्षेतरत्वे** इत्यादिना । ''पर्वतः वह्निमान् धूमात्'' इत्यादिसद्धेतौ पक्षेतरत्वं पर्वतेतरत्वादिकम् उपाधिः स्यात् । तस्य वह्निमति महानसादौ सत्त्वेन साध्यव्यापकत्वात् । हेतुमति पक्षे असत्त्वेन साधनाव्यापकत्वाच्च । न च – तस्य लक्ष्यत्वमेव इति – वाच्यम् । **एकाश्रये** इत्यादिना पूर्वोक्तस्य लक्ष्यतावच्छेदकस्य साध्याभावव-द्धेत्वधिकरणनिष्ठाभावप्रतियोगित्वे सति साध्यसामानाधिकरण्यरूपस्य तत्र अभावेन लक्ष्यत्वासंभवात्, अलक्ष्ये तत्र साध्यव्यापकत्वे सति साधनाव्यापकत्वसत्त्वात् अतिव्याप्तिः इति भावः । **पक्षेतरत्वे अतिव्याप्तिः** इत्यस्य साध्यव्यापकत्व-ज्ञानाधीनव्यभिचारोन्नायकत्वापत्तिः इत्यर्थः । अनेन पक्षेतरत्वे वस्तुतः साध्यव्यापकत्वस्य ''वह्निमान् धूमात्'' इत्यादौ असंभवात् अतिव्याप्तिकथनम् असङ्गतम् इति शङ्काया न अवकाशः । **तम् आदाय असंभवात्** इति । पक्षमादाय असंभवात् इत्यर्थः । पक्षे साध्यसत्त्वात् इति भावः । उपाधिव्यभिचारिता साध्यव्यभिचरिता च हेतुनिष्ठा एकाश्रयनिरूपिता भवति चेत् स उपाधिः इति

हि मूले उक्तम् । सद्धेतौ पक्षेतरत्वव्यभिचारिता पक्षमादाय, साध्यव्यभिचारिता तु तमादाय न भवति, पक्षे साध्यसत्त्वात् इति भावः ।।

मुक्तावल्यां – बाधानुन्नीतपक्षेतरस्तु इति । बाधेन पक्षे साध्याभाववत्तया हेतुना उन्नीतः साध्यव्यापकत्वेन निश्चितः यः, तद्भिन्नः पक्षेतर इत्यर्थः । **साध्यव्यापकताग्राहकप्रमाणाभावात्** इति । साध्यव्यापकत्वनिश्चायकानुकूलतर्काभावात् इत्यर्थः । तर्काभावे व्यभिचारशङ्काया अनिवृत्तेः साध्यव्यापकत्वं न निश्चेतुं शक्यत इति भावः । यदि च तर्कापेक्षां विनापि व्यापकत्वनिश्चयो मन्यते, तदापि पक्षेतरत्वस्य न दूषकत्वप्रसङ्ग इति दर्शयितुं **मुक्तावल्याम्** उक्तस्य **स्वव्याघातकत्वाच्च** इत्यस्य अर्थं विशदयति **दिनकर्यां – उपाधिमात्रस्य** इति । दूषकत्वव्याघातकत्वम् उपपादयति – **पक्षेतरत्वस्य** इत्यादिना । उपाधिः हि स्वव्यभिचारेण हेतौ साध्यव्यभिचारानुमानद्वारा हेतोः दूषकः भवति । पक्षेतरत्वस्य उपाधित्वे साध्यव्यभिचारसाध्यकानुमानस्यापि पक्षेतरत्वोपाधिना दूषितत्वात् साध्यव्यभिचारानुमापकत्वं कथं भवेत् इति भावः ।।

ननु तथापि इत्यादि । "वह्निः अनुष्णः, कृतकत्वात्" इत्यत्र वह्नीतरत्वे अनुष्णत्वरूपसाध्यव्यापकत्वग्राहकस्य प्रत्यक्षप्रमाणस्य सद्भावात् तत्र वह्नीतरत्वम् उपाधिः स्यात् । तस्य अनुष्णत्वरूपसाध्यव्यापकत्वस्य पक्षान्तर्भावेण कृतकत्वरूपसाधनाव्यापकत्वस्य च सत्त्वात् इत्याशङ्काम् इष्टापत्त्या परिहरति **बाधोन्नीतस्तु** इति ग्रन्थेन इति भावः । यत्र उपाधेः साध्यव्यापकता संदिह्यते तत्र संदिग्धोपाधिः दोष इति मूले उक्तम् । तथा सति "पर्वतो वह्निमान् धूमात्" इत्यादिसद्धेतावपि पक्षे साध्यसंदेहेन पर्वतेतरत्वे साध्यव्यापकत्वसंदेहस्य संभवात् पक्षेतरत्वस्य संदिग्धोपाधित्वं भवितुम् अर्हति इति बाधानुन्नीतपक्षेतरत्वं न उपाधिः इति कथम् उच्यत इति शङ्कायां **मूले पक्षेतरस्तु** इत्युक्तम् ।

बाधानुन्नीतपक्षेतरत्वं तु इति तदर्थः । ''अपि''ना निश्चितमपि पक्षेतरत्वं न उपाधिः इति सूच्यते ।।

तत्र शङ्कते – **न च** इति । पक्षेतरत्वस्य उपाधित्वे सर्वत्र अनुमाने तत्संभवात् अनुमानमात्रोच्छेदापत्त्या स्वव्याघातकत्वेन अनुपाधित्वादेव तदनुद्भावनस्य संभवात् कथकसंप्रदायमात्रे अनुद्भावनहेतुत्वकथनं मूले असंगतम् इति शङ्कितुः अशयः । समाधत्ते – **यत्र साध्यव्यापकता** इत्यादिना । अयं भावः – ''धूमवान् वह्नेः'' इत्यत्र आर्द्रेन्धनसंयोगः उपाधिः । तत्र आर्द्रेन्धनसंयोगः धूमव्यापकः । वह्निश्च आर्द्रेन्धनसंयोगव्यभिचारी । तेन च वह्नौ धूमव्यभिचारित्वम् अनुमीयते । ''वह्निः धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात्'' इति अनुमानाकारः । यो यद्व्यापकव्यभिचारी, स तद्व्यभिचारी इति व्याप्तिः अत्र उपजीव्या । आर्द्रेन्धनसंयोगे धूमव्यापकत्वं च तयोः कार्यकारणभाव-रूपानुकूलतर्कात् निश्चीयते इति स्थितिः । अत्र वह्निपक्षकधूमव्यभिचारसाध्यकानुमाने पक्षेतरत्वं वह्नीतरत्वम् उपाधिः भवितुम् अर्हति । न च – स्वव्याघातकत्वात् न तदुपाधिः इति – वाच्यम् । वह्नीतरत्वरूपोपाधौ धूमव्यभिचारात्मक-साध्यव्यापकतासंदेहेऽपि व्यापकव्यभिचारव्याप्यव्यभिचारयोः व्याप्यव्यापक-भावात्मकसामान्यनियमभङ्गापत्तिरूपतर्कसत्त्वात् प्रकृतहेतौ वह्नौ धूमव्यभिचारानुमानं संभवत्येव इति स्वव्याघातकत्वं पक्षेतरत्वस्य उपाधित्वेन अनुद्भावने न कारणम्, अपि तु कथकसंप्रदायविरोध इति **मुक्तावलीकाराणाम्** आशय इति भावः ।।

अस्मद्गुरुचरणास्तु अध्यापनवेलायाम् इत्थम् अवदन् – ''वह्निः अनुष्णः कृतकत्वात्'' इत्यादौ वह्नौ उष्णत्वप्रत्यक्षरूपानुकूलतर्कसत्त्वेन वह्नीतरत्वे अनुष्णत्वव्यापकत्वनिश्चयेन वह्नीतरत्वव्यभिचाररूपस्य व्यापकव्यभिचारस्य अनुष्णत्वव्यभिचाररूपः यो व्याप्यव्यभिचारः तद्व्याप्यतयापि निश्चयेन तत्र

कृतकत्वेतरत्वस्य उपाधि(त्व)[त्वा] संभवेन न अनुमानमात्रोच्छेदापत्तिः इति भावः– इति ।। उपाधित्वासंभवेन – स्वव्याधातकत्वासंभवेन इत्यर्थः ।।

मुक्तावली

केचित्तु – सत्प्रतिपक्षोद्भावनम् उपाधेः फलम् । तथा हि – **''अयोगोलकं** धूमाभाववत्, आर्द्रेन्धनाभावात्'' इति सत्प्रतिपक्षसंभवात् ।।

इत्थं च साधनव्यापकोऽपि क्वचिदुपाधिः, यथा **''करका पृथिवी, कठिनस्पर्शवत्त्वात्''** इत्यादौ अनुष्णाशीतस्पर्शवत्त्वम् ।।

न च – अत्र स्वरूपासिद्धिरेव दूषणम् इति – वाच्यम् । सर्वत्र उपाधेः दूषणान्तरसांकर्यात् । अत्र च साध्यव्यापकः पक्षावृत्तिः उपाधिः इति – **आहुः** ।।

दिनकरी

सत्प्रतिपक्षोन्नायकत्वेन उपाधेः दूषकतावादिनां मतम् आह – **केचित्तु** इति । **इत्थं च** इति । सत्प्रतिपक्षोत्थापकतया दूषकत्वे च इत्यर्थः । **अत्र च** – सत्प्रतिपक्षोत्थापकत्वपक्षे च । **पक्षावृत्तिः** इति । **पक्षवृत्तित्वे** तु पक्षे तदभावेन साध्याभावासाधनात् इति भावः ।।

राजीवोल्लासः

मुक्तावल्यां – **केचित्तु** इति । उपाधेः साध्यव्यापकतया तस्य पक्षे अभावेन साध्याभावानुमानरूपस्य प्रत्यनुमानस्य संभवात् सत्प्रतिपक्षोद्भावनं फलम् इत्यर्थः । तदाह – **अयोगोलकम्** इति । ननु एतत्पक्षेऽपि पूर्वदर्शितमेव लक्षणं लक्ष्यं च इति भ्रमं व्यावर्तयितुम् आह – **इत्थं च** इति । **कठिनस्पर्शवत्त्वात्** इति । **''करका पृथिवी कठिनस्पर्शवत्त्वात्''** इत्यत्र अनुष्णाशीतस्पर्शवत्त्वम् उपाधिः । अयम् उपाधिः साध्यव्यापकः साधनव्यापकश्च । परं तु पक्षावृत्तिः । **आहुः** इति अस्वरसोद्भावनम् । तद्बीजं तु – ''वह्निरनुष्णः कृतकत्वात्''

इत्यत्र बाधोन्नीते पक्षेतरत्वे वह्नीतरत्वे अव्याप्तिः । तत्र वह्नीतरत्वाभावेन पक्षे साध्याभावसाधनासंभवात् । तत्र हेतोः पक्षमात्रवृत्तित्वेन असाधारणत्वात् इति । **दिनकर्यां पक्षवृत्तित्वे तु इति** । साध्यव्यापकत्वे सति पक्षावृत्तित्वम् उपाधिलक्षणम् अस्मिन् मते । यद्युपाधिः पक्षवृत्तिः स्यात्, तदा उपाध्यभावस्य पक्षावृत्तित्वेन उपाध्यभावेन हेतुना पक्षे साध्याभावसाधनं कथं स्यात् इति भावः ।।

।। शब्दोपमानयोः पृथक्प्रामाण्यनिरूपणम् ।।

कारिकावली

शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ।। १४० ।।
अनुमानगतार्थत्वात् इति वैशेषिकं मतम् ।

मुक्तावली

वैशेषिकाणां मते प्रत्यक्षम् अनुमानं च प्रमाणम् । शब्दोपमानयोस्तु अनुमानविधयैव प्रामाण्यम् । तथा हि – ''दण्डेन गाम् आनय'' इत्यादिलौकिकपदानि (''यजेत'' इत्यादि) वैदिकपदानि वा तात्पर्यविषयस्मारित–पदार्थसंसर्गप्रमापूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बकत्वात्, ''घटम् आनय'' इति पदकदम्बकवत् ।।

दिनकरी

गुरुमते लौकिकः शब्दः अनुवादकः, वैदिक एव प्रमाणम्, तन्मतनिराकरणाय आह – वैदिक इति । अत्र ''स्वर्गकामो यजेत'' इत्यादिपदत्वेन पक्षता, तेन विशेषतः संसर्गसिद्धिः इति द्रष्टव्यम् । तात्पर्यविषय इति । ''अत्र ब्राह्मणे विद्या'' इत्यादौ यदा अधिकरणत्वसंसर्गे तात्पर्यम्, तदा विषयत्वादिसंसर्गेण

अर्थान्तरवारणाय तात्पर्यविषयत्वं संसर्गे विशेषणम् । पदार्थत्वेन पदार्थस्य प्रवेशे घटत्वादिना स्मृतस्य संसर्गः न सिद्ध्येत्, अतः स्मारित इति । स्मारितत्वं च वृत्त्या बोध्यम् । तेन वस्तुपदात् समवायेन आकाशत्वादिना उपस्थापितेन रूपेण संसर्गसिद्ध्यभावेऽपि न क्षतिः ।।

हेतौ च "अयमेति पुत्रः राज्ञः पुरुषः अपसार्यताम्" इत्यादौ "राज्ञः पुरुषः" इत्यादि भागे राजपुरुषयोः योग्यार्थयोः संसर्गे तात्पर्याभावेन साध्याभावात् व्यभिचारः इति आकाङ्क्षाविशेषणम् । तच्च "इदं पदम् अनेन सह अमुकसंसर्गेण एतदर्थान्वितस्वार्थबोधं जनयतु" इति पदतात्पर्यार्थकम् । तेन न आकाङ्क्षाया इतरांशवैयर्थ्यप्रसङ्गः ।।

"वन्हिना सिञ्चति" इत्यादिवाक्ये संसर्गप्रमापूर्वकत्वसाध्याभावेन व्यभिचारवारणाय हेतौ योग्यतापदम् ।।

"नीलो घटः, द्रव्यं पटः" इत्यादौ "नीलः पटः" इत्यादिभागे नीलपटयोः आकाङ्क्षायोग्यतासत्त्वेन हेतुसत्त्वात् व्यभिचारवारणाय आसत्तिपदम् ।।

कदम्बपदं च आकाङ्क्षादीनां परस्परं प्रतियोगित्वलाभाय । अन्यथा साध्यस्य परस्परार्थघटितत्वेन व्यभिचारप्रसङ्गात् ।।

राजीवोल्लासः

इत्यादिपदत्वेन इति । न तु वैदिकपदत्वेन सामान्यरूपेण इत्यर्थः । **विशेषतः संसर्गसिद्धिः** इति । यागादौ स्वर्गसाधनत्वाश्रयत्वादिरूपसंसर्गसिद्धिः इत्यर्थः । अन्यथा वैदिकपदत्वेन पक्षत्वे तदवच्छेदेन स्वर्गसाधनत्वाश्रयत्व-रूपविशेषसंसर्गबाधेन विशेषसंसर्गसिद्ध्यनापत्तेः । **घटत्वादिना स्मृतस्य** इति । घटादेः इति शेषः । **अतः स्मारित इति** इति । तथा च घटत्वेनैव घटस्य स्मारिततया तेन रूपेण घटस्य संसर्गसिद्धिः इति भावः । **पदतात्पर्यार्थकम्**

इति । न तु समभिव्याहारमात्रम् इति आकाङ्क्षानिरूपणे उक्तत्वात् इति भावः । **इतरांशवैयर्थ्यप्रसङ्गः** इति। **आकाङ्क्षादिमत्पदकदम्बकत्वात्** इत्यत्र ''आदि''-पदग्राह्येन योग्यतादिमत्पदकदम्बकत्वात् इत्यनेन आकाङ्क्षाया वैयर्थ्यप्रसङ्ग इत्यर्थः ।।

हेतौ योग्यतापदनिवेशस्य प्रयोजनम् आह – **वह्निना** इति । ''वह्निना सिञ्चति'' इत्यस्मिन् वाक्ये पदार्थसंसर्गप्रमापूर्वकत्वरूपसाध्याभाववति आकाङ्क्षा-वत्पदकदम्बकत्वसत्त्वात् व्यभिचारः । तद्वारणाय हेतौ पदकदम्बके योग्यतावत्त्व-निवेशः । तस्मिन् वाक्ये योग्यार्थकत्वरूपयोग्यताविरहात् न व्यभिचार इति भावः ।।

हेतौ आसत्तिमत्त्वविशेषणस्य प्रयोजनम् आह – **नीलो घट** इति । ''नीलो घटः द्रव्यं पटः'' इति वाक्यघटके ''नीलः पटः'' इति भागे तात्पर्यविषयसंसर्गप्रमापूर्वकत्वाभाववति आकाङ्क्षादिमत्पदकदम्बकत्वसत्त्वात् व्यभिचारः । तद्वारणाय हेतौ आसत्तिमत्त्वनिवेशः । तन्निवेशे ''नीलः पटः'' इति भागे अव्यवधानरूपासत्तिमत्त्वाभावात् न व्यभिचार इति भावः ।।

ननु **आकाङ्क्षादिमत्पदकदम्बकत्वात्** इत्यस्य तादृशाकाङ्क्षादिमत्पदघटित-समुदायत्वात् इति ह्यर्थः । तत्र व्यभिचारावारकत्वेन कदम्बत्वस्य हेतुकोटौ निवेशासंभवात् कदम्बपदं व्यर्थम् इति शङ्काम् अपाकरोति – **कदम्बपदम्** इति । अयम् आशयः – घटकर्मत्वयोः संसर्गतात्पर्येण यत्र ''घटम्'' इति प्रयुक्तं, तत्र सामान्यतः आकाङ्क्षादिमत्त्वस्यैव हेतुत्वे तद्वत्त्वं ''घट'' इत्यादेः, ''पटम्'' इत्यादेश्च भवति, तत्र घटकर्मत्वसंसर्गप्रमापूर्वकत्वाभावात् व्यभिचारः स्यात् । अतः ययोः पदयोः अर्थौ साध्यघटकौ, तयोः परस्परस्यैव आकाङ्क्षादिमत्त्वं हेतुघटकम् इति सूचयितुं **कदम्बपदम्** इति । एवं यत्प्रतियोगिकत्वम् आकाङ्क्षायाः,

तत्प्रतियोगिकत्वमेव योग्यतादेः इत्यपि सूचयितुं **कदम्बपदम्** । अन्यथा "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यादौ राजपदस्य पुत्रपदेन सह आकाङ्क्षासत्तिमत्त्वात् पुरुषपदेन च योग्यतासत्त्वात् राजपुरुषयोः तात्पर्यविषयसंसर्गप्रमापूर्वकत्वरूपसाध्याभावाच्च व्यभिचारः स्यात् । तथा विवक्षायां च "अयमेति" इत्यादौ राजपदस्य पुरुषपदनिरूपितयोग्यतासत्त्वेऽपि तात्पर्यघटितायाः तन्निरूपिताकाङ्क्षायाः अभावात् न "राज्ञः पुरुष" इति भागस्य हेतुमत्त्वम् इति न व्यभिचार इति भावः ।।

मुक्तावली

यद्वा – "एते पदार्थाः, मिथः संसर्गवन्तः, योग्यतादिमत्पदोपस्थापितत्वात्, तादृशपदार्थान्तरवत्" । दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिः इति ।

एवं गवयव्यक्तिप्रत्यक्षानन्तरं "गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, असति वृत्त्यन्तरे वृद्धैः तत्र प्रयुज्यमानत्वात्, असति च वृत्त्यन्तरे वृद्धैः यत्र यत् प्रयुज्यते, तत् तत्पदप्रवृत्तिनिमित्तकम्, यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम्"; यद्वा "गवयपदं सप्रवृत्तिनिमित्तकम्, साधुपदत्वात्" इत्यनुमानेन पक्षधर्मताबलात् गवयत्व-प्रवृत्तिनिमित्तकत्वं सिद्ध्यति ।।

दिनकरी

ननु इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकज्ञानस्य प्रवर्तकतया संसर्गज्ञानपूर्वकत्वानुमितेः अतादृशतया कथं प्रवर्तकत्वम्? अनुमितेः व्यापकता-वच्छेदकप्रकारकत्वनियमेन प्रमापूर्वकत्वत्वेन प्रमापूर्वकत्वसिद्धावपि पुरोवर्तिविशेष्यक-रजतत्वादिप्रकारकज्ञानस्य तस्मात् अनुत्पत्तेः, तदर्थं शब्दप्रामाण्यस्वीकार इति, अत आह – **यद्वा इति** । **मिथः संसर्गवन्त इति** । तात्पर्यविषयपरस्परसंसर्गवन्तः इत्यर्थः । तेन न अतात्पर्यविषयसंसर्गम् आदाय अर्थान्तरम् ।।

ननु दृष्टान्ते साध्यप्रसिद्ध्यभावात् कथं व्याप्तिग्रहः इति, अत आह – दृष्टान्तेऽपि इति ।।

राजीवोल्लासः

मूले पदपक्षकानुमानं प्रदर्श्य ततः **यद्वा** इत्यादिना पदार्थपक्षकानुमानं प्रदर्शितम् । एवं पक्षान्तरानुसरणस्य बीजं प्रदर्शयन् **यद्वा** इति ग्रन्थम् अवतारयति – **ननु इष्टतावच्छेदक** इत्यादिना । "दण्डेन गामानय" इत्यादि-लौकिकपदानां "यजेत स्वर्गकामः" इत्यादिवैदिकपदानां च श्रवणानन्तरं गवानयनयागादौ प्रवृत्तिः जायते । सा कथं जायत इति चिन्तायां प्रवृत्तिजनकज्ञानस्य तादृशपदेभ्यः जायमानत्वात् तद्द्वारा जायत इति वक्तव्यम् । प्रवृत्तिं प्रति च इष्टतावच्छेदकप्रकारकं प्रवृत्तिविषयविशेष्यकं ज्ञानम् कारणम् । यथा इष्टे रजते प्रवृत्तिः जायत इति रजतं प्रवृत्तिविषयः । इष्टतावच्छेदकं रजतत्वं, तत्प्रकारकरजतविशेष्यकज्ञानं रजते प्रवृत्तिं प्रति हेतुः । एवं गवानयनयागादिकं प्रवृत्तिविषयः तद्विशेष्यकम् इष्टतावच्छेदकगवानयनत्वयागत्वादिप्रकारकं ज्ञानं गवानयनयागादौ प्रवृत्तिं प्रति कारणम् । तच्च ज्ञानं "गामानय", "यजेत" इत्यादिवाक्यात् जायत इति तादृशवाक्यस्य प्रवर्तकत्वम् इति स्थितिः । यदि तादृशवाक्यम् अनुमानविधया प्रमाणं, तदा तादृशवाक्यजन्यानुमित्यात्मकज्ञानस्य संसर्गप्रमापूर्वकत्वप्रकारकतादृशवाक्यविशेष्यकत्वेऽपि प्रवृत्तिविषयगवानयन-यागादिविशेष्यकगवानयनत्वादिप्रकारकत्वाभावात् प्रवृत्तिजनकज्ञानजनकत्वम् अनुमानस्य नास्ति इति कथं शब्दस्य अनुमानेऽन्तर्भाव इति अस्वरसं मनसि निधाय पदार्थपक्षकानुमानानुधावनम् इति भावः ।।

कारिकावली

तन्न सम्यक्, विना व्याप्तिबोधं शाब्दादिबोधतः ।। १४१ ।।

मुक्तावली

तन्मतं दूषयति – **तन्न सम्यक्** इति । व्याप्तिज्ञानं विनापि शाब्दबोधस्य अनुभवसिद्धत्वात् । न हि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणम् अस्ति इति ।

किञ्च सर्वत्र शाब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते, तदा सर्वत्र अनुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियताम् इति ध्येयम् ।।

दिनकरी

ननु सर्वत्र शब्दश्रवणानन्तरम् अनुमितिरूपकार्यान्यथानुपपत्त्या व्याप्तिज्ञानं कल्पनीयम् इति, अत आह – **किञ्च** इति । **पदज्ञानं कल्पयित्वा** इति । पदस्मरणं कल्पयित्वा इत्यर्थः । वन्ह्यादिशब्देन अर्थस्य इव वन्ह्यादिरूपेणार्थेनापि वन्ह्यादिपदस्मरणसंभवात् वाच्यत्वादिवत् वाचकत्वादिसंबन्धस्यापि स्मारकत्वात् इति भावः ।।

इदम् उपलक्षणम् । आकाङ्क्षादिज्ञानं कल्पयित्वा इत्यपि बोध्यम् ।।

मणिकृतस्तु – "एते पदार्थाः परस्परसंसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात्" इत्यनुमाने योग्यता न लिङ्गविशेषणम्, लिङ्गस्य निश्चितस्यैव निश्चायकतया योग्यतायाश्च संशयेऽपि शाब्दबोधदर्शनात् । अतः पृथगेव शब्दोपमानम् इति वदन्ति ।।

मिश्रास्तु – अनुमानमुद्रया शब्दस्य बोधकत्वे "घटमानय" इति स्वरूपयोग्यम्, "घटः कर्मत्वम् आनयनं कृतिः" इति स्वरूपायोग्यम् इति न स्यात्, अनुमानस्य उभयत्रापि संभवात् । न च – **आकाङ्क्षाघटितहेत्वभावात्**

न अनुमितिः तत्र इति – वाच्यम् । **आकाङ्क्षाभ्रमेण** अनुमितिसंभवात् **विषयाबाधाच्च** तस्याः प्रमात्वात्, शब्दप्रामाण्ये च **स्वभावात्** न तादृशशब्दस्य बोधकत्वम् इति – आहुः ।।

परे तु – ''घटात् पृथक्'' इत्यादौ घटावधिकपृथक्त्वप्रकारेण निरवच्छिन्न-विशेष्यताकः पृथक्त्वाश्रयस्य शाब्दबोधः सर्वानुभवसिद्धः, स च अस्माकं तादृशानुपूर्वीकपदज्ञानत्वेन तादृशशाब्दबोधं प्रति हेतुत्वात् उपपद्यते ।।

वैशेषिकाणां तु ''पृथक्त्वं घटावधिकम्, घटपदसाकाङ्क्षपृथक्पदस्मारितत्वात्'' इत्यनुमानेन न तन्निर्वाहः । पक्षविधया पृथक्त्वस्य भानेऽपि तदाश्रयस्य अभानात् ।।

न च – पटं पक्षीकृत्य ''पटः घटावधिकपृथक्त्ववान्'' इत्यनुमित्या तन्निर्वाहः इति – वाच्यम् । पटादिनिष्ठविशेष्यतायाः तत्र पक्षतावच्छेदकीभूतपटत्वावच्छिन्नतया निरवच्छिन्नविशेष्यताकतादृशशाब्दबोधसमानाकारकत्वस्य तथापि अनिर्वाहात् इति – आहुः इति दिक् ।।

राजीवोल्लासः

इदम् उपलक्षणम् इति । अथ एवं बहुकारणकल्पनभियैव न सर्वत्र अनुमितौ शाब्दत्वसंभव इति शब्दस्य न पृथक् प्रामाण्यसिद्धिः । एवं बालस्य प्रथमं वृद्धव्यवहारेणैव शक्तिग्रहः । स च अनुमित्यात्मकः । तस्या अनुमितेः कथमपि न शाब्दत्वसंभवः, पदजन्यपदार्थस्मृत्यजन्यत्वात् इत्यभिप्रेत्य आह **मणिकृतस्तु** इति । ननु हेतुघटकयोग्यत्वं न तत्र तद्वत्त्वरूपम् । **आचार्यादिमते** अन्वयप्रयोजकरूपवत्त्वस्यैव योग्यत्वात् । तत्संशये च न शाब्दबोधः तत्समानाकारानुमितिः वा इति न कश्चित् दोषः इत्यतः **मिश्रोक्तरीत्या** शब्दस्य पृथक् प्रामाण्यं साधयति – **मिश्रास्तु** इति । **आकाङ्क्षाघटित** इति । आकाङ्क्षा च अत्र प्रत्यये प्रकृत्युत्तरत्वादिरूपा । **आकाङ्क्षाभ्रमेण** इति । ननु अनुमितेः भ्रमाधीनत्वे तस्या अपि भ्रमत्वापत्तिः इति शङ्कां वारयति – **विषयाबाधात्**

इति । स्वभावात् न इति । अनुभवबलात् ''घटः कर्मत्वम्'' इत्यानुपूर्व्याः प्रमितिजनकतानवच्छेदकत्वात् न तदाश्रयस्य स्वरूपयोग्यतासंभव इति भावः ।।

परे तु इति । अथ बाधबुद्ध्यप्रतिबध्यत्वात् निरवच्छिन्नविशेष्यताकशाब्दबोधे एव न मानम् । न च – पृथक्त्वं न घटावधिकम् इति बुद्धिप्रतिबध्यत्वम् अक्षतम् इति – वाच्यम् । पृथक्त्वाश्रयनिष्ठविशेष्यतायाः बाधबुद्धिप्रतिबध्यतावच्छेदकत्वस्य तथापि असंभवात् इति चेत् – न । शाब्दबोधीययावद्विशेष्यतानां बाधबुद्धिप्रतिबध्यतावच्छेदकत्वनियमे मानाभावात् । अन्यथा तेषां ''गच्छति'' इत्यादौ अपि चैत्रत्वनिष्ठप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतासत्त्वात् शाब्दबोधानुपपत्तेः । वस्तुतस्तु पदजन्यपदार्थोपस्थित्यादिसामग्र्यां सत्यां कार्येण अवश्यंभाव्यम् इति ''घटात् पृथक्'' इत्यादौ शाब्दापलापो न संभवति इति । इदम् उपलक्षणम् – शब्दजन्यज्ञानानन्तरं ''शृणोमि, न तु अनुमिनोमि'' इत्यनुव्यवसायात्, ''मया इदं न अनुमितं, किं तु गुरोः सकाशात् श्रुतम्'' इत्यादिव्यवहारात् च शाब्दबोधः न अनुमितिस्वरूपः । तज्जनकश्च शब्दः पृथक् प्रमाणम्। किं च ''वह्निव्याप्याभाववान् वह्निमान्'' इति शब्दप्रयोगे अनुमित्यनात्मक एव शाब्दबोधः स्वीकार्यः । तत्र वह्निव्याप्याभाववान् वह्निव्याप्यवान् इति परामर्शस्य आहार्यत्वनियमेन अनुमित्यसंभवात् इति शब्दस्य प्रमाणान्तरता इति । एतत्सूचनाय ''दिक्'' इत्युक्तम् ।।

एवं सदृशपिण्डदर्शनादिना यत्र ''गवयो गवयपदवाच्यः'' इत्यादिज्ञानं जातं, तदनन्तरम् उपमिनोमि, न तु अनुमिनोमि इत्यनुव्यवसायादिबलात् उपमानमपि प्रमाणान्तरम् इति सुबोधिन्यां विशेषाः ।।

।। अनुमानत्रैविध्यनिरूपणम् ।।

कारिकावली

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः ।
द्वैविध्यं तु भवेत् व्याप्तेरन्वयव्यतिरेकतः ।। १४१ ।।

मुक्तावली

अनुमानं हि त्रिविधम् – केवलान्वयि–केवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् ।

तत्र असद्विपक्षः केवलान्वयी । यथा ''घटः अभिधेयः, प्रमेयत्वात्'' इत्यादौ । तत्र हि सर्वस्यैव अभिधेयत्वात् विपक्षासत्त्वम् ।।

असत्सपक्षः केवलव्यतिरेकी । यथा ''पृथिवी इतरेभ्यः भिद्यते, गन्धवत्त्वात्'' इत्यादौ । तत्र हि जलादित्रयोदशभेदस्य पूर्वम् अनिश्चिततया निश्चितसाध्यवतः सपक्षस्य अभावात् ।।

सत्सपक्षविपक्षः अन्वयव्यतिरेकी । यथा ''वन्हिमान् धूमात्'' इत्यादौ । तत्र सपक्षस्य महानसादेः विपक्षस्य जलह्रदादेः सत्त्वात् इति ।।

दिनकरी

तत्र – तेषु मध्ये । असद्विपक्ष इति । अत्यन्ताभावाप्रतियोगिसाध्यक इत्यर्थः । यथाश्रुते सिद्ध्यसिद्धिव्याघातात् । अत्यन्ताभावाप्रतियोगित्वस्य च प्रमेयत्वादौ सत्त्वात् लक्षणसमन्वयः ।।

न च – एतत् न संभवति । प्रमाविषयत्वरूपस्य तस्य नानात्वेन अननुगमात् इति – वाच्यम् । प्रमात्वस्यैव परंपरासंबन्धेन अनुगतत्वात् । इत्थं च प्रेमयत्वादेः व्यतिरेकित्वसंभवेऽपि केवलान्वयित्वमेव इति मन्तव्यम् ।।

असत्सपक्ष इति । सिद्ध्यसिद्धिव्याघातात् अत्रापि **अगृहीतहेतुसहचारं** यत् व्यतिरेकिसाध्यं तत्कत्वम् अर्थो बोध्यः ।।

सत्सपक्ष इति । गृहीतान्वयव्यतिरेकिसाध्यकम् इत्यर्थः ।।

राजीवोल्लासः

अन्वयिव्यतिरेकत इति । अभेदार्थकतृतीयान्तात् तसिः । अन्वयव्यतिरेकपदे च व्याप्तिविशेषयोः परिभाषिते । भावप्रधानश्च निर्देशः । तथा च अन्वयत्वव्यतिरेकत्वाभिन्नविधाद्वयं व्याप्तेः इत्यर्थः इति **केचित्** ।।

परे तु ज्ञानज्ञाप्यार्थकपञ्चम्याः तसिः, तसिल् वा । अन्वयः साध्यहेत्वोः सहचारः, व्यतिरेकः साध्याभावहेत्वभावयोः सहचारः, तज्ज्ञानज्ञाप्यं द्वैविध्यम् इत्यर्थः । अत एव ''**व्यतिरेकादिहोच्यते**'' इति अग्रिमग्रसङ्गतिः इत्याहुः ।।

प्रथमकल्पे ''**व्यतिरेक इहोच्यते**'' इति पाठः इत्यवसेयम् - इति **सुबोधिनीकाराः** ।।

अत्यन्ताभावाप्रतियोगि इति । यदि गगनाभावकपिसंयोगाभावादेः केवलान्वयित्वम् अभिमतं, तदा निरवच्छिन्नवृत्तिमत्त्वम् अत्यन्ताभावे विशेषणं देयम् । गगनाभावस्य गगनात्मकाभावप्रतियोगित्वे गगनस्य वृत्तिमत्त्वं नास्ति इति वृत्तिमान् योऽत्यन्ताभावः घटाद्यभावः तदप्रतियोगित्वं गगनाभावे अस्ति इति तस्य केवलान्वयित्वोपपत्तिः । संयोगात्मकाभावस्य वृत्तिमत्त्वेऽपि निरवच्छिन्नवृत्तिमत्त्वं नास्ति इति निरवच्छिन्नवृत्तिकः घटाद्यभावः तदप्रतियोगित्वं संयोगाभावे अस्ति इति समन्वयः । **यथाश्रुत** इति । **असद्विपक्षः केवलान्वयी** इत्यत्र मूले असन् विपक्षः यस्य इति विग्रहे समासे च यदि विपक्षः प्रसिद्धः तदा न असत्त्वम्, यदि अप्रसिद्धः तदा भानमेव असंभवि इति व्याघातः ।

न च – सन् विपक्षः यस्य इति प्रथमं विग्रहः । तथा च यद्धेतुकसाध्याभाववान् अस्ति स इत्यर्थः । व्यतिरेकिसाध्यक इति यावत् । स न भवति इति असद्विपक्ष इत्यर्थः अस्तु इति– वाच्यम् । द्रव्यत्वादीनां व्यतिरेकिसाध्यकत्वसंभवात् ''अभिधेयः द्रव्यत्वात्'' इत्यादौ केवलान्वयित्वानुपपत्तेः । अतः सत्पदस्य अत्यन्ताभावप्रतियोगिनि लक्षणा । विपक्षपदस्य च साध्ये लक्षणा । इत्थं च असन् विपक्षो यस्य इति विग्रहात् यदीयसाध्यम् अत्यन्ताभावाप्रतियोगि इति लभ्यते । समासाच्च अत्यन्ताभावाप्रतियोगिसाध्यक इति च इत्यवधेयम् । **प्रमेयत्वादौ** इति । इदं च ''यथा घटः प्रमेयः अभिधेयत्वात्'' इत्यादौ । तत्र हि सर्वस्यैव प्रमेयत्वात् विपक्षासत्त्वम् इति **मुक्तावलीपाठः** इति मत्वा उक्तम् । **चिन्तामणावपि** प्रकरणेऽस्मिन् प्रमेयत्वस्यैव साध्यता दर्शिता इति अवसेयम् इति **सुबोधिनीकाराः** । **अननुगमात्** इति । सर्ववस्तुवृत्तित्वाभावात् इत्यर्थः । **प्रमात्वस्यैव** इति । तथा च स्वाश्रयनिरूपितविषयत्वसंबन्धेन प्रमात्ववत्त्वं प्रमेयत्वम् इति भावः । **इत्थं च** इति । प्रमेयत्वस्य उक्तरूपत्वे च इत्यर्थः । **व्यतिरेकित्वसंभवेऽपि** इति । प्रमाविषयत्वरूपस्य प्रमेयत्वस्य अत्यन्ताभावप्रतियोगित्वसंभवेऽपीत्यर्थः । **केवलान्वयित्वमेव** इति । प्रमात्वरूपस्य तस्य इत्यादिः । **अगृहीतहेतुसहचारम्** इति । अगृहीतः हेतुसहचारः हेतुसामानाधिकरण्यं यस्य तत् असत् इति विग्रहः । तादृशं व्यतिरेकिसाध्यं यस्य सः असत्सपक्ष इति यावत् । न तु असद्धेतुसहचारं, तादृशस्य सद्धेतोः अप्रसिद्धेः । ''अभिधेयः प्रमेयत्वात्'' इत्यादावपि अन्वयसहचारग्रहे व्यतिरेकसहचारभ्रमाधीनानुमितिदर्शनात् अतिव्याप्तिः इत्यतः व्यतिरेकित्वेन साध्यं विशेषितम् । **गृहीतान्वयव्यतिरेकि** इति । गृहीतान्वयं यत् व्यतिरेकि साध्यम् इति विग्रहः । एतावता यस्य अत्यन्ताभावप्रतियोगिनः साध्यस्य हेतुसामानाधिकरण्यं

न गृहीतं तादृशसाध्यकः हेतुः केवलव्यतिरेकी। एवं यस्य अत्यन्ताभावप्रतियोगिनः साध्यस्य हेतुसामानाधिकरण्यं गृहीतं तादृशसाध्यकः हेतुः अन्वयव्यतिरेकी इति फलितम् । हेतुसामानाधिकरण्यग्रहाविषयीभूतव्यतिरेकि (अत्यन्ताभावप्रतियोगि) साध्यकः हेतुः केवलव्यतिरेकी। हेतुसामानाधिकरण्यग्रहविषयीभूतव्यतिरेकिसाध्यकः हेतुः अन्वयव्यतिरेकी इति यावत् ।।

।। व्यतिरेकव्याप्तिनिरूपणम् ।।

कारिकावली

अन्वयव्याप्तिरुक्तैव (व्यतिरेक) (व्यतिरेकात्) इहोच्यते ।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ।। १४३ ।।

मुक्तावली

तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणम्, तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति – **साध्याभाव** इति । साध्याभावव्यापकीभूताभावप्रतियोगित्वम् इत्यर्थः ।।

अत्र इदं बोध्यम् – **यत्संबन्धेन यदवच्छिन्नं प्रति येन संबन्धेन येन रूपेण** व्यापकता गृह्यते, तत्संबन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्ता-ज्ञानात् तत्संबन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिः इति ।।

इत्थं च यत्र विशेषणतासंबन्धेन इतरत्वव्यापकत्वं गन्धात्यन्ताभावे गृह्यते, तत्र गन्धाभावाभावेन इतरत्वात्यन्ताभावः सिद्ध्यति ।।

यत्र तादात्म्यसंबन्धेन (इतरव्याप्यता) (इतरव्यापकता)गन्धाभावस्य गृह्यते, तत्र तु तादात्म्यसंबन्धेन इतरस्य अभावः सिद्ध्यति, स एव अन्योन्याभावः ।।

एवं यत्र संयोगसंबन्धेन धूमं प्रति संयोगसंबन्धेन वन्हेः व्यापकता गृह्यते, तत्र **संयोगसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन** जलह्रदे संयोगसंबन्धावच्छिन्न–प्रतियोगिताकधूमाभावः सिद्ध्यति । **अत्र च** व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम् ।

दिनकरी

यत्संबन्धेन यदवच्छिन्नं प्रति इति । यत्संबन्धावच्छिन्नयद्रूपावच्छिन्न-व्याप्यतानिरूपितव्यापकता गृह्यते इत्यर्थः । **इतरव्याप्यता** इति । इतरस्य व्याप्यता इत्यर्थः । ''तादात्म्येन इतरव्यापकता'' इति पाठे तादात्म्यसं-बन्धावच्छिन्ना या इतरनिष्ठा व्याप्यता तन्निरूपितव्यापकता इत्यर्थः । **तादात्म्यसंबन्धेन** इति । तादात्म्यसंबन्धावच्छिन्नप्रतियोगिकाभावः सिद्ध्यति इत्यर्थः । येन संबन्धेन व्याप्यता गृह्यते इत्यनुक्तौ तु तादात्म्येन इतरस्य व्याप्यता यत्र गृहीता तत्र इतरात्यन्ताभावस्य सिद्धिः स्यात् इति भावः ।

संयोगसंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभावेन इति सावधारणम् । तेन संबन्धान्तरावच्छिन्नप्रतियोगिताकेन न तत्सिद्धिः इत्यर्थः । अनेन च येन संबन्धेन व्यापकता गृह्यते इत्यस्य फलं सूचितम् । प्रदर्शितरीत्यैव ''येन रूपेण'' ''यदवच्छिन्न'' इत्यनयोरपि प्रयोजनम् ऊह्यम् ।

ननु साध्यसधनसहचारज्ञानाभावात् कथं व्यतिरेकव्याप्तिज्ञानम् इति, अत आह – **अत्र च** इति । तथा च व्यतिरेकसहचारेणैव व्यतिरेकव्याप्तिग्रहात् न अन्वयसहचारग्रहापेक्षा इति भावः ।

ननु साध्यप्रसिद्धिं विना तदभावाज्ञाने व्यतिरेकव्याप्तेः दुर्ग्रहत्वं स्यात् । साध्यप्रसिद्धौ च सिद्धसाधनम् इति चेत्, न । साध्यस्य घटादावेव प्रत्यक्षसिद्धत्वात् ''पृथिवी इतरभिन्ना'' इति उद्देश्यप्रतीतेः असिद्धत्वात् न सिद्धसाधनम् ।

पक्षतावच्छेदकनानात्वे एव अंशतः सिद्धसाधनस्य दोषत्वात् । अत एव "अनित्ये वाङ्मनसे" इत्यत्र "अनित्या वाक्" इति बुद्धेः उद्देश्यायाः सिद्धत्वे नांशतः सिद्धसाधनम् इति ।

ननु तथापि घटः **कथं पक्षः?** साध्यस्य निश्चयेन तत्सन्देहसिषाधयिषयोः अभावात् इति चेत्, न । "सर्वा पृथिवी इतरभिन्ना न वा" इति संशयस्य तत्प्रकारकसिषाधयिषायाश्च **घटविषयत्वात् घटत्वेन विशेषदर्शने** सिद्धौ वा **तेन रूपेण** संशयसिषाधयिषे न भवतः, पृथिवीत्वेन तु भवतः एव इति ।

ननु "पृथिवी इतरभिन्ना, पृथिवीत्वात्, घटवत्" इति **अन्वयिनैव** इतरभेदसिद्धौ व्यतिरेकिवैयर्थ्यम् इति चेत्, न । अन्वयव्याप्तेः अग्रहे व्यतिरेकव्याप्ति-**स्फूर्तिदशायां व्यतिरेक्यनुमितिजननसंभवेन** व्यतिरेक्यनुमानप्रवृत्तेः निष्प्रत्यूहत्वात् ॥

राजीवोल्लासः

ननु एवं गन्धवत्त्वादिना हेतुना पृथिव्यां कदाचित् पृथिवीतरत्वात्यन्ताभावः, कदाचित् पृथिवीतरभेदः सिध्यति इत्यत्र नियामकदौर्लभ्यम् । एवं "पृथिवी इतरेभ्यो भिद्यते" इत्यादौ साध्यस्य अनुमितेः पूर्वम् अप्रसिद्ध्या साध्याभावत्वेन तदभावोऽपि अप्रसिद्ध इति व्याप्तिग्रहासंभवश्च इति, अत आह **मुक्तावल्यां – अत्र इदं बोध्यम्** इति । **येन रूपेण** इति । इदं तन्त्रेण व्यापकतायां ग्रहे च अन्वेति। एवं च यद्धर्मावच्छिन्नधर्मिकं यद्धर्मावच्छिन्नव्यापकताज्ञानम् इत्यर्थः लभ्यते। व्यापकतायां यद्धर्मावच्छिन्नत्वनिवेशेन वह्नौ द्रव्यत्वेन व्यापकताज्ञानात् वह्नित्वावच्छिन्नाभाववत्ताज्ञानसहितात् न धूमाभावसिद्धिप्रसङ्गः । ग्रहे यद्धर्मावच्छिन्नधर्मिकत्वनिवेशेन च निर्धर्मितावच्छेदककात् वह्नित्वान्यधर्मितावच्छेदककाद्वा वह्नित्वेन व्यापकताग्रहात् तथाविधात् न उक्तापत्तिः । **गृह्यत** इत्यादि । अत्र च तद्धर्मावच्छिन्नधर्मिकतद्धर्मावच्छिन्नव्यापकताज्ञानं तद्धर्मा-

वच्छिन्नाभाववत्ताज्ञानं च अनुमितिजनकम् । विशिष्टपरामर्शस्यैव अनुमितिहेतुत्वम् इति **नैयायिकाभिमतनियमश्च** अन्वयिसाध्यके इत्याशयः । तादृशनियमस्य सार्वत्रिकत्वे व्यापकतावच्छेदकत्वविशिष्टतद्रूपावच्छिन्न-प्रतियोगिताकाभाववत्ताज्ञानं हेतुः इत्यवसेयम् इति **सुबोधिनीकाराः** ।।

दिनकर्यां यत्संबन्धावच्छिन्न इत्यादि । **सुबोधिन्यनुसारेण** पूर्वं व्यापकतायां यद्धर्मावच्छिन्नत्वं ग्रहे यद्धर्मावच्छिन्नधर्मिकत्वं च निवेशितम्। इदानीं व्याप्यतायां यद्धर्मावच्छिन्नत्वं यत्संबन्धावच्छिन्नत्वं च निवेशितम् । **मूललभ्योऽयमप्यंशः** संयोजनीयः । एवं च सति यत्संबन्धावच्छिन्नयद्धर्मावच्छिन्नव्याप्यतानिरूपितयद्धर्मा-वच्छिन्नधर्मिकयत्संबन्धावच्छिन्नयद्धर्मावच्छिन्नव्यापकताज्ञानं तद्धर्मावच्छिन्नाभाव-वत्ताज्ञानं च अनुमितिहेतुः इति लभ्यते । तथा च संयोगसंबन्धेन धूमत्वावच्छिन्नं प्रति संयोगेन वह्नित्वावच्छिन्नः व्यापकः इति ज्ञानं ''वह्नित्वावच्छिन्न-प्रतियोगिताकाभाववांश्च ह्रदः'' इति ज्ञानसहितं ''ह्रदो धूमाभाववान्'' इत्यनुमितौ कारणम् इति फलितम् । एवं ''स्वरूपसंबन्धेन इतरत्वं प्रति स्वरूपसंबन्धेन गन्धाभावो व्यापकः'' इति ज्ञानं ''गन्धाभावाभाववान्'' इति ज्ञानसहितं पृथिव्याम् इतरत्वात्यन्ताभावानुमितौ कारणम् । ''तादात्म्येन इतरं प्रति स्वरूपसंबन्धेन गन्धाभावः व्यापकः'' इति ज्ञानं पृथिव्याम् इतरनिष्ठतादात्म्यसं-बन्धावच्छिन्नप्रतियोगिताकाभावानुमितौ – इतरभेदानुमितौ कारणम् इति अवधेयम् । **इतरव्याप्यता** इति । इतरनिष्ठा व्याप्यता इत्यर्थः ।।

प्रयोजनम् ऊह्यम् इति । इतरत्वेन इतरस्य व्याप्यताग्रहे जलत्वाद्य-वच्छिन्नभेदत्वादिना न साध्यसिद्धिः । एवं गन्धाभावत्वेन व्यापकताग्रहे घ्राणग्राह्यगुणत्वादिना न हेतुता इति तत्प्रयोजनम् ऊह्यम् ।।

अन्ये तु वह्निं प्रति द्रव्यत्वेन धूमस्य यत्र व्यापकता गृह्यते तत्र धूमत्वावच्छिन्नाभावेन वह्न्यभावस्य, एवं यत्र धूमत्वेन धूमं प्रति वह्नेर्व्यापकता

गृहीता तत्र वह्न्यभावेन द्रव्यत्वावच्छिन्नाभावस्य च सिद्धिप्रसङ्ग इति भावः – इत्याहुः ।।

उद्देश्यप्रतीतेः इति । अभिमतायाः पृथिवीत्वावच्छिन्ने इतरभेदानुमितेः इत्यर्थः । अयं भावः – एकधर्मितावच्छेदककसिद्धेः अपरधर्मितावच्छेदककबुद्धौ न प्रतिबन्धकत्वम् । अन्यथा ''धूमवान् वह्निमान्'' इति सहचारज्ञानकाले ''पर्वतो वह्निमान्'' इत्यनुमितेः अनुभवसिद्धायाः अपलापापत्तेः । धूमवत्त्वेन पर्वते वह्नेः सहचारग्रहकाले निश्चयात् । प्रकृते च प्रत्यक्षं घटत्वधर्मितावच्छेदककम्, अनुमितिस्तु पृथिवीत्वधर्मितावच्छेदकिका इति न सिद्धसाधनं दोष इति भावः ।।

ननु भिन्नधर्मितावच्छेदककानुमितौ सिद्धेः अप्रतिबन्धकत्वे ''अनित्या वाक्'' इत्यंशतः सिद्धेः ''अनित्ये वाङ्मनसे'' इति मनस्त्वावच्छेदेन अनित्यत्वानुमितौ प्रतिबन्धकत्वाभावात् ''अंशतः सिद्धसाधनं दोषः'' इति प्रवादस्य का गतिः इत्याशङ्कां परिहरति – **पक्षतावच्छेदकनानात्व** इति । यत्र पक्षतावच्छेदकं नाना, यथा अनित्ये वाङ्मनसे इत्यत्र वाक्त्वं मनस्त्वं च, तत्रैव अंशतः सिद्धसाधनं दोषः । तथा च तद्धर्मितावच्छेदककसिद्धेः तद्धर्मितावच्छेदककानुमितिं प्रत्येव प्रतिबन्धकत्वम् इति नियमः । वाक्त्वधर्मितावच्छेदककोक्तानुमितिं प्रति वाक्त्वधर्मितावच्छेदककसिद्धेः ''वाक् अनित्या'' इत्याकारायाः प्रतिबन्धकत्वम् । प्रकृते घटत्वधर्मितावच्छेदककेतरभेदप्रत्यक्षस्य न पृथिवीत्वधर्मितावच्छेदककेतरभेदानुमितिं प्रति प्रतिबन्धकत्वम् इति भावः ।।

कथं पक्ष इति । पृथिवीत्वावच्छिन्नस्य पक्षत्वे तदन्तर्गतघटस्यापि पक्षत्वावश्यकतया कथं स पक्षः साध्यसंदेहविशेष्यः, साध्यस्य तत्र निश्चयात्

इति भावः । **घटविषयत्वात्** इति । घटविषयकत्वेन, घटस्य पक्षत्वसंभवात् इति भावः । घटविषयकसिद्धिसत्त्वे कथं तद्विषयकसंशयसिषाधयिषे स्याताम् इति, अत आह – **घटत्वेन** इति । **घटत्वेन विशेषदर्शने** इति । घटत्वावच्छिन्नविशेष्यकेतरभेदव्याप्यप्रकारकदर्शने इत्यर्थः । विशेषदर्शने सति संशयः न भवति, सिद्धौ सत्यां सिषाधयिषा न भवति इति विवेकः । **तेन रूपेण** घटत्वेन रूपेण ।।

अन्वयिनैव इति । घटे साध्यहेत्वोः साहचर्यदर्शनात् इति भावः । **स्फूर्तिदशायां** ज्ञानदशायाम् । **व्यतिरेक्यनुमिति** इति । व्यतिरेकव्याप्तिज्ञानाधीनानुमितिः इत्यर्थः ।।

मुक्तावली

केचित्तु – व्यतिरेकसहचारेण अन्वयव्याप्तिरेव गृह्यते, न तु व्यतिरेकव्याप्तिज्ञानमपि कारणम् । यत्र व्यतिरेकसहचारात् व्याप्तिग्रहः तत्र व्यतिरेकी इत्युच्यते । साध्यप्रसिद्धिस्तु घटादावेव जाता, पश्चात् पृथिवीत्वावच्छेदेन साध्यते इति – वदन्ति ।।

दिनकरी

आचार्यमतम् आह – **केचित्तु** इति । **व्यतिरेकसहचारेण** – अन्वयसहचारनिरपेक्षव्यतिरेकसहचारेण । **अन्वयव्याप्तिरेव** इति ''एव'' कारेण व्यतिरेकव्याप्तेः व्युदासः ।।

ननु एवं व्यतिरेकव्याप्तिज्ञानरूपकारणाभावात् कथं व्यतिरेक्यनुमितिः? अत आह – **न तु** इति । **व्यतिरेकव्याप्तिज्ञानम्** इत्यस्य ''अनुमितौ'' इत्यादिः ।।

ननु अन्वयव्याप्तिज्ञानस्यैव हेतुत्वे कथं व्यतिरेकी इति व्यवहारः? इति, अत आह – **यत्र** इति ।।

ननु "पृथिवी इतरेभ्यः भिद्यते, पृथिवीत्वात्" इत्यादौ साध्यस्य इतरभेदादेः अप्रसिद्धत्वात् कथं (व्यतिरेकसहचारग्रहः) [अन्वयव्याप्तिग्रहः] इति, अत आह – **साध्यप्रसिद्धिस्तु** इति ।।

ननु घटादौ साध्ये निर्णीते कथं तत्र इतरभेदानुमितिः, अत आह – **पश्चात्** इति । **अवच्छेदकावच्छेदेन** अनुमितौ सामानाधिकरण्येन साध्यसिद्धेः अप्रतिबन्धकत्वात् इति भावः ।।

अत्र च अन्वयव्याप्तिघटकतावत्पदार्थज्ञानादेव अन्वयव्याप्तिज्ञानोत्पत्तौ **व्यतिरेकसहचारज्ञानस्य तद्धेतुत्वे** मानाभावः ।।

न च – व्यतिरेकसहचारेण इत्यत्र प्रयोजकत्वं तृतीयार्थः । तच्च न अनुपपन्नम् । अन्वयव्याप्तिज्ञानप्रतिबन्धकव्यभिचारशङ्कानिरासद्वारा व्यतिरेकसहचार-ज्ञानस्य तत्र प्रयोजकत्वात् इति – वाच्यम् । **व्यतिरेकसहचारग्रहेऽपि** अधिकरणान्तरे व्यभिचारशङ्कातादवस्थ्यात् । तदधिकरणीयव्यभिचारशङ्कानिरासद्वारा तत्र तस्य उपयोगित्वम् इत्यपि न । तदधिकरणे साधनाभावग्रहमात्रेणैव तदधिकरणीयव्यभिचारशङ्कानिवृत्तेः इति अस्वरसः **वदन्ति** इत्यनेन सूचितः ।।

राजीवोल्लासः

अवच्छेदकावच्छेदेन इति । पृथिवीत्वाश्रये सर्वत्र इतरभेदविधेयकानुमितिं प्रति पृथिवीत्वाश्रये घटे इतरभेदरूपसाध्यनिश्चयस्य अप्रतिबन्धकत्वात् इत्यर्थः ।।

आचार्यमतेऽस्वारस्यम् आह – **अत्र च** इत्यादिना । **अन्वयव्याप्तिघटक** इति । हेतुव्यापकसाध्यसामानाधिकरण्यरूपान्वयव्याप्तिघटकानां पदार्थानां ज्ञानादेव

इत्यर्थः । **व्यतिरेकसहचारज्ञानस्य** – साध्याभावहेत्वभावयोः साहचर्यज्ञानस्य । **तद्धेतुत्वे** – अन्वयव्याप्तिज्ञानहेतुत्वे । न च इति । साध्याभाववति हेतुः इति व्यभिचारशङ्कां प्रति साध्याभाववति हेत्वभाव इति व्यतिरेकसहचारज्ञानं प्रतिबन्धकम् । व्यभिचारशङ्का च अन्वयव्याप्तिज्ञानप्रतिबन्धिका । तथा च व्यतिरेकसहचारग्रहे व्यभिचारशङ्कायां निवृत्तायां अन्वयव्याप्तिज्ञानं जायत इति व्यतिरेकसहचारज्ञानस्य व्यभिचारशङ्कानिवर्तनद्वारा अन्वयव्याप्तिज्ञानहेतुत्वात् प्रयोजकत्वम् इति भावः । **व्यतिरेकसहचारग्रहेऽपि** इति । कस्मिंश्चिदधिकरणे साध्याभावहेत्वभावयोः साहचर्यग्रहेऽपि अन्यस्मिन् अधिकरणे व्यभिचारशङ्का तिष्ठत्येव । न च– यस्मिन् अधिकरणे तयोः साहचर्यं गृह्यते तदधिकरणे साध्यव्यभिचारशङ्कानिवृत्तिद्वारा तयोः साहचर्यग्रहस्य अन्वयव्याप्तिज्ञानहेतुत्वम् इति– वाच्यम् । "अधिकरणविशेषः साधनाभाववान्" इति ग्रह एव आवश्यकः । न तु साध्याभावमपि तत्र विषयीकृत्य साध्याभावहेत्वभावयोः सामानाधिकरण्यावगाही ग्रहः । तथा च व्यतिरेकसहचारग्रहस्य न अन्वयव्याप्तिज्ञानं प्रति हेतुत्वम् इति भावः ॥

॥ अर्थापत्तेः प्रमाणान्तरत्वनिरासः ॥

कारिकावली

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्थता हि सा यतः ॥ १४४ ॥

मुक्तावली

अर्थापत्तिः इति । अर्थापत्तिं प्रमाणान्तरं केचन मन्यन्ते । तथा हि – यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रात् अवगतम्, जीविनः गृहासत्त्वं च

प्रत्यक्षात् अवगतम्, तत्र शतवर्षजीवित्वान्यथानुपपत्त्या बहिःसत्त्वं कल्प्यते इति । तदपि अनुमानेन गतार्थत्वात् नेष्यते । तथा हि – यत्र जीवित्वस्य बहिः-सत्त्वगृहसत्त्वान्यतरव्याप्यत्वं गृहीतं, तत्र अन्यतरसिद्धौ जायमानायां गृहसत्त्वबाधात् बहिःसत्त्वम् अनुमितौ भासते ।।

एवं ''पीनो देवदत्तः दिवा न भुङ्क्ते'' इत्यादौ पीनत्वस्य भोजनव्याप्य-त्वावगमात् भोजनसिद्धौ दिवाभोजनबाधे रात्रिभोजनं सिद्ध्यति इति ।।

अभावप्रत्यक्षस्य आनुभविकत्वात् अनुपलम्भोऽपि न प्रमाणान्तरम् । किंच अनुपलम्भस्य अज्ञातस्य हेतुत्वे ज्ञानाकरणकत्वात् प्रत्यक्षत्वम्, ज्ञातस्य हेतुत्वे तु तत्रापि अनुपलम्भान्तरापेक्षा इति अनवस्था ।।

एवं चेष्टापि न प्रमाणान्तरम् । तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वात् शब्दे एव अन्तर्भावात् । यत्र व्याप्त्यादिग्रहः तत्र अनुमितिरेव इति ।।

दिनकरी

केचन मीमांसकाः । **तदपि** – अर्थापत्तेः प्रमाणान्तरत्वमपि । **दिवा न भुङ्क्ते इत्यादौ** इति ''**आदि**'' ना ''मयूरः पर्वतेतरस्मिन् न नृत्यति, नृत्यति च'' इत्यस्य संग्रहः ।।

ननु एतद्वाक्यात् ''मयूरः पर्वते नृत्यति'' इति ज्ञानम् उत्पद्यते, न तु एतद्व्यतिरेकिणः संभवति, पर्वतनृत्यस्य साध्यस्य अप्रसिद्धौ व्यतिरेकव्याप्त्यनिरूपणात् इति कथं न अर्थापत्तिः प्रमाणान्तरम् इति चेत्, न । ''**मयूरनृत्यं** पर्वताधिकरणकम्, पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात्, पर्वतत्ववत्'' इति अन्वयव्यतिरेकिणैव पर्वताधिकरणकमयूरनृत्यज्ञानसंभवात् ।।

राजीवोल्लासः

मुक्तावल्याम् अर्थापत्तिम् इति । अर्थस्य आपत्तिः कल्पनं यस्याः इति व्युत्पत्त्या अर्थकल्पकानुपपत्तिप्रतिसन्धानम् उच्यते । तदेव करणम् । अर्थस्य आपत्तिः इति तत्पुरुषाश्रयणेन प्रमितिरपि तेनैव पदेन व्यवह्रियते। **तथा हि** इति । ''यो यो बहिःसत्त्वगृहसत्त्वान्यतराभाववान्, स न जीवी, यथा घटत्वादिः'' इति व्याप्तिग्रहाकारः । यद्यपि ''यो यो जीवी स दर्शितान्यतरवान् यथा अहम्'' इत्यन्वयिनापि अभिमतसिद्धिसंभवात् व्यतिरेकव्याप्तिबुद्ध्या चरितार्थत्वकथनम् अनावश्यकम्, तथापि ''जीविनः गृहासत्त्वं बहिस्सत्त्वं विना अनुपपन्नम्'' इति मीमांसकाभिमतम् अनुपपत्तिप्रतिसन्धानं जीवित्वविशिष्टगृहासत्त्वा-भावे बहिस्सत्त्वाभावव्यापकत्वग्रहाधीनम् इति तन्मते व्यतिरेकव्याप्तिज्ञानरूपानुमितिसामग्रीनैयत्यसूचनार्थत्वात् न **मूलोक्तेः** स्वारस्यभङ्गः । **मुक्तावल्यां** तु हेतोः अन्वयव्यतिरेकित्वं संभवति इति बोधयितुम् एवम् उक्तम्। अत एवादौ ''अनुमानेन'' इति सामान्यरूपेण गतार्थत्वं प्रदर्शितम् ।।

श्रुतार्थापत्तेः गतार्थताम् अभिधाय दृष्टार्थापत्तेरपि तां दर्शयति – **एवं पीन** इति ।।

ननु कल्प्यमानार्थस्य बहिःसत्त्वादेः यत्र प्रसिद्धिः तत्र अनुमानेन निर्वाहेऽपि तस्य अप्रसिद्धत्वे विना अर्थापत्तिं न निर्वाह इत्याक्षेपं समाधातुं तादृशस्थलम् ''आदि''शब्दार्थतया दर्शयति **दिनकर्यां** – **इत्यादौ** इति''आदि''ना । **मयूरः** इत्यादि । ''मयूरः पर्वतेतरस्मिन् न नृत्यति, परं तु नृत्यति'' इत्यत्र मयूर-कर्तृकपर्वतेतराधिकरणकनर्तनाभावसहकृतं मयूरकर्तृकं नर्तनं पर्वताधिकरणकत्वं विना अनुपपन्नं मयूरकर्तृकनर्तने पर्वताधिकरणकत्वं कल्पयति । अत्र ''मयूरः पर्वते नृत्यति, पर्वतान्यस्मिन् नृत्यत्त्वाभावे सति नृत्यत्त्वात्'' इत्यनु-मानाकारः ।।

तत्र शङ्कते – ननु एतद्वाक्यात् इति । एतदनुमानात् पूर्वं पर्वते नृत्यरूपस्य साध्यस्य अप्रसिद्धेः, साध्याभावघटितव्यतिरेकव्याप्तिग्रहासंभवात् न व्यतिरेक्यनुमानेन गतार्थता अर्थापत्तेः इति शङ्का । समाधत्ते – मयूरनृत्यम् इति । पर्वताधिकरणकत्वं पर्वतत्वे प्रसिद्धम् । अत्र अन्वयव्याप्तिरपि संभवति । दृष्टान्ते पर्वतत्वे साध्यहेत्वोः साहचर्यग्रहात् । व्यतिरेकव्याप्तिरपि संभवति । यत्र साध्याभावः पर्वताधिकरणकत्वाभावः तत्र पर्वतेतरानधिकरणत्वे सति साधिकरणत्वाभावः इति । न च– तथापि पर्वतनृत्यप्रकारकप्रतीतिः अर्थापत्त्यैव इति– वाच्यम् । पर्वतनृत्यस्य अप्रसिद्धत्वात् । ''पर्वतनृत्यं विना अनुपपन्नम्'' इति अनुपपत्तिप्रतिसन्धानरूपकारणस्य मीमांसकमतेऽपि असंभवात् पर्वतनृत्यप्रकारकप्रतीतेः तैरपि स्वीकर्तुम् अशक्यत्वात् इति ॥

॥ सुखदुःखनिरूपणम् ॥

कारिकावली

सुखं तु जगतामेव काम्यं धर्मेण जायते ।
अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् ॥ १४५ ॥

मुक्तावली

सुखं निरूपयति – सुखं तु इति । काम्यम् – अभिलाषविषयः । धर्मेण इति । धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः ॥

दुःखं निरूपयति – अधर्म इति । अधर्मत्वेन दुःखत्वेन कार्यकारणभाव इत्यर्थः । प्रतिकूलम् इति । दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः ॥

दिनकरी

धर्मत्वेन इति । इदं च प्राचां मतेन उक्तम् । नवीनमते तु ''नित्यं विज्ञानम् आनन्दं ब्रह्म'' इति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं सुखत्वावान्तरजातिर्वा इति बोध्यम् ।।

राजीवोल्लासः

मुक्तावल्याम् स्वाभाविकद्वेषविषय इति । इतरद्वेषानधीनद्वेषविषय इत्यर्थः ।।

।। इच्छानिरूपणम् ।।

कारिकावली

निर्दुःखत्वे सुखे च इच्छा तज्ज्ञानादेव जायते ।
इच्छा तु तदुपाये स्यात् इष्टोपायत्वधीर्यदि ।। १४६ ।।
चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत् ।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ।। १४७ ।।

मुक्तावली

इच्छां निरूपयति – निर्दुःखत्व इति । इच्छा द्विविधा – फलविषयिणी उपायविषयिणी च । फलं तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । अत एव पुरुषार्थः संभवति । यद् ज्ञातं सत् स्ववृत्तितया इष्यते, स पुरुषार्थः इति तल्लक्षणात् । इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् ।।

चिकीर्षा इति । कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणी इच्छा चिकीर्षा । ''पाकं कृत्या साधयानि'' इति तदनुभवात् । तद्धेतुः इति । चिकीर्षां प्रति

कृतिसाध्यताज्ञानम् इष्टसाधनताज्ञानं च कारणम् । अत एव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावात् न चिकीर्षा ।।

दिनकरी

तत्र-तयोः मध्ये । अत एव – फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव । पुरुषार्थः संभवति इति । सुखं दुःखाभावश्च पुरुषार्थः संभवति इत्यर्थः । ननु यद् ज्ञातम् इत्यादेः स्वविषयकज्ञानजन्येच्छाविषयत्वम् अर्थः । तथा च उपाये अतिव्याप्तिः । तस्यापि स्वाविषयकेष्टसाधनताज्ञानजन्येच्छाविषयत्वात्, अत आह – इतरेच्छा इति ।।

कृतिसाध्यताज्ञानम् इति । ननु कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण चिकीर्षां प्रति हेतुत्वे मानाभावः । तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनाताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात् कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादेव चिकीर्षायाः संभवात् इति चेत्, न । यत्र कृतिसाध्यपाकत्वेन इष्टसाधनत्वं न गृहीतम्, अपि तु शुद्धपाकत्वेन कृतिसाध्यत्वं शुद्धपाकत्वेन इष्टसाधनत्वं गृहीतम्, तत्रापि पाकगोचरप्रवृत्तेः आनुभविकतया तदनुरोधेन चिकीर्षाया अपि आवश्यकत्वेन तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण हेतुताया आवश्यकत्वात् ।।

अथ कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वादेव वृष्ट्यादौ चिकीर्षानुत्पादात् कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति हेतुत्वे मानाभाव इति चेत्, न । कृतिसाध्यत्वाभावतद्व्याप्यतदवच्छेदकधर्मज्ञानानां प्रतिबन्धकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानस्य हेतुत्वे लाघवात् । इष्टसाधनताज्ञानम् इति । अन्यथा निष्फलत्वज्ञानेऽपि चैत्यवन्दनादौ चिकीर्षापत्तिः इति भावः ।।

अत्र इदं बोध्यम् – पाकविशेष्यकेष्टसाधनताज्ञानस्य कार्यतावच्छेदकं न पाकादिगोचरचिकीर्षात्वम्, कृतिसाध्यत्वप्रकारकत्वनिवेशे प्रयोजनविरहात् "पाको

जायताम्'' इति इच्छायाः असङ्ग्रहापत्तेश्च । किंतु पाकत्वावच्छिन्नमुख्य-विशेष्यकेच्छात्वम् । ''पाकसाध्यं सुखं जायताम्'' इति इच्छायां व्यभिचारवारणाय ''मुख्य'' इति । ''इष्टसाधनता'' इत्यत्र इच्छा स्वरूपसती विशेषणम् । तेन इच्छाज्ञानशून्यकालेऽपि चिकीर्षानिर्वाहः । अत एव – कृतिसाध्यताज्ञानस्य हेतुत्वादेव ।।

राजीवोल्लासः

इतरेच्छा इति । उपाये फलेच्छाधीनेच्छाविषयत्वमेव अस्ति । न तु इतरेच्छानधीनेच्छाविषयत्वम् इति न उपायेऽतिव्याप्तिः ।।

दिनकर्यां कृतिसाध्यत्वाभाव इति । तद्वत्ताबुद्धिं प्रति तदभाववत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानस्य, तदभावधर्मितावच्छेदकतया गृहीतधर्मधर्मिता-वच्छेदककज्ञानस्य च प्रतिबन्धकत्वात् इति भावः । शङ्कासमाधानग्रन्थयोः समुदायार्थः अयम् – ''पाकं कृत्या साधयानि'' इति आकारिकां पाकविशेष्यक-कृतिसाध्यत्वप्रकारिकाम् इच्छां प्रति ''पाकः मत्कृतिसाध्यः'' इत्याकारकस्य पाकविशेष्यककृतिसाध्यत्वप्रकारकज्ञानस्य हेतुत्वे प्रमाणं नास्ति । तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनत्वप्रकारकज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुताया क्लृप्तत्वात् ''पाकः मदिष्टसाधनम्'' इत्याकारकपाकत्वावच्छिन्नविशेष्यक-इष्टसाधनत्वप्रकारकज्ञानादेव पाकचिकीर्षायाः संभवात् इति शङ्का ।।

समाधानं तु – यत्र कृतिसाध्यत्वविशिष्टपाकत्वावच्छिन्ने इष्टसाधनत्वं न ज्ञातम्, अर्थात् ''कृतिसाध्यपाकः मदिष्टसाधनम्'' इत्याकारकज्ञानं न जातम्, अपि तु ''शुद्धपाकः मदिष्टसाधनम्'' इत्याकारकं पाकत्वावच्छिन्नविशेष्यक – इष्टसाधनत्वप्रकारकज्ञानं ''शुद्धपाकः कृतिसाध्यः'' इत्याकारकं पाकत्वावच्छिन्न-विशेष्यककृतिसाध्यत्वप्रकारकज्ञानं च जातम्, अथवा एकत्र द्वयमिति रीत्या

''पाकः कृतिसाध्यः इष्टसाधनं च'' इति ज्ञानं जातम्, तत्रापि पाके प्रवृत्तेः आनुभविकतया तदनुरोधेन चिकीर्षाया अपि आवश्यकतया तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण हेतुत्वम् आवश्यकम् ।।

ननु कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति कारणत्वं किमर्थम् अङ्गीक्रियते इति चिन्तायां कृत्यसाध्ये वृष्ट्यादौ चिकीर्षावारणार्थम् इति वक्तव्यम् । तत्तु कृत्यसाध्यत्वज्ञानस्य प्रतिबन्धकत्वादेव संभवति इति कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति हेतुत्वे मानाभाव इति शङ्कते – **अथ** इति । कृत्यसाध्यताज्ञानस्य चिकीर्षाप्रतिबन्धकत्वे कृत्यसाध्यताज्ञानाभावः चिकीर्षां प्रति कारणम् इति वक्तव्यम् । तत्र च गौरवं स्पष्टम् इति स्थितेऽपि गौरवान्तरम् आह – **कृतिसाध्यत्वाभाव** इति । एतत्तु पूर्वमेव विवृतमिति ।।

अन्यथा इति । इष्टसाधनताज्ञानस्य चिकीर्षां प्रति हेतुत्वाभावे इत्यर्थः । कृतिसाध्यताज्ञानमात्रस्य चिकीर्षां प्रति हेतुत्वे ''चैत्यवन्दनादिकं कृतिसाध्यम्'' इति ज्ञाने ''चैत्यवन्दनादिकं निष्फलम्'' इति ज्ञाने सत्यपि तत्र चिकीर्षा स्यात्। इष्टसाधनताज्ञानस्यापि हेतुत्वे तु निष्फलत्वज्ञानदशायाम् इष्टसाधनत्वज्ञानाभावात् न तत्र चिकीर्षा इति भावः ।।

अत्र इदं बोध्यम् इत्यादि । ''पाकः इष्टसाधनम्'' इत्याकारकस्य पाकविशेष्यक–इष्टसाधनत्वप्रकारकज्ञानस्य पाकविशेष्यक–कृतिसाध्यत्व-प्रकारकेच्छात्वं न कार्यतावच्छेदकम् । कार्यतावच्छेदककुक्षौ कृतिसाध्यत्व-प्रकारकत्वनिवेशे प्रयोजनाभावात् । ''पाको भवतु'' इत्याकारकेच्छाया अपि प्रवृत्तिं प्रति हेतुतया तस्या असंग्रहापत्तेश्च । तस्याः कृतिसाध्यत्वप्रकारकत्वा-भावात् । किं तु पाकत्वावच्छिन्नमुख्यविशेष्यकेच्छात्वं कार्यतावच्छेदकम् । ''पाको भवतु'' इति इच्छायाः ''पाकं कृत्या साधयानि'' इति इच्छायाश्च पाकत्वावच्छिन्नमुख्यविशेष्यकत्वात् उभयोः संग्रहः । मुख्यपदानुपादाने ''पाकसाध्यं

सुखं भवतु'' इति इच्छाया अपि पाकविशेष्यकत्वम् अस्ति, पाकत्वं प्रति पाकस्य विशेष्यत्वात् इति तस्या अपि चिकीर्षां प्रति हेतुत्वं स्यात् । परं तु तस्यां सत्यां चिकीर्षा न जायत इति अन्वयव्यभिचारः स्यात् । तद्वारणाय मुख्यपदम् । तथा सति पाकनिष्ठविषयतायाः पाकत्वनिष्ठप्रकारतानिरूपित-विशेष्यतारूपत्वेऽपि सुखनिष्ठविशेष्यतानिरूपितप्रकारतारूपत्वात् न मुख्यत्वम् । किंचिन्निष्ठप्रकारतानिरूपितायाः किंचिन्निष्ठविशेष्यतानिरूपित-प्रकारतानात्मिकाया एव विषयतायाः मुख्यविशेष्यतारूपत्वात्। तथा च ''पाकसाध्यं सुखं भवतु'' इति इच्छायाः पाकमुख्यविशेष्यकत्वाभावेन चिकीर्षां प्रति कारणत्वमेव नास्ति इति न अन्वयव्यभिचारः इति भावः ।।

स्वरूपसती विशेषणम् इति । ''भोजनं तृप्तिसाधनम्'' इति ज्ञानकालेऽपि यदि तृप्तिरूपफले न इच्छा तदा भोजने प्रवृत्त्यनुदयात् । अतः फलेच्छा विशेषणम् । तथा च यत्साधनताज्ञानं कारणम् तद्विषयकेच्छापि तादृशज्ञान-सहकारिणी । ''स्वरूपसती'' इत्युक्त्या इच्छाविषयकज्ञानस्य न कारणत्वम् । तदाह – तेन इति । ''स्वरूपसती'' इति कथनेन इत्यर्थः । एवं च फलेच्छासहकृतं फलसाधनताज्ञानं कृतिसाध्यताज्ञानं च चिकीर्षां प्रति हेतुः इति सिद्धम् ।।

कारिकावली

बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका ।
तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ।। १४८ ।।

मुक्तावली

बलवत् इति । बलवद्द्विष्टसाधनताज्ञानं तत्र **प्रतिबन्धकम्** । अतः मधुविषसंपृक्तान्नभोजने न चिकीर्षा ।।

बलवद्द्वेषः तत्र प्रतिबन्धकः इति अन्ये । तदहेतुत्व इति । बलवदनिष्टजनकत्वज्ञानं कारणम् इत्यर्थः ।।

दिनकरी

बलवद्द्विष्ट इति । द्विष्टं – द्वेषविषयीभूतम् । द्वेषश्च दुःखे ताद्रूप्येण ज्ञानात् । सर्पादौ तत्साधनताज्ञानात् । द्वेषे बलवत्त्वं जातिविशेषः ।।

प्रतिबन्धकम् इति । ननु बलवद्द्वेषविषयसाधनत्वज्ञानस्य प्रतिबन्धकत्वे चैत्रस्य अगम्यागमनजन्यनरके यदा बलवान् द्वेषः, तदा मैत्रस्य तादृशद्वेषशून्यस्य अगम्यागमने तादृशनरकसाधनत्वज्ञानवतः इच्छाप्रवृत्त्योः अनुपपत्तिः । एवं चैत्रस्य कालान्तरे तादृशद्वेषसत्त्वेऽपि ।।

न च – तत्कालीनतत्पुरुषीयेच्छां प्रति प्रवृत्तिं प्रति च तत्कालीनतत्पुरुषीय-बलवद्द्विष्टजनकत्वज्ञानस्य प्रतिबन्धकत्वं कल्प्यते । यत्पुरुषस्य यदा न क्वापि द्वेषः, तत्कालतत्पुरुषान्तर्भावेण तादृशज्ञानप्रतिबन्धकत्वस्य अकल्पनात्, न तत्र तादृशप्रतिबन्धकाप्रसिद्ध्या तदभावरूपकारणस्य अभावात् प्रवृत्त्यनुपपत्तिः इति – वाच्यम् ।।

यत्पुरुषस्य यदा अगम्यागमनजन्यनरके बलवद्द्वेषः, तदा तत्पुरुषस्य तत्र इच्छानुत्पादात् अगम्यागमनगोचरतत्पुरुषीयतत्कालीनेच्छाया अप्रसिद्ध्या तत्पुरुषतत्कालान्तर्भावेण तादृशकार्यकारणभावस्य अभावेन तत्र तत्पुरुषीयागम्या-गमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्भिक्षापत्तेः इति चेत्, न ।।

तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्वज्ञानस्य तत्र प्रतिबन्धकत्वकल्पनेन उक्तापत्त्यभावात् । तद्धर्मप्रकारकद्वेषानुत्तरतादृशेच्छायां तादृशद्वेषाभावः, तादृशद्वेषोत्तरतद्गोचरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानाभावः कारणम् इति निष्कर्षो बोध्यः ।।

बलवद्द्वेष इति । पाकादिगोचरेच्छायां बलवद्द्वेषविषयसाधनत्वज्ञानजन्यः पाकगोचरः द्वेषः प्रतिबन्धकः । पूर्वोक्तप्रतिबन्धकद्वयकल्पनापेक्षया लाघवात् इति भावः ।।

यत्र च उत्कटसुखोत्कटदुःखजनकत्वम् एकस्मिन् कर्मणि गृहीतम्, तत्र सत्प्रतिपक्षस्थले इव इच्छाद्वेषयोः अनुत्पत्तेः तन्मते तत्र **कार्यकाले** द्वेषाभावस्य सत्त्वेन इच्छोत्पादापत्तिः ।।

न च – **यत्र** बलवद्द्विष्टसाधनत्वज्ञानेन तृतीयक्षणे द्वेषः जनितः, तदुत्तरक्षणे इच्छोत्पादापत्तिः तवापि इति–वाच्यम् । तत्र **इच्छोत्पादस्य** इष्टत्वात् । **क्षणविलम्बस्य** शपथनिर्णेयत्वात् इति **अन्ये** इत्यनेन अस्वरसः सूचितः ।

बलवदनिष्टाजनकत्वज्ञानम् इति । **अत्रापि** तद्धर्मप्रकारकद्वेषोत्तरेच्छायां तद्धर्मावच्छिन्नाजनकत्वज्ञानं कारणम् । तादृशद्वेषानुत्तरेच्छायां तु तद्धर्मप्रकारकद्वेषा-भावः कारणम् इति निष्कर्षो बोध्यः ।।

राजीवोल्लासः

ननु मधुविषसंपृक्तान्नभोजने तृप्तिरूपेष्टसाधनताज्ञानस्य कृतिसाध्यताज्ञानस्य च सद्भावात् चिकीर्षाप्रसङ्ग इति शङ्कायां मूले बलवद्द्विष्टसाधनताज्ञानस्य चिकीर्षां प्रति प्रतिबन्धकत्वात् न तत्र चिकीर्षा इत्युक्तम् । तत्र द्विष्टशब्दार्थम् आह – **द्विष्टं द्वेषविषयीभूतम्** इति । द्वेषविषयश्च दुःखम् । **तादृप्येण** इति । दुःखत्वेन इत्यर्थः । द्वेषे बलवत्त्वं दुर्निरूपम् इति शङ्कां परिहरति – **द्वेषे बलवत्त्वं च** इति ।।

शङ्कते – **ननु बलवद्द्वेष** इत्यादिना । बलवद्द्वेषविषयदुःखसाधनत्वज्ञानं यदि चिकीर्षायां तदधीनप्रवृत्तौ च प्रतिबन्धकं, तदा चैत्रस्य अगम्यस्त्रीगमन-जन्यनरकदुःखे द्वेषसत्त्वे मैत्रस्य तादृशद्वेषाभावेऽपि नरकसाधनत्वज्ञाने सति

इच्छायाः प्रवृत्तेश्च अनुपपत्तिः । चैत्रीयद्वेषविषयत्वस्य नरके सत्त्वेन द्वेषविषयीभूतनरकसाधनत्वज्ञानस्य मैत्रनिष्ठस्यापि इच्छां प्रवृत्तिं च प्रति प्रतिबन्धकत्वात् । एवं चैत्रस्य पूर्वकाले कदाचित् नरके द्वेष आसीत्, इदानीं तु द्वेषो नास्ति, अगम्यागमनं नरकसाधनम् इति ज्ञानं च वर्तते। तथापि नरके द्वेषाभावात् अगम्यागमने चिकीर्षा प्रवृत्तिश्च जायते। ते न स्याताम् । पूर्वकालिकद्वेष-विषयनरकसाधनत्वज्ञानस्य प्रतिबन्धकस्य सद्भावात् इति शङ्का ।।

तत्र समाधानं शङ्कते – **न च तत्कालीन** इत्यादिना । तत्कालीनतत्पु-रुषीयेच्छां प्रति तत्कालीनतत्पुरुषीयप्रवृत्तिं प्रति च तत्कालीनतत्पुरुषीयबलवद्वेष-विषयदुःखजनकत्वज्ञानं प्रतिबन्धकम् इति कल्प्यते । अतः पुरुषान्तरीय-कालान्तरीयद्वेषम् आदाय पूर्वोक्तदोषस्य न प्रसक्तिः । न च– एवमपि यस्य चिकीर्षापूर्वक्षणे न कुत्रापि द्वेष आसीत् तत्र बलवद्वेषविषयदुःखसाधनत्वज्ञानरूप-प्रतिबन्धकाप्रसिद्ध्या तदभावरूपकारणाप्रसिद्धिः इति– वाच्यम् । तत्काल-तत्पुरुषान्तर्भावेण तादृशज्ञानप्रतिबन्धकत्वस्य कल्पनात् न तत्र प्रतिबन्धका-प्रसिद्ध्या प्रतिबन्धकाभावरूपकारणस्य अभावात् प्रवृत्त्यनुपपत्तिः । तथा च पुरुषभेदेन कालभेदेन च प्रतिबध्यप्रतिबन्धकभावभेदकल्पनात् न पूर्वोक्तदोष इति **न च** इत्यादिग्रन्थभावः ।।

एतत् अवान्तरसमाधानं निराकरोति – **यत्पुरुषस्य** इत्यादिना । यस्य पुरुषस्य यदा अगम्यागमनजन्यनरके बलवान् द्वेषः, तदा तस्य पुरुषस्य अगम्यागमने इच्छायाः अभावात् अगम्यागमनविषयकतत्पुरुषीयतत्कालीनेच्छायाः अप्रसिद्ध्या तत्पुरुषतत्कालान्तर्भावेण कार्यकारणभावस्य अभावेन तत्र तत्पुरुषीयागम्यागमनविषयकेच्छानुत्पादप्रयोजकस्य कारणाभावस्य दुर्लभत्वात् इति भावः । **दुर्भिक्षापत्तेः** इति । तथा च कार्यकारणभावाभावेन कारणाभावरूपं प्रयोजकं न स्यात् इति भावः ।।

समाधत्ते – **तद्धर्मप्रकारक** इत्यादिना । **तद्धर्मप्रकारकद्वेषविशिष्टस्य** – नरकत्वादिप्रकारकद्वेषविशिष्टस्य । वैशिष्ट्यं च स्वाधिकरणकालावच्छिन्नस्वसमवायिवृत्तित्वसंबन्धेन । स्वं – द्वेषः । **तद्धर्मावच्छिन्नजनकत्वज्ञानस्य** – नरकत्वाद्यवच्छिन्ननिरूपितजनकत्वज्ञानस्य । **तत्र** – अगम्यागमनादीच्छायाम् । ननु तादृशद्वेषविशिष्टतादृशज्ञानाभावस्य तादृशज्ञानविशिष्टतादृशद्वेषाभावस्य वा हेतुत्वम् इत्यत्र विनिगमकाभावात् गुरुतरकार्यकारणभावद्वयापत्तिः इति आशङ्क्य आह – **तद्धर्मप्रकारक** इति । नरकत्वप्रकारकद्वेषशून्यकालीनागम्यागमनगोचरेच्छायाम् इत्यर्थः । **तादृशद्वेषाभावः** – नरकत्वप्रकारकद्वेषाभावः । विशिष्टाभावस्य विशेष्यवति विशेषणाभावरूपतया प्रकृते द्वेषाभावरूपत्वात् इति भावः । **तादृशद्वेषोत्तर** इति । नरकत्वप्रकारकद्वेषोत्तरागम्यगमनगोचरेच्छायाम् इत्यर्थः । **तद्धर्मावच्छिन्नजनकत्वज्ञानाभाव** इति । नरकत्वावच्छिन्ननिरूपितजनकत्वज्ञानाभाव इत्यर्थः । विशेषणवति विशिष्टाभावस्य विशेष्याभावरूपतया प्रकृते नरकजनकत्वज्ञानाभावरूपत्वात् इति भावः ।।

अन्ये इत्यनेन सूचितम् अस्वरसं स्पष्टयति – **यत्र च उत्कट** इत्यादिना । यत्र एकस्मिन् कर्मणि अगम्यागमनादौ उत्कटसुखजनकत्वम्, उत्कटदुःखजनकत्वं च ज्ञातं, तत्र उत्कटसुखजनकत्वज्ञानस्य द्वेषं प्रति प्रतिबन्धकतया, उत्कटदुःखजनकत्वज्ञानस्य इच्छां प्रति प्रतिबन्धकतया च अगम्यागमनादौ इच्छा द्वेषश्च न जायेत इति द्वेषरूपप्रतिबन्धकाभावस्य सत्त्वात् इच्छोत्पत्त्यापत्तिः इत्यर्थः । **कार्यकाल** इति । इच्छारूपकार्याव्यवहितप्राक्काले इत्यर्थः ।।

ननु बलवद्विष्टसाधनत्वज्ञानं प्रतिबन्धकम् इति मतेऽपि यत्र आदौ बलवद्विष्टसाधनत्वज्ञानं तत्तृतीयक्षणे नरकादौ द्वेषः, तत्र चतुर्थक्षणे इच्छोत्पत्त्यापत्तिः, तृतीयक्षणे इच्छोत्पत्तिकारणस्य द्विष्टसाधनत्वज्ञानाभावस्य सत्त्वात् । द्वेषस्य

प्रतिबन्धकत्वे तु तदा कारणस्य द्वेषाभावस्य असत्त्वात् न इच्छोत्पत्त्यापत्तिः इति शङ्कते – **न च यत्र** इति ।।

इष्टापत्त्या उक्तशङ्कां परिहरति – **तत्र इच्छा उत्पादस्य** इति । परिहारान्तरम् आह – **क्षणविलम्बस्य** इति ।।

बलवद्विष्टहेतुत्वज्ञानस्य प्रतिबन्धकत्वमते यो यो दोषः पूर्वं शङ्कितः सः अत्रापि सम इत्याशङ्कापनोदनाय आह – **अत्रापि** इति । बलवदनिष्टाजनकत्वज्ञानस्य चिकीर्षां प्रति कारणत्वपक्षेऽपि इत्यर्थः । नरकत्वादिप्रकारकद्वेषोत्तरेच्छां प्रति नरकत्वावच्छिन्नाजनकत्वज्ञानं कारणम् । नरकत्वादिप्रकारकद्वेषाभावकालीनेच्छां प्रति नरकत्वादिप्रकारकद्वेषाभावः कारणम् इति निष्कर्षः ।।

दिनकरी

मूले कस्यचिन्मते इत्यनेन अस्वरसः सूचितः ।।

न च बलवदनिष्टाननुबन्धित्वज्ञानत्वस्य हेतुतावच्छेदकत्वम्, बलवदनिष्टजनकत्वप्रकारतानिरूपिताभावविशेष्यताशालित्वादेः तादृशनिरूप्यनिरूपकभावघटितत्वेन गौरवात् तदघटितबलवदनिष्टसाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तम् ।।

न च – अप्रामाण्यज्ञानानास्कन्दितबलवदनिष्टाननुबन्धित्वज्ञानत्वापेक्षया अप्रामाण्यनिश्चयानास्कन्दिततदनुबन्धित्वज्ञानत्वस्य प्रतिबन्धकतावच्छेदकत्वे गौरवम् इति – वाच्यम् । युद्धादौ बलवदनिष्टसाधनत्वसन्देहेऽपि इच्छाप्रवृत्त्योः उदयात् बलवदनिष्टानुबन्धित्वनिश्चयस्यैव इच्छाप्रतिबन्धकतायाः तदननुबन्धित्वसंशयस्यापि च कारणतायाश्च वाच्यतया च विपरीतगौरवात् इति ।।

न च – बलवदनिष्टाननुबन्धित्वज्ञानस्य अप्रवर्तकत्वे तद्विषयस्य विध्यर्थत्वाभावात् "न कलञ्जं भक्षयेत्" इत्यादिवाक्यानाम् अप्रामाण्यापत्तिः

इति – वाच्यम् । तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेऽपि **प्रवृत्तिप्रतिबन्धकबलवद-निष्टसाधनविघटकत्वेन प्रवृत्तिप्रयोजकत्वात्** प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यर्थत्वानपायात् ॥

अत्र यद्यपि – यत्र प्रथमक्षणे द्वेषः, द्वितीयक्षणे फलेच्छा, तृतीयक्षणे फलसाधनताज्ञानं, तत्र तृतीयक्षणे द्वेषनाशात् भवत्येव चतुर्थक्षणे उपायेच्छा, यत्र फलेच्छादिक्रमेण एषाम् उत्पत्तिः तत्र फलेच्छारूपकारणाभावादेव न उपायेच्छाः । एवम् अन्यत्रापि । आत्मविशेषगुणानां यौगपद्यानङ्गीकारात् इति बलवदनिष्टाननु-बन्धित्वज्ञानस्य द्वेषस्य वा प्रतिबन्धकत्वं न युक्तम् । न युक्तं च बलवदनिष्टाननुबन्धित्वज्ञानस्य हेतुत्वम् – **तथापि द्वित्रिक्षणान्तरितेऽपि द्वेषे** इच्छाप्रवृत्त्योः अनुदयस्य आनुभविकतया, ज्ञानयोरेव न यौगपद्यम् इति अभ्युपगमाद्वा पूर्वोक्तप्रतिबन्धकत्वस्य हेतुत्वस्य च आवश्यकत्वम् इति ध्येयम् ॥

राजीवोल्लासः

अस्वरसमेव विशदयति – **न च बलवदनिष्ट** इत्यादिना । बलवदनिष्टा-जनकत्वज्ञानस्य चिकीर्षादिहेतुत्वे बलवदनिष्टाजनकत्वज्ञानत्वं हेतुतावच्छेदकं भवति । तच्च बलवदनिष्टजनकत्वनिष्ठप्रकारतानिरूपिताभावनिष्ठविशेष्यताशालि-ज्ञानत्वरूपं गुरुभूतम् । निरूप्यनिरूपकभावघटितत्वात् । तदपेक्षया निरूप्यनिरू-पकभावाघटितेन लघुभूतेन बलवदनिष्टजनकत्वज्ञानाभावत्वेनैव कारणत्वं युक्तम् । अतः बलवदनिष्टाजनकत्वज्ञानत्वं न हेतुतावच्छेदकम् इति भावः ॥

अत्र शङ्कते – **न च अप्रमाण्यज्ञान** इति । अयम् अत्र शङ्कितुः आशयः– बलवदनिष्टाजनकत्वज्ञानस्य चिकीर्षादिकारणतावादिमते निश्चयस्यैव कारणतया तादृशनिश्चये संशयनिश्चयसाधारणाप्रामाण्यज्ञानसत्त्वे चिकीर्षाद्यनुत्पत्त्या अप्रामाण्यज्ञानाभावविशिष्टस्य बलवदनिष्टाजनकत्वज्ञानस्य कारणत्वम् ।

बलवदनिष्टजनकत्वज्ञानस्य प्रतिबन्धकतावादिमते संशयनिश्चयसाधारणतादृशज्ञानस्यैव प्रतिबन्धकतया तत्र च अप्रामाण्यसंशयस्य विषयसंशयपर्यवसायित्वेन अनुकूलतया अप्रामाण्यनिश्चयाभावविशिष्टस्य बलवदनिष्टजनकत्वज्ञानस्यैव प्रतिबन्धकत्वं वाच्यम् । तत्र च गौरवं स्पष्टम् । तदभावाप्रकारकत्वे सति तत्प्रकारकज्ञानत्वरूप-निश्चयत्वस्य तत्प्रकारकज्ञानत्वापेक्षया गुरुत्वात् इति ।।

उक्तशङ्कां समाधत्ते – **युद्धादौ** इत्यादिना । युद्धादौ बलवदनिष्टाजनकत्व-संशयेऽपि इच्छादेः उत्पत्त्या संशयनिश्चयसाधारणबलवदनिष्टाननुबन्धित्वज्ञानत्वेन हेतुत्वं वाच्यम् । तादृशज्ञानेऽप्रामाण्यनिश्चये सति इच्छायाः अनुदयेन बलवदनिष्टाननु-बन्धित्वाभाववद्विशेष्यकत्वविशिष्टबलवदनिष्टाननुबन्धित्वप्रकारकत्वरूपाप्रामाण्यप्रकारक-निश्चयानास्कन्दितत्वमपि निरुक्तकारणतावच्छेदककोटौ निवेशनीयम् इति महागौरवम् । एवम् युद्धादौ बलवदनिष्टजनकत्वसंशयेऽपि इच्छाप्रवृत्त्योः उत्पत्त्या बलवदनिष्टजनकत्वनिश्चयस्यैव इच्छाप्रतिबन्धकत्वं वाच्यम् । तत्र च संशयनिश्चय-साधारणाप्रामाण्यज्ञानस्यैव उत्तेजकतया तादृशज्ञानानास्कन्दितबलवदनिष्टाननु-बन्धित्वनिश्चयाभावस्य कारणत्वम् इति लाघवम् इति भावः । **निश्चयस्यैव इच्छाप्रतिबन्धकतायाः** इति । तथा च संशयसाधारणाप्रामाण्यज्ञानमात्रस्य उत्तेजकतया तदभावस्यैव प्रतिबन्धकाभावनिष्ठकारणतावच्छेदकघटकत्वम् इति भावः ।।

संशयस्यापि च इति । तथा च अप्रामाण्यनिश्चयस्यैव कारणताविघटकतया अप्रामाण्यनिश्चयाभावस्यैव कारणतावच्छेदकघटकत्वम् इति भावः ।।

विपरीतगौरवात् इति । ननु सिद्धान्ते बलवदनिष्टजनकत्वव्याप्यवत्ताज्ञानस्य तदवच्छेदकधर्मदर्शनस्य च पृथक् प्रतिबन्धकत्वकल्पनप्रयुक्तगौरवम् अधिकम् इति चेत्, न । तयोः चिकीर्षां प्रति प्रतिबन्धकत्वे मानाभावात्। तद्वत्ताबुद्धिं प्रत्येव तयोः प्रतिबन्धकत्वस्य संप्रदायसिद्धत्वात् । न च– एवं कृत्यसाध्यत्वज्ञानस्य चिकीर्षाप्रतिबन्धकत्वपक्षे कृतिसाध्यत्वाभावव्याप्यज्ञानादीनां चिकीर्षाप्रतिबन्धकत्वा-

पत्तिप्रदर्शनं पूर्वं कृतं कथं घटत इति – वाच्यम् । तस्य अभ्युच्चयवाद-मात्रत्वात् । **अप्रवर्तकत्व** इति । प्रवृत्तिं प्रति अजनकत्वे इत्यर्थः । **तद्विषयस्य** – तादृशज्ञानविषयस्य बलवदनिष्टाननुबन्धित्वस्य । **विध्यर्थत्वाभावात्** इति । प्रवृत्तिजनकज्ञानविषयस्यैव विध्यर्थत्वात् इति भावः । **अप्रामाण्यापत्तिः** इति । कृतिसाध्यत्वविशिष्टेष्टसाधनत्वरूपविध्यर्थाभावस्य कलञ्जभक्षणे बाधात् इति भावः । **प्रवृत्तिप्रतिबन्धक** इति । प्रवृत्तिप्रतिबन्धकं यत् बलवदनिष्टजनकत्व-ज्ञानं तन्निवर्तकतया इत्यर्थः । **प्रवृत्तिप्रयोजकत्वात्** – प्रवृत्तिं प्रति प्रतिबन्धकविघटनद्वारा कारणत्वात् । बलवदनिष्टाननुबन्धित्वज्ञानस्य द्वेषस्य वा चिकीर्षादिप्रतिबन्धकत्वं, बलवदनिष्टाननुबन्धित्वज्ञानस्य तद्धेतुत्वं वा न संभवति । कारणसमवधानकालीनबलवद्द्वेषविषयसाधनताज्ञानसत्त्वे कार्यापत्तिवारणाय तयोः प्रतिबन्धकत्वं वाच्यम् । तच्च न संभवति । कारणप्रतिबन्धकानां मेलनासंभवात् इति आशङ्कते – **अत्र यद्यपि** इत्यादिना । यत्र प्रथमक्षणे नरकादिदुःखे द्वेषः, द्वितीयक्षणे सुखरूपफलेच्छा, तृतीयक्षणे "अगम्यागमनादिकं सुखसाधनम्" इत्याकारकं सुखसाधनताज्ञानं, तस्मिन् क्षणे प्रथमक्षणोत्पन्नस्य प्रतिबन्धकस्य द्वेषस्य नाशात् चतुर्थक्षणे उपायभूतागम्यागमनादौ इच्छा भवत्येव । एवं यत्र प्रथमक्षणे फलेच्छा, द्वितीयक्षणे द्वेषः, तृतीयक्षणे सुखसाधनताज्ञानं, तत्र तस्मिन् क्षणे फलेच्छारूपकारणाभावादेव न उपायविषय-केच्छा । एवं यत्र प्रथमक्षणे द्वेषः, द्वितीयक्षणे इष्टसाधनताज्ञानं, तृतीयक्षणे फलेच्छा, तत्र द्वेषनाशादेव अनन्तरक्षणे इच्छा भवत्येव । न च– एकस्मिन्नेव क्षणे द्वेषेच्छादीनाम् उत्पत्तिः भवतु इति – वाच्यम् । आत्मविशेषगुणानां युगपदुत्पत्त्यनङ्गीकारात् । तथा द्वेषादेः प्रतिबन्धकत्वं वा बलवदनिष्टाजनकत्वज्ञानस्य कारणत्वं वा न युक्तम् इति शङ्कितुर्भावः ।।

समाधत्ते – तथापि इत्यादिना । इच्छायाः द्वित्रिक्षणव्यवहितेऽपि द्वेषे इच्छाप्रवृत्त्योः न उत्पत्तिः इत्यनुभवात् द्वेषस्य प्रतिबन्धकत्वम् आवश्यकम् । अपि च ज्ञानयोरेव युगपदुत्पत्तिः न भवति । द्वेषज्ञानयोः द्वेषेच्छयोः वा युगपदुत्पत्तिः भवितुम् अर्हति इति यत्र प्रथमक्षणे द्वेषः फलेच्छा च, द्वितीयक्षणे इष्टसाधनताज्ञानं, तत्र तृतीयक्षणे चिकीर्षायाः वारणाय द्वेषस्य द्विष्टसाधनताज्ञानस्य च प्रतिबन्धकत्वम् आवश्यकम् इति भावः । द्वित्रिक्षणान्तरितेऽपि इति । अर्थात् इच्छायाः । यथा समवायिकारणादीनां केषांचित् अनुभवबलात् कार्यकालेऽपि सत्त्वम् आवश्यकम्, तथा कतिपयानां प्रतिबन्धकाभावादीनां कार्यपूर्वद्वित्रिक्षणादि-वृत्तित्वमपि आवश्यकम् इति भावः । यत्र द्वेषोत्पत्त्यनन्तरं फलसाधनताज्ञानकृति-साध्यताज्ञानयोः समूहालम्बनरूपत्वं तत्र द्विक्षणान्तरितत्वम्, यत्र क्रमिकत्वं तत्र त्रिक्षणान्तरितत्वम् इति द्रष्टव्यम् । द्वेषे इति । द्विष्टसाधनताज्ञानस्य उपलक्षणम् एतत् । इच्छायाः अनुत्पत्तिं द्रढयितुं प्रवृत्तेरपि अनुदयप्रदर्शनम् । दर्शितानुभवस्य सविवादताम् अनुचिन्त्य पक्षान्तरम् अवलम्ब्य समाधत्ते – ज्ञानयोः इति । यदा स्वर्गनरकयोः सुखदुःखत्वधीः समूहालम्बनरूपा उत्पन्ना, तदा स्वर्गे इच्छायाः नरके द्वेषस्य च युगपदुत्पत्तेः अवर्जनीयतया आत्मविशेषगुणसामान्यस्य न यौगपद्यनिषेधः, किं तु ज्ञानयोरेव ।।

न च– ज्ञानयोरप्यस्तु यौगपद्यम् इति– वाच्यम् । मनसोऽणुत्वेन इन्द्रियद्वयसंयोगस्य युगपदसंभवात् । त्वक्संयोगस्य ज्ञानसामान्यकारणतायाः निर्युक्तिकत्वात् । एवं समाने विषये प्रत्यक्षसामग्र्याः प्राबल्यम् इत्यादिरीत्या अनुभवबलकल्पितप्रतिबन्धकसंभवात् न प्रत्यक्षानुमित्यादीनामपि यौगपद्यसंभवः इत्यादिकं चिन्तनीयम् ।।

।। द्वेषनिरूपणम् ।।

कारिकावली

द्विष्टसाधनताबुद्धिः भवेद्द्वेषस्य कारणम् ।

मुक्तावली

द्वेषं निरूपयति – द्विष्ट इति । दुःखोपायविषयकं द्वेषं प्रति बलवद्द्विष्टसाधनताज्ञानं कारणम् इत्यर्थः ।

बलवदिष्टसाधनताज्ञानं च प्रतिबन्धकम्, तेन नान्तरीयदुःखजनके पाकादौ न द्वेषः ।।

दिनकरी

तेन – द्वेषे बलवत्त्वविशेषणेन ।

राजीवोल्लासः

मूले दुःखोपायविषयकम् इति । अनेन द्वेषः द्विविधः, दुःखे ताद्रूप्येण ज्ञानात् तदुपाये च बलवद्द्विष्टसाधनताज्ञानात् इति सूचितम् ।

।। प्रयत्ननिरूपणम् ।।

कारिकावली

प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ।। १४९ ।।

एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् ।

चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ।। १५० ।।

मुक्तावली

प्रयत्नं निरूपयति – **प्रवृत्तिः** इति । प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदात् प्रयत्नः त्रिविधः इत्यर्थः ।।

चिकीर्षा इति । मधुविषसंपृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावात् न प्रवृत्तिः इति भावः । कृतिसाध्यताज्ञानादिवत् बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां कारणम् इत्यपि वदन्ति ।।

कार्यताज्ञानं प्रवर्तकम् इति गुरवः । तथा हि – ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं न अपेक्षितम् अस्ति । सा च कृतिसाध्यताज्ञानसाध्या, इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात् । चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा । तत्र कृतिसाध्यत्वं प्रकारः, तत्प्रकारकं ज्ञानं चिकीर्षायां कारणम्, तद्द्वारा प्रवृत्तौ च हेतुः । न तु इष्टसाधनताज्ञानं तत्र हेतुः, नित्ये तदभावात्, कृत्यसाध्येऽपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः ।।

ननु कृत्यसाध्यताज्ञानं प्रतिबन्धकम् इति चेत्, न । तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात् । न च द्वयोरेव हेतुत्वम्, गौरवात् ।।

ननु त्वन्मतेऽपि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः, कार्यताज्ञानस्य सत्त्वात् इति चेत्, न । स्वविशेषणवत्ता-प्रतिसन्धानजन्य – कार्यताज्ञानस्य प्रवर्तकत्वात् । काम्ये हि यागपाकादौ कामना स्वविशेषणम्, ततश्च बलवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेन कार्यताज्ञानम्, ततः प्रवृत्तिः । तृप्तश्च भोजने न प्रवर्तते, तदानीं कामनायाः पुरुषविशेषणत्वाभावात् । नित्ये च शौचादिकं पुरुषविशेषणम्, तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात् तत्र प्रवृत्तिः ।।

ननु तदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानविषयक-कार्यताज्ञानत्वेनैव हेतुत्वम् अस्तु, बलवदनिष्टाननुबन्धित्वं च इष्टोत्पत्ति-नान्तरीयक-दुःखाधिक-दुःखाजनकत्वं बलवद्द्वेषविषयदुःखाजनकत्वं वा इति चेत्, न । इष्टसाधनत्व–कृतिसाध्यत्वयोः युगपत् ज्ञातुम् अशक्यत्वात्, साध्यत्वसाधनत्वयोः विरोधित्वात् । असिद्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वम् । न च एकमेकेनैकदा सिद्धम् असिद्धं इति च ज्ञायते । तस्मात् कालभेदात् उभयं ज्ञायत इति ।।

दिनकरी

प्रवृत्तिः इत्यादि । प्रवृत्तित्वं च रागजन्यतावच्छेदकतया सिद्धः जाति-विशेषः । निवृत्तित्वं च द्वेषजन्यतावच्छेदकतया सिद्धः जातिविशेषः । जीवनयोनियत्नत्वं च साहजिक-प्राणसञ्चारविषयकयत्नत्वम् ।।

ननु बलवदनिष्टानुबन्धित्वज्ञानाभावस्य प्रवृत्त्यहेतुत्वे मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिः, अत आह – मधु इति । चिकीर्षाभावात् इति । चिकीर्षां प्रति बलवदनिष्टानुबन्धित्वज्ञानाभावस्य हेतुत्वात् इति भावः । कृतिसाध्यता-ज्ञानादिवत् इति । अन्यथा कृतिसाध्यताज्ञानादेरपि चिकीर्षायामेव हेतुत्वं स्यात्, न तु प्रवृत्तौ, व्यापारेण व्यापारिणः न अन्यथासिद्धत्वम् इति तु प्रकृतेऽपि समानम् इति भावः ।।

प्राभाकरमतम् आह – कार्यताज्ञानम् इति । सा च – चिकीर्षा च । तद्द्वारा – कृतिसाध्यत्वप्रकारकेच्छाद्वारा ।।

द्वयोरेव इति । ''एव''कारः अप्यर्थे ।।

स्वविशेषण इति । स्वं – प्रवर्तमानः पुरुषः, तद्विशेषणं – काम्ये कामना, नित्ये कालशौचादि, तद्वत्ता – पक्षे तत्संबन्धः, तस्य प्रतिसन्धानं – ज्ञानम् इत्यर्थः ।।

तस्य कार्यताज्ञानहेतुता लिङ्गज्ञानविधया । तथा हि – ''पाकः मत्कृतिसाध्यः, मत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वात्'' इति अनुमानम् । अत्र मदिष्टसाधनत्वमात्रोपादाने वृष्ट्यादौ व्यभिचारः इति सत्यन्तम् । मदिष्टसाधने परकृतपाकादौ व्यभिचारवारणाय ''मत्कृतिं विना'' इत्यत्र मत्पदम् । श्रमे व्यभिचारवारणाय मदिष्टसाधनत्वात् इति । मदीयश्रमस्य मच्छत्रोः इष्टसाधनत्वात् तद्दोषतादवस्थ्यम्, अतः तत्रापि ''मत्'' इति ।।

न च – स्वेच्छाधीनकृतिसाध्यताज्ञानमेव प्रवर्तकम्, अन्यथा नान्तरीयकश्रमे प्रवृत्त्यापत्तेः, तच्च उक्तानुमानात् न सिद्धम् इति – वाच्यम् । स्वेच्छाधीनकृति-साध्यत्वस्यैव साध्यत्वात् । एवं च हेतावपि ''मत्कृतिं विना'' इत्यत्र स्वेच्छाधीनत्वं मत्कृतिविशेषणं देयम् । अन्यथा अन्येच्छाधीनमत्कृतिसाध्यमदिष्टसाधने नान्तरीयकजलसंयोगादौ व्यभिचारापत्तेः । एवं सति स्वेच्छाधीनमत्कृति-घटितहेत्वभावादेव श्रमे व्यभिचारवारणसंभवात् विशेष्यदलप्रयोजनं यद्यपि न संभवति, तथापि नीलधूमादिवत् हेत्वन्तरत्वात् अदोषः ।।

एवम् ''अहं इदानीन्तनकृतिसाध्यसन्ध्यावन्दनः, द्विजातित्वे सति विहितसन्ध्याकालीनशौचादिमत्त्वात्'' इति अनुमानम् । ''यः द्विजातित्वे सति विहितसन्ध्याकालीनशौचादिमान्, सः तत्कालीनकृतिसाध्यसन्ध्यावन्दनः'' इति सामान्यतो व्याप्तिः इति ।।

न च – एवंरीत्या इष्टसाधनत्वहेतुकानुमानसंभवेऽपि पक्षे स्वविशेषण-वत्ताप्रतिसन्धानजन्यकार्यताज्ञानं न संभवति, इष्टसाधनत्वस्य यागनिष्ठत्वेन पुरुषविशे-षणत्वाभावात्, इच्छायाश्च पुरुषविशेषणत्वेऽपि तस्याः लिङ्गत्वासंभवात्, लिङ्ग-घटकत्वेऽपि पक्षे तद्वत्ताज्ञानानिर्वाहकत्वात् इति – वाच्यम् । काम्यसाधनता-ज्ञानस्यापि पक्षे यागादौ स्वविषयसाधनत्वरूपकामनासंबन्धज्ञानात्मकत्वात् ।।

वस्तुतः तद्वत्ताज्ञानं तत्संबन्धज्ञानं तज्ज्ञानमेव वा, न तु पक्षोऽपि तत्रान्तर्भूत इति काम्यसाधनताज्ञानस्यापि कामनासंबन्धज्ञानात्मकतया कामनाज्ञानात्मकतया वा अनुपपत्त्यभावात् ।।

ननु **स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे इष्टसाधनताज्ञान-शून्यकालेऽपि** पाके स्वविशेषणकृत्यादिघटितहेत्वन्तरात् यत्र कार्यतानुमितिः, यथा पाकः **स्वेच्छाधीनमत्कृतिसाध्यः, श्रमादिभिन्नत्वे सति मत्कृतिव्यतिरेक-प्रयुक्तव्यतिरेकप्रतियोगित्वात्, यद्वा स्वेच्छाधीनमत्कृतिं** विना असत्त्वात् इति, तत्रापि प्रवृत्त्यापत्तिः, अत आह – **काम्ये हि** इति । कामना – **यागपाकादि** – फलगोचरकामना । क्वचित् तथैव पाठः । तथा च "स्वविशेषण" इत्यत्र विशिष्य **तादृशकामनारूपमेव स्वविशेषणं** वाच्यम् । एवं विशेषणवत्त्वमपि **स्वविषयसाधनत्वरूपं** वाच्यम् । तेन न "स्वेच्छाधीन" इत्यादि **द्वितीय-हेतुज्ञानजन्यकार्यतानुमितिस्थले** प्रवृत्त्यापत्तिः इति भावः ।।

ननु काम्यसाधनताज्ञानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिः इति, अत आह – **ततश्च बलवदनिष्ट** इति । तथा च स्वविशेषणवत्ताप्रतिसन्धाने बलवदनिष्टाननुबन्धित्वविषयकत्वं विशेषणं **देयम्** इति भावः ।।

ननु तृप्तस्यापि भोजने प्रवृत्त्यापत्तिः, तस्यापि अतीतभोजनकामनाघटित-लिङ्गजन्यकार्यताज्ञानसत्त्वात्, अत आह – **तृप्तश्च** इति । कामनायाः तदानीं पुरुषविशेषणत्वाभावात् इत्यर्थः । तथा च "स्वविशेषण" इत्यत्र तदानीन्तनत्वं विशेषणं देयम् इति भावः ।।

ननु **स्वेच्छाधीनमत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिलिङ्गज्ञानजन्य-कार्यताज्ञानात् सन्ध्यावन्दने** प्रवृत्त्यापत्तिः, कृतेरपि स्वविशेषणत्वात्,

अत आह – **नित्ये शौचादिकम्** इति । ''आदि''ना विहिततत्कर्मकालस्य परिग्रहः ।।

न च – कालस्य कथं पुरुषविशेषणत्वम् इति – वाच्यम् । स्ववृत्तिजीवनवत्त्वसंबन्धेन तस्य पुरुषविशेषणत्त्वात् विहितकालजीवित्वादेर्वा ''आदि''पदेन ग्रहणात् । तथा च नित्यगोचरप्रवृत्तिस्थले स्वविशेषणपदेन विशिष्य तत्कालीन–शुचित्वादिरूपविशेषणमेव ग्राह्यम् इति न पूर्वोक्तातिप्रसङ्गः इति भावः ।।

नैयायिकः शङ्कते – **ननु** इति । **तदपेक्षया** बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञानापेक्षया । **लाघवेन** इति । **नियमादिघटित**जन्यत्वापेक्षया **विषयत्वस्य** लघुत्वात् इति भावः ।।

ननु बलवदनिष्टाजनकत्वज्ञानं न हेतुः । क्वचित् बह्वायाससाध्ये बहुतरस्यापि दुःखस्य अबलत्वात्, क्वचित् अल्पस्य बलवत्त्वात् अनुगतस्य बलवत्त्वस्य दुर्वचत्वात् इति, अत आह – **बलवदनिष्टाननुबन्धित्वं च** इति । **इष्टोत्पत्ति** इति । **इष्टोत्पत्तिनान्तरीयकं** यद्दुःखं तदपेक्षया **अतिरिक्तं** यद्दुःखं तदजनकत्वम् इत्यर्थः । एतेन मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिः अपास्ता । इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तस्य मरणदुःखस्य तेन जननात् ।।

अत्र केचित् – सुखमात्रजनके कर्मणि इष्टोत्पत्तिनान्तरीयकदुःखम् अप्रसिद्धम् इति तत्र प्रवृत्त्यभावप्रसङ्ग इति । तदयुक्तम् – ''कष्टं कर्म'' इति न्यायेन सुखजनके कर्मणि दुःखजनकत्वनियमेन अप्रसिद्ध्यभावात् ।।

मिश्रास्तु – इष्टोत्पत्त्यनान्तरीयकनरकदुःखाजनकत्वम् उक्तस्यार्थ इति न अप्रसिद्धिः इति – आहुः ।।

ननु एवं सति नरकसाधनत्वेन प्रमिते परदाराभिगमनादौ रागौत्कट्यात् न प्रवर्तेत, इष्टोत्पत्त्यनान्तरीयकनरकदुःखजनकत्वेन तस्य निश्चयात् इति, अत आह –

बलवद्द्वेष इति । द्वेषे च बलवत्त्वं जातिविशेषः । अत एव रागान्धस्य यदा अगम्यागमनादिजन्यदुःखे न तादृशो द्वेषः, तदा तद्धेतावपि प्रवृत्तिः ।।

साध्यत्वसाधनत्वयोः विरोधम् उपपादयति – **असिद्धस्य हि इति** । आद्यक्षणवृत्तित्वविशिष्टपाकादेः इत्यर्थः । **सिद्धस्य** – अनाद्यक्षणवृत्तित्वविशिष्टस्य । कृत्यव्यवहितोत्तरक्षणसंबन्धित्वघटितस्य कृतिसाध्यत्वस्य पाकोत्पत्तिक्षणे एव पाकवृत्तित्वात्, कालान्तरभावि-ओदनादिफलसाधनत्वस्य ओदनाव्यवहित-पूर्वक्षणसंबन्धित्वघटितस्य च उत्पत्तिक्षणे पाकावृत्तित्वात् तयोः एकक्षणावच्छेदेन एकत्र अवृत्तित्वरूपविरोधात् इति भावः ।।

यद्यपि कालान्तरभाव्योदनाव्यवहितपूर्वक्षणवृत्तितावच्छेदकधर्मवत्त्वरूपम् ओदनसाधनत्वम् आद्यक्षणवृत्तित्वविशिष्टेऽपि पाके संभवति इति कथं विरोधः?, तथापि स्वरूपयोग्यम् इदं, न फलोपधायकम् इति ज्ञानात् प्रवृत्त्यनुदयेन, फलोपधायकत्वरूपेष्टसाधनताज्ञानस्यैव संशयसाधारणस्य प्रवृत्तिकारणत्वं वाच्यम् । पूर्वोक्तं फलोपधायकत्वं च आद्यक्षणविशिष्टे यागादौ न संभवति इति भावः ।।

साध्यत्वसाधनत्वयोः विरोधम् व्युत्पाद्य तयोः एकज्ञानविषयत्वं न संभवति इत्याह – **न च एकमेकेनैकदा इति** । अव्याप्यवृत्तिपदार्थस्य स्वस्वावच्छेद-कानवगाहिज्ञानं न संभवति, "मूले वृक्षः संयोगी" इत्येव प्रतीतेः । तथा च साध्यत्वसाधनत्वयोरपि स्वस्वावच्छेदकसिद्धत्वासिद्धत्वविषयकम् "असिद्धः पाकः कृतिसाध्यः, सिद्धश्च पाकः इष्टसाधनम्" इति ज्ञानं समूहालम्बनरूपं वाच्यम् । तच्च न संभवति, सिद्धत्वासिद्धत्वज्ञानयोः परस्परं विरोधित्वात् इत्यभिमानः ।।

तस्मात् कालभेदात् इति । न च – इदानीम् असिद्धः पाकः कृतिसाध्यः, अग्रे च सिद्धः पाकः इष्टसाधनम् इति ज्ञानादेव प्रवृत्तिरस्तु इति – वाच्यम् । इदानीन्तनाग्रेतनकालयोः अननुगमात् ।।

राजीवोल्लासः

प्रवृत्तित्वं च इति । ननु एवम् ईश्वरकृतौ प्रवृत्तित्वालाभः । तस्याः नित्यत्वेन रागजन्यत्वाभावात् । न च इष्टापत्तिः । यत्नत्रैविध्यकथनासांगत्यापत्तेः इति चेत्, न । जन्ययत्नस्यैव अत्र विभागात् । बुद्धीच्छयोः अपि जन्ययोरेव विभागदर्शनात् । नित्यज्ञाने प्रमात्वसंभवेऽपि प्रमाया गुणजन्यत्वाभिधानानुरोधेन जन्यप्रमाया एव प्रक्रान्तत्वस्य अवश्याभ्युपेयत्वात् । **साहजिक** इति । स्वाभाविक इत्यर्थः । सह जायत इति सहजः, सहज एव साहजिकः । स्वार्थे ठक् । **परममूले** चिकीर्षा कृतिसाध्यत्वज्ञानम् इष्टसाधनत्वज्ञानं समवायिकारण-विषयकप्रत्यक्षं च प्रवृत्तिं प्रति कारणम् इत्युक्तम् । तथा सति मधुविषसंपृक्तान्न-भोजनादौ प्रवृत्तिः स्यात्, उक्तकारणानां सत्त्वात् इति शङ्कायां मुक्तावल्यां – तत्र चिकीर्षाभावात् न प्रवृत्तिः । चिकीर्षां प्रति बलवदनिष्टानुबन्धित्वज्ञानाभावस्य कारणत्वात्, तत्र बलवदनिष्टानुबन्धित्वज्ञानस्यैव सत्त्वेन तदभावरूपकारणस्य अभावात् – इत्युक्तम् । तदेतत् सावतरणव्याख्यानेन स्पष्टीकरोति **दिनकर्यां** – **ननु बलवत्** इत्यादिना । **अन्यथा** इत्यादि । बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्तिं प्रति कारणत्वम् अनङ्गीकृत्य चिकीर्षां प्रति कारणत्वाङ्गीकारे कृतिसाध्यत्वज्ञान-इष्टसाधनत्वज्ञानयोरपि चिकीर्षां प्रत्येव कारणत्वमस्तु । न तु प्रवृत्तिं प्रति । चिकीर्षयैव प्रवृत्तिसिद्धेः अन्यथासिद्धत्वात् । व्यापारेण व्यापारिणः न अन्यथासिद्धिः इति यदि, तर्हि बलवदनिष्टाननुबन्धित्वज्ञानेऽपि तुल्यम् एतत् इति भावः ।।

प्राभाकरमतम् आह – **कार्यताज्ञानम्** इति इति । कार्यताज्ञानं कृति-साध्यत्वप्रकारकज्ञानम् । **एवकारः** अप्यर्थ इति । तथा च कृतिसाध्यताज्ञान-इष्टसाधनताज्ञानयोः द्वयोरपि इत्यर्थः । **पक्षे तत्संबन्ध** इति । पक्षे पाकादौ

कामनायाः संबन्धः – कामनाविषयीभूतफलसाधनत्वं, तस्य प्रतिसन्धानं – तद्विषयकज्ञानं तज्जन्यं कार्यताज्ञानं प्रवृत्तिजनकम् इत्यर्थः । प्रतिसन्धाने बलवदनिष्टाननुबन्धित्वविषयकत्वस्यापि निवेशयिष्यमाणतया न मधुविषसंपृक्तान्न-भोजनादौ प्रवृत्त्यापत्तिः इति ध्येयम् ।।

स्वविशेषणवत्ताज्ञानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात् इत्युक्त्या स्वविशेषणवत्ताज्ञानस्य कार्यताज्ञानहेतुत्वं लभ्यते । तस्य कया विधया कार्यताज्ञानहेतुत्वम् इति शङ्कायाम् आह – **तस्य कार्यताज्ञानहेतुता** इति । अनुमाने हेतुघटकदलानां प्रयोजनम् आह – **अत्र** इत्यादिना । हेतौ सत्यन्तानुपादाने ''पाकः मत्कृतिसाध्यः मदिष्टसाधनत्वात्'' इत्येतावन्मात्रस्य हेतुत्वे मत्कृतिसाध्यत्वा-भाववति वृष्ट्यादौ मदिष्टसाधनत्वसत्त्वात् व्यभिचारः । तद्वारणाय ''मत्कृतिं विना असत्त्वे सति'' इति । वृष्ट्यादेः मत्कृतिं विनापि सत्त्वात् न व्यभिचारः । हेतौ ''मत्कृतिं विना'' इत्यत्र मत्पदानुपादाने ''कृतिं विना असत्त्वे सति मदिष्टसाधनत्वात्'' इत्युक्तौ मत्कृतिसाध्यत्वाभाववति मदिष्टसाधने परकृतपाकादौ व्यभिचारः । तत्र कृतिं विना असत्त्वस्य सद्भावात् । मत्पदोपादाने तु मत्कृतिं विना सत्त्वमेव तत्र इति न व्यभिचारः । ''मदिष्टसाधनत्वात्'' इत्यस्य अनुपादाने मत्कृतिं विना असत्त्वस्य हेतुत्वे दुःखविशेषरूपे श्रमे व्यभिचारः । तद्वारणाय ''इष्टसाधनत्वात्'' इति । श्रमस्य मदिष्टसाधनत्वाभावात् न व्यभिचारः । तत्र मत्पदानुपादाने मदीयश्रमे मच्छत्रोः इष्टसाधनत्वात् व्यभिचारः । तद्वारणाय ''मदिष्ट'' इति । मदीयश्रमस्य मदिष्टसाधनत्वं नास्ति इति न व्यभिचारः ।।

न च स्वेच्छाधीन इति । पाककरणवेलायाम् अनिवार्यः श्रमः जायते। सोऽपि पाककृतिसाध्यः इति तत्र प्रवृत्तिः स्यात् इति तद्वारणाय

स्वेच्छाधीनमत्कृतिसाध्यताज्ञानमेव प्रवर्तकम् इति वक्तव्यम् । नान्तरीयकश्रमे स्वपदग्राह्यनान्तरीयकश्रमेच्छाधीनकृतिसाध्यत्वज्ञानं नास्ति इति न प्रवृत्तिः इति वक्तव्यम् । तादृशं च ज्ञानम् उक्तानुमानात् न सिध्यति इति शङ्का । स्वेच्छाधीनमत्कृतिसाध्यत्वमेव उक्तानुमाने साध्यम् इति परिहारः । न च नान्तरीयकश्रमे इष्टसाधनत्वघटितलिङ्गज्ञानाधीनमत्कृतिसाध्यताज्ञानदशायां प्रवृत्तिः इष्टैव इति वाच्यम् । श्रमत्वदुःखत्वादिरूपेण श्रमदुःखादिकं न इच्छाविषयत्व-प्रवृत्तिविषयत्वस्वरूपयोग्यम् इति सिद्धान्तात् ।।

देयम् इति । तथा च स्वेच्छाधीनमत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वं हेतुः इति भावः । स्वपदं कृतिसाध्ययागपाकादिपरम् । **अन्येच्छा** इति । अन्योद्देश्यकेच्छा इत्यर्थः । प्रकृते पाकोद्देश्यकेच्छाधीन इत्यर्थः । **श्रमे** इति । नान्तरीयकश्रमभिन्नश्रमे व्यभिचारवारणसंभवात् इत्यर्थः । **विशेष्यदल-प्रयोजनम्** इति । मदिष्टसाधनत्वरूपविशेष्यदलप्रयोजनम् इत्यर्थः । **हेत्वन्तरत्वात्** इति । स्वेच्छाधीनमत्कृतिं विना असत्त्वात् इति हेतोरिव मदिष्टसाधनत्वघटितस्यापि अव्यभिचरितत्वात् इति भावः । **तथापि नीलधूमादिवत्** इति । व्यतिरेकदृष्टान्तोऽयम् । नीलधूमादौ यो दोषः सोऽत्र हेत्वन्तरत्वात् न इत्यर्थः । न च– तथापि ''साधनत्वात्'' इत्येव विशेष्यदलम् अस्तु इति – वाच्यम् । अधिकरणनिष्ठाभावाप्रतियोगित्वरूपस्य साधनत्वस्य पाकादौ साध्याधिकरणेऽप्रसिद्धेः व्याप्तिग्रहासंभवात् ''मदिष्ट''इत्यंशस्य साधनत्व-घटकाधिकरणत्वविशेषणत्वस्य आवश्यकत्वात् ।।

स्वविशेषणं नित्ये कालशौचादि इति पूर्वोक्तम् । तदनुसारेण अनुमानम् आह – **एवम् अहम्** इत्यादिना । इदानीन्तनकृतिसाध्यत्वरूपसाध्यस्य हेतोश्च सामानाधिकरण्याप्रसिद्ध्या इदानीन्तनत्वाघटितसामान्यमुखव्याप्तिम् आह – **यः**

द्विजातित्वे सति इति । तस्या **लिङ्गत्वासंभवात्** इति । पक्षनिष्ठत्वाभावात् इति भावः । **लिङ्गघटकत्वेऽपि** इति । इच्छायाः इष्टसाधनत्वरूपलिङ्गघटकत्वेऽपि इत्यर्थः । इच्छाविषयसाधनत्वं हि इष्टसाधनत्वम् । **तद्वत्ताज्ञानानिर्वाहकत्वात्** इति । इच्छाघटितलिङ्गस्य पक्षनिष्ठत्वेऽपि इच्छायाः पक्षनिष्ठत्वाभावात् इति भावः ।।

अत्र स्वविशेषणवत्ताज्ञानं स्वविशेषणसाक्षात्संबन्धज्ञानमेव । न च– स्वविशेषणसाक्षात्संबन्धस्य पक्षनिष्ठत्वाभावेन हेतुत्वासंभव इति– वाच्यम् । इष्टसाधनत्वस्य पक्षनिष्ठतया हेतुत्वसंभवेन तज्ज्ञानस्य इष्टांशे कामनारूपस्वविशेषण-साक्षात्संबन्धविषयकत्वात् । अथवा अतोऽपि लाघवेन स्वविशेषणवत्ताज्ञानं स्वविशेषणज्ञानमेव । इष्टसाधनत्वज्ञानस्य कामनारूपस्वविशेषणविषयकत्वात् तस्य स्वविशेषणज्ञानरूपत्वम् इत्याह – **वस्तुतः** इत्यादिना । **श्रमादिभिन्नत्वे सति** इति । इष्टसाधनताज्ञानशून्यकाले इष्टसाधनत्वघटितहेत्वसंभवेन श्रमे व्यभिचारापत्त्या श्रमादिभिन्नत्वघटित एव हेतुः इति भावः ।।

ननु श्रमे व्यभिचारवारणाय श्रमभिन्नत्वं देयम् । तत्र इष्टसाधनताज्ञानशून्यकाले प्रवृत्त्यदर्शनेन इष्टसाधनत्वमेव दीयत इति आशङ्कायाम् आह – **यद्वा स्वेच्छाधीन** इति । **द्वितीयहेतुज्ञान** इति । पूर्वहेतोः अस्वरसग्रस्तत्वात् इति भावः ।।

सुबोधिनीकारास्तु – द्विजातित्वे सति इति । ''आलस्यादिशून्यत्वे सति'' इत्यस्य उपलक्षणम् एतत् । अन्यथा आलस्यादिना अकृतसन्ध्यावन्दने द्विजातौ व्यभिचारापत्तेः । **अनुमानसंभवेऽपि** इति । पाकयागादिपक्षकानुमान-संभवेऽपि । **पक्षे तद्वत्ता** इति । पाकादौ प्रकृतपक्षे इच्छारूपलिङ्गवत्ताज्ञाना-संपादकत्वात् इत्यर्थः । लिङ्गज्ञाने इच्छायाः निरूपितत्वसंबन्धेन विषयत्वे एव अवगाहनात् इति भावः । परंपरायाः संबन्धत्वानङ्गीकारेऽपि न अत्र क्षतिः इति

दर्शयति – **वस्तुत इति** । "स्वविशेषणवत्ता" इत्यत्र मतुपः संबन्धार्थकत्वम् अभिप्रेत्य आह – **तत्संबन्धज्ञानम् इति** । लाघवम् अभिसन्धाय आह – **तज्ज्ञानमेव वा इति** । सत्तावत्त्वं साधर्म्यम् इत्यादौ यथा सत्तैव साधर्म्यम् अभिमतम्, न तु तत्संबन्धः, तथा अत्रापि इति ज्ञेयम् । **श्रमादिभिन्नत्वे सति** इति । एतद्दलाघटितं श्रमादिव्यभिचारवारकलघुविशेषणघटितं हेत्वन्तरं दर्शयति – **यद्वा इति** – इति व्याचक्षते ॥

ननु स्वविशेषणवत्ता इत्यादि । यदि स्वविशेषणवत्ताप्रतिसन्धानजन्यं कार्यताज्ञानं प्रवर्तकं, तदा "पाक इष्टसाधनम्" इति ज्ञानशून्यकालेऽपि स्वस्य प्रवर्तमानस्य पुरुषस्य विशेषणीभूता या कृतिः तत्संबन्धस्य स्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपस्य मत्कृतिं विना असत्त्वरूपस्य पाके ज्ञानात् यदा कार्यतानुमितिः तदापि प्रवृत्त्यापत्तिः इत्यर्थः । **स्वेच्छाधीन इति** । पाकविषयकेच्छाधीन इत्यर्थः । **मत्कृतिव्यतिरेक इति** । मत्कृतेरभावे योऽभावः पाकाभावः तत्प्रतियोगित्वात् पाकस्य इत्यर्थः । **यद्वा स्वेच्छा इति** । पाकविषयकेच्छाधीना या पाकविषयिणी मत्कृतिः तां विना असत्त्वात् इत्यर्थः । श्रमादौ व्यभिचारवारणाय **श्रमादिभिन्नत्वे सति इति** । **यागपाकादि इति** । यागपाकादेः यत् फलं स्वर्गभोजनादि तद्गोचर इत्यर्थः । **तादृशकामनारूपमेव इति** । पाकयागादिफलविषयकेच्छारूपमेव इत्यर्थः । **स्वविशेषणम् इति** । प्रवर्तमानपुरुषविशेषणम् इत्यर्थः । **स्वविषयसाधनत्वरूपम् इति** । कामनाविषयभूतफलसाधनत्वरूपम् इत्यर्थः । **द्वितीयहेतुज्ञान इति** । "स्वेच्छाधीनमत्कृतिं विना असत्त्वात्" इति पूर्वोक्तद्वितीयहेतुज्ञानेत्यर्थः । तादृशहेतुज्ञानस्य स्वविशेषणीभूता या इच्छा तत्संबन्धविषयकज्ञानरूपत्वात् तज्जन्यत्वाच्च अनुमितिरूपकार्यताज्ञानस्य इति भावः । संबन्धश्च स्वाधीनमत्कृतिं

विना असत्त्वरूपः । स्वविशेषणवत्त्वं स्वविषयसाधनत्वरूपम् इत्युक्तौ तु उक्तसंबन्धस्य अतादृशत्वात् न उक्तदोष इति भावः ॥

प्रवृत्त्यापत्तिः इति । मधुविषसंपृक्तान्नभोजनेऽपि तृप्तिरूपेष्टसाधनता-ज्ञानजन्यस्य कार्यताज्ञानस्य सत्त्वात् इति भावः । **देयम्** इति । तथा च बलवदनिष्टाननुबन्धित्वविशिष्टं यत् इच्छाविषयसाधनत्वं तज्ज्ञानाधीनं कार्यताज्ञानं प्रवृत्तिहेतुः इति फलितम् । मधुविषसंपृक्तान्नभोजने तादृशविशिष्टज्ञानजन्यकार्यता-ज्ञानविरहात् न प्रवृत्तिः इति भावः ॥

सन्ध्यावन्दने प्रवृत्त्यापत्तिः इति । काम्यस्थले एव कामनायाः स्वविशेषणत्वात् इति भावः ॥

स्ववृत्तिजीवनवत्त्वस्य संबन्धत्वं स्वीकृत्य कालस्य विशेषणत्वापेक्षया लाघवात् आह – **विहितकालजीवित्वादेः** इति ॥

नियमादिघटित इति । नियतपश्चाद्भावित्वरूपजन्यत्वस्य नियमादि-घटितत्वात् इति भावः । **विषयत्वस्य** इति । इष्टसाधनत्वकृतिसाध्यत्वयोः एकज्ञानविषयत्वरूपसंबन्धस्य नियमादिघटितजन्यत्वापेक्षया लघुत्वात् इति भावः । **इष्टोत्पत्तिनान्तरीयकम्** इति । इष्टोत्पत्तिनियतपूर्वोत्पत्तिकम् इत्यर्थः । **अतिरिक्तम्** – अधिकम् । **अप्रसिद्ध्यभावात्** इति । इष्टोत्पत्तिनान्तरीयकदुःखस्य इति शेषः ॥

तादृशं कर्मास्ति, यत्र नान्तरीयकं दुःखं न भवति । ''कष्टं कर्म'' इति तु उत्सर्ग इत्याशयेन समाधानान्तरम् आह – **मिश्रास्तु** इति । इष्टोत्पत्तिनान्तरीयकं दुःखं श्रमादि अनन्तरीयकं दुःखं नरकादि तदजनकत्वज्ञानं प्रवर्तकम् इत्यर्थः । न च – एवमपि चैत्यवन्दनादौ स्वजन्येष्टाप्रसिद्ध्या प्रवृत्त्यभावप्रसङ्ग इति –

वाच्यम् । इष्टसाधनताभ्रमवतामेव तत्र प्रवृत्तिदर्शनात् इष्टे स्वजन्यत्वभ्रमेण तदुपपत्तेः ।।

ननु एवं सति इति । कस्यचित् परदाराभिगमनं नरकसाधनम् इति प्रमात्मकं ज्ञानं वर्तते । तथापि उत्कटरागवशात् तत्र प्रवर्तते। सा प्रवृत्तिः कथम् उपपद्येत ? इष्टोत्पत्त्यनान्तरीयकनरकदुःखसाधनत्वनिश्चयसत्त्वेन तादृशदुःखाजनकत्वज्ञानविरहात् इत्यतः बलवदनिष्टाननुबन्धित्वं प्रकारान्तरेण परिष्करोति इत्यर्थः । परदारगमने यदा उत्कटेच्छा तदा तज्जन्यनरके बलवान् द्वेषो नास्ति इति भावः । ननु पूर्वं बलवत्त्वं दुर्वचम् इत्युक्तम् । तस्य अस्मिन् पक्षे कः परिहारः इति, अत आह–बलवत्त्वं जातिविशेष इति । अत एव इति । द्वेषे बलवत्त्वनिवेशादेव । रागान्धस्य–उत्कटेच्छया अभिभूतनरक-जनकत्वज्ञानस्य । तादृशो द्वेषः–बलवान् द्वेषः । तद्धेतावपि–वस्तुतः नरकहेतावपि परदाराभिगमनादौ प्रवृत्तिः इत्यर्थः । अनाद्यक्षणवृत्तित्वविशिष्टस्य – आद्यक्षण-भिन्नक्षणवृत्तित्वविशिष्टस्य इत्यर्थः । कृत्यव्यवहित इत्यादि । कृत्यव्यवहितोत्तर-क्षणवृत्तित्वरूपस्य कृतिसाध्यत्वस्य पाकोत्पत्तिक्षण एव पाकवृत्तित्वात् किंचित्कालानन्तरभाव्योदनादिरूपेष्टसाधनत्वस्य पाके ओदनाव्यवहितपूर्वक्षणवृत्तितया उत्पत्तिक्षणे पाकावृत्तित्वात् तयोः कृतिसाध्यत्वेष्टसाधनत्वयोः एकक्षणावच्छेदेन एकत्र अवृत्तित्वरूपः विरोधः इति तयोः युगपत्–एककालावच्छेदेन ज्ञातुम् अशक्यत्वम् इति भावः ।।

यद्यपि इत्यादि । आद्यक्षणवृत्तित्वविशिष्टे पाके फलाव्यवहितपूर्ववृत्तित्वरूप-फलोपधायकत्वरूपम् ओदनसाधनत्वं नास्ति यद्यपि, तथापि ओदनाव्यवहित-पूर्वक्षणवृत्तितावच्छेदकपाकत्ववत्त्वरूपं स्वरूपयोग्यत्वरूपम् ओदनसाधनत्वं तत्र अस्ति इति कथं साध्यत्वसाधनत्वयोः विरोधः इति शङ्का । समाधानं तु– पाकः

ओदनस्वरूपयोग्यः न ओदनोपधायक इति ज्ञानात् प्रवृत्तेः अनुत्पत्त्या फलोपधायकत्वरूपेष्टसाधनत्वज्ञानमेव प्रवृत्तिजनकं वक्तव्यम् । फलाव्यवहितपूर्वक्षण-वृत्तित्वरूपं फलोपधायकत्वं तु आद्यक्षणावच्छेदेन पाके नास्ति इति कृतिसाध्यत्वेष्टसाधनत्वयोः विरोधः संभवति इति भावः ।।

साध्यत्वसाधनत्वयोः इति । एतावता साध्यत्वसाधनत्वयोः एकक्षणावच्छेदेन एकत्र अवृत्तित्वरूपः विरोधः उक्तः । अथ कृतिसाध्यत्वेष्ट-साधनत्वयोः एकज्ञान-विषयत्वमपि न संभवति इत्याह इत्यर्थः । तदेव उपपादयति – **अव्याप्य-वृत्तिपदार्थस्य** इत्यादिना । किंचिदवच्छेदेन वर्तमानः पदार्थः अव्याप्यवृत्तिपदार्थः । यथा संयोगादिः । तस्य स्वावच्छेदकेन साकमेव ज्ञानविषयत्वं भवति । स्वावच्छेदकाविषयकम् अव्याप्यवृत्तिपदार्थविषयकं ज्ञानं न संभवति इति यावत् । ''मूले वृक्षः कपिसंयोगी'' इत्येव प्रतीतेः, अवच्छेदकानवगाहिन्याः ''वृक्षः संयोगी'' इति प्रतीतेः अभावात् । एवं साध्यत्वसाधनत्वयोः कालविशेषावच्छिन्नयोः कालिकाव्याप्यवृत्तितया स्वस्वावच्छेदककालविषयकमेव ज्ञानं समूहालम्बनरूपं भवति इति वक्तव्यम् । तदाकारः ''आद्यक्षणविशिष्टः पाकः कृतिसाध्यः'', ''आद्यक्षणेतरक्षणविशिष्टः पाकः इष्टसाधनम्'' इति । एतादृशं ज्ञानं तु न संभवति । सिद्धत्वासिद्धत्वज्ञानयोः परस्परं विरोधित्वात् इति समुदायार्थः । **अव्याप्यवृत्तिपदार्थस्य** इत्यत्र षष्ठ्याः निरूपकतया ज्ञानान्वयि विषयत्वमर्थः । **असिद्धः** – आद्यक्षणवृत्तित्व-विशिष्टः । **सिद्धः** – अनाद्यक्षणवृत्ति-त्वविशिष्टः ।।

ननु इष्टसाधनत्वज्ञानस्य नियमेन सिद्धत्वविषयकत्वे वृष्ट्यादौ इच्छा न स्यात्, सिद्धत्वज्ञानस्य इच्छाविरोधित्वात् इति चेत्, न । स्वातन्त्र्येण ''वृष्टिः भवतु'' इति इच्छायाः गुरुभिः अस्वीकारात् । ''वृष्टिसाध्यं सुखं भवतु'' इति

इच्छाया एव तैः अङ्गीकारात्। अननुगमात् इति । तथा च विशिष्यैव निवेशनीयतया तद्विषयकज्ञानानामपि अनुगतरूपेण हेतुत्वं न संभवति इति भावः ।।

मुक्तावली

मैवम् । लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य तत्र हेतुत्वात् । न च साध्यत्वसाधनत्वयोः विरोधः, यदा कदाचित् साध्यत्वसाधनत्वयोः अविरोधात् एकदा साध्यत्वसाधनत्वयोश्च ज्ञानात् ।।

नव्यास्तु – "मम इदं कृतिसाध्यम्" इति ज्ञानं न प्रवर्तकम्, अनागते तस्य ज्ञातुम् अशक्यत्वात् । किन्तु यादृशस्य पुंसः कृतिसाध्यं यद् दृष्टं, तादृशत्वं स्वस्य प्रतिसन्धाय तत्र प्रवर्तते । तेन ओदनकामस्य तत्साधनताज्ञानवतः तदुपकरणवतः "पाकः कृतिसाध्यः, तादृशश्च अहम्" इति प्रतिसन्धाय पाके प्रवर्तते इति – आहुः ।।

तन्न – स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना संभोगादौ च तदभावात् ।।

इदं तु बोध्यम् – इदानीन्तनेष्टसाधनत्वादिज्ञानं प्रवर्तकम् । तेन भावियौवराज्ये बालस्य न प्रवृत्तिः, तदानीं कृतिसाध्यत्वाज्ञानात् । एवं तृप्तश्च भोजने न प्रवर्तते, तदानीम् इष्टसाधनत्वाज्ञानात् । प्रवर्तते च रोषदूषितचित्तः विषादिभक्षणे, तदानीं बलवदनिष्टाननुबन्धित्वज्ञानात् ।।

न च – आस्तिकस्य अगम्यागमनशत्रुवधादिप्रवृत्तौ कथं बलवदनिष्टाननुबन्धित्वबुद्धिः? नरकसाधनत्वज्ञानात् इति – वाच्यम् । उत्कटरागादिना नरकसाधनताधीतिरोधानात् । वृष्ट्यादौ कृतिसाध्यत्वज्ञानाभावात् न चिकीर्षाप्रवृत्ती । किन्तु इष्टसाधनताज्ञानात् इच्छामात्रम् ।।

कृतिश्च प्रवृत्तिरूपा बोध्या । तेन जीवनयोनियत्नसाध्ये प्राणपञ्चकसञ्चारे न प्रवृत्तिः ।।

दिनकरी

प्राणित्वस्यापि पुरुषविशेषणत्वेन ''अहम् इदानीन्तनकृतिसाध्यविषभक्षणः, प्राणित्वात्'' इत्याद्यनुमितिसंभवात् विषभक्षणसाधारणं स्वविशेषणवत्ताप्रतिसन्धान-जन्यकार्यताज्ञानम् इति बलवदनिष्टाननुबन्धीष्टसाधनताशौचाद्यन्यतरलिङ्गप्रतिसन्धानजन्य कार्यताज्ञानं प्रवर्तकं वाच्यम् । तदपेक्षया बलवदनिष्टाननुबन्धीष्टसाधनताविषयक कार्यताज्ञानम् अतिलघु इति तदेव काम्यनित्यसाधारणकारणत्वेन कल्प्यत इति अभिप्रायेण प्राभाकरमतं दूषयति – मैवम् इति । साध्यत्वसाधनत्वयोः विरोधं दूषयति – न च इति । न हि इत्यर्थः । यदा कदाचित् इति । यत्किञ्चित्कालीनस्य साध्यत्वस्य यत्किञ्चित्कालीनेन साधनत्वेन विरोधाभावात् इत्यर्थः । तथा च एककालीनकृतिसाध्यत्वेष्टसाधनत्वयोः विरोधेऽपि न क्षतिः । तथा ज्ञानस्य अस्माभिः कारणत्वानङ्गीकारात् । किन्तु निर्विशेषितयोः सामान्यतः कृतिसाध्यत्वेष्ट-साधनत्वयोः ज्ञानस्यैव हेतुत्वाङ्गीकारात् इति भावः ।।

तादृशं च ज्ञानं संभवति इत्याह – एकदा इति । इदं च ज्ञानान्वयि । ज्ञानात् – ज्ञानसंभवात् ।।

मूलाद्यनवगाहिनोऽपि ''वृक्षः संयोगी'' इति ज्ञानस्य आनुभविकतया अव्याप्यवृत्तेः ज्ञानं स्वावच्छेदकविषयमेव इति नियमे मानाभावात् न पूर्वोक्तदोष इति ध्येयम् ।।

प्राभाकरानुयायिनवीनमतम् आह – नव्यास्तु इति । ज्ञातुम् अशक्यत्वात् इति । सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारेण प्रत्यक्षस्य, पक्षज्ञानाभावेन अनुमितेश्च असंभवात् इति भावः ।।

तदभावात् – यादृशस्य पुंसः कृतिसाध्यं यद्दृष्टं तादृशत्वज्ञानाभावात् ।।

ननु इष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वे भावियौवराज्ये प्रवृत्त्यापत्तिः, अत आह – इदं तु बोध्यम् इति । ''इष्टसाधनत्वादि'' इत्यत्र ''आदि'' – पदोपगृहीतस्य इदानीन्तनकृतिसाध्यत्वघटककृतौ इदानीन्तनत्वविशेषणस्य प्रयोजनम् आह – तेन भावि इति । इष्टसाधनत्वघटकेच्छायां तद्विशेषणस्य प्रयोजनम् आह – एवं तृप्त इति । ''बलवदनिष्ट'' इत्यत्र बलवद्द्वेषे तद्विशेषणप्रयोजम् आह – प्रवर्तते च इति । प्रवृत्तौ – प्रवृत्तेः पूर्वम् । नरकसाधनत्वज्ञानात् इति । नरकरूपबलवदनिष्टसाधनत्वज्ञानात् इत्यर्थः । उत्कटरागादिना इति । अगम्यागमनादिसुखे उत्कटरागादिना इत्यर्थः । नरक इति । बलवदनिष्टेत्यर्थः । तिरोधानात् अनुत्पादनात् । तादृशसुखे उत्कटरागसत्त्वे अगम्यागमनजन्यनरके बलवद्द्वेषानुदयात् इति भावः । प्रवृत्तिरूपा इति । ''कृतिसाध्यताज्ञानम्'' इत्यत्र प्रवृत्तित्वेन कृतेः प्रवेश इत्यर्थः ।।

स्वेच्छाधीनकृतिसाध्यताज्ञानस्य हेतुत्ववादिमणिकृन्मतेऽपि स्वेच्छाधीनत्वं कृतिविशेषणं प्रवृत्तिरूपकृतिलाभायैव इति भावः । इत्थं च तद्व्यापारीभूतेच्छापि प्रवृत्तिसाध्यत्वप्रकारिका बोध्या, ज्ञानेच्छयोः समानप्रकारकत्वेन हेतु-हेतुमद्भावात् इति ।।

तेन – प्रवृत्तित्वेन निवेशेन । प्राणपञ्चकसञ्चारे न प्रवृत्तिः इति । न च – प्राणानाम् अतीन्द्रियतया तदुपादानप्रत्यक्षाभावादेव न प्राणोपादानकसञ्चार-साध्यकप्रवृत्त्यापत्तिः इति – वाच्यम् । प्राणवहनाड्युपादानकप्राणसञ्चारसाध्यक-प्रवृत्त्यापत्तिवारणायैव प्रवृत्तिसाध्यताज्ञानहेतुत्वाङ्गीकारात् ।।

यद्यपि प्राणसञ्चारावृत्तिविशेष्यतासंबन्धेन कृतिसाध्यताज्ञानहेतुत्वाङ्गीकारादेव तथाप्रवृत्तिवारणं संभवति, तथापि घटादौ जीवनयोनियत्नसाध्यत्वभ्रमात्

प्रवृत्त्यापत्तिवारणाय प्रवृत्तिसाध्यत्वज्ञानत्वेन हेतुत्वम् आवश्यकम् इति ध्येयम् ।।

एतेन–प्राणपञ्चकसञ्चारे प्रवृत्तिवारणाय प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेऽपि प्रवृत्तिसाध्यत्वभ्रमात् प्राणसञ्चारे प्रवृत्त्यापत्तिः दुर्वारा इति – अपास्तम् ।।

न च – प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेऽपि भोजननान्तरीयके श्रमे साध्यतया प्रवृत्त्यापत्तिः दुर्वारा इति – वाच्यम् । तादृशश्रमे चिकीर्षाविरहादेव प्रवृत्त्यनुत्पत्तेः । तत्र चिकीर्षाविरहश्च श्रमस्य दुःखरूपतया दुःखत्वज्ञानस्य इच्छाप्रतिबन्धकतया इच्छासामान्यसामग्रीविरहादेव । एतेन नान्तरीयकश्रमे प्रवृत्त्यापत्तिवारणाय स्वेच्छाधीनकृतिसाध्यंताज्ञानस्य हेतुत्वं वाच्यम् इति मणिकृन्मतम् अपास्तम् ।।

न च – सुखे प्रवृत्तिसाध्यताज्ञानेच्छयोः सत्त्वात् तत्र साध्यताख्यविषयतासंबन्धेन प्रवृत्त्यापत्तिः इति – वाच्यम् । साध्यतया प्रवृत्तिं प्रति फलत्वज्ञानस्य प्रतिबन्धकत्वात् ।।

वस्तुतस्तु तत्तद्धर्मान्यवृत्तिविषयतासंबन्धेन ज्ञानं प्रति तत्तद्धर्मभेदस्य हेतुतायाः तत्र तत्र व्यवस्थापितत्वात्, तत्र च कार्यतावच्छेदककोटौ ज्ञानत्वस्थाने गुणत्वमेव निवेशनीयम् ।।

एवं च सुखत्वान्यवृत्तिविषयतासंबन्धेन गुणत्वस्य कृतिसाध्यताज्ञानजन्यतावच्छेदकीभूतं यत् साध्यताख्यविषयतावच्छेदकसंबन्धेन प्रवृत्तित्वं तद्व्यापकतया तदवच्छिन्नजनकसुखत्वभेदस्य सुखत्वेऽभावादेव न तत्र साध्यताख्यविषयतावच्छेदकतया प्रवृत्त्यापत्तिः । व्याप्यधर्मावच्छिन्नजनकसामग्र्या फलजनने व्यापकधर्मावच्छिन्नजनकसामग्र्या अपेक्षितत्वात् । अनयैव च रीत्या प्राणसञ्चारत्वे श्रमत्वे च साध्यताख्यविषयतावच्छेदकतासंबन्धेन प्रवृत्तिवारणं बोध्यम् ।।

एतदेव हृदि निधाय प्राणसञ्चारस्य प्रवृत्त्ययोग्यत्वादेव न तत्र प्रवृत्तिः इति **मिश्रैः अभिहितम्** इति दिक् ।।

राजीवोल्लासः

मैवम् इत्यादिग्रन्थम् अवतारयति – **प्राणित्वस्यापि** इत्यादिना । स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यत्वज्ञानं प्रवर्तकम् इति **गुरुमते** दोषान्तरमपि भवति । तथा हि – कामना-काल-शौचादिकं यथा स्वविशेषणं – प्रवर्तमानपुरुष-विशेषणं, तथा प्राणित्वमपि तद्विशेषणम् । तथा सति "अहम् इदानींतनकृतिसाध्यविषभक्षणः, प्राणित्वात्" इत्याद्यनुमितिसंभवात् तादृशानुमितिरपि स्वविशेषणभूतप्राणित्वप्रतिसन्धानजन्यकार्यत्वज्ञानरूपा भवति इति ततोऽपि विषभक्षणादौ प्रवृत्त्यापत्तिः । तस्मात् स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानं प्रवर्तकम् इति सामान्यतः वक्तुं न शक्यते । किं तु बलवदनिष्टाननुबन्धित्वविशिष्ट-इष्टसाधनत्व-शौचाद्यन्यतरलिङ्गप्रतिसन्धानजन्यकार्यताज्ञानं प्रवर्तकम् इति – वाच्यम् । पूर्वोक्तप्राणित्वस्य तदन्यतरानन्तर्गतत्वात् न दोषः । तदपेक्षया बलवदनिष्टाननुबन्धित्वविशिष्ट-इष्टसाधनत्वविषयककार्यताज्ञानम् अतिलघु इति तदेव काम्यनित्यसाधारणप्रवृत्तिकारणत्वेन कल्प्यत इत्यभिप्रायेण **प्राभाकरमतं** दूषयति – **मैवम्** इत्यादिना इति भावः । **तथा ज्ञानस्य** इति । एककालीनयोः कृतिसाध्यत्व-इष्टसाधनत्वयोः ज्ञानस्य इत्यर्थः । एककालीनत्वावगाहिनः कृतिसाध्यत्वविशिष्ट-इष्टसाधनत्व-प्रकारकज्ञानस्य इति यावत् । **निर्विशेषितयोः** इति । किंचित्कालनवच्छिन्नयोः इत्यर्थः । एककालीनत्वाविशेषितयोः इति यावत् । **सामान्यतः** इति । कृतिसाध्यत्वत्व-इष्टसाधनत्वत्वादिरूपेण इत्यर्थः । **इदं च ज्ञानान्वयि** इति । **एकदा** इत्यस्य संनिहितेन **साध्यत्वसाधनत्वयोः** इत्यनेन अन्वये पूर्वदर्शितरीत्या विरोधसंभवात् इति भावः । एकदा तयोः ज्ञानं

च प्राभाकरैः अपि अवश्यम् अङ्गीकार्यम् । अन्यथा प्रकृतसाध्यसाधनयोः सहचारग्रहासंभवात् अनुमितेः अनुपपत्तेः ।।

ननु एवमपि अव्याप्यवृत्तिपदार्थस्य स्वावच्छेदकानवगाहि ज्ञानं न संभवति इति पूर्वोक्तस्य आक्षेपस्य समाधानं न उक्तम् इत्याशङ्कायाम् आह – **मूलाद्यनवगाहिनोऽपि** इति । मूलाद्यवच्छेदकाविषयकस्यापि "वृक्षः संयोगी" इति ज्ञानस्य अनुभवसिद्धतया अव्याप्यवृत्तिपदार्थविषयकं ज्ञानं स्वावच्छेदकविषयकमेव इति नियमे प्रमाणाभावात् न पूर्वोक्तदोष इति । इत्थं च "पाकयागादिकं बलवदनिष्टाजनकम् इष्टसाधनं कृतिसाध्यं च" इत्याकारकं समूहालम्बनज्ञानं प्रवृत्तिजनकम् इति सिद्धम् ।।

ननु वर्तमानयत्किंचित्पाकदर्शने पाकत्वसामान्यलक्षणया सर्वपाकप्रत्यक्ष-संभवात् अनागतपाकेऽपि कृतिसाध्यताज्ञाने न किमपि बाधकम् इति, अत आह – **सामान्यलक्षण** इति । **प्रत्यक्षस्य** इति । पक्षप्रत्यक्षस्य इत्यर्थः । अस्य **असंभवात्** इत्यनेन अन्वयः । ननु मास्तु अनागतपाकस्य इदानीं प्रत्यक्षम्, तथापि तत्र कृतिसाध्यत्वानुमितिः संभवेदेव । अनुमितौ अतीन्द्रिय-विषयकत्वस्यापि स्वीकारात् इति, अत आह – **पक्षज्ञानाभावेन** इति । अत्र एवं **प्राचीनप्राभाकराः** – यथा पर्वतीयवह्नेः पूर्वम् अज्ञातत्वेऽपि वह्नित्वेन पर्वते वह्न्यनुमितिः, तथा पाकत्वेन रूपेण अनागतपाकेऽपि कृतिसाध्यत्वानुमितिः संभवत्येव। अनुमितौ पक्षसाध्ययोः अप्रसिद्धौ अविशेषात् । यद्वा "अयं कालः पाकप्रागभाववान्, सृष्टिकालत्वात्" इति वा, "अयं पाकः पाकपूर्ववर्ती पाकत्वात्" इति वा अनुमानेन भाविपाकस्य ज्ञानं संभवति इति ।।

इष्टसाधनताज्ञानस्य इति । इष्टसाधनतादिज्ञानस्य इत्यर्थः । **भावियौव-राज्ये** – भावियौवराज्यादौ । अयं भावः – इदानीन्तनेच्छाविषयसाधनत्वज्ञानं,

इदानीन्तनकृतिसाध्यत्वज्ञानं, इदानीन्तनबलवद्द्वेषविषयाजनकत्वज्ञानं च प्रवृत्तिं प्रति कारणम् इति वक्तव्यम् । तत्र इष्टसाधनत्वघटकेच्छायाम् इदानीन्तनत्व-विशेषणाभावे तृप्तस्य ''कालान्तरीयेच्छाविषयतृप्तिसाधनं भोजनम्'' इति ज्ञानात् इदानीं भोजने प्रवृत्त्यापत्तिः । तद्वारणाय इच्छायाम् इदानीन्तनत्वविशेषणम् । तथा सति तृप्तस्य इदानीन्तनेच्छाविषयत्वं तृप्तौ नास्ति इति न दोषः । कृतिसाध्यत्वघटककृतौ इदानीन्तनत्वानिवेशे बालस्य इदानीं यौवराज्ये प्रवृत्त्या-पत्तिः । तत्र भाविकृतिसाध्यत्वज्ञानात् । तन्निवेशे तु बालस्य इदानीन्तनकृति-साध्यत्वं यौवराज्ये न ज्ञायत इति न दोषः । ''बलवदनिष्ट'' इत्यत्र बलवद्द्वेषे इदानीन्तनत्वानिवेशे रोषदूषितचित्तस्य इदानीं विषादिभक्षणे प्रवृत्त्यनुपपत्तिः । कालान्तरीयद्वेषविषयानुबन्धित्वज्ञानसद्भावात् । तन्निवेशे च इदानीं तस्य मरणदुःखे द्वेषाभावात् इदानीन्तनद्वेषविषयानुबन्धित्वाभावज्ञानसत्त्वात् प्रवृत्त्युपपत्तिः । **नरकसाधनत्वज्ञानात् इति** इति । नरके बलवद्द्वेषाभावकाले तत्साधनताज्ञानं न प्रवृत्तिप्रतिबन्धकम् इत्यतः आशयं प्रकटयति – **नरकरूप** इति । **उत्कटरागादिना इत्यर्थः** इति । ''आदि''ना उत्कटसंहारेच्छायाः परिग्रहः । **बलवद्द्वेषानुदयात्** इति । रागनिष्ठोत्कटत्वजातेः उत्कटद्वेषप्रतिबन्धकतावच्छेदकत्वात् इति भावः ।।

प्रवृत्तिः निवृत्तिः जीवनयोनिः इति कृतिः त्रिधा इति मूले वक्ष्यति । प्रकृते प्रवृत्तिं प्रति कृतिसाध्यताज्ञानं कारणम् इत्यत्र कृतिपदेन प्रवृत्तिरूप-कृतिःविवक्षिता । निवृत्तिरूपकृतिसाध्यताज्ञानसत्त्वे प्रवृत्त्यनुदयेन अन्वयव्यभिचारात् इत्याशयेन आह – **प्रवृत्तित्वेन कृतेः** इति ।।

ननु तथा सति **मणिकाराणां** कृतौ स्वेच्छाधीनत्वविशेषणदानम् अनुपपन्नं स्यात्। गौरवेण तथा हेतुत्वासंभवात् इति शङ्काम् अपनुदति – **स्वेच्छा**

इति । **प्रवृत्तिरूपकृतिलाभाय** इति । निवृत्तिरूपकृतेः स्वेच्छाधीनत्वाभावात् इति भावः । ननु अस्तु प्रवृत्तिसाध्यताज्ञानं प्रवृत्तिहेतुः । तथापि तद्व्यापारभूतायां चिकीर्षायां कृतेः कृतित्वेन प्रवेशोऽस्तु, दोषाभावात् इति शङ्काम् अपनुदति – **इत्थं च** इति । **प्रवृत्तित्वेन निवेशेन** इति । प्रवृत्तित्वेन कृतेः निवेशेन इत्यर्थः । **न च प्राणानाम्** इति । जीवनयोनियत्नसाध्ये प्राणपञ्चकसंचारे प्रवृत्तेः वारणाय प्रवृत्तिसाध्यताज्ञानं हेतुः इति न युक्तम्। तत्साध्यकप्रवृत्तिं प्रति तदुपादानविषयकप्रत्यक्षस्यापि कारणतया प्राणस्य अतीन्द्रियतया प्राणरूपोपादानविषयकप्रत्यक्षाभावादेव प्राणोपादानकसंचारसाध्यकप्रवृत्तेः आपत्त्यसंभवात् इति शङ्का । समाधत्ते – **प्राणवह** इति । यद्यपि प्राणवहनाड्याः प्राणसमवायिकारणत्वरूपं प्राणोपादानत्वं नास्ति, तथापि उत्तरत्र **उपादानपदम् अधिष्ठानपरम्** इति **वक्ष्यमाणतया** उपादानत्वोक्तिः । तथा च तत्साध्यकप्रवृत्तिं प्रति तदधिष्ठानविषयकप्रत्यक्षं कारणम् इत्युक्तं भवति । प्राणवहनाड्याश्च प्रत्यक्षत्वात् न उक्तदोष इति भावः ।।

यद्यपि इत्यादि । यद्यपि प्राणसंचारे प्रवृत्तिवारणाय प्रवृत्तित्वावच्छिन्नकृतिसाध्यताज्ञानं कारणम् इति न वाच्यम् । प्राणसंचारावृत्तिविशेष्यतासंबन्धेन प्रवृत्तिं प्रति कृतिसाध्यताज्ञानं कारणम् इत्यङ्गीकारादेव प्राणसंचारविशेष्यकप्रवृत्तेः वारणसंभवात्, तथापि यस्य घटादिविशेष्यकजीवनयोनियत्नसाध्यत्वभ्रमो वर्तते तस्य तादृशभ्रमः प्राणसंचारावृत्तिविशेष्यताक इति घटादौ प्राणसंचारावृत्तिविशेष्यतासंबन्धेन जीवनयोनिरूपकृतिसाध्यताज्ञानसत्त्वात् प्रवृत्त्यापत्तिः । तद्वारणाय प्रवृत्तित्वावच्छिन्नकृतिसाध्यत्वज्ञानत्वेन हेतुत्वं वक्तव्यम् इति भावः । **एतेन** इति । प्राणसंचारावृत्तिविशेष्यतायाः एव कारणतावच्छेदकसंबन्धत्वाङ्गीकारेण इत्यर्थः । प्रवृत्तित्वेन कृतिसाध्यताज्ञानस्य हेतुत्वेऽपि प्राणसंचारे प्रवृत्तिसाध्यत्वभ्रमात्

प्रवृत्त्यापत्तिः । तद्वारणाय प्राणसंचारावृत्तिविशेष्यतासंबन्धेन प्रवृत्तिसाध्यताज्ञानं कारणं वक्तव्यम् । न च– एवम् अपि घटादौ प्रवृत्तिसाध्यत्वभ्रमात् प्रवृत्त्यापत्तिः इति वाच्यम्। इष्टापत्तेः ।।

न च इत्यादि । प्रवृत्तिसाध्यताज्ञानस्य प्रवृत्तिं प्रति हेतुत्वेऽपि भोजननान्तरीयके उपवेशनादिश्रमे प्रवृत्तिसाध्यताज्ञानसत्त्वात् प्रवृत्त्यापत्तिः इति न आशङ्कनीयम् । भोजने चिकीर्षासत्त्वेऽपि भोजननान्तरीयकश्रमे चिकीर्षाविरहादेव प्रवृत्त्यनुत्पत्तेः । न च– श्रमे चिकीर्षा कुतो नास्ति? इति– वाच्यम् । श्रमस्य दुःखरूपतया दुःखत्वज्ञानम् अस्ति इति तस्य ज्ञानस्य इच्छां प्रति प्रतिबन्धकतया इच्छासामान्यसामग्रीविरहादेव चिकीर्षाया अनुत्पत्तेः । प्रतिबन्धकाभावस्यापि सामग्र्याम् अन्तर्भावात्। एतेन इत्यादि । चिकीर्षाविरहादेव नान्तरीयकश्रमे प्रवृत्तिवारणसंभवेन नान्तरीयकश्रमे प्रवृत्तिवारणाय स्वेच्छाधीनकृतिसाध्यत्वज्ञानं प्रवृत्तिकारणम् इति **मणिकारोक्तम्** अपास्तम् इत्यर्थः ।।

न च सुखे इति । उद्देश्यताख्यविषयतासंबन्धेन सुखे प्रवृत्तेः इष्टत्वात् साध्यताख्यविषयतासंबन्धेन इत्युक्तम् । ननु चिकीर्षां प्रति तद्द्वारा प्रवत्तिं प्रति च इष्टसाधनताज्ञानस्य हेतुत्वात् तदभावादेव न सुखे प्रवृत्त्यापत्तिः इति चेत् – न । यत्र चिकीर्षायाः उपायेच्छात्वं, तत्रैव इष्टसाधनताज्ञानस्य चिकीर्षां प्रति हेतुत्वम् । तथा च चिकीर्षायां कृतिसाध्यत्वज्ञानजन्यायां तत्तद्विषयकेच्छारूपत्वमेव इष्टसाधनताज्ञानेन संपाद्यते । तत्तु सुखत्वप्रकारकसुख-ज्ञानेनापि इति सुखे चिकीर्षाप्रवृत्त्योः आपादयितुं शक्यत्वात् । सुखसाक्षात्कारस्यापि इष्टत्वेन सुखे तत्साधनताज्ञानात् चिकीर्षाप्रवृत्त्योः आपत्तिः इति परे । **फलत्व-ज्ञानस्य** इति । फलत्वं सुखत्वं सुखदुःखाभावान्यतरत्वं वा ।।

ननु एवं सुखेऽपि साध्यतासंबन्धेन प्रवृत्तेः इष्टत्वात् सुखत्वे साध्यताख्य-विषयतावच्छेदकत्वसंबन्धेन प्रवृत्तिरेव आपादनीया । तत्परिहाराय च प्रतिबन्धकत्वकल्पनं न आवश्यकम्, सहकार्यभावेन उपपत्तेः इति दर्शयति – वस्तुतस्तु इति । ''घटः द्रव्यम्'' इत्यत्र अभेदसंबन्धावच्छिन्नघटत्वावच्छिन्न-प्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन द्रव्यत्वे यथा शाब्दबोधः भवति अनुमितिर्वा, तथा ''घटो घट'' इत्यत्रापि पदजन्यपदार्थोपस्थित्यादिसत्त्वेन घटत्वेऽपि तेन संबन्धेन शाब्दबोधाद्यापत्तिवारणाय तद्धर्मावच्छिन्नाभेदसंबन्धावच्छिन्न-प्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्दबोधं प्रति तद्धर्मभेदः कारणम् इत्यादिरीत्या नानाकार्यकारणभावकल्पनापेक्षया, तद्धर्मान्यवृत्तिविषयतासंबन्धेन ज्ञानं प्रति तद्धर्मभेदः कारणम् इति एकः कार्यकारणभावः कल्पनीयः । तथा सति घटत्वावच्छिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्दबोधाधिकरणेषु द्रव्यत्वप्रमेयत्वादिषु घटत्वान्यवृत्तिविषयतासंबन्धेन ज्ञानमपि अस्ति इति उक्तविशेष्यतावच्छेदकतासंबन्धेन शाब्दबोधं प्रति उक्तविषयतासंबन्धेन ज्ञानं व्यापकम् । व्याप्यधर्मावच्छिन्ने जननीये व्यापकधर्मावच्छिन्नस्य सामग्री अपेक्षिता इति न्यायेन उक्तसंबन्धेन शाब्दबोधत्वावच्छिन्ने जननीये उक्तसंबन्धेन ज्ञानत्वावच्छिन्नसामग्र्यन्तर्गतस्य तद्धर्मभेदस्य आवश्यकत्वात् तादृशघटत्वभेदस्य घटेऽभावात् न घटत्वे घटत्वावच्छिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्य-तावच्छेदकतासंबन्धेन शाब्दबोधापत्तिः इति **व्युत्पत्तिवादे गदाधरभट्टाचार्यैः न्यरूपि** । तत्र तद्धर्मान्यवृत्तिविषयतासंबन्धेन ''ज्ञानं प्रति'' इत्यस्य स्थाने ''गुणं प्रति'' इति निवेश्य तद्धर्मान्यवृत्तिविषयतासंबन्धेन गुणं प्रति तद्धर्मभेदः कारणम् इति वक्तव्यम् । एवं च प्रकृते सुखे साध्यताख्यविषयतासंबन्धेन प्रवृत्तौ आपाद्यमानायां सुखत्वे साध्यताख्यविषयतावच्छेदकतासंबन्धेन प्रवृत्तिः आपादिता भवति ।।

तत्परिहारस्तु इत्थम् – सुखभिन्ने यागपाकादावेव प्रवृत्तेः आनुभाविकतया साध्यताख्यविषयतासंबन्धेन प्रवृत्तिः यागपाकादौ अस्ति, न सुखे । एवं साध्यताख्यविषयतावच्छेदकतासंबन्धेन प्रवृत्तिः यागत्वपाकत्वादौ अस्ति । न तु सुखत्वे । तथा च स्वाश्रयनिरूपितसाध्यताख्यविषयतावच्छेदकतासंबन्धेन प्रवृत्तित्वाधिकरणेषु सर्वेषु यागत्वपाकत्वादिषु सुखत्वान्यवृत्तिस्वाश्रयनिरूपितविषयतासंबन्धेन गुणत्वं वर्तते इति गुणत्वं व्यापकम् । तेन संबन्धेन गुणत्वं प्रति सुखत्वभेदः कारणम् । तस्य सुखत्वेऽभावादेव सुखत्वे स्वाश्रयनिरूपितविषयतावच्छेदकतासंबन्धेन प्रवृत्तित्वं नापादयितुं शक्यते इति भावः ।।

अथ वा किमनेन 'शिरोवेष्टनेन नासिकास्पर्शेन ।। इदम् अत्र आकूतम् । तद्धर्मान्यवृत्तिविषयतासंबन्धेन गुणं प्रति तद्धर्मभेदः कारणम् इति कार्यकारणभावः । गुणपदेन सविषयकज्ञानेच्छाकृत्यादयः ग्राह्याः । तद्धर्मभिन्ने एव तद्धर्मान्यवृत्तिविषयतासंबन्धेन ज्ञानादिगुणः भवति इत्याशयेन अयं कार्यकारणभावः कल्प्यते । प्रवृत्तिस्तु साध्यतासंबन्धेन यागपाकादौ एव भवति, न सुखे। तथा च प्रवृत्तिः साध्यतासंबन्धेन यत्र वर्तते यागादौ, तत्र सुखान्यवृत्तिविषयतासंबन्धेन ज्ञानादिगुणोऽस्ति इति गुणः प्रवृत्तिव्यापकः । सुखे च साध्यतासंबन्धेन प्रवृत्तिः आपाद्यते। सा च आपत्तिः न संभवति । कुत इति चेत् – साध्यतासंबन्धेन प्रवृत्तिं प्रति व्यापकः सुखान्यवृत्तिविषयतासंबन्धेन गुणः, तस्य यत् कारणं सुखभेदः, तस्य सुखेऽभावादेव सुखे साध्यतासंबन्धेन प्रवृत्यापत्तिः न संभवति इति ।।

गुणत्वस्य इति । अस्य उपरितनेन ''**तद्व्यापकतया**'' इत्यनेन अन्वयः । **साध्यताख्यविषयतावच्छेदकतासंबन्धेन** इति । तत्र ''साध्यता'' इत्यतः पूर्वं ''स्वाश्रयनिरूपित'' इति योजनीयम् । **तदवच्छिन्नजनक**

इति । वाक्यारम्भे स्थितस्य ''सुखत्वान्यवृत्तिविषयतासंबन्धेन'' इत्यस्य सुखत्वान्यवृत्तिविषयतासंबन्धावच्छिन्नजन्यतानिरूपितेत्यर्थकस्य अत्रत्यजनक-पदार्थैकदेशजनकतायाम् अन्वयः इत्याहुः । वस्तुतः तत्रत्येन ''गुणत्वस्य'' इत्यनेन अन्वयेऽपि न दोषः । तत्रापि ''विषयता'' इत्यतः पूर्वं ''स्वाश्रय-निरूपित'' इति योजनीयम् । **व्याप्यधर्म इति** । प्रवृत्तित्वत्वं व्याप्यधर्मः । व्यापकधर्मः गुणत्वत्वम् । **अनयैव च रीत्या इति** । प्रवृत्तित्वव्यापकगुणत्वा-वच्छिन्नहेतुभूतप्राणपञ्चकसंचारत्वभेदश्रमत्वभेदयोः विरहादेव इत्यर्थः ।।

वस्तुतस्तु इत्यादिकल्पे **मिश्रानुमतिं** दर्शयति - **एतदेव इति** । **मिश्रैरभिहितम् इति** । ''कृतौ च अनुभवसिद्धचिकीर्षाधीनत्वं विशेषः । तेन प्राणपञ्चकसंचारे जीवनयोनिकृतिसाध्ये न प्रवृत्तिः'' इति **मणिव्याख्यानावसरे** कृतौ चिकीर्षाधीनत्वविशेषणवैयर्थ्यप्रतिपादनावसरे इति शेषः ।।

मुक्तावली

इत्थं च प्रवर्तकत्वानुरोधात् विधेरपि इष्टसाधनत्वादिकमेव अर्थः । इत्थं च ''विश्वजिता यजेत'' इत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते ।।

दिनकरी

इत्थं च इति । प्रवृत्तिं प्रति इष्टसाधनत्वादिधियः हेतुत्वे च इत्यर्थः । ''इष्टसाधनत्वादि'' इति ''आदि''ना बलवदनिष्टाननुबन्धित्व-कृतिसाध्यत्वयोः परिग्रहः ।।

अत्र च निष्फले प्रवृत्त्यभावात् इष्टसाधनत्वस्य इष्टसाधनेऽपि मधुविषसंपृक्तान्न-भोजने अप्रवृत्तेः बलवदनिष्टाननुबन्धित्वस्य, कृत्यसाध्ये सुमेरुशृङ्गाहरणादौ अप्रवृत्तेः

कृतिसाध्यत्वस्य च ज्ञानं प्रवृत्तिहेतुः । तच्च विधितः इति इष्टसाधनत्वादिकं विध्यर्थः इति भावः ।।

ननु भावियौवराज्यादौ प्रवृत्तेः वारणाय इदानीन्तनकृतिसाध्यताज्ञानादेः प्रवर्तकत्वं वाच्यम्, तच्च न विधिवाक्यात्, ततः शक्यकृतिसाध्यत्व-इष्टसाधनत्व-प्रकारकज्ञानस्यैव उत्पत्तेः इति कथं प्रवर्तकज्ञानं विधितः? इति ।।

अत्र वदन्ति – न विधिः साक्षात् प्रवर्तकं ज्ञानम् उत्पादयति, किन्तु विधिवाक्यात् इष्टसाधनत्वे कृतिसाध्यत्वे च अवगते किम् इष्टम्? इत्याकाङ्क्षायां स्वर्गकामादिपदसमभिव्याहारात् स्वर्गसाधनमितिज्ञानम् आनुमानिकं मानसं वा उत्पद्यते । अन्यथा विशेषरूपेण फलज्ञानाभावात् प्रवृत्त्यनुपपत्तेः । एवम् इदानीन्तनत्वान्तर्भावेण कृतिसाध्यत्वादिज्ञानम् अनुमानात् इति । अत एव उक्तं **मणिकृतापि** – ''एवं विधिजन्यज्ञानजन्यं ज्ञानं प्रवर्तकम्'' इति ।।

राजीवोल्लासः

अत्र च इत्यादि। प्रवर्तकज्ञानविषय एव विध्यर्थः – लिङ्लोट्तव्य-प्रत्ययार्थः । प्रवर्तकं ज्ञानं च इष्टसाधनत्वज्ञानं कृतिसाध्यताज्ञानं बलवद-निष्ट–अननुबन्धित्वज्ञानं च । निष्फले कर्मणि प्रवृत्त्यभावात् इष्टसाधनत्वज्ञानं प्रवृत्तिहेतुः । इष्टसाधनेऽपि कृत्यसाध्ये सुमेरुशृङ्गानयनादौ प्रवृत्त्यभावात् कृतिसाध्यताज्ञानं प्रवृत्तिहेतुः । तृप्तिरूपेष्टसाधने कृतिसाध्येऽपि मधुविषसंपृक्तान्न-भोजने प्रवृत्त्यभावात् बलवदनिष्टाननुबन्धित्वज्ञानं च प्रवृत्तिहेतुः । तथा च प्रवृत्तिजनकज्ञानविषयभूतानां इष्टसाधनत्व–कृतिसाध्यत्व–बलवदनिष्टाननुबन्धित्वानां त्रयाणामपि विध्यर्थत्वम् आवश्यकम् इति भावः । तच्च विधित इति । प्रवृत्तिहेतुभूतं ज्ञानं च विध्यर्थकप्रत्ययात् जायते इति हेतोः इष्टसाधनत्वादित्रिकं विधिप्रत्ययार्थः । योऽर्थः यस्मात् शब्दात् ज्ञायते स तस्य शब्दस्य अर्थ इति न्यायात् इति भावः ।।

इदानीन्तन इति । एतत्कालीन इत्यर्थः । **शक्यकृतिसाध्यत्व** इति । अननुगमेन इदानीन्तनत्वम् अन्तर्भाव्य शक्त्यसंभवात् इति भावः । विधिप्रत्ययशक्तिविषयीभूतं यत् इदानीन्तनत्वाघटितं कृतिसाध्यत्वम् इष्टसाधनत्वं च, तत्प्रकारकज्ञानस्यैव उत्पत्तेः प्रवर्तकं यत् इदानीन्तनत्वघटितकृतिसाध्यत्वादि-प्रकारकज्ञानं तस्य विधिप्रत्ययात् कथम् उत्पत्तिः इति प्रश्नः ।।

तत्र समाधानम् आह – **अत्र वदन्ति** इत्यादिना । विध्यर्थकः प्रत्ययः न साक्षात् प्रवृत्तिजनकं ज्ञानम् उत्पादयति । किं तु विधिवाक्यश्रवणानन्तरं यागादेः कृतिसाध्यत्वम् इष्टसाधनत्वं च ज्ञायते । ततः किम् इष्टम् ? इति जिज्ञासायां स्वर्गकामपदसमभिव्याहारात् स्वर्गस्य इष्टत्वं ज्ञायते । ततः "यागादिकं स्वर्गसाधनम्" इति आनुमानिकं मानसं वा ज्ञानम् उत्पद्यते । "यागः स्वर्गसाधनम् स्वर्गकामकर्तृकत्वात्, यत् यत्कामकर्तृकं तत् तत्साधनं, यथा तृप्तिकामकर्तृकं भोजनं तृप्तिसाधनम्" इति अनुमानाकारः । एवम् अनुमानादेव इदानीन्तनत्वान्त-र्भावेण कृतिसाध्यत्वज्ञानम् उत्पद्यते । "यागादिः इदानीन्तनमत्कृतिसाध्यः इदानीम् उपकरणादिसमवहितत्वात्" इत्यनुमानाकारः ।।

अत्र स्वकपोलकल्पितत्वशङ्काम् अपाकरोति – **अत एव उक्तम्** इति । विधिजन्यं ज्ञानं शाब्दबोधः, तज्जन्यं ज्ञानम् इदानीन्तनत्वविषयकम् इष्टसाधनत्वादिज्ञानम् अनुमित्यात्मकं मानसं वा ।।

दिनकरी

अत्र भट्टपादाः – लोके प्रवृत्तिः द्वेधा – स्वेच्छाधीना परप्रेरणाजन्या च । तत्र आद्यायां प्रवर्तनाया अनुपयोगेऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका "आचार्यप्रेरणया इदं करोमि" इति व्यवहारात् । प्रवर्तना च प्रवर्तयितुः प्रवृत्त्यनुकूलव्यापारविशेषः, स च चेतनस्य अभिप्राय एव, अचेतनस्य तु वेदस्य अभिधानामकः कश्चित्

शब्दसमवेतः । तथा च आचार्याभिप्रायज्ञानात् यथा शिष्यः प्रवर्तते, तथा अभिधाज्ञानात् विधिस्थले प्रवृत्तिः इति । सैव लिङ्र्थः, सैव च शाब्दीभावना लिङ्त्वांशेन उच्यते, अर्थभावता तु आख्यातत्वांशेन । तदुक्तम् –

अभिधाभावनामाहुः अन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः ।। इति ।

अभिधा- शब्दः, तन्निष्ठा भावना अभिधाभावना । अर्थः यागादिः आत्मा वा । अर्थात्मकत्वं च अर्थगोचरत्वम् अर्थाश्रितत्वं वा । तथा च यागादिगोचरा आत्माश्रिता प्रवृत्तिः अर्थभावना ।।

अत्र च शब्दभावनायाः अर्थभावनैव भाव्या, अर्थभावनायाश्च फलं स्वर्गादि इति बोध्यम् ।।

तदुक्तम्–

लिङोऽभिधा सैव च शब्दभावना
भाव्या च तस्याः पुरुषप्रवृत्तिः ।
संबन्धबोधः करणं तदीयं
प्ररोचना चाङ्गतयोपयुज्यते ।। इति ।

अस्य अर्थः – लिङः अभिधा वाच्या । तस्याः किं भाव्यम् इत्याकाङ्क्षायाम् उक्तं – भाव्या च तस्या इति । केन भाव्या इत्याकाङ्क्षायां – संबन्ध इति । संबन्धबोधः लिङादिपदशक्तिज्ञानम् । तत्र आलस्येन निवर्तमानं पुरुषं स्तुतिः उत्तेजयति इति सा सहकारिणी इत्याह – प्ररोचना इति – इति वदन्ति ।

तन्न । लोके स्वेच्छाधीनप्रवृत्तौ इष्टसाधनताज्ञानस्य हेतुत्वेन क्लृप्तत्वात् अन्यत्रापि प्रवृत्तौ तदेव हेतुः अस्तु, किम् अतिरिक्तप्रवर्तनाज्ञानस्य

अतिरिक्तहेतुत्वेन । अत एव वेदेऽपि न प्रवर्तनाज्ञानं हेतुः, शब्दशक्तिभिन्नायाम् अभिधायां मानाभावाच्च । अत एव **मण्डनमिश्राः** –

पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ।।

इत्यादिना प्रवृत्त्यनुकूलत्वेन इष्टसाधनत्वमेव प्रवर्तना इत्युक्तवन्तः ।

ननु एवं ''विश्वजिता यजेत'' इत्यादौ फलाश्रवणेन इष्टसाधनताज्ञानाभावात् प्रवृत्तिः न स्यात्, अत आह – इत्थं च इति । इष्टसाधनत्वादेः विध्यर्थत्वे च इत्यर्थः ।।

राजीवोल्लासः

अथ विध्यर्थविषये कुमारिलभट्टपादानां मतम् उपन्यस्यति – **अत्र भट्टपादा** इत्यादिना। लोके प्रवृत्तिः द्विविधा – स्वेच्छाधीना परप्रेरणजन्या च इति । तत्र आद्यायां प्रवृत्तौ प्रवर्तनायाः अनुपयोगेऽपि द्वितीयायां प्रवृत्तौ प्रवर्तना प्रयोजिका – परंपरया हेतुः । आचार्यादिप्रेरणया ''इदं करोमि'' इति व्यवहारात् । प्रवर्तना च प्रवर्तकनिष्ठः प्रवृत्त्यनुकूलव्यापारविशेषः । स च प्रवर्तकचेतनगतः अभिप्रायविशेषः । अपौरुषेये वेदे तु प्रवर्तकचेतनाभावात् अचेतनवेदगतः अभिधानामकः व्यापारः प्रवर्तना। तथा च ''गामानय'' इत्यादिवाक्यश्रवणानन्तरं आचार्याभिप्रायं ज्ञात्वा यथा शिष्यः प्रवर्तते, तथा अभिधाख्यव्यापारज्ञानात् वैदिक ''यजेत'' इत्यादिविधिवाक्यश्रवणानन्तरं प्रवृत्तिः इति सा अभिधैव वेदे लिङर्थः । सैव च लिङादिशब्दनिष्ठत्वात् शब्दभावना इत्युच्यते । लिङि लिङ्त्वम् आख्यातत्वं च इति धर्मद्वयम् अस्ति । तत्र लिङ्त्वेन रूपेण शब्दभावना । लिङ्त्वं शब्दभावनाशक्यतावच्छेदकम् इति

यावत् । आख्याततत्वेन रूपेण अर्थभावना उच्यते । आख्याततत्वम् अर्थभावना-शक्यतावच्छेदकम् इति यावत् इति । **शब्दसमवेत** इति । समवायम् अङ्गीकृत्य एवम् उक्तम् । भाट्टमते गुणगुणिनोः इव धर्मधर्मिणोः तादात्म्यमेव संबन्धः । **विधिस्थले** इति । वैदिकविधिस्थले इत्यर्थः । तेन यत्र आचार्यादिभिः ''गामानय'' इत्यादि उक्तं, तत्र आप्ताभिप्राय एव विध्यर्थः । **लिङ्त्वांशेनोच्यत** इति । लिङ्त्वावच्छिन्नशक्ततानिरूपितशक्त्यनुयोगिनि इत्यर्थः । लिङ्त्वं लोट्त्व-तव्यत्वादेः उपलक्षणम् । **तदुक्तम्** इति । भावनाद्वैविध्यं तच्छक्ततावच्छेदकशक्यता-वच्छेदकवैलक्षण्यं च उक्तम् इत्यर्थः । **भट्टपादैः** इति शेषः । **अन्याम्** – अर्थभावनातः भिन्नाम् । **आत्मा वा** इति । ''वा''कारः चार्थे । **अर्थात्मभावना** इत्यत्र आत्मशब्दः गोचरे आश्रिते च लाक्षणिक इति दर्शयति – **अर्थात्मकत्वं** च इति । **अर्थात्मकत्वम्** – यागाद्यर्थविषयकत्वम्, आत्माश्रितत्वं च । **अन्या** – शब्दभावनातः अन्या । तथा च यागादिविषयिणी आत्मनिष्ठा प्रवृत्तिः अर्थभावना इत्युक्तं भवति ।।

अथ भावनायाः अंशत्रयम् आह – **अत्र च** इति । भावनायाः साध्यं, साधनम्, इतिकर्तव्यता इति अंशत्रयम् अस्ति । साध्यं भाव्यम् इति-पर्यायः । साधनं करणम् इति पर्यायः । करणानुग्राहकम् इतिकर्तव्यता इत्युच्यते । तत्र अर्थभावनायाः भाव्यं स्वर्गादि । करणं यागादि । इति कर्तव्यता अङ्गकलापः । शब्दभावनायाः भाव्या पुरुषप्रवृत्तिरूपा अर्थ-भावना । करणं लिङ्ज्ञानं, लिङ्गतशक्तिज्ञानं वा । इतिकर्तव्यता अर्थवादवाक्यजन्यं प्राशस्त्यज्ञानम् इति **भाट्टमतसारः** । **अर्थभावनैव भाव्या** । प्रवृत्त्यर्थमेव लिङादिप्रयोगात् इति भावः । **भाव्या** – साध्यं फलम् । **अर्थभावनायाश्च** इति । **फलं स्वर्गादि** इत्यनन्तरं करणं यागः, प्रयाजादिकम् इतिकर्तव्यता इति पूरणीयम् । न च – यागस्य अर्थभावनात्मककृतिजन्यत्वात् कथं तस्य

अर्थभावनाकरणत्वम् इति – वाच्यम् । अर्थभावनाभाव्यस्वर्गादिकरणत्वात् तथा व्यपदेशात् । **तदुक्तम्** इति । शब्दभावनाया अंशत्रयम् उक्तम् इत्यर्थः । **लिङादिपदशक्तिज्ञानम्** इति । प्रवर्तनविषयकलिङादिपदशक्तिज्ञानम् इत्यर्थः । करणत्वं च तस्य भावनाभाव्यनिर्वर्तकत्वम् । लिङ्पदशक्तिज्ञाने सति प्रवृत्तिरूपार्थभावनोत्पादेन शब्दभावनाभाव्यप्रवृत्तिनिष्पादकत्वेन इति भावः । **स्तुतिरुत्तेजयति** इति । फले उत्कटरागं जनयित्वा श्रमादौ बलवद्वेषं निरस्य चिकीर्षया योजयति इत्यर्थः ।।

उक्तं भाट्टमतं निरस्यति – **तन्न** इत्यादिना । लोके स्वेच्छाधीनप्रवृत्तौ इष्टसाधनताज्ञानस्य कारणत्वं क्लृप्तम् इति **अन्यत्रापि** – परप्रेरणजन्यलौकिक-प्रवृत्तावपि इष्टसाधनताज्ञानमेव हेतुरस्तु, किम् इष्टसाधनत्वातिरिक्तप्रवर्तनाज्ञानस्य प्रवृत्तिं प्रति अतिरिक्तहेतुत्वकल्पनेन इत्यर्थः । आचार्यप्रेरणायाः शब्दप्रयोगद्वारा इष्टसाधनत्वादिज्ञानसंपादकतया "आचार्यप्रेरणया करोमि" इत्यादिव्यवहारस्य उपपत्तिः इति भावः । **अत एव** इति । क्लृप्तेनैव निर्वाहात् इत्यर्थः । ननु अभिधायां मानाभावोक्तिः असङ्गता । त्वयापि तस्याः स्वीकृतत्वात् इति शङ्काम् अपाकर्तुम् आह – **शब्दशक्तिभिन्नायाम्** इति । साधुपदानाम् अर्थबोधौपयिक-शक्तिरेव मया अभिधा इत्युच्यते । सा च सर्वतान्त्रिकसिद्धा । तद्भिन्नायां लिङाद्यर्थरूपायाम् अभिधायां मानाभाव इति भावः । उक्तार्थे **मण्डनमिश्राणां** संमतिं प्रदर्शयति – **अत एव** इति । **प्रवृत्तिहेतुं धर्मम्** इति । प्रवृत्तिजनक-ज्ञानविषयम् इष्टसाधनरूपधर्मम् इत्यर्थः ।।

मुक्तावली

ननु "अहरहः सन्ध्याम् उपासीत" इत्यादौ इष्टानुत्पत्तेः कथं प्रवृत्तिः? न च – आर्थवादिकं ब्रह्मलोकावाप्तिः, प्रत्यवायाभावो वा फलम् इति – वाच्यम् ।

तथा सति काम्यत्वे **नित्यत्वहान्यापत्तेः, कामनाभावे च अकरणापत्तेश्च** । **इत्थं च** यत्र फलश्रुतिः तत्र अर्थवादमात्रम् इति चेत्, न ।।

ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव भरणीश्राद्धे काम्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरपि अविरोधात् । न च कामनाभावे अकरणापत्तिः, त्रिकालस्तवपाठादाविव कामनासद्भावस्यैव कल्पनात् ।।

ननु वेदबोधितकार्यताज्ञानात् प्रवृत्तिः संभवत्येव इति चेत्, न । स्वेष्टसाधनत्वम् अविज्ञाय तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेः असंभवात् ।।

दिनकरी

ननु नित्ये सन्ध्योपासनादौ फलाभावात् न इष्टसाधनत्वज्ञानं प्रवर्तकम्, न वा **तद्विषयः विध्यर्थः** इत्यभिप्रायेण शङ्कते – **ननु** इति ।।

न च आर्थवादिकम् इति ।।

''सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापाः ते यान्ति ब्रह्मलोकं सनातनम् ।।

इति अर्थवादबोधितम् इत्यर्थः ।।

नित्यत्वहान्यापत्तेः इति । नित्यत्वकाम्यत्वयोः विरोधः इत्यभिमानः ।।

ननु तयोः विरोधित्वे मानाभावः । ''अहरहः सन्ध्याम् उपसीत'' इत्यादिश्रुति–''सन्ध्यामुपासते...'' इति अर्थवादयोः **एकवाक्यताबलेन तत्कालजीविफलकामस्य संवलिताधिकारः कल्प्यते इति, अत आह – **कामनाभावे** इति । **अकरणापत्तेः** इति । अकरणे प्रत्यवायानुत्पत्त्यापत्तेः इत्यर्थः । कामनारूपाधिकाराभावात् **अनधिकृताकरणस्य** प्रत्यवायजनकत्वाभावात् इति भावः ।।

ननु तथापि नित्यस्थलीयफलश्रुतेः वैयर्थ्यम् इति आशङ्क्य अर्थवादतया स्तुतिमात्रे तात्पर्यं कल्प्यते इत्याह – **इत्थं च** इति ।।

कल्पनात् इति । इदम् उपलक्षणम् । अर्थवादोपस्थितकामनाया अधिकारत्वेऽपि "अकुर्वन् विहितं कर्म" इत्यादिना शौचे सति विहितानुष्ठानस्य प्रत्यवायजनकत्वबोधनात् कामनासंवलितस्य शुचित्वादेः न अधिकारत्वम् किन्तु नित्यस्थले फलकामनाशुचित्वाद्योः अधिकारयोः (अ)संवलनम् । तथा च कामानाविरहेऽपि शुचित्वादिरूपाधिकारसत्त्वात् तदा सन्ध्याद्यकरणस्य प्रत्यवायजनकत्वमेव । कामनायाः अधिकारत्वेऽपि तदधिकारवतः शौचादिविरहिणः सन्ध्याद्यकरणस्य प्रत्यवायजनकत्वं न कल्प्यते, शुचितत्कालजीवित्वरूपाधिकारैकदेशवतोऽपि अकरणे प्रत्यवायजनकत्वं कल्प्यते । तेन संवलिताधिकारत्वेऽपि क्षतिविरहश्च इत्यपि द्रष्टव्यम् । एतेन तत्र नियमेन फलकामनासत्त्वे मानाभावेऽपि न क्षतिः इति सूचितम् ।।

ननु नित्यगोचरप्रवृत्तौ इष्टसाधनताज्ञानं कारणमेव न इत्यनेनैव उपपत्तौ किमर्थं नित्यस्यापि काम्यत्वं कल्पनीयम्, अत आह – न तु इति । स्वेष्टसाधनत्वम् इति । अन्वयव्यतिरेकाभ्यां प्रवृत्तित्वावच्छिन्नं प्रति इष्टसाधनताज्ञानस्य हेतुत्वात् इति भावः ।।

अत एव कुसुमाञ्जलौ सन्ध्योपासनम् अफलमपि क्रियते, वेदबोधितत्वात् इत्याशङ्क्य "गुरुमतम् एतत्, न गुरोर्मतम्" इति अभिधायैव उपेक्षितम् आचार्यैः ।।

राजीवोल्लासः

तद्विषयः – इष्टसाधनत्वज्ञानविषयः इष्टसाधनत्वम् । विध्यर्थः विधिप्रत्ययार्थः। प्रवृत्तिजनकज्ञानविषयस्यैव विध्यर्थत्वात् इति भावः । एकवाक्यताबलेन इति । तदुत्थाप्याकाङ्क्षानिवर्तकत्वं तदेकवाक्यत्वम् । "सन्ध्याम् उपासीत" इति विधिवाक्येन उत्थापिता या फलाकाङ्क्षा तन्निवर्तकत्वात् दर्शितश्रुतिस्मृत्योः

एकवाक्यत्वं, तद्बलेन – तदन्यथानुपपत्त्या । न च – स्तुतिपरतयैव अर्थवादानाम् एकवाक्यत्वोपपत्तिः इति – वाच्यम् । संभवति स्वार्थपरत्वे तत्परित्यागानौचित्यात् इति भावः । **तत्कालजीवि इति** । तत्कालजीवित्वं फलकामना च मिलित्वा अधिकार इत्यर्थः । संवलनं समावेशः मेलनम् । तथा च नित्यस्थले अधिकारद्वयम् इति भावः । **अकरणापत्तेः इति** इति । अत्र इष्टापत्तिसंभवात् अभिप्रायं स्पष्टयति – **अकरणे** इति । आपादकं दर्शयति – **कामनारूप** इति । **अनधिकृताकरणस्य** इति । अधिकाररहितपुरुषकर्तृकस्य अकरणस्य इत्यर्थः । कर्मण्यधिकृतः सन् कर्म यो न करोति तस्यैव प्रत्यवायः । अनधिकृतः सन् न करोति चेत् न तस्य पापम् इति भावः । **मूले त्रिकालस्तवपाठादौ इव** इति । शुद्धकाम्ये त्रिकालस्तवपाठादौ अननुभूयमानापि फलकामना यथा त्वया अवश्यं प्रवृत्त्यर्थं कल्प्यते, तथा मया सन्ध्योपासनादिस्थलेऽपि कल्प्यत इत्यर्थः ।।

दिनकर्यां – ननु त्रिकालस्तवपाठदृष्टान्तो विषमः, अकरणे प्रत्यवायाभावात्। कामनाया एव तत्र प्रवृत्तिप्रयोजकत्वात्, सन्ध्योपासनादेस्तु नित्यस्य अकरणे प्रत्यवायम् अनुचिन्त्य कदाचित् कामनाशून्या अपि प्रवर्तन्त इति आलोच्य न अत्र कामनानैयत्यम् इति यदि ब्रूयात् तदापि कामनारूपाधिकारशून्यस्य सन्ध्योपासनाद्यकरणे प्रत्यवायोत्पत्तेः उपपत्तिं दर्शयति – **इदम् उपलक्षणम्** इति । **अकुर्वन्** इति । ''अकुर्वन् विहितं कर्म नरो भवति किल्बिषी'' इति याज्ञवल्क्यस्मृत्या इत्यर्थः । **कामनासंवलितस्य** – कामनाविशिष्टस्य । **अधिकारत्वं** – फलसंबन्धप्रयोजकत्वम् । **अधिकारयोः संवलनम्** – प्रत्येकम् अधिकारत्ववतोः केषुचित् पुरुषेषु मेलनम् । ब्रह्मलोकावाप्तिरूपफलं प्रति उभयोः सहकारित्वम् । एकतराभावे ब्रह्मलोकावाप्त्यजननात् इति बोध्यम् ।।

ननु एवं प्रत्येकम् अधिकारत्वे शौचादिविरहेऽपि कामनावतोऽकरणे प्रत्यवायापत्तिः, अत आह – **कामनायाः अधिकारत्वेऽपि** इति । कामनायाः स्वविषयब्रह्मलोकप्राप्त्यादिकं प्रति प्रयोजकत्वेऽपि शुचित्वादिरूपाधिकारान्तरशून्यस्य अकरणे प्रत्यवायजनकत्वं न सिध्यति । तद्बोधकवचनाभावात् इत्यर्थः । न च – ''अकुर्वन् विहितं कर्म'' इत्यादिकमेव तद्बोधकम् इति – वाच्यम् । ''शुचिः कर्म कुर्वीत'' इति श्रुत्या शुचिः सन् अकुर्वन् इत्यर्थकतायाः दर्शितस्मृतेः स्वीकारात् ॥

अथ संवलिताधिकारपक्षेऽप्युपपत्तिं दर्शयति – **शुचि** इति । **प्रत्यवायजनकत्वं कल्प्यत** इति । कल्पनायाः वचनानुरोधित्वात् इति भावः । वचनं च–

''निद्रया कलहैर्नृत्यैरनाश्वासैश्च सांप्रतम् ॥
त्यक्तवैदिककर्माणो घोरं नरकमाप्नुयुः ॥'' इति ।

ननु रासभाभावेऽपि घटवत् इष्टसाधनताज्ञानाभावेऽपि प्रवृत्तिः कुतो न इत्याक्षेपं भाववर्णनेन परिहरति – **अन्वयव्यतिरेकाभ्याम्** इति । ननु नित्येतरस्थलीयप्रवृत्तिं प्रत्येव इष्टसाधनताज्ञानं प्रयोजकम् इति तु न सम्यक्, गौरवपराहतत्वात् इत्यत्र उदयनाचार्यवाक्यं प्रमाणयन् आह – **अत एव** इति । **गुरु** गौरवग्रस्तं **मतम्** इति कर्मधारयः । गुरोः आप्तस्य उपदेष्टुः ॥

मुक्तावली

यदपि पण्डापूर्वं फलम् इति, तदपि न । **कामनाभावे अकरणतापत्तेः** तौल्यात् । कामनाकल्पने तु आर्थवादिकं फलमेव रात्रिसत्रन्यायात् कल्प्यताम् । **अन्यथा** प्रवृत्त्यनुपपत्तेः । तेन अनुत्पत्तिं प्रत्यवायस्य अन्ये मन्यन्ते । एवं –

"सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ।।"

एवं–

"दद्यादहरहःश्राद्धं पितृभ्यः प्रीतिमावहन्..." इत्यादिवचन – प्रतिपादितब्रह्मलोकादिकमेव फलमस्तु ।।

न च – पितृप्रीतिः कथं फलम्? व्यधिकरणत्वात् इति – वाच्यम् । गयाश्राद्धादाविव उद्देश्यत्वसंबन्धेनैव फलजनकत्वस्य क्वचित् कल्पनात् । अत एव उक्तम् –

"शास्त्रदर्शितं फलम् अनुष्ठानकर्तरि इति उत्सर्गः" इति ।।

पितॄणां मुक्तत्वे तु स्वस्य स्वर्गादिफलम्, यावत् नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गजनकत्वात् ।।

पण्डापूर्वार्थं प्रवृत्तिश्च न संभवति । न हि तत् सुखदुःखाभाववत् स्वतः पुरुषार्थः न वा तत्साधनम् ।।

प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिः? इति चेत् इत्थम् – यथा हि नित्ये कृते प्रत्यवायाभावः तिष्ठति, तदभावे तदभावः, एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभावसत्त्वम्, तदभावे तदभावः इति योगक्षेमसाधारणकारणताया दुःखप्रागभावं प्रति सुवचत्वात् । एवमेव प्रायश्चित्तस्यापि दुःखप्रागभाव-हेतुत्वम् इति ।।

दिनकरी

यच्च पण्डापूर्वं स्वतः प्रयोजनं नित्यस्य कर्मणः इति प्राभाकरमतम्, तदपि दूषयति – यदपि इति । कामनाभावे – पण्डापूर्वात्मकफलकामनाभावे ।

रात्रिसत्रन्यायात् इति । यथा हि रात्रिसत्रशब्दवाच्यानां ज्योतिर्गौरित्यादि-वाक्योत्पन्नकर्मणां फलजिज्ञासायाम् अत्यन्ताश्रुतस्वर्गादिकल्पने गौरवात् विश्वजिन्न्यायापवादेन "प्रतितिष्ठन्ति ह वा एता रात्रीरुपयन्ति" इति अर्थवादश्रुतौ प्रतिष्ठैव फलम् इति सिद्धान्तितम्, तथा अत्रापि आर्थवादिकब्रह्मलोक एव फलं लाघवात् इत्यर्थः । **अन्यथा**–फलाभावे । **तेन** – आर्थवादिकफलकल्पने लाघवेन । तत्र तत्र आर्थवादिकं फलं दर्शयति – **अनुत्पत्तिम्** इत्यादिना ।।

अत एव – पितृप्रीतेः श्राद्धफलत्वादेव । **उत्सर्ग** इति । श्राद्धादिफलस्य कर्तृमात्रगतत्वे तु व्यभिचाराभावात् नियम एव स्यात् इति भावः ।।

पण्डापूर्वस्वीकारेऽपि तत्साधनताज्ञानस्य प्रवर्तकत्वं न संभवति इत्याह – **पण्डापूर्वार्थम्** इति । **न वा तत्साधनम्** इति । **तथा च** इच्छाविषयत्वाभावेन फलत्वाभावात् न तत्साधनताज्ञानं प्रवर्तकम् इति भावः ।।

ननु त्वन्मतेऽपि प्रत्यवायानुत्पत्तेः कथं फलत्वम्? स्वतः पुरुषार्थत्वाभावात् । न वा दुःखानुत्पत्तिरूपपुरुषार्थसाधनत्वेन तत्र इच्छाविषयत्वम् । दुःखानुत्पत्तेः प्रागभावरूपायाः तदजन्यत्वात् इत्याशङ्क्य परिहरति – **प्रत्यवाय** इत्यादिना । **अनुत्पत्तौ** इति उद्देश्यत्वं सप्तम्यर्थः । **कथं प्रवृत्तिः** इति । पूर्वोक्तरीत्या प्रत्यवायानुत्पत्तेः फलत्वाभावेन तत्साधनताज्ञानस्य प्रवृत्त्यहेतुत्वात् सन्ध्यावन्दनादौ कथं प्रवृत्तिः इत्यर्थः ।।

प्रत्यवायाभावः – प्रत्यवायप्रागभावः । **तदभावे** – सन्ध्यावन्दनादि नित्याभावे । **तदभावः** – प्रत्यवायाभावस्य अभावः । **तदभावे** – प्रत्यवायाभावस्य अभावे । **तदभावः** – दुःखप्रागभावाभावः दुःखरूपः । **योगक्षेमसाधारण** इति । योगः – अप्राप्तस्य प्राप्तिः । क्षेमः – सिद्धस्य संरक्षणम् । प्रवृत्तिं प्रति इष्टसाधन-ताज्ञानस्य हेतुतायां साधनतायाः क्षेमसाधारण्या एव प्रविष्टत्वात् इति भावः ।।

प्रागभावस्य प्रतियोगिविकल्पग्रासेन फलत्वासंभवात् प्रत्यवायात्यन्ताभाव एव नित्यस्य फलम्, स्वरूपसंबन्धविशेषात्मकक्षेमसाधारणजन्यताया अत्यन्ताभावे सत्त्वात् इति तु नव्याः ।।

एवमेव – योगक्षेमसाधारणमेव ।।

राजीवोल्लासः

ननु पण्डापूर्वस्य फलत्वोक्तिः असङ्गता, सुखदुःखाभावान्यंतरत्वाभावात् इति शङ्कां निराकरोति – **स्वतःप्रयोजनम्** इति । सुखादिवत् अन्येच्छानधीनम् अस्यापि फलत्वम् अव्याहतम् इत्यभिमानः । **इति प्राभाकरमतम्** इति । तेषाम् अयम् आशयः— यथा ''यजेत'' इत्यादौ काम्ये कर्मणि लिङा कार्यत्वेन अपूर्वमेव बोध्यते, तथा ''सन्ध्याम् उपासीत'' इत्यादौ नित्येऽपि कर्मणि लिङा अपूर्वमेव बोध्यते । परं तु तस्य निष्फलत्वात् तत् पण्डापूर्वमिति व्यवह्रियते । **सिद्धान्तितम्** इति । तत्र विधिवाक्ये फलाश्रवणात् अर्थवादवाक्येन ''प्रतिष्ठाकामाः एताभिः उपेयुः'' इति विधिवाक्यं कल्पयित्वा तत एव फलबोधनं सिद्धान्तितम् । **व्यभिचाराभावात्** इति । कर्तृभिन्नगतत्वरूपव्यभिचाराभावात् ''शास्त्रदर्शितं फलम् अनुष्ठातरि एव'' इति नियम एव स्यात्, न तु उत्सर्गः इति भावः ।।

ननु ''यदपि पण्डापूर्वं फलमिति, तदपि न'' इत्यनेन पण्डापूर्वस्य निरस्तत्वात् ''पण्डापूर्वार्थं प्रवृत्तिश्च न संभवति'' इति इदानीम् उक्तिः कथं घटते इत्याक्षेपं मनसिकृत्य आक्षेप्तुः आशयं स्फुटयति – **पण्डापूर्वस्वीकारेऽपि** इति । नित्ये तत्र तत्र भिन्नभिन्नफलकल्पनापेक्षया लाघवात् एकरूपापूर्वस्य फलत्वकल्पनं ज्याय इत्यभिसन्धाय पण्डापूर्वस्वीकारेऽपि इत्यर्थः । **तत्साधनताज्ञानस्य** – पण्डापूर्वसाधनत्वज्ञानस्य । तथा च इति । पण्डापूर्वस्य

इच्छाविषयत्वाभावेन फलत्वं नास्ति इति पण्डापूर्वसाधनत्वज्ञानस्य न प्रवृत्तिजनकत्वम् इत्यर्थः । फलसाधनत्वज्ञानस्यैव प्रवर्तकत्वात् इति भावः ।।

तदजन्यत्वात् इति । प्रत्यवायानुत्पत्त्यजन्यत्वात् इत्यर्थः । **प्रतियोगिविकल्पग्रासेन** इति । प्रतियोगिविकल्पाधीनत्वेन इत्यर्थः । प्रतियोगिभेदेन भिन्नभिन्नत्वेन इति यावत् । **फलत्वासंभवात्** इति । अस्य प्रागभावस्य फलत्वम् इति नियन्तुम् अशक्यत्वात् इत्यर्थः । यद्वा प्रतियोगिनः सत्त्वासत्त्वरूपविरुद्धकल्पनाधीनस्वसत्त्वासत्त्वकत्वेन इत्यर्थः । यदि प्रतियोगी नास्ति, तदा तत्प्रागभावोऽपि नास्ति, मानाभावात् । यद्यस्ति, तदा प्रकृते प्रतियोगिनः दुःखरूपत्वात् द्वेषावश्यंभावेन तज्जनके प्रागभावे द्विष्टसाधनताज्ञानोदयात् इच्छानुत्पत्त्या न फलत्वसंभव इति भावः । **नित्यस्य फलम्** इति । प्रत्यवायत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य एकत्वात् इति भावः । प्रागभावस्य तु सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वाभावेन न एकत्वम् इति भावः ।।

मुक्तावली

ननु "न कलञ्जं भक्षयेत्" इत्यत्र विध्यर्थे कथं नञर्थान्वयः? इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुम् अशक्यत्वात् इति चेत्, न । तत्र बाधात् इष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः, किन्तु बलवदनिष्टाननुबन्धित्वमात्रं, तदभावश्च नञा बोध्यते ।।

अथ वा – बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः, तदभावश्च नञा बोध्यमानः विशिष्टाभावः विशेष्यवति विशेषणाभावे विश्राम्यति ।।

दिनकरी

ननु "न कलञ्जम्" इत्यत्र "कलञ्जभक्षणाभावः इष्टसाधनम्" इति अन्वयबोधाभ्युपगमे बाधकाभावः इति, अत आह – **विध्यर्थे कथं नञर्थ** इति ।

विध्यर्थनञर्थयोः कथम् अन्वयः? विध्यर्थेष्टसाधनत्वाद्यन्वितनञर्थस्य अभावस्य कलञ्जभक्षणे कथम् अन्वयः इत्यर्थः । **अशक्यत्वात्** इति । कलञ्जभक्षणे **तस्य बाधात्** इत्यर्थः । **बलवदनिष्टाननुबन्धित्वमात्रम्** इति । विधेः कृतिसाध्यत्वादिषु त्रिषु शक्तिस्वीकारेण क्वचित् कस्यचित् विध्यर्थस्य बोधस्वीकारात् इति भावः ।।

प्रवृत्तिं प्रति कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धित्वविशिष्ट – इष्टसाधनत्वज्ञानत्वेन एकस्यैव हेतुत्वं लाघवात्, न तु कृतिसाध्यत्वादिप्रत्येक-विषयकज्ञानत्वेन गौरवात्, अतः विधेरपि विशिष्टमेव शक्यं वाच्यम् । एवं च निषेधस्थले विशिष्टाभावः विधिसमभिव्याहृतनञा बोध्यते इत्यभिप्रायवान् आह – **अथ वा** इति । **विशेषणाभावे विश्राम्यति** इति । एवं च इष्टसाधन-त्वादिमति कलञ्जभक्षणादौ विशिष्टाभावः बोध्यमानः बलवदनिष्टाननुबन्धित्वाभावे पर्यवस्यति इति भावः ।।

राजीवोल्लासः

न कलञ्जम् इत्यत्र इति । धात्वर्थस्य भक्षणस्य नञर्थाभावे प्रतियोगितया अन्वयः, लिङर्थस्य इष्टसाधनत्वस्य स्वरूपसंबन्धेन तत्रैव अन्वयः । तथा च ''कलञ्जभक्षणाभावः इष्टसाधनम्'' इति वाक्यार्थ इति भावः । **विध्यर्थे कथं नञर्थान्वय** इति शङ्कितुः अयम् आशयः – विध्यर्थयोः कृतिसाध्यत्व–इष्टसाधनत्वयोः प्रतियोगितया नञर्थेऽभावेऽन्वयः । अभावस्य च धात्वर्थेऽन्वयः । प्रतियोग्य-भावान्वयौ तुल्ययोगक्षेमौ इति न्यायात् । तथा च ''कलञ्जभक्षणं कृतिसाध्यत्वाभाववत् इष्टसाधनत्वाभाववच्च'' इति वाक्यार्थः । तत्र च बाधः । कलञ्जभक्षणस्य तृप्तिरूपेष्टसाधनत्वात् कृतिसाध्यत्वाच्च तदभावासंभववत् इति । **तस्य बाधात्** इति । इष्टसाधनत्वाद्यन्वितनञर्थस्य अभावस्य बाधात्

इत्यर्थः । इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बाधात् इति यावत् । **कस्यचित्** इति । तथा च ''न कलञ्जं भक्षयेत्'' इत्यत्र लिङः बलवदनिष्टाननुबन्धित्वम् अर्थः । तस्य नञर्थेऽभावे प्रतियोगितया अन्वयः । तस्य च कलञ्जभक्षणेऽन्वयः । तथा च ''कलञ्जभक्षणं बलवदनिष्टाननुबन्धित्वाभाववत्'' इति बोध इति भावः ॥

अथ वा इति मूलम् अवतारयति – **प्रवृत्तिं प्रति** इत्यादिना । प्रवृत्तिं प्रति कृतिसाध्यत्वविशिष्ट–बलवदनिष्टाननुबन्धित्वविशिष्ट–इष्टसाधनत्वज्ञानं कारणम् इति एकः कार्यकारणभावः । न तु कृतिसाध्यत्वज्ञानं बलवदनिष्टाननु-बन्धित्वज्ञानं इष्टसाधनत्वज्ञानं च कारणम् इति कारणतात्रयम्, गौरवात् । अतः विधिप्रत्ययस्यापि विशिष्टमेव शक्यम् । कृतिसाध्यत्वविशिष्ट–बलवदननुबन्धित्वविशिष्ट–इष्टसाधनत्वं शक्यम् इति यावत् । एवं च नञ्समभिव्याहारस्थले तादृशविशिष्टाभाव एव नञा धात्वर्थे बोध्यते । विशिष्टाभावश्च विशिष्टान्तर्गतस्य अन्यतमस्य अभावादपि भवति । प्रकृते इष्टसाधनत्वकृतिसाध्यत्ववति कलञ्जभक्षणे बोध्यमानः उक्तविशिष्टाभावः बलवदनिष्टाननुबन्धित्वाभावे पर्यवस्यति इति भावः ॥

मुक्तावली

ननु ''श्येनेन अभिचरन् यजेत'' इत्यत्र कथं बलवदनिष्टाननुबन्धित्वम् अर्थः । श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात् । न च – वैधत्वात् न निषेधः इति – वाच्यम् । अभिचारे प्रायश्चित्तोपदेशात् ॥

न च – मरणानुकूलव्यापारमात्रं यदि हिंसा, तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वापत्तिः, गललग्नान्नभक्षणजन्यमरणे आत्महन्तृत्वापत्तिश्च इति – वाच्यम् । मरणोद्देश्यकत्वस्यापि विशेषणत्वात् । अन्योद्देश्यकक्षिप्तनाराचहतब्राह्मणस्य तु

वाचनिकं प्रायश्चित्तम् इति चेत्, न । तत्र बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वाभावात् ।।

वस्तुतः **श्येनवारणाय अदृष्टाद्वारकत्वेन विशेषणात्** । **अत एव काशीमरणार्थं** कृतशिवपूजादेरपि **न हिंसात्वम्** । **न च** – **साक्षात्** मरणजनकस्यैव हि हिंसात्वम्, श्येनस्तु न तथा; किन्तु तज्जन्यापूर्वम् इति – वाच्यम् । खड्गाभिघातेन ब्राह्मणे व्रणपाकपरंपरया मृते हिंसात्वानापत्तेः ।।

दिनकरी

विशिष्टस्य विध्यर्थत्वे श्येने बलवदनिष्टाननुबन्धित्वरूपविशेषणबाधात् कथं विशिष्टस्य विध्यर्थस्य बोधः इति आशङ्कते – **ननु श्येनेन** इति । ''श्येन'' इति कर्मनामधेयम् । **अभिचरन्** – वैरिमरणं कामयन् । **कथम्** इति । श्येने तस्य बाधितत्वात् इति भावः । **अर्थः** – विधिजन्यबोधविषयः । **वैधत्वात् न निषेध इति** इति । यज्ञीयपश्वालम्भनानुरोधेन ''मा हिंस्यात्'' इति निषेधस्य वैधहिंसेतरहिंसापरत्वात् इति भावः । **अभिचार** इति । तथा च ''अभिचारमहीनं च त्रिभिः कृच्छ्रैः व्यपोहति'' इति तत्र प्रायश्चित्तोपदेशवैयर्थ्यापत्त्या निषेधविधेः तदतिरिक्तपरत्वं न संभवति इति भावः ।।

न च – एवं यज्ञीयपशुहिंसाया अपि प्रत्यवायजनकत्वापत्तिः इति – वाच्यम् । अनुपदिष्टप्रायश्चित्तहिंसेतरहिंसापरत्वात् ''मा हिंस्यात्'' इति निषेधविधेः इति ।।

साक्षात् मरणानुकूलव्यापार एव हिंसा, न हि श्येनः तथा इति ''मा हिंस्यात्'' इति निषेधाविषयत्वात् अस्त्येव बलवदनिष्टाननुबन्धित्वम् इत्यभिप्रायेण साक्षात्परंपरासाधारणमरणानुकूलव्यापारमात्रस्य हिंसात्वे दोषम् आह –

मरणानुकूलव्यापारमात्रं यदि हिंसा तदा इति । साक्षात् परंपरासाधारणः सर्वोऽपि व्यापारः यदि हिंसा तदा इत्यर्थः ।।

ननु मरणोद्देश्यकत्वनिवेशे अन्योद्देशेन प्रक्षिप्तनाराचेन यत्र ब्राह्मणमृतिः तत्र प्रायश्चित्तं न स्यात्, तस्य हिंसात्वाभावेन ''मा हिंस्यात्'' इति निषेधाविषयत्वात्, अत आह – **अन्योद्देश्यक** इति । **वाचनिकम्** इति । न तु ''मा हिंस्यात्'' इति निषेधविषयतया इति । **अदृष्टाद्वारकत्वेन** इति । श्येनस्य अदृष्टद्वारैव वैरिमरणसाधनत्वात् इति भावः ।।

ननु अस्तु श्येनस्य हिंसात्वम्, किम् अदृष्टाद्वारकत्वविशेषणेन इति, अत आह – **अत एव** इति । अदृष्टाद्वारकत्वविशेषणादेव इत्यर्थः । **न हिंसात्वम्** इति । तथा च तादृशशिवपूजनादेः हिंसात्ववारणाय आवश्यकेन अदृष्टाद्वारकत्व-विशेषणेन श्येनस्यापि हिंसात्ववारणम् इति भावः ।।

ननु साक्षान्मरणजनकत्वविशेषणादेव तादृशशिवपूजनश्येनादेः वारणे किम् अदृष्टाद्वारकत्वेन गुरुविशेषणेन इति तटस्थः शङ्कते – **न च साक्षात्** इति ।।

राजीवोल्लासः

विशिष्टस्य विध्यर्थत्व इति। ''श्येनेन अभिचरन् यजेत'' इति वाक्येन विहिते श्येनयागे इष्टसाधनत्वकृतिसाध्यत्वयोः सत्त्वेऽपि कालान्तरे नरकसाधनत्वेन बलवदनिष्टाननुबन्धित्वस्य अभावात् विशिष्टस्य विध्यर्थस्य तत्र कथं बोधः, बाधात् इति शङ्का । अर्थपदस्य शक्ये रूढत्वात् तत्र च बाधाभावात् ''कथम्'' इत्याक्षेपः अनुचित इत्यतः अर्थपदस्य प्रकृते विवक्षितम् अर्थं प्रकटयति – **विधिजन्यबोधविषय** इति । शक्यत्वमस्तु नाम बलवदनिष्टाननु-बन्धित्वस्य, तस्य बोधविषयत्वं तु प्रकृते न भवति, बाधितत्वात् इति भावः । **यज्ञीय** इति । यज्ञे पश्वालम्भविधिसद्भावात् ''न हिंस्यात्'' इति

निषेधः यज्ञीयपशुहिंसातिरिक्तहिंसाविषयक इति यथा निर्णीयते, तथा श्येनयागस्य विहितत्वात् श्येनयागीयहिंसातिरिक्तहिंसाविषयकत्वं ''न हिंस्यात्'' इति निषेधस्य कल्प्यते । अतः श्येनस्य न नरकसाधनत्वम् इति भावः । **तथा च** इति । श्येनयागस्य शत्रुवधसाधनत्वेन अभिचारत्वात् अभिचारकर्मणि कृते प्रायश्चित्तविधानात् पापद्वारा नरकसाधनस्य कर्मण एव प्रायश्चित्तविषयत्वात् श्येनयागस्य नरकसाधनत्वम् अवर्जनीयम् इति भावः । **अनुपदिष्ट** इति । यस्य हिंसारूपस्य कर्मणः प्रायश्चित्तं विहितं तस्यैव ''न हिंस्यात्'' इति निषेधविषयतया प्रत्यवायजनकत्वम् । यस्य तु हिंसारूपकर्मणः प्रायश्चित्तं न विहितं न तस्य प्रत्यवायजनकत्वम् इति न तादृशहिंसायाः निषेधविषयत्वम् । यज्ञीयपशुहिंसायाः प्रायश्चित्तं न विहितम् । अतः सा हिंसा न निषेधविषय इति भावः । तथा च अनुपदिष्टं प्रायश्चित्तं यस्या हिंसायाः तदितरहिंसाया एव ''न हिंस्यात्'' इति निषेधविधिविषयत्वम् इति तात्पर्यम् । ततश्च श्येनयागस्य ''न हिंस्यात्'' इति निषेधविषयत्वं स्थितम् इति कथं तस्य बलवदनिष्टाननुबन्धित्वम् इति शङ्का स्थिता ।।

तस्याः समाधानं वदन् उत्तरग्रन्थम् अवतारयति – **साक्षान्मरण** इत्यादिना । साक्षात् मरणसाधनव्यापार एव हिंसा, श्येनयागस्तु न तथा, अभिचारद्वारा तस्य मरणसाधनत्वात् । अतः न तस्य हिंसात्वम् ''न हिंस्यात्'' इति निषेधाविषयतया तस्य नरकसाधनत्वाभावात् बलवदनिष्टाननुबन्धित्वम् अस्त्येव । यदि तु साक्षात्परंपरासाधारणमरणानुकूलव्यापारमात्रं हिंसा स्यात्, तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वापत्तिः । तन्निर्मितखड्गाभिघातेन तन्निर्मितकूपपतनेन च कस्यचिन्मरणसंभवात् ।।

न च – मरणोद्देश्यकः मरणानुकूलव्यापारः हिंसा। खड्गकारव्यापारस्य कूपकर्तृव्यापारस्य च धनपुण्याद्युद्देश्यकत्वेन मरणोद्देश्यकत्वाभावात् न हिंसकत्वापत्तिः

इति – वाच्यम् । तथा सति अन्योद्देशेन प्रक्षिप्तेन नाराचेन यत्र ब्राह्मणस्य मृतिः तत्र नाराचप्रक्षेपस्य हिंसात्वं न स्यात् । यदि तु ब्राह्मणवधस्य प्रायश्चित्तविषयत्वात् हिंसात्वम्, तदा मरणोद्देश्यकः साक्षात्परंपरासाधारणमरणानुकूल-व्यापारः हिंसा इति आयाति । तथा च श्येनयागस्यापि तथात्वात् हिंसात्वम् अवर्जनीयम् इति तिष्ठति । तस्य समाधानम् उक्तं मूले श्येनवारणाय **अदृष्टाद्वारकत्वेन विशेषणात्** इति । श्येनस्य अदृष्टद्वारैव वैरिमरणसाधनत्वात् अदृष्टाद्वारकमरणसाधनत्वं नास्ति इति न हिंसात्वम् इति भावः । शिष्टं स्पष्टम् ।।

मुक्तावली

केचित्तु – श्येनस्य **हिंसा फलम्**, न तु मरणम् । तेन श्येनजन्यखड्गाघाता-दिरूपा हिंसा अभिचारपदार्थः । **तस्य च पापजनकत्वम्** । अतः श्येनस्य वैधत्वात् पापाजनकत्वेऽपि अग्रिमपापं प्रतिसन्धाय सन्तः न प्रवर्तन्ते इति - आहुः ।।

दिनकरी

अदृष्टाद्वारकत्वविशेषणं विनैव श्येने बलवदनिष्टाननुबन्धित्वम् उपपादयतां मतम् आह – **केचित्तु** इति । **हिंसा फलम्** इति । साक्षान्मरणफलकः व्यापारः फलम् इत्यर्थः । **तस्य** – खड्गाभिघातादेः । **पापजनकत्वम्** इति । 'अभिचारमहीनं च'' इत्यादिना अभिचारस्य पापजनकत्वबोधनात्, साक्षान्मरणजनकव्यापारस्यैव अभिचारपदार्थत्वात् इति भावः ।।

न च – पूर्वं ''न च'' इत्यादिना साक्षात् मरणजनकव्यापरस्यैव हिंसात्वम् इति आशङ्कितत्वात् तेन पौनरुक्त्यम् इति – वाच्यम् । पूर्वं साक्षात् मरणजनकस्य

श्येनजन्यापूर्वस्य हिंसात्वम् आशङ्कितम्, इह च तथाभूतस्य खड्गाभिघातादेः इति भेदात् ।।

न च – "आदि" पदेन श्येनजन्यापूर्वस्य तथाभूतस्य ग्रहणात् कथं भेद इति – वाच्यम् । श्येनजन्यापूर्वस्य एतन्मते खड्गाभिघातं प्रत्येव व्यापारतया तस्य मरणजनकत्वाभावात् ।।

न च – साक्षात् मरणजनकव्यापारस्य हिंसात्वे खड्गाभिघातेन ब्राह्मणे व्रणपाकपरंपरया मृते हिंसात्वानुपपत्तिः तदवस्थैव इति – वाच्यम् । तत्र खड्गाभिघाताद्युत्तरमेव सन्निपातादिदोषस्य उत्पत्त्या मरणं प्रति तस्य व्यापारतया व्यापारेण व्यवधानासंभवात् ।।

कुतस्तर्हि आस्तिकानां श्येने न प्रवृत्तिः? अत आह – अग्रिम इति । तथा च पापप्रयोजकत्वात् न तत्र आस्तिकानां प्रवृत्तिः इति भावः ।।

अत्र नव्याः – मास्तु श्येनस्य "मा हिंस्यात्" इति निषेधविषयत्वम्, तथापि अभिचारतया पापजनकत्वं सर्वसंमतम् । अभिचारस्य उपपातकमध्ये मनुना परिगणितत्वात् इति कथं तस्य बलवदनिष्टाननुबन्धित्वम् ।।

यच्च उक्तम् – श्येनजन्यखड्गाभिघातादेरेव अभिचारतया पापजनकत्वं न श्येनस्य इति, तदपि न । "अभिचारमहीनं च" इत्यत्र अभिचारपदेन तज्जनकश्येनादेः ग्रहणात् । अन्यथा प्रत्यभिचारेण यत्र न खड्गाभिघाताद्युत्पत्तिः तत्र प्रायश्चित्तं न स्यात् । एवमपि श्येने पापप्रयोजकतया बलवदनिष्टाप्रयोजकत्वोपपादनस्य अशक्यत्वाच्च । प्रवृत्तिं प्रति बलवदनिष्टाप्रयोजकत्वज्ञानस्यैव जनकतया तद्विषयस्यैव विध्यर्थत्वात् ।।

तथा च श्येनस्य बलवदनिष्टाननुबन्धित्वम् उपपाद्य विधेः बलवदनिष्टाननुबन्धित्वविशिष्ट-इष्टसाधनत्वविशिष्ट-कृतिसाध्यत्वे शक्तिः अयुक्ता । किन्तु

त्रिषु शक्तित्रयं स्वीकृत्य क्वचित् कस्यचिदर्थस्य बोध इत्यङ्गीकरणीयम् । ''श्येनेन'' इत्यादौ तु बलवदनिष्टाननुबन्धित्वस्य बोधः न भवत्येव, परन्तु इष्टसाधनत्व-कृतिसाध्यत्वयोः एव इति ।।

किञ्च विशेषणविशेष्यभावे विनिगमनाविरहेणापि विशिष्टे शक्तिः न युक्ता । न च – प्रत्येकं शक्तिं स्वीकृत्य कचित् कस्यचिदर्थस्य बोधोपगमे नियामकाभाव इति – वाच्यम् । तात्पर्यस्यैव नियामकत्वात् ।।

प्रत्येकशक्तिपक्षे ''अगम्यां गच्छेत्'' इत्यादिवाक्यानाम् इष्टसाधनत्वादि-प्रमाजनकतया प्रामाण्यापत्तिः इत्यपि न । **इष्टापत्तेः । तत्र अप्रामाण्यव्यवहारस्तु** कदाचित् बलवदनिष्टानुनबन्धित्वभ्रमजनकत्वनिबन्धनः ।।

न च – ''बलवदनिष्टाननुबन्धित्वे सति इष्टसाधनत्वे सति कृतिसाध्यः पाकः'' इत्येव बोधः. न तु कृतिसाध्यत्वे सति इत्यादिरूपः इति विशिष्टशक्तिपक्षेऽपि न विनिगमनाविरहः इति – वाच्यम् । तथैव बोधः नान्यथा इत्यस्य शपथनिर्णेयत्वात् । तस्मात् बलवदनिष्टाननुबन्धित्वादिषु प्रत्येकं शक्तिः इति प्रथमकल्प एव युक्तः ।।

तत्रापि बलवदनिष्टाननुबन्धित्वं न अर्थः । यागादिजन्यनान्तरीयकदुःखस्यापि यदा कदाचित् यस्य कस्यचित् बलवद्द्वेषविषयतया **''यजेत'' इत्यादीनाम् अप्रामाण्यापत्तेः । ''न कलञ्जम्''** इत्यादिनिषेधविधिवत् ''अश्वमेधेन न यजेत'' इत्यादीनामपि प्रामाण्यापत्तेश्च । **अश्वमेधादौ** यदा यः पुरुषः प्रवर्तते, तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वम् अर्थ इति तु न सत् । कालभेदेन पुरुषभेदेन च विधिशक्तिकल्पने गौरवात्, **कालविशेषपुरुषविशेषाणां** विशिष्य ज्ञातुम् अशक्यतया कालविशेषपुरुषविशेषान्तर्भावेण शक्तेः दुर्ग्रहत्वाच्च । ''न **अश्वमेधेन** यजेत'' इत्यादि निषेधविधिवत् ''न कलञ्जं भक्षयेत्'' इत्यादि

निषेधविधीनाम् अप्रामाण्यापत्तेश्च । तत्र यदा यः पुरुषः प्रवर्तते तत्कालीन-तत्पुरुषीयबलवद्द्वेषविषयाजनकत्वस्य तत्रापि सत्त्वात् ।।

किन्तु वैदिकविधेः पापाजनकत्वम् अर्थः । तदभाव एव ''न कलञ्जं भक्षयेत्'' इत्यादौ नञा बोध्यते । ''शाकं न भुञ्जीत'' इत्यादिवाक्यस्य प्रामाण्यनिर्वाहाय रोगाजनकत्वमप्यर्थः । एवं ''पुष्ये न उद्वहेत्'', ''न एकः पर्वतम् आरोहेत्'' इत्यादावपि तत्तदनिष्टाजनकत्वम् अर्थः बोध्यः ।।

न च शक्त्यानन्त्यम् । नरकत्वरोगत्वादीन् द्वेषविषयतावच्छेदकत्वेन उपलक्षणीभूतेन अनुगमय्य तत्तदवच्छिन्नप्रतियोगिताकाभावकूटे एकशक्त्यभ्युपगमात्, रोगाद्यजनकत्वादौ लौकिकलिङः लक्षणाभ्युपगमाद्वा इति – वदन्ति ।।

राजीवोल्लासः

हिंसात्वानुपपत्तिः इति । **खड्गाभिघातस्य** इत्यादिः । **व्यापारेण व्यवधानासंभवात्** इति । व्यापारेण व्यवधानस्य कारणताविघटकत्वासंभवात् इत्यर्थः । कारणत्वस्य कार्यनियताव्यवहितपूर्ववर्तिस्वस्वव्यापारान्यतरकत्व-रूपत्वात् । अन्यथा यागादेरपि स्वर्गकारणत्वस्य बाधापत्तेः इति भावः । **व्यापारेण** इति । व्यापारेण व्यापारिणोऽन्यथासिद्ध्यभावात् इति पाठः । **पापप्रयोजकत्वात्** इति । पापजनकजनकत्वात् इत्यर्थः ।।

प्रत्यभिचारेण इति । तस्य श्येनजन्यापूर्वनाशकत्वं वा, तज्जन्यापूर्वस्य खड्गाभिघाते प्रतिबन्धकत्वं वा। **तत्र प्रायश्चित्तं न स्यात्** इति । अत्र इष्टापत्तिम् आशङ्क्य आह – **एवम् अपि** इति । **अप्रयोजकत्वज्ञानस्यैव** इति । अन्यथा भवन्मतेऽपि श्येने आस्तिकानां प्रवृत्त्यापत्तिः इति भावः ।।

ननु एतावता विधिशक्तिविचारे किमायातम् इति, अत आह – **तथा च** इति । **अयुक्ता** इति । शक्तिः वक्तुम् अयुक्ता इत्यर्थः ।।

ननु शत्रुवधे यदा उत्कटकामना, तदा श्येनप्रयोज्यपापे बलवद्द्वेषानुदयात् न बलवद्द्विष्टसाधनत्वान्वये बाध इति, अतः विशिष्टे एकशक्तिकल्पनापेक्षया शक्तित्रयकल्पनं गौरवपराहतम् इत्याक्षेपम् अपनुदति – **किं च विशेषण** इति । बलवदनिष्टाननुबन्धित्वविशिष्ट–इष्टसाधनत्वविशिष्ट–कृतिसाध्यत्वे वा इष्टसाधनत्वविशिष्ट–कृतिसाध्यत्वविशिष्ट–बलवदनिष्टाननुबन्धित्वे वा इत्यादिरीत्या विनिगमनाविरहात् गुरुतरेषु नवसु शक्तिनवककल्पनापेक्षया लघुशरीरेषु त्रिषु शक्तित्रयं लघु इति भावः ।।

प्रत्येकं शक्तित्रयकल्पनपक्षे दोषं शङ्कते – **प्रत्येकशक्तिपक्ष** इति । **इष्टापत्तेः** इति । सुखविशेषाभिलाषिणं प्रति लोके ''अगम्यां गच्छेत्'' इत्यादिवाक्यप्रयोगस्य कदाचित् दर्शनात् इति भावः । ननु एतादृशं वाक्यम् अप्रमाणम् इत्यपि कदाचित् व्यवहारो दृश्यते, तस्य का गतिः ? इत्यत्र आह – **तत्र अप्रामाण्य** इति । **यजेत इत्यादीनाम् अप्रामाण्यापत्तेः** इति । यागादिजन्यनान्तरीयकदुःखस्यापि यदा कदाचित् यस्य कस्यचित् बलवद्द्वेषविषयत्वसंभवेन बलवद्द्वेषविषयतादृशदुःखजनकत्वस्यैव सत्त्वेन तादृश-दुःखाजनकत्वस्य बाधात् बाधितार्थबोधकतया ''यजेत'' इत्यादेः अप्रामाण्यापत्तेः इति भावः । ननु ''श्येनेन यजेत'' इत्यत्रेव ''यजेत स्वर्गकाम'' इत्यादौ बलवदनिष्टाननुबन्धित्वस्य नैव बोधः । तथा च न अप्रामाण्यापत्तिः इति, अत आह – **न कलञ्जम् इत्यादि** इति । अश्वमेधयागादौ अपि तज्जन्यश्रमरूपदुःखे कदाचित् द्वेषविषयत्वसत्त्वेन द्वेषविषयाननुबन्धित्वाभावात् ''अश्वमेधेन न यजेत'' इति वाक्यस्य प्रामाण्यापत्तेः इत्यर्थः । उक्तवाक्यस्य प्रामाण्यापत्तिं परिहरति – **अश्वमेधादौ** इति । प्रामाणिकं गौरवं न दोषाय इत्युक्तावपि आह – **कालविशेष** इति । ननु लिङः स्वविशिष्टक्षणद्वयावृत्तिधर्मवद्वृत्तिस्वविशिष्ट-पुरुषद्वयावृत्तिधर्मवद्वृत्तिबलवद्द्वेषविषयाजनकत्वे शक्तिः । धर्मयोः स्ववैशिष्ट्यं च

स्वबोध्यकृतिविशिष्टत्वसंबन्धेन । कृतिवैशिष्ट्यं सामानाधिकरण्यसंबन्धेन । सामानाधिकरण्यघटकाधिकरणता प्रथमे कालिकसंबन्धावच्छिन्ना । द्वितीये समवायसंबन्धावच्छिन्ना । स्वविशिष्टत्वादिकम् उपलक्षणम् इति न तस्य शाब्दे भानम् । धर्मौ च क्षणपुरुषगततत्तद्व्यक्तित्वे । इत्थं च शक्तेः ऐक्यम् । तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वस्य शाब्दे भानं च सुष्ठु घटते इत्यतः दोषान्तरम् आह – **न अश्वमेधेन** इति – इति **सुबोधिनीकाराः** । यद्यपि इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वस्य विध्यर्थत्वेनैव अत्र दर्शितसकलदोषवारणं संभवति, तथापि अगम्यागमनादौ उत्कटरागवतां प्रवृत्त्युपपत्तये तज्ज्ञानस्य प्रवर्तकत्वं न इत्यभ्युपगन्तव्यम्, प्रवर्तकज्ञानविषयस्यैव च विध्यर्थत्वम् इति दोषापरिहार एव इति । एतावता बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वं निराकृतम् ।।

अथ स्वसिद्धान्तम् आह – **किं तु** इति । **पापाजनकत्वम्** इति । नरकाजनकत्वम् इति परे । ''यजेत'' इत्यादि वेदवाक्यस्थलिङादिप्रत्ययस्य कृतिसाध्यत्व-इष्टसाधनत्ववत् पापाजनकत्वमप्यर्थः । ''न कलञ्जं भक्षयेत्'' इत्यादौ नञा पापाजनकत्वाभाव एव बोध्यते । न तु कृतिसाध्यत्वाभाव - इष्टसाधनत्वाभावौ अपि, कलञ्जभक्षणे तयोः बाधात् । ''शाकं न भुञ्जीत'' इत्यादिलौकिकवाक्ये तु लिङः रोगाजनकत्वम् अर्थः । तदभावो नञा शाकभोजने प्रत्याय्यते। न च – पापाजनकत्वरोगाजनकत्वादौ लिङः शक्तिस्वीकारे शक्यभेदेन शक्त्यानन्त्यम् इति – वाच्यम् । पापत्व-नरकत्व-रोगत्वादीन् द्वेषविषयतावच्छेदकत्वेन उपलक्षणेन अनुगमय्य तत्तदवच्छिन्नप्रतियोगिताकाभावकूटे एकशक्त्यङ्गीकारात् । तथा च द्वेषविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्न-प्रतियोगिताकाभावकूटे लिङादेः शक्तिः इति भावः । लाघवात् आह – **रोगाद्यजनकत्वादौ** इति ।।

मुक्तावली

आचार्यास्तु – आप्ताभिप्रायः विध्यर्थः, ''पाकं कुर्याः'' इत्यादौ आज्ञादिरूपेच्छावाचित्ववत् लिङ्मात्रस्य इच्छावाचित्वम्, लाघवात् । एवं च ''स्वर्गकामो यजेत'' इत्यादौ ''यागः स्वर्गकामकृतिसाध्यतया आप्तेष्टः'' इत्यर्थः । ततश्च आप्तेष्टत्वेन इष्टसाधनत्वादिकम् अनुमाय प्रवर्तते । कलञ्जभक्षणे तदभावात् न प्रवर्तते ।।

यस्तु वेदे पौरुषेयत्वं न अभ्युपैति, तं प्रति विधिरेव तावत्, गर्भ इव श्रुतिकुमार्याः पुंयोगे, मानम् ।।

न च कर्त्रस्मरणं बाधकम्; कपिलकणादादिभिः अद्यपर्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात् । अन्यथा स्मृतीनामपि अकर्तृकत्वापत्तेः ।।

तत्रैव कर्तृस्मरणम् अस्ति इति चेत्, वेदेऽपि ''छन्दांसि जज्ञिरे तस्मात्'' इत्यादिकर्तृस्मरणम् अस्त्येव । एवं ''प्रतिमन्वन्तरं चैषा श्रुतिः अन्या विधीयते'' इत्यपि द्रष्टव्यम् ।।

''स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा ।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ।।

इति तु वेदस्य स्तुतिमात्रम् ।।

न च – पौरुषेयत्वे भ्रमादिसंभवात् अप्रामाण्यं स्यात् इति – वाच्यम् । नित्यसर्वज्ञत्वेन निर्दोषत्वात् । अत एव पुरुषान्तरस्य भ्रमादिसंभवात् न कपिलादेरपि कर्तृत्वं वेदस्य ।।

किञ्च, वर्णानामेव अनित्यत्वस्य वक्ष्यमाणत्वात् सुतरां तत्सन्दर्भस्य वेदस्य अनित्यत्वम् इति संक्षेपः ।।

दिनकरी

विध्यर्थश्च आप्ताभिप्रायः, स च स्वेष्टसाधनतानुमापकः, इष्टसाधनताज्ञानं च प्रवर्तकम् इति उदयनाचार्यमतम् आह – आचार्यास्तु इति । "इत्यादौ" इति "आदि" ना "पाकं कुर्याम्" इति उत्तमपुरुषपरिग्रहः । "आज्ञादि" इति "आदि" ना अध्येषणादिपरिग्रहः । तथा च "पाकं कुर्याः", "पाकं कुर्याम्" इति मध्यमोत्तमपुरुषयोः आज्ञाध्येषणादिरूपेच्छावाचित्वं क्लृप्तम् । तद्दृष्टान्तेन प्रथमपुरुषेऽपि इच्छावाचित्वम् अनुमेयम् इति भावः । लाघवात् इति । बलवदनिष्टाननुबन्धीष्टसाधनत्वाद्यपेक्षया इच्छात्वेन विधिशक्तौ लाघवात् इत्यर्थः । इत्यर्थः इति बोधः । अनुमाय इति । अत्र च "यागः मम स्वर्गकामस्य बलवदनिष्टाननुबन्धीष्टसाधनम्, मत्कृतिसाध्यतया आप्तेन इष्यमाणत्वात्, मन्मात्रकृतिसाध्यतया इष्यमाणमद्भोजनवत्" इति अनुमानम् अवधेयम् । तदभावात् – आप्तेष्टत्वाभावेन तद्धेतुकेष्टसाधनत्वज्ञानाभावात् ।।

ननु वेदे वक्तुः अभावात् कस्य इच्छा लिङा बोधनीया? इति, अत आह – यस्तु इति । विधिरेव इति । वक्तृभिन्नेच्छाया बोधने विधेः सामर्थ्याभावात् विधिरेव वेदवक्तरि ईश्वरे मानम् इति भावः ।।

न च कर्त्रस्मरणम् इति । कर्तुः – वेदकर्तुः, अस्मरणम् – स्मृतिभिः अबोधनम् । तथा च "वेदः अपौरुषेयः, अस्मर्यमाणकर्तृकत्वात्" इत्यनुमानं बाधकम् इत्यर्थः । कपिलकणाद इति । कपिलकणादगौतमादिभिः तच्छिष्यैश्च अद्यपर्यन्तम् इत्यर्थः । कर्तृस्मरणस्य – सकर्तृकबोधकस्मृतेः इत्यर्थः ।।

ननु ईश्वरस्य वेदवक्तुः सर्गादौ केनचित् साक्षात् अदृष्टत्वात् अननुभवे अस्मरणं तदभावे ऋषीणां स्मृतिप्रणयनं च न संभवति इति चेत्, न । पौरुषेयत्वानुमानेन वेदवक्तारम् अनुभूय तन्मूलकस्मरणस्मृतिप्रणयनयोः संभवात् । अन्यथा – वेदे

सकर्तृकत्वानङ्गीकारे । तत्रैव – स्मृतिष्वेव । वेदस्य सकर्तृकत्वे श्रुतिं प्रदर्श्य स्मृतिमपि प्रदर्शयति – एवम् इति । ननु वेदस्य नित्यत्वबोधकं भारताद्येव तस्य अकर्तृकत्वे प्रमाणं भविष्यति इति आशङ्कते – **स्वयंभूः** इति । नित्य इत्यर्थः । **एष भगवान्** इत्यपि वेदविशेषणम् । **स्तुतिमात्रम्** इति । तथा च पूर्वोक्तश्रुतिस्मृत्योः विरोधेन अस्य भारतस्य न स्वार्थे तात्पर्यम्, अपि तु स्तुतिपरत्वम् इति भावः । **भ्रमादिसंभवात्** – पुरुषस्य भ्रमप्रमादादिदोषसंभवात् इत्यर्थः । **नित्यसर्वज्ञत्वेन** इति । **नित्यसर्वविषयकज्ञानवत्त्वेन** इत्यर्थः । **निर्दोषत्वात्** – भ्रमादिशून्यत्वात् । **अत एव** – नित्यसर्वज्ञत्वाभावादेव ।।

ननु नित्यसर्वज्ञपुरुषप्रणीतत्वापेक्षया नित्यनिर्दोषत्वं वेदे स्वीकृत्य तदेव वेदप्रामाण्ये प्रयोजकम् अस्तु । तथा च **सकर्तृकत्वानुमाने** बाधः इति, अतः वेदस्य नित्यत्वे बाधकम् आह – **किञ्च** इति । **तत्सन्दर्भस्य** इति । **तन्निष्ठानुपूर्वीविशेषस्य** इत्यर्थः । **आनुपूर्व्या नित्यत्वे** तु अनित्यसमवेतनित्यस्य जातित्वेन आनुपूर्व्या जातित्वापत्तेः इति भावः ।।

अत्र च आप्तेच्छाविषयत्वस्य ईश्वरेच्छाविषयत्वरूपस्य केवलान्वयिनः कलञ्जभक्षणेऽपि सत्त्वात् बलवदनिष्टाननुबन्धित्वविशिष्ट-इष्टसाधनत्वरूपसाध्यस्य च तत्र अभावेन व्यभिचारात्, कथं तस्य अनुमापकत्वम्? बलवदनिष्टाननुबन्धित्व-विशिष्ट-इष्टसाधनत्वप्रकारकेच्छाया लिङर्थत्वे च लाघवात्, बलवदनिष्टाननुबन्धीष्ट-साधनत्वमेव लिङर्थः अस्तु, कृतम् आप्तेच्छया इति अस्वरसः **आचार्यास्तु** इत्यनेन सूचितः ।।

ननु इष्टसाधनत्वस्य न विधितः बोधः संभवति । स्वर्गत्वावच्छिन्नसाधनत्वस्य यागे बाधात्, गङ्गास्नानादिजन्यस्वर्गे व्यभिचारात्, स्वर्गनिष्ठवैजात्यावच्छिन्न-साधनत्वस्य यागे सत्त्वेऽपि तद्वैजात्यस्य विधिबोधितस्वर्गसाधनत्वान्यथानुपपत्त्या

कल्पनीयस्य प्रागनुपस्थित्या तद्घटितकारणत्वे विधिशक्तिग्रहायोगात् इति चेत्, न ।।

स्वरूपसंबन्धविशेषरूपाया एव कारणताया विध्यर्थत्वोपगमात् इति एके । अन्यथासिद्धिनिरुपकतानवच्छेदक–नियतोत्तरवर्तितावच्छेदक – धर्मवत्स्वर्गकत्वमेव स्वर्गकारणत्वम् इति अन्ये ।।

वस्तुतस्तु – स्वर्गनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववर्तितावच्छेदकधर्मवत्त्वमेव स्वर्गकारणत्वम् । तच्च यागे न बाधितम् । स्वर्गनिष्ठवैजात्यरूपस्वर्गधर्मावच्छिन्नं प्रति यागस्य व्यभिचाराभावात् ।।

ननु विधेः इष्टसाधनत्वे शक्तत्वेऽपि स्वर्गसाधनत्वस्य कथं ततो बोधः । स्वर्गसाधनत्वादौ विभिन्नशक्तिकल्पने तु शक्त्यानन्त्यम् । न च – विधिप्रत्ययोपस्थिते इष्टे स्वर्गपदोपस्थितस्वर्गस्य अभेदेन अन्वयात् स्वर्गाभिन्नेष्टसाधनत्वस्य बोधः संभवति इति – वाच्यम् । स्वर्गपदस्य समासान्तर्गततया तदर्थस्य अन्यत्र अन्वयासंभवात् इति चेत्, न । स्वर्गसाधनत्वादौ विधेः शक्तिकल्पनेन तथाबोधनिर्वाहात् ।।

न च – एकैकस्य बोधे विनिगमकाभावः । स्वर्गादिपदसमभिव्याहाराधीन तत्तद्धर्मघटित-साधनत्वे तात्पर्यग्रहस्यैव विनिगमकत्वात् ।।

न च – एवं विधिशक्त्यानन्त्यम्, स्वर्गत्वादिधर्मावच्छिन्ननिरूपितसाधनत्वेषु एकशक्त्युपगमात् । न च शक्यतावच्छेदकभेदात् शक्तिभेदः, इष्टतावच्छेदकत्वेन स्वर्गत्वादीन् अनुगतीकृत्य तदवच्छिन्ननिरूपितसाधनत्वे एकशक्त्युपगमात् ।।

न च – इष्टतावच्छेदकत्वेनैव शाब्दबोधे स्वर्गत्वादीनां भानं स्यात्, न तु स्वरूपतः इति – वाच्यम् । इष्टतावच्छेदकत्वस्य उपलक्षणतया शक्तिविषयत्वात्

विशेषणस्यैव शाब्दबोधे भानोपगमात् । उपलक्षणत्वं च तत्पदजन्यबोधाविषयत्वेन शक्तिविषयत्वम्, तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वमेव अत्र विशेषणत्वम् इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

स्वेष्टसाधनतानुमापक इति। ''यागः इष्टसाधनम्, अयमत्र प्रवर्तताम् इत्याकारकाप्ताभिप्रायविषयत्वात्'' इत्यनुमानाकारः । **अभिप्रायः** इच्छा । **अध्येषणा** अधिका प्रार्थना, सत्कारपूर्वकगुर्वादिप्रेरणं वा । ''आदि''ना निमन्त्रणादिपरिग्रहः । **इच्छावाचित्वम् अनुमेयम्** इति । ''प्रथमपुरुषलिङादिः इच्छावाचकः, लिङादित्वात्, मध्यमादिपुरुषलिङादिवत्'' इत्यनुमानाकारः । **इच्छात्वेन विधिशक्तौ** इति । शक्यतावच्छेदकस्य लघुत्वात् इत्यर्थः । इच्छायाम् आप्तसमवेतत्वादिकं प्रमाणान्तरेण अवगम्य इष्टसाधनत्वम् अनुमेयम् । अन्यथा इष्टसाधनत्वाभाववति अनाप्तसमवेतेच्छाविषयत्वसत्त्वेन इच्छाविषयत्वस्य व्यभिचरितत्वात् इति ध्येयम् । **इति बोध** इति । यद्यपि प्रथमान्तार्थमुख्यविशेष्यक एव बोधः नैयायिकैः अङ्गीक्रियते, तथापि अनुभवबलात् व्युत्पत्तिवैचित्र्यम् अङ्गीकृत्य ''यागः स्वर्गकामकृतिसाध्यतया आप्तेष्टः'' इत्याकारकः धात्वर्थमुख्यविशेष्यकः बोधः लिङादिसमभिव्याहारस्थले अङ्गीक्रियत इति भावः । अन्वयक्रमश्च इत्थम् – स्वर्गकामपदार्थः आधेयतासंबन्धेन आख्यातार्थकृतौ अन्वेति । कृतिश्च साध्यतासंबन्धावच्छिन्नप्रकारताकत्वसंबन्धेन लिङर्थेच्छायाम् अन्वेति । सा च विषयतासंबन्धेन प्रकृतिभूतधात्वर्थे यागेऽन्वेति इति । ''आप्तेच्छाविषययागानुकूल-कृतिमान् स्वर्गकाम'' इति नवीननैयायिकाभिमतः प्रथमान्तार्थमुख्यविशेष्यकः अत्र बोधः इत्यवसेयम् । **मत्कृतिसाध्यतया** इति । मत्समवेतकृतिसाध्यत्वप्रकारक-आप्तसमवेत-इच्छाविषयत्वात् इत्यर्थः ।

सुखादौ व्यभिचारवारणाय प्रकारकान्तम् । **मुक्तावल्यां तदभावात्** इत्यस्य आप्तेष्टत्वाभावात् इत्यर्थः स्वरसतः प्रतीयते। तस्य च न साक्षात् प्रवृत्त्यभावप्रयोजकत्वम् इत्यतः विवक्षितार्थं स्फुटयति – **आप्तेष्टत्वाभावेन** इत्यादिना । **तद्धेतुक इति** । आप्तेष्टत्वहेतुकबलवदनिष्टाननुबन्धीष्टसाधनत्वज्ञानाभावात् इत्यर्थः । परं तु लोकावगततृप्तिसाधनत्वज्ञानेन ''न कलञ्जम्'' इति निषेधं जानतोऽपि प्रवृत्तिः न एतावता वारिता भवति । अतः आप्तेष्टत्वाभावानुमितबलवदनिष्टजनकत्वज्ञानात् इत्यर्थो वर्णनीयः । ''कलञ्जभक्षणं बलवदनिष्टानुबन्धि, इष्टसाधनत्वेन आप्तेन अनिष्यमाणत्वात्, मधुविषसंपृक्तान्नभोजनवत्'' इत्यनुमानाकारः । **वक्तृभिन्नेच्छाया** इति । वक्तृभिन्ननिष्ठाया इच्छाया इत्यर्थः । **अननुभवेऽस्मरणम्** इति । अननुभवे सति अस्मरणम् इत्यर्थः । **तदभावे** – स्मरणाभावे । **पौरुषेयत्वानुमानेन** इति । ''वेदः पौरुषेयः, वाक्यसमूहत्वात्, भारतादिवाक्यसमूहवत्'' इत्यनुमानेन इत्यर्थः । **अनुभूय** इति । तथा च अनुमित्यात्मकानुभवसत्त्वेन न स्मरणानुपपत्तिः इति भावः । **नित्यसर्वज्ञत्वेन** इत्यत्र नित्यत्वं न धर्मिविशेषणम्, प्रकृतानुपयोगात्, किं तु ज्ञानरूपक्रियाविशेषणम् इति स्फुटयति – **नित्यसर्वविषयकज्ञानवत्त्वेन इत्यर्थ** इति । नित्यं सर्वविषयकं च यत् ज्ञानं तद्वत्त्वेन इत्यर्थः । ज्ञाने नित्यत्वविशेषणात् भ्रमत्वव्युदासः । सर्वविषयकत्वात् अज्ञानवत्त्वनिरासः । **सकर्तृकत्वानुमान** इति । ''वेदः सकर्तृकः'' इत्यनुमाने इत्यर्थः । **तन्निष्ठानुपूर्वीविशेषस्य** इति । एकवर्णनिष्ठापरवर्णोत्तरत्वादिरूपस्य इत्यर्थः । आनुपूर्वीविशेषस्य अनित्यत्वसाधनाय विपक्षे – नित्यत्वे – बाधकतर्कं प्रदर्शयति – **आनुपूर्व्या नित्यत्व** इति । **जातित्वापत्तेः** इति। ''आनुपूर्वी जातिः, अनित्यसमवेतत्वे सति नित्यत्वात्, घटत्वादिवत्'' इति भावः । अत्वकत्वादिना सांकर्याच्च न इष्टापत्तिसंभव इति भावः ।।

आचार्यास्तु इत्यादिना उक्तम् आप्ताभिप्रायस्य विध्यर्थत्वे सूचितम् अस्वरसं प्रकटयति – **अत्र च आप्तेच्छा** इत्यादिना । अत्र **सुबोधिनी-काराः** – न च – आप्तेच्छायाः केवलान्वयित्वेऽपि कृतिसाध्यत्वनिष्ठप्रकारता-निरूपितायाः आप्तेच्छाविषयतायाः न केवलान्वयित्वम् इति तद्वत्त्वं कलञ्जभक्षणे न संभवति इति – वाच्यम् । कलञ्जभक्षणस्य वस्तुतः कृतिसाध्यत्वात् तत्प्रकारकेच्छाविषयत्वस्यापि तत्र संभवात् व्यभिचारापरिहारात् । इदम् अत्र चिन्त्यम् – ईश्वरेच्छायाः सर्वविषयकत्वेऽपि यथा गङ्गापदस्य गङ्गायामेव शक्तिः, न तु तीर इति पूर्वं दर्शितं, तथा बलवदनिष्टानुबन्धिनि निरर्थके च कृतिनिरूपितं साध्यत्वम्, साध्यं च कलञ्जभक्षणादि इत्यादिरीत्यैव ईश्वरेच्छास्वीकारात् न हेतोः व्यभिचारिता इति ।।

मुक्तावल्यां संक्षेप इत्यनेन सूचितम् अर्थं प्रकटयति – **ननु इष्टसाधनत्वस्य** इत्यादिना । इष्टत्वेन इष्टसाधनत्वज्ञानं न प्रवर्तकम् । किं तु यद्धर्मप्रकारिका इच्छा तद्धर्मावच्छिन्नसाधनत्वज्ञानम् इति प्रकृते स्वर्गत्वावच्छिन्ननिरूपितसाधनत्वस्यैव भानं स्वीकार्यं, तच्च बाधितम् । यागस्य स्वर्गविशेषं प्रत्येव हेतुत्वेन स्वर्गसामान्यहेतुत्वाभावात्। बाधमेव आह – **गङ्गास्नान** इति । **व्यभिचारात्** इति । यागं विनापि जायमानत्वेन व्यतिरेकव्यभिचारात् । ननु स्वर्गनिष्ठवैजात्यमेव यागकार्यतावच्छेदकम् । तथा च न व्यभिचार इत्याशङ्क्य, तथापि न उपपत्तिः इति दर्शयति – **स्वर्गनिष्ठ** इति । **अन्यथासिद्धि** इति । नियतोत्तरवृत्तितावच्छेदक-धर्मत्वेन च वैजात्यमेव शाब्दबोधे भासत इति न वाक्यस्य अप्रामाण्यम् ।।

ननु यागे यागसाध्यस्वर्गकत्वज्ञानापेक्षया लाघवात् स्वर्गे यागसाध्यत्वज्ञानस्यैव प्रवृत्तिहेतुता स्यात् । अस्तु तथा इति चेत्, तर्हि यागसाध्यस्वर्ग एव विध्यर्थो भवेत्, न तु इष्टसाधनत्वम् इत्याद्यभिसन्धाय आह – **वस्तुतस्तु** इति ।

व्यभिचाराभावात् इति । व्यतिरेकव्यभिचाराभावात् इत्यर्थः । अत्र स्वर्गधर्मस्य वैजात्यस्य स्वरूपत एव कार्यतावच्छेदकत्वेऽपि स्वर्गधर्मत्वस्य व्यापकताशरीरे उपलक्षणतयैव प्रवेशात् न स्वर्गधर्मावच्छिन्नकार्यताया अप्रसिद्धिः । अधिकं **व्युत्पत्तिवादे लिङर्थविचारे** द्रष्टव्यम् ।।

ननु एवं स्वर्गसाधनत्वस्य यागे बाधाभावेऽपि लिङा तद्भानं न संभवति, तत्र शक्त्यभावात् इति आक्षिपति – **ननु विधेः** इति । **स्वर्गसाधनत्वादौ** इति । ''आदि''ना तृप्तिपशुसाधनत्वादिपरिग्रहः । **स्वर्गपदोपस्थित** इति । स्वर्गकामसमासघटकस्वर्गपदोपस्थितेत्यर्थः । **अन्वयासंभवात्** इति । समासघटकपदस्य समासाघटकपदसाकाङ्क्षत्वे सामर्थ्यभङ्गात् समासानुपपत्तेः । **सापेक्षमसमर्थं भवति** इति **महाभाष्योक्तेः** । समासघटकपदस्य समासाघटकपदार्थान्वितस्वार्थबोधकत्वं सापेक्षत्वम् । **तत्तद्धर्मघटित** इति । स्वर्गत्वादिरूपधर्मघटितस्वर्गादिसाधनत्वे इत्यर्थः । ''आदि''ना पशुत्वादिपरि-ग्रहः । **तदवच्छिन्न** इति । स्वर्गत्वाद्यवच्छिन्न इत्यर्थः । **अनुगतीकृत्य** इति । इष्टतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ननिरूपित-साधनत्वे लिङादेः शक्तिः इति भावः ।।

ननु तद्धर्मावच्छिन्नोद्देश्यकप्रवृत्तिं प्रति तादृशेच्छां प्रति च तद्धर्मावच्छिन्नसाधनताज्ञानस्य हेतुत्वात्, प्रकृते च स्वर्गत्वावच्छिन्नसाधनताज्ञानाभावात् कथं विधिज्ञानात् स्वर्गत्वप्रकारकेच्छाप्रवृत्ती उपपद्येते इति चेत् – न । वह्निकामस्य वह्नित्वव्याप्यवैजात्यावच्छिन्ननिरूपितसाधनतावति तृणफूत्कारादौ प्रवृत्तिदर्शनात् तद्धर्मप्रकारेण भासमानफलसाधनताज्ञानस्यैव तत्र हेतुत्वोपगमात् । कार्यतावच्छेदकत्वं तद्धर्मस्य तद्धर्मव्याप्यधर्मस्य वा यथासंभवं बोध्यम् इत्याशयेन आह – **अन्यत्र विस्तर** इति ।।

कारिकावली

उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ।
निवृत्तिस्तु भवेत् द्वेषात् द्विष्टसाधनताधियः ।। १५१ ।।

मुक्तावली

उपादानस्य इति । उपादानस्य – **समवायिकारणस्य** अध्यक्षं – प्रत्यक्षं प्रवृत्तौ कारणम् इति ।।

निवृत्तिः इति । द्विष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वम् अन्वयव्यतिरेकात् अवधारितम् इति भावः ।।

दिनकरी

समवायिकारणस्य इति । तत्साध्यकप्रवृत्तिं प्रति तत्समवायिकारणात्मक-तदुपादानगोचरलौकिकप्रत्यक्षस्य हेतुत्वम् ।।

न च – शब्दसाध्यकप्रवृत्तिः मृदङ्गादौ न स्यात्, तदुपादानस्य गगनस्य अतीन्द्रियत्वात् । एवं ध्वंससाध्यकप्रवृत्तिरपि, तत्समवायिनः अप्रसिद्धेः इति – वाच्यम् । इष्टापत्तेः । शब्दसाक्षात्कारसाध्यकप्रवृत्तेरेव मृदङ्गादिगोचराया उपगमात् इति । **प्राचीनमतानुसारेण** इदम् । नवीनमते तु अधिष्ठानमात्रम् उपादानम् बोध्यम् । तेन यागादेः हविः, शब्दस्य मृदङ्गादिः, प्राणसञ्चारादेश्च प्राणवहनाड्यादिः उपादानम् इति बोध्यम् ।।

मूले द्वेषात् इति । फलगतः द्वेषः द्विष्टसाधनाताज्ञानं च निवृत्तिं प्रति कारणम् इत्यभिप्रायेण उक्तम् ।।

राजीवोल्लासः

तत्साध्यक इति । घटसमवायिकारणकपालादिप्रत्यक्षवत एव पुरुषस्य घटसाध्यकप्रवृत्तिः भवति इति लोके दर्शनात् तदनुसारेण तत्साध्यकप्रवृत्तिं प्रति

तत्समवायिकारणात्मकतदुपादानविषयकं प्रत्यक्षं कारणम् इति कल्प्यते । तत्र इयम् आशङ्का भवति – मृदङ्गादौ शब्दसाध्यकप्रवृत्तिः न स्यात् । शब्दसमवायिकारणस्य गगनस्य प्रत्यक्षाभावात्, गगनस्य अतीन्द्रियत्वात् । एवं घटध्वंससाध्यकप्रवृत्तिः न स्यात्, घटध्वंससमवायिकारणस्य अप्रसिद्धेः इति । तत्र समाधानम् आह – **इष्टापत्तेः** इति । मृदङ्गादौ या प्रवृत्तिः तस्याः न शब्दः साध्यः, अपि तु शब्दसाक्षात्कारः, तस्य समवायिकारणम् आत्मा । तद्विषयकः साक्षात्कारः मानसप्रत्यक्षात्मकः अस्त्येव इति भावः ।।

ननु ध्वंससाध्यकप्रवृत्त्यनङ्गीकारे ''अयं ध्वंसाय प्रवर्तत'' इति व्यवहारानुपपत्तिः इति चेत्, न । ध्वंसजनकमुद्गरपातादिव्यापारसाध्यकप्रवृत्तेरेव तादृशव्यवहार-विषयत्वात् । **यागादेः हविः** इति । हविर्विषयकेच्छाविशेषस्यैव यागतया विषयतया हविः तदधिष्ठानम् । **प्राणसंचारादेश्च** इति । अधिकश्वासरूपप्राणसंचारादेः इत्यर्थः । तस्यैव प्रवृत्तिसाध्यत्वात् । प्राणवहननाडीप्रत्यक्षं च स्पार्शनात्मकं बोध्यम् ।।

कारिकावली

यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तत्प्रकीर्तितम् ।। १५२ ।।

मुक्तावली

यत्न इति । जीवनयोनियत्नः यावज्जीवनम् अनुवर्तते । स च अतीन्द्रियः । तत्र प्रमाणम् आह – **शरीर** इति । प्राणसञ्चारो हि अधिकश्वासादिः प्रयत्नसाध्यः । इत्थं च प्राणसञ्चारस्य सर्वस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षप्रयत्नबाधाच्च अतीन्द्रिययत्नसिद्धिः, स एव जीवनयोनिः यत्नः ।।

दिनकरी

प्राणसञ्चारो हि इति । अधिकश्वासादिः प्राणसञ्चारः यत्नसाध्यः, **प्रत्यक्षयत्नसाध्यतया** दृष्टः । धावतः प्रयत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनात् इति भावः । **इत्थं च** इति । दृष्टान्तसिद्धौ इत्यर्थः । **सर्वस्य** इति । एकत्र यत्नसाध्यत्वस्य आनुभविकत्वेन तद्दृष्टान्तेन प्राणसञ्चारत्वावच्छेदेन सर्वत्र **भोक्तृयत्न**-जन्यत्वानुमानात् इति भावः । स एव – प्राणसञ्चारहेतुत्वेन अनुमीयमान एव ।

नव्यास्तु – जीवनयोनियत्वे मानाभावः, **प्राणक्रियायाः अदृष्टविशेषप्रयोज्या**-त्ममनोयोगरूपात् जीवनात् **तत्प्रयोजकादृष्टाद्वा** संभवात्, उक्तानुमानस्य च अप्रयोजकत्वात् । **अन्यथा** एकत्र यत्ने ज्ञानजन्यत्वदृष्टान्तेन जन्ययत्नत्वावच्छेदेन ज्ञानजन्यत्वकल्पनापत्त्या सुषुप्तौ ज्ञानादेरपि **अतीन्द्रियस्य कल्पनापत्तेः** इति – प्राहुः ।।

राजीवोल्लासः

प्रत्यक्षयत्नसाध्य इति । अत्र यत्ने प्रत्यक्षत्वविशेषणं व्याप्तिग्रहस्य सौलभ्यं प्रकाशयति । न तु तस्यापि साध्यकोटौ घटनम् अभिप्रेतम्, बाध-प्रसङ्गात् । ईश्वरयत्नम् आदाय सिद्धसाधनवारणाय आह – **भोक्तृयत्न** इति । **प्राणक्रियायाः**–श्वासादेः । **अदृष्टविशेषप्रयोज्य** इति । तदा तदा फलोन्मुखधर्माधर्मविशेषाधीन इत्यर्थः । अत्र ''सदेहस्य आत्मनो विपच्यमान (फलोन्मुख) कर्माशय (अदृष्ट) सहितस्य मनसा सह संयोगः संबन्धो जीवनम्'' इति **कन्दलीग्रन्थः** अनुसंहितः । एतादृशजीवनपूर्वकत्वं **प्राचीना** यत्नविशेषे स्वीकुर्वन्ति । प्राणक्रियायामेव तत्त्वं सुवचम् इति यत्नविशेषे मानाभाव इति **नवीनानाम्** अभिसन्धिः । वस्तुतः ''तद्धेतोरेव तत्सिद्धौ'' इति न्यायेन अदृष्टविशेष एव प्राणक्रियाया हेतुः, सैव च जीवनम् इत्याशयवान् आह –

तत्प्रयोजकादृष्टाद्वा इति । ननु पूर्वदर्शितानुमानात् जीवनयोनियत्नः सिद्ध एव इति शङ्काम् अपाकरोति – उक्तानुमानस्य इति । अन्यथा इति । एकत्र प्रयत्नसाध्यत्वदर्शनेन सर्वत्र प्रयत्नसाध्यत्वानुमाने । अतीन्द्रियस्य कल्पनापत्तेः इति । तथा च घटादिप्रवृत्तौ घटादिविषयकज्ञानजन्यत्वस्य दर्शनात् तद्दृष्टान्तेन प्रयत्नत्वावच्छेदेन ज्ञानजन्यत्वापत्त्या सुषुप्तिकालीनजीवनयोनियत्ने ज्ञानजन्यत्वापत्तौ अतीन्द्रियज्ञानादेरपि सिद्धिप्रसङ्ग इति भावः ॥

॥ गुरुत्वनिरूपणम् ॥

कारिकावली

अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यात् नित्ये नित्यमुदाहृतम् ॥ १५३ ॥
तदेव असमवायि स्यात्, पतनाख्ये तु कर्मणि ।

मुक्तावली

गुरुत्वं निरूपयति – अतीन्द्रियम् इति । अनित्ये इति । अनित्ये – द्व्यणुकादौ । तत् – गुरुत्वम् अनित्यम् । नित्ये – परमाणौ नित्यम्; गुरुत्वम् इति अनुवर्तते ॥

तत् – गुरुत्वम्, असमवायि – असमवायिकारणम् । पतने – आद्यपतने इत्यर्थः ॥

दिनकरी

पतनसमवायिभिन्नत्वरूपं पतनासमवायित्वं रूपादौ अतिव्याप्तम्, अतः व्याचष्टे – असमवायिकारणम् इति । द्वितीयादिपतनस्य वेगासमवायिकारणकत्वात्

आह – आद्य इति । एवं च ''संयोगासमवधानकालीना क्रिया गुणासमवायिकारणिका, क्रियात्वात्, संयोगजन्यक्रियावत्'' इत्यनुमानेन गुरुत्वसिद्धिः इति भावः ।।

राजीवोल्लासः

''तदेव असमवायि स्यात् पतनाख्ये तु कर्मणि'' इति मूलस्थस्य ,असमवायिपदस्य समवायिभिन्नम् इति यथाश्रुतार्थस्वीकारे पतनसमवायिभिन्नत्वरूपं पतनासमवायित्वं रूपादौ अपि अस्ति इति गुरुत्वलक्षणस्य तत्र अतिव्याप्तिः स्यात्, तद्वारणाय असमवायिकारणपरतया व्याचष्टे इत्याह – **पतनसमवायि** इति । रूपादौ पतनासमवायिकारणत्वं नास्तीति न अतिव्याप्तिः इति भावः । मूलस्थस्य पतनाख्ये इत्यस्य आद्यपतने इत्यर्थ इति व्याख्याने बीजम् आह – **द्वितीयादिपतनस्य** इति । पतनजनकदण्डसंयोगसमवधानकालीनपतनक्रियायां संयोगरूपगुणासमवायिकारणकत्वस्य सिद्धत्वात् सिद्धसाधनम्, तद्वारणाय ''संयोगासमवधानकालीन'' इति पक्षविशेषणम् । संयोगपदम् अत्र क्रियाजनकसंयोगविशेषपरम् । तेन आकाशसंयोगम् आदाय न पक्षाप्रसिद्धिः । द्वितीयादिपतने वेगस्य असमवायिकारणत्वमते संयोगपदं वेगस्यापि उपलक्षणम् । तेन न वेगम् आदाय सिद्धसाधनम् ।।

।। द्रवत्वनिरूपणम् ।।

कारिकावली

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ।। १५४ ।।

सांसिद्धिकं तु सलिले, द्वितीयं क्षितितेजसोः ।

परमाणौ जले नित्यम्, अन्यत्रानित्यमिष्यते ।। १५५ ।।

नैमित्तिकं वन्हियोगात् तपनीयघृतादिषु ।

द्रवत्वं स्यन्दने हेतुः निमित्तं संग्रहे तु तत् ।। १५६ ।।

मुक्तावली

द्रवत्वं निरूपयति – **सांसिद्धिकम्** इति । द्रवत्वं द्विविधम् – सांसिद्धिकं नैमित्तिकं च इति । **द्वितीयं** नैमित्तिकम् । **परमाणौ** इति । जलपरमाणौ द्रवत्वं नित्यम् इत्यर्थः । **अन्यत्र** – पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वम् अनित्यम् ।।

कुत्रचित् तेजसि कुत्रचित् पृथिव्यां च नैमित्तिकं द्रवत्वम् । तत्र को वा नैमित्तिकार्थः, तं दर्शयति – **नैमित्तिकम्** इति । **वन्हि** इति । अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम् । तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां च वर्तते इत्यर्थः । **हेतुः** इति । असमवायिकारणम् इत्यर्थः । **संग्रहे** – सक्तुकादिसंयोगविशेषे । **तत्** – द्रवत्वम् स्नेहसहितम् इति बोद्धव्यम् । तेन द्रुतसुवर्णादीनां न संग्रहः ।।

दिनकरी

अग्निसंयोगजन्यम् इति । अग्निसंयोगासमवायिकारणकम् इत्यर्थः । वक्ष्यमाणातिप्रसङ्गात् आह – **स्नेहसहितम्** इति । तच्च सांसिद्धिकमेव । तथा च सांसिद्धिकद्रवत्वत्वेन हेतुत्वात् न सुवर्णादिद्रवत्वस्य सङ्ग्रह इति भावः ।

न च – अवश्यस्नेहहेतुत्वेनैव अनतिप्रसङ्गे सांसिद्धिकद्रवत्वस्य सङ्ग्रहहेतुत्वे मानाभाव इति – वाच्यम् । स्नेहत्वेन सांसिद्धिकद्रवत्वत्वेन वा हेतुत्वम् इत्यत्र विनिगमनाविरहेण उभयस्यापि हेतुत्वात् ।।

राजीवोल्लासः

अग्निसंयोगजन्ये तृणदाहादौ अतिव्याप्तिवारणाय व्याचष्टे – **अग्निसंयोगासमवायिकारणकम्** इत्यर्थ इति । **संग्रहे – सक्तुकादिसंयोगविशेषे द्रवत्वं निमित्तकारणम्** इत्युक्तं **मूले** । तथा सति द्रुतसुवर्णादीनामपि संग्रहाख्यः संयोगविशेषः, तद्वारणाय स्नेहसहितम् इत्यर्थ इति व्याख्यातं **मुक्तावल्याम्** । द्रुतसुवर्णे स्नेहविरहान्न दोषः । तथा च अर्थात् स्नेहसहितं द्रवत्वं सांसिद्धिकं द्रवत्वमेव भवति इति आशयेन आह – **तच्च सांसिद्धिकमेव** इति । **न सुवर्णादिद्रवत्वस्य संग्रह** इति । सुवर्णादिद्रवत्वात् संग्रहाख्यः संयोगविशेषः सक्तुकादीनां न भवति इति भावः ।।

।। स्नेहनिरूपणम् ।।

कारिकावली

स्नेहो जले स नित्योऽणौ, अनित्योऽवयविन्यसौ ।
तैलान्तरे तत्प्रकर्षात् दहनस्यानुकूलता ।। १५७ ।।

मुक्तावली

स्नेहं निरूपयति–स्नेह इति । जल इति । जले एव इत्यर्थः । सः–स्नेहः ।।

ननु पृथिव्यामपि तैले स्नेह उपलभ्यते । न चासौ जलीयः, तथा सति दहनप्रातिकूल्यप्रसङ्गात्, अत आह – तैलान्तर इति । तत्प्रकर्षात् –

स्नेहप्रकर्षात् । तैले उपलभ्यमानः स्नेहोऽपि जलीय एव । तस्य प्रकृष्टत्वात् अग्नेः आनुकूल्यम् । अपकृष्टस्नेहं हि जलं वन्हिं नाशयति इति भावः ।।

दिनकरी

असौ – तैले प्रतीयमानः स्नेहः । जलीयः – तैलान्तर्गतजलभागनिष्ठः । तथा सति – तैलान्तर्गतजलभागस्वीकारे । दहनप्रातिकूल्यप्रसङ्गात् – दहननाशप्रसङ्गात् । दहननाशं प्रति संयोगेन जलस्य हेतुत्वात् इति भावः ।।

।। संस्कारनिरूपणम् ।।

कारिकावली

संस्कारभेदो वेगोऽथ स्थितस्थापकभावने ।
मूर्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित् ।। १५८ ।।

स्थितस्थापकसंस्कारः क्षितौ केचित् चतुर्ष्वपि ।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम् ।। १५९ ।।

भावनाख्यस्तु संस्कारः जीववृत्तिरतीन्द्रियः ।
उपेक्षानात्मकः तस्य निश्चयः कारणं भवेत् ।। १६० ।।

मुक्तावली

संस्कारं निरूपयति – संस्कारभेद इति । वेग-स्थितस्थापक-भावनाभेदात् संस्कारः त्रिविध इत्यर्थः । कर्मज इति । कर्मजवेगजभेदात् वेगो द्विविध इत्यर्थः ।।

शरीरादौ हि नोदनजनितेन कर्मणा वेगः जन्यते । तेन च पूर्वकर्मनाशः, ततः उत्तरकर्म । एवम् अग्रेऽपि । विना च वेगं कर्मणः कर्मप्रतिबन्धकत्वात् पूर्वकर्मनाशः उत्तरकर्मोत्पत्तिश्च न स्यात् ।।

यत्र वेगवता कपालेन जनिते घटे वेगः जन्यते, स वेगजो वेगः ।।

स्थितस्थापक इति । आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितस्थापकसाध्यत्वात् । **केचित् इति ।** चतुर्षु क्षित्यादिषु स्थितस्थापकत्वं केचित् मन्यन्ते, तत् अप्रमाणम् इति भावः ।।

असौ – स्थितस्थापकः । **क्वचित्** – आकृष्टशाखादौ ।।

भावनाख्य इति । **तस्य** – संस्कारस्य । उपेक्षात्मकज्ञानात् संस्कारानुत्पत्तेः उपेक्षानात्मक इत्युक्तम् । तत्संशयात् तस्य अनुत्पत्तेः निश्चय इत्युक्तम् । तेन उपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुता इति भावः ।।

ननु – स्मरणं प्रति उपेक्षान्यनिश्चयत्वेन हेतुत्वम्, तेन उपेक्षादिस्थले न स्मरणम् । इत्थं च संस्कारं प्रति ज्ञानत्वेनैव हेतुता अस्तु इति चेत् – न । विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् ।।

किञ्च उपेक्षास्थले संस्कारकल्पनायाः गुरुत्वात् संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् ।।

दिनकरी

वेगः जन्यत इति । वेगत्वं तु जातिविशेषः प्रत्यक्षसिद्धः । **तेन इति ।** कर्मनाशकस्य उत्तरसंयोगस्य तदानीम् अभावात् वेगस्यैव कर्मनाशकत्वं कल्प्यत इति भावः । **तत इति ।** पूर्वकर्मनाशानन्तरम् इत्यर्थः । **एवम् अग्रेऽपि इति ।** उत्तरकर्मणापि पूर्ववेगनाशः, ततो वेगान्तरोत्पत्तिः इति एषा दिक् इत्यर्थः । **विना च वेगम् इति ।** वेगं विना कर्मनाशः न स्यात् इत्यन्वयः । नाशकान्तराभावात् इति भावः ।।

ननु पूर्वकर्मणः नाशाभावे का क्षतिः? अत आह – **कर्मोत्पत्तिश्च न स्यात्** इति । अत्र हेतुः **कर्मणः प्रतिबन्धकत्वात्** इति ।।

अत्र **केचित्** – उत्तरसंयोगेनैव पूर्वकर्मनाशोत्तरकर्मणोः संभवात् तत्पूर्वकर्म-नाशकर्मोत्पत्तिस्वीकारे प्रयोजनाभावात् **अलं वेगेन** । तस्मात् "वेगेन गच्छति" इति कर्मजनकतया प्रत्यक्षमेव वेगे प्रमाणम् इति – आहुः ।।

पुनर्गमनस्य इति । यथापूर्वसंयोगजनकक्रियाया इत्यर्थः । **स्थितस्थापक-साध्यत्वात्** इति । वेगस्य तु उत्तरदेशसंयोगजनकक्रियाजनकत्वम्, न तु यथा-पूर्वसंयोगजनकक्रियाजनकत्वम् इति न वेगेन स्थितस्थापकस्य अन्यथासिद्धिः इति भावः । स्थितस्थापकत्वं जातिविशेषः क्रियाविशेषजनकतावच्छेदकतया सिद्धः । स्थितस्थापकश्च क्रियाविशेषजनकः, स्वजन्यक्रियानाश्यः, अतीन्द्रियश्च इति **मूले** उक्तप्रायम् ।।

इत्थं च – उक्तप्रकारेण उपेक्षाज्ञानात् स्मृतिवारणे च ।।

वस्तुतः संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुत्वे एव विनिगमकम् अस्ति इत्याह – **किञ्च** इति । **संस्कारकल्पनायाः गुरुत्वात्** इत्यस्य **स्मृतिं प्रत्येव उपेक्षान्यनिश्चयत्वेन हेतुत्वे** इत्यादिः । **सिद्धत्वात्** इत्यग्रिमस्यापि पञ्चम्यन्तस्य "न" इत्यनेन अन्वयः ।।

राजीवोल्लासः

उत्तरसंयोगस्य तदानीमभावात् इति । आन्तरालिकोत्तरसंयोगस्यापि क्रियोत्पत्तिचतुर्थक्षण एव उत्पत्त्या क्रियोत्पत्तिद्वितीयक्षणे तस्य अभावात् इति भावः । **तत्पूर्व** इति । आन्तरालिकसंयोगात्पूर्वेत्यर्थः ।।

अलं वेगेन इति । अलं वेगस्य कर्मनाशकत्व-तज्जनकत्वाभ्याम् इत्यर्थः ।।

कारिकावली

स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ।

मुक्तावली

तत्र प्रमाणं दर्शयति – **स्मरण** इति । **असौ** – संस्कारः । यतः स्मरणं प्रत्यभिज्ञानं च जनयति, **अतः संस्कारः कल्प्यते** । विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात्, **स्वस्वव्यापारान्यतराभावे कारणत्वासंभवात्** ।।

न च – प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिः इति – वाच्यम् । **अप्रयोजकत्वात्** ।।

परे तु – अनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयात् उद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यते इति – **आहुः** ।।

दिनकरी

उद्देश्यवाचकपदस्य प्राक् अपेक्षितत्वात् तथा अन्वयप्रदर्शनार्थम् उदीच्यस्यापि **"असौ"** इत्यस्य प्राक् धारणम् इति बोध्यम् । तत्र – संस्कारे । **अतः संस्कारः कल्प्यते** इति । अथ अनुभवस्य ध्वंस एव व्यापारः अस्तु, प्रतियोग्यभावयोः एकत्र अजनकत्वम् इत्यस्य अप्रयोजकत्वात् ।।

न च – अनुभवस्य स्मृतिं प्रति **प्रतिबन्धकत्वापत्तिः** इति – वाच्यम् । **संसर्गाभावत्वावच्छिन्नकारणताश्रयीभूताभावप्रतियोगित्वस्यैव** प्रतिबन्धकता-पदार्थत्वात्, इह च संसर्गाभावत्वेन **अजनकत्वात्** ।।

न च – अनुभवद्वितीयक्षणोत्पन्नसंस्कारेण तृतीयक्षणे स्मरणसंभवात् ध्वंसस्य व्यापारत्वं न संभवति, फलस्य प्राक्काले **अनुभवध्वंसस्य अभावात्** इति – वाच्यम् । तत्रापि क्षणविलम्बेनैव स्मरणाभ्युपगमात् इति चेत्, न ।

संस्कारानङ्गीकारे कदाचित् अनुभूतस्य सर्वदा स्मरणापत्तेः, अनुभवध्वंसात्मकव्यापारस्य सर्वदा सत्त्वात् ।।

न च – उद्बोधकाभावात् अस्मरणम् इति – वाच्यम् । यत्र वस्तुविशेषज्ञानात्मकोद्बोधकेन दश पञ्च वा घटादेः स्मरणानि जातानि, न तु अधिकानि, तत्र घटादिस्मृतौ तद्वस्तुज्ञानस्यैव नियतोद्बोधकतया तत्सत्त्वे उद्बोधकाभावस्य वक्तुम् अशक्यत्वात् ।।

वस्तुतस्तु अनुपदं वक्ष्यमाणापूर्वसाधकयुक्त्या संस्कारसिद्धिः निराबाधा इति ध्येयम् ।।

स्वस्वव्यापारान्यतराभावे – कार्योत्पत्त्यव्यवहितपूर्वक्षणे स्वस्वव्यापारान्यतराभावे । **कारणत्वासंभवात्** इति । कार्याव्यवहितप्राक्क्षणवृत्तिस्वस्वव्यापारान्यतरकत्वस्यैव कारणतापदार्थत्वात् इति भावः । **अप्रयोजकत्वात्** इति । संस्कारजन्यत्वस्य स्मृतित्वे प्रयोजकत्वाभावात् इत्यर्थः ।।

मणिकृन्मतं प्रदर्शयति – परे तु इति । **त्वन्मते** अन्तराकल्पनीयस्मृतिव्यक्तौ उद्बुद्धसंस्कारस्य हेतुत्वकल्पनम्, मन्मते तु प्रत्यभिज्ञायां तद्धेतुत्वकल्पनम् इति समानम् । अन्तरा स्मृतिव्यक्तिकल्पने प्रत्यभिज्ञायां तद्धेतुत्वकल्पने च तव अधिकं गौरवम् इति **''आहुः''** इत्यनेन अस्वरसः सूचितः ।।

राजीवोल्लासः

उदीच्यस्यापि इति । अग्रेतनस्यापि इत्यर्थः । **प्रतिबन्धकत्वापत्तिः** इति । कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकत्वपदार्थत्वात् इति भावः । **संसर्गाभावत्वावच्छिन्नकारणता** इति । इदं च प्राचीनमतानुसारेण । नव्यमते तु अत्यन्ताभावत्वावच्छिन्ना सा । अत्यन्ताभावत्वं च संसर्गाभावत्वाघटितम् अनुयोगिताविशेषरूपं बोध्यम् । **अजनकत्वात्** इति ।

तथा च ध्वंसत्वस्यैव कारणतावच्छेदकत्वात् न प्रतिबन्धकत्वापत्तिः इति भावः । **अनुभवध्वंसस्य अभावात्** इति । अनुभवध्वंसस्य तृतीयक्षणोत्पत्तेः इति भावः । **तत्सत्त्वे** – तद्वस्तुज्ञानसत्त्वे । **वक्तुम् अशक्यत्वात्** इति । संस्कारस्वीकारे तु उद्बोधकसत्त्वेऽपि संस्कारस्य नष्टत्वात् न स्मरणम् इति भावः । ननु उक्तस्थले उद्बोधकसत्त्वे मानाभावः । उद्बोधकस्य फलबलकल्प्यत्वात् इति, अत आह – **वस्तुतस्तु** इति । **स्वस्वव्यापारान्यतरकत्वस्य** इति । स्वविशिष्टत्वं स्वतादात्म्यसंबन्धेन । व्यापारवत्त्वं च जनकतासंबन्धेन इति बोध्यम् ।।

छात्राणां सौकर्यार्थं भावनाख्यसंस्कारविषये मूलव्याख्यानयोः यदुक्तं तत् संकलय्य लिख्यते –

संस्कारः त्रिविधः – वेगः स्थितिस्थापकः भावना च इति । तत्र भावनाख्यः संस्कारः जीवात्मवृत्तिः अतीन्द्रियः । तस्य संस्कारस्य उपेक्षानात्मकः निश्चयः हेतुः । स च संस्कारः स्मरणं प्रति प्रत्यभिज्ञां प्रति च हेतुः । बहुकालात् पूर्वम् अनुभूतस्य स्मरणम् इदानीं भवति । इदं स्मरणं प्रति पूर्वानुभवस्य साक्षाद्धेतुत्वं न संभवति, नष्टत्वेन इदानीम् अभावात् । कार्याव्यवहितपूर्ववर्तिन एव कारणत्वात् । अतः अनुभवेन संस्कारो जायते, स च स्थायी स्मरणं जनयति। एवं च संस्कारद्वारा अनुभवः स्मरणं जनयति इति सिद्धम् ।।

अथ अनुभवस्य ध्वंस एव स्थायित्वात् व्यापारः सन् स्मृतिं जनयतु, किं संस्कारेण । न च – प्रतियोग्यभावयोः एककार्याजनकत्वात् अनुभवस्य तद्ध्वंसस्य च कथं स्मरणजनकत्वम् इति – वाच्यम् । प्रतियोग्यभावयोः एककार्याजनकत्वम् इति नियमस्य अप्रामाणिकत्वात् । न च – अनुभवध्वंसस्य

स्मृतिं प्रति कारणत्वे अनुभवस्य स्मृतिप्रतिबन्धकत्वापत्तिः । कारणीभूताभाव-प्रतियोगित्वस्य प्रतिबन्धकतारूपत्वात् कारणीभूतः यः अभावः ध्वंसः तत्प्रतियोगित्वात् अनुभवस्य इति – वाच्यम् । संसर्गाभावत्वावच्छिन्ना या कारणता तदाश्रयः यः अभावः तत्प्रतियोगित्वमेव प्रतिबन्धकत्वम् इति अनुभवध्वंसस्य संसर्गाभावरूपत्वेऽपि स्मरणं प्रति ध्वंसत्वेनैव कारणता न संसर्गाभावत्वेन इति संसर्गाभावत्वावच्छिन्नकारणताश्रयः अभावः अनुभवध्वंसातिरिक्त एव अभावः । तत्प्रतियोगित्वम् अनुभवे नास्ति इति तस्य प्रतिबन्धकत्वाप्रसक्तेः । न च – अनुभवद्वितीयक्षणोत्पन्नसंस्कारेण तृतीयक्षणे यत्र स्मरणं तत्र अनुभवध्वंसस्य व्यापारत्वं न संभवति । अनुभवस्य द्वितीयक्षणेऽपि सत्त्वेन तदानीम् अनुभवध्वंसस्य अभावात् स्मरणरूपकार्यस्य प्राक्क्षणे अर्थात् द्वितीयक्षणे ध्वंसरूपस्य व्यापारस्य अभावात् इति – वाच्यम् । तत्रापि एकक्षणविलम्बेनैव स्मरणोत्पत्तेः अङ्गीकारात् । तथा च ध्वंस एव व्यापारो भवतु, संस्कारो मास्तु इति चेत् – मैवम् । संस्कारस्य अनङ्गीकारात् कदाचित् अनुभूतस्य सर्वदा स्मरण-प्रसङ्गात् । ध्वंसस्य ध्वंसाभावेन अनुभवध्वंसस्य सर्वदा सत्त्वात् । न च – उद्बोधकाभावान्न स्मरणम् इति – वाच्यम्। यस्य पुंसः हस्तिपरूपवस्तुविशेषज्ञान-रूपात् उद्बोधकात् दश वा पञ्च वा हस्तिस्मरणानि जातानि, तस्य पुंसः कालान्तरे हस्तिपदर्शनरूपोद्बोधकसत्त्वेऽपि मन्मते स्मरणाभावोपपत्तिः, रोगतः कालतो वा संस्कारनाशस्वीकारात्। तव मते ध्वंसरूपव्यापारसत्त्वात् उद्बोधकसत्त्वाच्च हस्तिस्मरणापत्तेः दुर्वारत्वात् । तस्मात् अनुभवध्वंसस्य न व्यापारत्वम् इति संस्कारः स्वीकरणीयः ।।

किं च उपेक्षात्वस्य अनुगतस्याभावात् यत्र दश उपेक्षा ज्ञानानि तेभ्यः स्मरणवारणाय तत्तदुपेक्षाज्ञानभेदकूटवत्त्वं स्मरणकारणतावच्छेदककोटौ निवेश-

नीयम् । कूटत्वस्य एकविशिष्टापरत्वरूपतया तत्र विशेषणविशेष्यभावे विनिगमनाविरहात् महागौरवम् । संस्कारस्वीकारे च उपेक्षाज्ञानानां तत्पूर्वक्षणे मेलनासंभवेन तत्तदुपेक्षाभिन्नज्ञानानामेव कारणत्वं सुवचम् इति ।।

प्रयोजकत्वाभावात् इति । तर्हि ज्ञानेषु केषांचित् स्मृतित्वं केषांचित् प्रत्यभिज्ञात्वम् इत्यत्र किं प्रयोजकम् इति चेत् – **सामग्रीभेद एव** । तथा हि – प्रत्यभिज्ञात्वे इन्द्रियसहकृतसंस्कारजन्यत्वम्, स्मृतित्वे तदसहकृततज्जन्यत्वं प्रयोजकम्, यथा वेगसहकृताभिघातजन्यत्वम् अभिघातत्वे तदसहकृतक्रियाजन्यत्वं नोदनत्वे ।।

प्रत्यभिज्ञायां स्मरणमेव हेतुः न संस्कार इति मूलानूदित**मणिकारमते आहुः** इति सूचितम् अस्वरसं स्पष्टयति – **त्वन्मते** इत्यादिना । **तद्धेतुत्वकल्पने** इति । तस्याः स्मृतेः प्रत्यभिज्ञां प्रति हेतुत्वकल्पने इत्यर्थः ।।

।। अदृष्टनिरूपणम् ।।

कारिकावली

धर्माधर्मावदृष्टं स्यात् धर्मः स्वर्गादिकारणम् ।। १६१ ।।
यागादिगङ्गास्नानादिव्यापारः स तु कीर्तितः ।
कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ।। १६२ ।।

मुक्तावली

अदृष्टं निरूपयति – **धर्म** इति । **स्वर्गादि** इति । स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः ।।

तत्र प्रमाणं दर्शयितुम् आह – **यागादि** इति । यागादिव्यापारतया धर्मः कल्प्यते । **अन्यथा** यागादीनां चिरविनष्टतया **निर्व्यापारतया** च कालान्तरभाविस्वर्गजनकत्वं न स्यात् । तदुक्तम् आचार्यैः–

"**चिरध्वस्तं फलायालं न कर्मातिशयं विना**" इति ।।

ननु यागध्वंस एव व्यापारः स्यात् । न च – प्रतियोगितद्ध्वंसयोः एकत्र अजनकत्वम्, सर्वत्र तथात्वे मानाभावात् ।।

न च – त्वन्मते फलानन्त्यम्, मन्मते चरमफलस्य अपूर्वनाशकत्वात् न तथात्वम् इति – वाच्यम् । कालविशेषस्य सहकारित्वात् इति, अत आह – **गङ्गास्नान** इति । गङ्गास्नानस्य हि स्वर्गजनकत्वे अनन्तानां जलसंयोगध्वंसानां व्यापारत्वम् अपेक्ष्य **एकमेव अपूर्वं कल्प्यते**, लाघवात् इति भावः ।।

ननु ध्वंसोऽपि न व्यापारोऽस्तु । न च – निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वम् इति – वाच्यम् । अनन्यथासिद्धनियतपूर्ववर्तित्वस्य तत्रापि सत्त्वात् । अव्यवहितपूर्ववर्तित्वं हि चक्षुःसंयोगादेः कारणत्वे, न तु सर्वत्र, कार्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्वे इति, अत आह – **कर्मनाशा** इति । यदि हि अपूर्वं न स्यात्, तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात् । न हि तेन यागादेः नाशः प्रतिबन्धो वा कर्तुं शक्यते, तस्य **पूर्वमेव वृत्तत्वात्** इति भावः ।।

एतेन देवताप्रीतेरेव फलत्वम् इत्यपास्तम् । गङ्गास्नानादौ सर्वत्र देवताप्रीतेः असंभवाच्च । देवतायाः चेतनत्वेऽपि तत्प्रीतेः अनुद्देश्यत्वात् प्रीतेः सुखरूपत्वेन विष्णुप्रीत्यादौ तदसंभवात्, जन्यसुखस्य तत्र अभावात् । तेन विष्णुप्रीतिजन्यत्वेन पराभिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन लक्ष्यते ।।

दिनकरी

''स्वर्गादि'' इत्यत्र स्वर्गपदेन सुखमात्रस्य ''आदि'' पदेन शरीरेन्द्रियादेः परिग्रहः इति प्रदर्शयति – **स्वर्गादिसकल** इत्यादि । अग्रे **नरकादीनाम्** इत्यत्रापि एवम् ।।

तत्र – धर्मे । **यागादि** इति । ''आदि''ना होमदानपरिग्रहः । यागत्वं च देवतोद्देश्यकस्वस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छात्वम् । **देवतोद्देश्यकत्वं देवतास्वत्ववद्विशेष्यकत्वम्** । ''शब्दमयी देवता'' इति पक्षे तु ''तस्या इदम्'' इति **आरोपज्ञानविषयत्वम्** उद्देश्यत्वम् । होमत्वं च अग्निसंयोगानुकूल-क्रियानुकूलघृतादिवृत्तिनोदनादिव्यापरत्वम् । दानत्वं च **मूल्यग्रहणं विना** स्वस्वत्वध्वंस-परस्वत्वजनकत्यागत्वम् इति **संप्रदायः** । यागत्वहोमत्वादयः मानसप्रत्यक्षगम्या जातिविशेषा इति **अन्ये** । श्राद्धस्य पित्रपेक्षया यागत्वेन ब्राह्मणापेक्षया दानत्वेन तत्र साङ्कर्यात् न इदं युक्तम् इति **अपरे** ।।

अन्यथा – धर्माभावे । चिरविनष्टस्यापि अनुभवस्य स्मृतिजनकत्वात् आह – **निर्व्यापारतया** इति । **चिरध्वस्तम्** इति । चिरकालनष्टं कर्म, अतिशयम् – अपूर्वं विना, फलाय – फलजननाय, नालं – न समर्थम् इत्यर्थः ।।

तथात्वे – ध्वंसप्रतियोगिनोः एकत्र जनकत्वाभावे । **एकमेव अपूर्वं कल्प्यते** इति । **वस्तुतस्तु** यागस्यापि ध्वंसः न व्यापारः, तथात्वे कीर्तितयागात् स्वर्गोत्पाद-वारणाय स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदः निवेशनीयः । तत्र च कीर्तितत्वस्य एकस्य अभावेन कीर्तितत्वावच्छिन्नप्रतियोगिताकभेदनिवेशनम् अशक्यम् । अतः कीर्तितव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक एव भेदो निवेशनीयः ।।

एवं च दशकीर्तितयागस्थले परस्परं तत्तद्व्यक्तिभेदसत्त्वेन स्वर्गोत्पादवारणाय भेदकूटस्यैव कारणतावच्छेदकत्वम् अभ्युपगन्तव्यम् । तत्र च विशेषणविशेष्यभावे

विनिगमनाविरहेण कार्यकारणभावानन्त्यम् । अपूर्वस्वीकारे तु क्षणिकतया कीर्तितयागानां मेलनासंभवेन भेदानाम् एकत्र निवेशे प्रयोजनाभावः । यादृशकीर्तित-यागात् अपूर्वम् आपादनीयं तद्भेदावच्छिन्नयागव्यक्तेः तदानीम् अभावात् ।।

न च – अपूर्वसंबन्धेन कीर्तितयागव्यक्तीनां मेलनं संभवति इति स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदानाम् एकत्र निवेशः आवश्यक इति – वाच्यम् । अपूर्वानुत्पत्त्यैव अस्वर्गसंभवे स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदानाम् अनिवेशात् कीर्तितयागात् ध्वंसोत्पादेन ध्वंसजनकतावच्छेदककोटौ कीर्तितभेदनिवेशस्य असंभवात् इति अन्यैः अपरिशीलितः पन्थाः ।।

कारणत्वे इति । घटकत्वं सप्तम्यर्थः । एवम् अग्रेऽपि । **कार्यकालवृत्तित्वम् इव** इति । यथा समवायिकारणस्य कारणत्वे कार्यकालवृत्तित्वं घटकम्, न तु **असमवायिकारणस्य कारणत्वे**, तथा इत्यर्थः ।।

तेन – कर्मनाशाजलस्पर्शादिना । **तस्य** – यागादेः । **पूर्वम्** – कर्मनाशाजलस्पर्शादितः पूर्वम् । **वृत्तत्वात्** इति । उत्पन्नत्वात् विनष्टत्वाच्च इत्यर्थः । योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नगुणनाश्यत्वात्, इच्छात्मकयागस्य तृतीयक्षणे एव नष्टत्वात् इति भावः । एवम् अग्रेऽपि ।।

''धर्मः क्षरति'' इत्यस्य ''धर्मः – यागादिः, क्षरति – फलभाङ् न भवति'' इत्यर्थकतया कर्मनाशाजलस्पर्शादेः स्वध्वंससंबन्धेन स्वर्गादिफलं प्रति प्रतिबन्धकत्वमेव युक्तम् इति न सत् । एकाश्वमेधानन्तरं ''अश्वमेधः कृतः'' इति कीर्तिते तदुत्तरं पुनः अश्वमेधकरणेऽपि स्वर्गानुदयापत्तेः ।।

न च – तदश्वमेधजन्यस्वर्गत्वावच्छिन्नं प्रति तत्कीर्तनत्वेन प्रतिबन्धकत्वात् न अश्वमेधान्तरात् स्वर्गानुदयप्रसङ्गः इति – वाच्यम् । यदश्वमेधस्य कीर्तनं कृतम्

तदश्वमेधजन्यस्वर्गाप्रसिद्ध्या तादृशप्रतिबध्यप्रतिबन्धकभावस्य कल्पयितुम् अशक्यत्वात् ।।

तच्च अपूर्वं दर्शपूर्णमासयोः द्विविधम् – परमापूर्वम्, कलिकापूर्वं च । तथा हि – ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां च अच्युतो भवति'', ''उपांशुयाजमन्तरा यजति'', ''ताभ्यामेतम् अग्नीषोमीयम् एकादशकपालं पूर्णमासे प्रायच्छत्'', ''ऐन्द्रं दधि अमावास्यायाम्'', ''ऐन्द्रं पयः अमावास्यायाम्'' इति पञ्चभिः वाक्यैः विहितेभ्यः षड्भ्यः आग्नेयादिभ्यः षडुत्पत्त्यपूर्वाणि, तान्येव कलिकापूर्वाणि उच्यन्ते, तेभ्यश्च परमापूर्वम् इति ।।

ननु – षडपूर्वाणि आवश्यकानि साक्षादेव स्वर्गहेतवः सन्तु, किं परमापूर्वेण इति चेत्, न । ''दर्शपूर्णमासाभ्यां यजेत'' इत्यनेन उभयत्वावच्छिन्नस्य स्वर्गसाधनत्वावगमात् उभयत्वावच्छिन्नस्य एकव्यापारकल्पनात् उत्पत्त्यपूर्वाणां च उभयत्वावच्छिन्नाजन्यत्वात् ''दर्शपूर्णमासाभ्याम्'' इति विधिप्रवृत्तिसमये चिरविनष्टस्य दर्शपूर्णमासस्य व्यापारतया एकस्यैव अपूर्वस्य कल्पनाच्च ।।

न च एवम् अनन्तरं षण्णां यागानां क्रमिकत्वज्ञाने षडपूर्वकल्पनागौरवम् । तस्य फलमुखत्वात् ।।

न च – पञ्चभिः पञ्चापूर्वद्वारा षष्ठेन च साक्षादेव परमापूर्वं जन्यताम्, किं षष्ठेन कलिकापूर्वेण इति – वाच्यम् । षष्ठेनापि उत्तराङ्गदक्षिणासहकारेणैव परमापूर्वजननात् तावत्कालं षष्ठस्य यागस्य अनवस्थित्या तज्जन्यापूर्वस्य आवश्यकत्वात् ।।

अत्र परमापूर्वं प्रति स्वर्गं प्रति च दर्शत्वपूर्णमासत्वव्यापकेन दर्शपूर्णमासोभय-साधारणवैजात्येन कारणत्वम् इति एके । दर्शत्वेन पूर्णमासत्वेन च कारणत्वं दण्डचक्रवत् मिलितानां फलोपधानम् इति अपरे ।।

अत्र त्रयात्मकदर्शजन्यम् अपूर्वम् एकं कलिकापूर्वत्रयव्यापारकम्, एवं त्रयात्मकपूर्णमासजन्यम् एकम् अपूर्वम् कलिकापूर्वत्रयव्यापारकम् । ताभ्यां स्वर्गजनकापूर्वोत्पत्तिः, तच्च परमापूर्वं फलशिरस्कापूर्वम् इति उच्यते इति नवापूर्वीपक्ष इति एके । तत्रैव फलशिरस्कापूर्वे मानाभावात् अष्टापूर्वी इति अन्ये । कलिकापूर्वषट्केनैव परमापूर्वसंभवात् व्यापारीभूतापूर्वद्वये मानाभावात् पूर्वोक्ता सप्तापूर्व्येव युक्ता इति नव्याः ।।

इदं च अपूर्वं जातेष्टिपितृयज्ञादौ कर्तृनिष्ठम् उत्पद्यते इति एके । भोक्तृनिष्ठम् इति तु संप्रदायः ।।

प्राभाकरास्तु – यागक्रिया सर्वात्मना नैव नश्यति, किन्तु सूक्ष्मरूपेण स्वर्गदेहारम्भकेषु यागसंबन्धिद्रव्यारम्भकेषु यागकर्तरि आत्मनि वा अवस्थाय फलम् आरभते इति – आहुः ।।

तन्न । ज्ञानेच्छादिरूपस्य यागस्य आत्मनः योग्यविशेषगुणतया क्षणचतुष्टयानवस्थायित्वनियमात् ज्ञानेच्छादीनां सदा अनुभवेन समानाधिकरणस्वोत्तरवर्तिगुण-नाश्यत्वस्वीकारात् । अन्यथा एवंरीत्या जगत एव सूक्ष्मरूपतया सर्वदा अवस्थानप्रसङ्गात् इति अलं विस्तरेण ।।

राजीवोल्लासः

देवतोद्देश्यक इति । देवतोद्देश्यिका स्वस्वत्वध्वंसवद्द्रव्यविशेष्यिका च इच्छा याग इत्यर्थः । ''अग्नये इदं न मम'' इत्यादिः इच्छायाः आकारः । ''अग्न्युद्देश्यकं मन्निरूपितस्वस्वत्वाभाववत् इदं द्रव्यम्'' इति तदर्थः । अस्याम् इच्छायां इदमर्थे द्रव्ये अग्न्युद्देश्यकत्वं स्वत्वाभाववत्त्वं च भासते । अतः अस्याः इच्छायाः अग्न्युद्देश्यकस्वस्वत्वाभाववद्द्रव्यविशेष्यकत्वम् । देवतास्वत्ववद्वि-शेष्यकत्वम् इति । देवतानिरूपितस्वत्ववद्द्रव्यविशेष्यकत्वम् इत्यर्थः ।

त्यज्यमानद्रव्ये देवतायाः स्वत्वं जायत इति मतेन इदम् । तथा च स्वस्वत्वध्वंसदेवतास्वत्वोभयप्रकारकद्रव्यविशेष्यकेच्छात्वं यागत्वम् इति फलितः अर्थः । **आरोपज्ञानविषयत्वम्** इति । देवतायाः विग्रहाभावे स्वत्वाभावात् देवतास्वत्वस्थाने देवतास्वत्वप्रकारकारोपविषयत्वमेव निवेशनीयम् । तथा च देवतास्वत्वप्रकारकारोपविषयीभूतस्वस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छा याग इति फलितम् । देवतास्वत्वप्रकारकारोपविषयत्व–स्वस्वत्वध्वंस - उभयप्रकारकद्रव्यविशेष्यकेच्छात्वं यागत्वम् इति पर्यवसितोऽर्थः । **मूल्यग्रहणं विना** इति । विक्रेतरि दातृत्वव्यवहारपरिहाराय इदम् । **साङ्कर्यात्** इति । दानत्वाभाववति यागत्वस्य दर्शादौ, यागत्वाभाववति दानत्वस्य गोदानादौ सत्त्वेन, यागत्वदानत्वयोः उभयोः श्राद्धे समावेशेन च साङ्कर्यात् इत्यर्थः । **इदम्** इति । जातिविशेषत्वकथनम् इत्यर्थः ।।

मुक्तावल्याम् एकत्र अजनकत्वात् इति । विघ्नध्वंसादेः समाप्त्यादिकारणत्वे ध्वंसप्रतियोगिनः विघ्नादेः समाप्त्यादिप्रतिबन्धकत्वस्यैव दर्शनात् इति भावः । **मानाभावात्** इति । यत्र ध्वंसस्य संसर्गाभावत्वेन हेतुत्वं, तत्रैव प्रतियोगिनः प्रतिबन्धकत्वनियमात्, अत्र च ध्वंसत्वेनैव हेतुत्वात् इति भावः । **फलानन्त्यम्** इति । फलं स्वर्गः, तदानन्त्यापत्तिः इत्यर्थः । आनन्त्यं च अत्र अनेकस्वर्गपरंपरारूपम् । स्वर्गप्रागभावसमानाधिकरणस्वर्गसामान्यकत्वम् इति यावत् ।।

ननु गङ्गास्नानस्थले अनन्तजलसंयोगध्वंसानां व्यापारत्वापेक्षया एकापूर्वस्वीकारेऽपि यागध्वंसस्य एकतया तत्र अपूर्वकल्पने मानाभाव इति, अत आह – **वस्तुतस्तु** इति । यागस्यापि ध्वंसो न व्यापारः, अपि तु अपूर्वमेव । तथा हि – यदि यागस्य ध्वंसो व्यापारः स्यात्, तदा ''धर्मः क्षरति कीर्तनात्'' इत्युक्त्या कीर्तितयागस्य स्वर्गजनकत्वं नास्ति इत्यवगमात् कीर्तितयागात् स्वर्गोत्पत्तिवारणाय कीर्तितयागभिन्नयागस्यैव ध्वंसद्वारा

स्वर्गोत्पत्तिहेतुत्वं वक्तव्यम् । तत्र कीर्तितत्वस्य जातिरूपस्य अभावेन कीर्तितत्वावच्छिन्नप्रतियोगिताकः एको भेदः कारणतावच्छेदकशरीरे निवेशयितुम् अशक्यः । अतः कीर्तितयागव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक एव भेदो निवेशनीयः । एवं च यत्र कीर्तिताः दश यागाः तत्र प्रत्येकं तत्तद्यागव्यक्तिभेदसत्त्वेन स्वर्गोत्पत्तिः स्यात् इति तद्वारणाय यावन्तः कीर्तिता यागाः तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकयागभेदकूटविशिष्टयाग एव स्वर्गजनक इति वक्तव्यम् । तत्र च कूटत्वस्य एकविशिष्टापररूपत्वात् तद्व्यक्तिभेदविशिष्ट-तद्व्यक्तिभेदेत्यादिरीत्या निवेशः कर्तव्यो भवति। तत्र च विशेषणविशेष्यभावे विनिगमनाविरहात् अनेकभेदविशिष्टयागव्यक्तीनां ध्वंसद्वारा स्वर्गकारणत्वम् इति अनेके कार्यकारणभावाः कल्पनीया इति महत् गौरवम् । न च – अपूर्वस्य व्यापारत्वेऽपि दोषोऽयं समान इति – वाच्यम् । अपूर्वव्यापारत्वपक्षे कीर्तितयागानां क्षणिकतया मेलनासंभवेन भेदानाम् एकत्र निवेशे प्रयोजनाभावात् । यादृशकीर्तित-यागात् अपूर्वम् आपादनीयं तद्भेदावच्छिन्नयागव्यक्तेः तदानीम् अभावात् ।।

न च – अपूर्वसंबन्धेन कीर्तितयागव्यक्तीनां मेलनं संभवत्येव इति स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदानां निवेश आवश्यक इति – वाच्यम् । अपूर्वानुत्पत्त्यैव स्वर्गासंभवे स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदानाम् अनिवेशात् । कीर्तितयागात् ध्वंसोत्पादेन ध्वंसानां च सद्भावेन ध्वंसजन-कतावच्छेदककोटौ कीर्तितभेदनिवेशस्य असंभवात् इति ।।

एवम् अग्रेऽपि इति । समवायिकारणस्य कारणत्वे इत्यत्रापि घटकत्वं सप्तम्यर्थ इति भावः । अन्वयश्च अस्य कार्यकालवृत्तित्वे । न तु असमवायिकारणस्य कारणत्वे इति। न च – असमवायिकारणस्य तन्तुसंयोगादेः अपि पटादिकार्यकालवृत्तित्वात् कथम् एवम् उच्यत इति – वाच्यम् ।

कार्यनाशजनकनाशप्रतियोगिनः समवायिकारणस्यैव कार्यसहभावेन हेतुत्वं, न तु असमवायिकारणमात्रस्य इत्याशयेन एवम् उक्तत्वात् । **एवम् अग्रेऽपि इति ।** **पूर्वमेव विनष्टत्वात्** इत्यत्रापि उत्पन्नत्वाद्विनष्टत्वाच्च इत्यर्थोऽवसेय इति भावः ।।

धर्मः क्षरति इत्यस्य इति ।।

''कर्मनाशाजलस्पर्शात् करतोयातिलङ्घनात् ।
गण्डकीबाहुतरणात् धर्मः क्षरति कीर्तनात् ।।''

इति स्मृतिग्रन्थान्तर्गतस्य ''धर्मः क्षरति''इति भागस्य इत्यर्थः । तस्य वाक्यस्य यागादिः नश्यति इति न अर्थः । कीर्तनात् पूर्वमेव यागादेः नष्टत्वात् । अपि तु धर्मः यागादिः क्षरति – फलभाक् न भवति इत्यर्थः । तेन कर्मनाशाजलस्पर्शादेः यागफलस्वर्गादिप्रतिबन्धकत्वमेव लभ्यते । प्रतिबन्धकतावच्छेदकसंबन्धश्च स्वध्वंसः । अतः अपूर्वं न अनया स्मृत्या सिद्ध्यति इति भावः ।।

स्वध्वंससंबन्धेन इति । न च – कर्मनाशाजलस्पर्शादिध्वंसः शरीरे, स्वर्गश्च आत्मनि इति वैयधिकरण्यात् कथं प्रतिबन्धकत्वम् इति – वाच्यम् । अवच्छेदकताया एव स्वर्गनिष्ठप्रतिबध्यतावच्छेदकसंबन्धत्वात् । तथा च अवच्छेदकतासंबन्धेन स्वर्गः शरीरे, तत्र कर्मनाशाजलस्पर्शादिः अस्ति इति प्रतिबध्यप्रतिबन्धकयोः सामानाधिकरण्यम् । तथा च अवच्छेदकतासंबन्धेन स्वर्गं प्रति समवायसंबन्धेन कर्मनाशाजलस्पर्शादिः प्रतिबन्धक इत्युक्तं भवति । यद्वा समवायेन स्वर्गं प्रति तादृशजलस्पर्शाद्यनुकूलकृतेः समवायेन प्रतिबन्धकत्वम् अवसेयम् । कर्मनाशा, करतोया, गण्डकी इति इमे नदी-विशेषाः ।।

उक्तं मतं दूषयति – इति न सत् इति । ‘‘एकः अश्वमेधः मया कृतः’’, ‘‘अयम् अश्वमेधः मया कृतः’’ इति कीर्तितश्च, तदुत्तरं अश्वमेधान्तरं कृतम्, तच्च न कीर्तितम्, तथापि स्वर्गानुत्पत्तिः स्यात् । कीर्तनस्य स्वर्गप्रतिबन्धकत्वात्। न च – तदश्वमेधजन्यस्वर्गं प्रति तदश्वमेधकीर्तनं प्रतिबन्धकमिति विशिष्य प्रतिबन्धकत्वकल्पनात् न दोष इति – वाच्यम् । यदश्वमेधस्य कीर्तनं कृतं तदश्वमेधजन्यस्वर्गाप्रसिद्ध्या तथाप्रतिबध्यप्रतिबन्धकभाव-कल्पनासंभवात् । तस्मात् धर्मपदस्य अपूर्वमेव अर्थ इति भावः ।।

अथ प्रकृतस्य अपूर्वस्य विभागादिकं दर्शयति – **तच्च अपूर्वम्** इत्या-दिना । **विधिप्रवृत्तिसमय** इति । विधिवाक्यजन्यज्ञानाव्यवहितोत्तरकाले इत्यर्थः । **कल्पनात्** इति । ‘‘दर्शपूर्णमासौ सव्यापारकौ, पूर्वनष्टत्वे सति स्वर्गजनकत्वात्’’ इत्यनुमानेन व्यापारस्य एकत्वे लाघवम् इति लाघवज्ञानसहकृतेन एकापूर्वस्यैव सिद्धेः इति भावः ।।

लाघवम् आशङ्क्य निषेधति – **न च एवम्** इति । दर्शपूर्णमाससाध्या-पूर्वनिष्पत्तये षडपूर्वान्तराणि कल्पनीयानि, यागानां पूर्वं नष्टत्वात् इति, परमापूर्वपक्षे गौरवमेव इत्यर्थः । **फलमुखत्वात्** इति । परमापूर्वकल्पनोत्तरं तदुपपादकतयैव षडपूर्वान्तरकल्पनात् इत्यर्थः । तथा च इदं गौरवज्ञानं न पूर्वां परमापूर्वसिद्धिं प्रतिबन्ध्यात् इति भावः । षष्ठयागाव्यवहितोत्तरं जायमानं षष्ठम् अपूर्वमेव परमापूर्वम् अस्तु इति आक्षिपति – **न च पञ्चभिः** इति । **षष्ठेन** इति । षष्ठेन यागेन इत्यर्थः । **दक्षिणासहकारेणैव** इति । अन्यथा दक्षिणाशून्याभ्यामपि दर्शपूर्णमासाभ्यां स्वर्गोत्पत्तिप्रसङ्गात् इति भावः ।।

पूर्वं लिङर्थविचारे श्राद्धविषये दर्शितां रीतिम् अपूर्वेऽतिदिश्य दर्शयति – **इदं च** इति । **कर्तृनिष्ठम्** इति । नित्यनैमित्तिकानुष्ठानस्य

स्वर्गफलकत्वात् इति भावः । **भोक्तृनिष्ठम्** इति । पुत्रश्रेयःपितृप्रीत्यादेः अर्थवादश्रुतस्यैव फलत्वात् इति भावः । उद्देश्यत्वस्य कारणतावच्छेदकसंबन्धत्वात् न कार्यकारणयोः वैयधिकरण्यम् ।।

स्वर्गदेहारम्भकेषु इति । स्वर्गदेहारम्भकाणि यानि यागसंबन्धिद्रव्यारम्भकाणि तेषु इत्यर्थः । तथा च यागसंबन्धिद्रव्यारम्भकैः परमाणुभिः स्वर्गदेहारम्भो भवति इति भावः । यागस्य इच्छारूपत्वसिद्धान्तम् अनुसृत्य आह – **यागकर्तरि** इति । द्वितीयपक्षं प्रतिक्षिपति – **तन्न** इति । इच्छायाः कारणं इच्छायाः समानाकारकं ज्ञानं याग इति एके । इच्छा इति परे । तज्जन्या कृतिः इति अन्ये । पक्षत्रयेऽपि न उपपत्तिः इति दर्शयितुं ज्ञानेच्छादिरूपस्य यागस्य इत्युक्तम् । ननु ज्ञानादेः स्थूलरूपस्यैव अनुभवः, तस्य च स्वोत्तरवर्तिना गुणेन नष्टत्वात् न अनुभवापत्तिः इति, अत आह – **अन्यथा** इति । यागस्य क्रियात्वपक्षेऽपि स्थूलस्य तस्य स्वजन्यसंयोगनाश्यत्वात् न सदा अनुभवापत्तिः इति च वेदितव्यम् । **सर्वदा अवस्थानप्रसङ्गात्** इति ।।

ननु न इयम् आपत्तिः, यत्र क्रियादीनाम् आशु विनाशिनीनां कालान्तरभाविफलजनकत्वं वचनेन अवगम्यते, तत्रैव सूक्ष्मरूपेण अवस्थान-कल्पनम्, न तु सर्वत्र; प्रमाणाभावात् । तच्च सूक्ष्मरूपं फलनाश्यम् । अतः न सर्वदा अवस्थानप्रसङ्गश्च इति चेत् – न किंचिदेतत् । किमिदं सूक्ष्मरूपं नाम । स्थूलाद्भिन्नम् अभिन्नं वा । भेदे तदेव अदृष्टादिपदवाच्यम् । अभेदे पूर्ववत् प्रत्यक्षापत्तिः । भेदश्च अभेदश्च एकत्र इति विप्रतिषिद्धम् । एतदनुसन्धाय उक्तम् – **अलं विस्तरेण** इति ।।

कारिकावली

अधर्मो नरकादीनां हेतुः, निन्दितकर्मजः ।
प्रायश्चित्ताद्विनाश्योऽसौ जीववृत्तीत्विमौ गुणौ ।। १६३ ।।
इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः ।

मुक्तावली

अधर्म इति । नरकादिसकलदुःखानां नारकीयशरीरादीनां च साधनम् अधर्म इत्यर्थः । तत्र प्रमाणम् आह – **प्रायश्चित्त** इति । यदि हि अधर्मः न स्यात्, तदा प्रायश्चित्तादिना नाश्यत्वं न स्यात् । न हि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते, तस्य पूर्वमेव विनष्टत्वात् इति भावः । **जीव** इति । ईश्वरस्य धर्माधर्माभावात् इत्यर्थः ।।

इमौ – धर्माधर्मौ । **वासना** इति । अतः ज्ञानिना कृते अपि सुकृतदुष्कृत-कर्मणी न फलाय अलम् इति भावः । **ज्ञानादपि** इति । ''अपि''ना भोगपरिग्रहः ।।

ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वम्, ''नाभुक्तं क्षीयते कर्म कल्प-कोटिशतैरपि'' इति वचनविरोधात् । इत्थं च तत्त्वज्ञानिनां झटिति कायव्यूहेन सकलकर्मणां भोगेन क्षयः इति चेत्, न । तत्र भोगस्य वेदबोधितनाशकोपलक्षक-त्वात् । कथम् अन्यथा प्रायश्चित्तादिना कर्मणां नाशः? तदुक्तम् –

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन" ।

"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।" इति ।।

ननु तत्त्वज्ञानिनः तर्हि शरीरावस्थानं सुखदुःखादिकं न स्यात् । ज्ञानेन सर्वेषां कर्मणां नाशात् इति चेत्, न । प्रारब्धेतरकर्मणामेव नाशात् । तत्तच्छरीरभोगजनकं हि यत् कर्म तत् प्रारब्धम् । तदभिप्रायमेव "नाभुक्तम्" इति वचनम् इति ।।

दिनकरी

ननु गङ्गादिदर्शनादिना ईश्वरे कुतः न धर्मादेः उत्पत्तिः, अत आह – **मूले इमौ तु वासनाजन्यौ** इति । ईश्वरे मिथ्याज्ञानजन्यवासनाविरहात् न धर्मादेः उत्पत्तिः इति भावः । ननु धर्माधर्मौ प्रति वासनाया हेतुत्वे मानाभाव इति, अथ आह – **मुक्तावल्याम् अत** इति । **ज्ञानिना** – तत्त्वज्ञानवता । **वचनविरोधात्** इति । तेन अदृष्टनाशमात्रे भोगस्य हेतुत्वप्रतिपादनात् इति भावः । **इत्थं च** इति । कर्मणां भोगैकनाश्यत्वे च इत्यर्थः । **अन्यथा** – उपलक्षकत्वाभावे । **सर्वकर्माणि** इति । सर्वकर्मजन्यादृष्टानि इत्यर्थः । **भस्मसात् कुरुते** – नाशयति । स्मृतिं दर्शयित्वा श्रुतिं दर्शयति – **क्षीयन्ते च** इति । **तदभिप्रायमेव** – प्रारब्धकर्माभिप्रायमेव ।।

।। शब्दनिरूपणम् ।।

कारिकावली

शब्दो ध्वनिश्च वर्णश्च, मृदङ्गादिभवो ध्वनिः ।। १६४ ।।

कण्ठसंयोगादिजन्या वर्णाः, ते कादयो मताः ।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ।। १६५ ।।

वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता ।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ।। १६६ ।।

उत्पन्नः को विनिष्टः कः इति बुद्धेरनित्यता ।
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ।। १६७ ।।

मुक्तावली

शब्दं निरूपयति – शब्द इति । नभोवृत्तिः – आकाशसमवेतः । दूरस्थशब्दस्य अग्रहणात् आह – श्रोत्र इति ।।

ननु मृदङ्गाद्यवच्छेदेन उत्पन्ने शब्दे श्रोत्रे कथम् उत्पत्तिः? अत आह – वीची इति । आद्यशब्देन बहिः दशदिगवच्छिन्नः अन्यः शब्दः तेनैव शब्देन जन्यते । तेन च अपरः तद्व्यापकः । एवं क्रमेण श्रोत्रोत्पन्नः गृह्यते इति ।।

कदम्ब इति । आद्यशब्दात् दशदिक्षु दशशब्दा उत्पद्यन्ते, तैश्च अन्ये दशशब्दाः उत्पद्यन्त इति भावः । अस्मिन् मते कल्पनागौरवात् उक्तम् – कस्यचिन्मते इति ।।

ननु शब्दस्य नित्यत्वात् उत्पत्तिकथनम् असङ्गतम्, अत आह – **उत्पन्न** इति । शब्दानाम् उत्पादविनाशप्रत्ययशालित्वात् अनित्यत्वम् इत्यर्थः ।।

ननु ''स एव अयं ककारः'' इत्यादिप्रत्यभिज्ञानात् शब्दानां नित्यत्वम् । इत्थं च उत्पादविनाशबुद्धिः भ्रमरूपैव इति, अत आह – **सोऽयम्** इति । **साजात्यम्** इति । तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयः, न तु तद्व्यक्त्यभेदो विषयः । **उक्तप्रतीतिविरोधात्** । **इत्थं च द्वयोरपि** प्रतीत्योः अभ्रमत्वम् इति ।।

दिनकरी

गौरवात् इति । दशशब्दानां तत्प्रागभावानां तद्धेतुहेतुमद्भावानां च कल्पने गौरवात् इत्यर्थः ।।

उक्तप्रतीतिविरोधात् इति । उत्पादविनाशशालिप्रत्ययविरोधात् इत्यर्थः । **इत्थं च** इति । प्रत्यभिज्ञानस्य सजातीयविषयकत्वे च इत्यर्थः । **द्वयोरपि** इति । उत्पादप्रतीतिप्रत्यभिज्ञानयोः इत्यर्थः ।।

अत्र मीमांसकाः–

''स एव अयं गकारः'' इति प्रत्यभिज्ञया गकारादेः तावत्कालावस्थानस्य विषयीकृतत्वेन अन्तराभूतशब्दादिना अनाशेन नाशकाभावात् वर्णनित्यत्वसिद्धिः । न च प्रत्यभिज्ञा तज्जातीयत्वविषयिणी, बाधकाभावात् । अन्यथा सर्वत्रापि तथाभावे अभेदोच्छेदापत्तिः ।।

न च तारत्वमन्दत्वरूपविरुद्धधर्माध्यासः बाधकः, प्रत्यभिज्ञानबलेन तस्य नित्यत्वसिद्धौ तारत्वादेः व्यञ्जकवायुधर्मत्वस्य कल्पनात् श्रोत्रेण वायुधर्मस्य

तारत्वादेरपि ग्रहणसंभवात् । य एव तारः स एव अन्यापेक्षया मन्द इति प्रतीतेः तारत्वमन्दत्वयोः अविरोधाच्च इति – आहुः ।।

तन्न । तथा सति कत्वगत्वादेरपि व्यञ्जकवायुधर्मत्वापत्त्या ककारगकारयोरपि भेदः न सिद्ध्येत् इति वर्णैक्यापत्तेः । वस्तुतस्तु वर्णानित्यत्वपक्षे कण्ठताल्वाद्यभिघातानां कत्वादिकं कार्यतावच्छेदकम्, वर्णनित्यतापक्षे तु कसाक्षात्कारत्वम् इति गौरवात् ।।

न च – नित्यत्वपक्षेऽपि लौकिकविषयितया कत्वमेव तज्जन्यतावच्छेदकम् इति न गौरवावकाशः इति – वाच्यम् । कोलाहलप्रत्यक्षस्य असंग्रहप्रसङ्गात् । न हि कोलाहलप्रत्यक्षं कत्वादिविषयकम् । अन्यथा तुल्ययुक्त्या घटाद्युत्पादकस्यापि घटप्रत्यक्षत्वमेव कार्यतावच्छेदकम् इति तदपि नित्यमेव स्यात् इति ।।

न च – अनित्यत्वमते प्रत्यभिज्ञायाः तज्जातीयत्वविषयकत्वेन ''तज्जातीयः अयम्'' इति स्यात्, न तु ''सोऽयम्'' इति इति – वाच्यम् । यत्र प्रत्यभिज्ञायां जातित्वेन गत्वादेः भानम्, तत्रैव ''तज्जातीयः अयम्'' इत्याकारः; यत्र तु स्वरूपतः भानम्, तत्र ''सोऽयम्'' इत्याकारः इत्यभ्युपगमात् इति ।।

अत्र इदं बोध्यम् – शब्दः द्विविधः – ध्वन्यात्मकः वर्णात्मकश्च । तत्र ध्वन्यात्मकसंयोगजन्याद्यशब्दं प्रति गगनं समवायिकारणम्, भेर्याकाशसंयोगः असमवायिकारणम्, भेरीदण्डसंयोगादिः निमित्तकारणम् । विभागजन्यध्वन्यात्मकाद्यशब्दं प्रति तु वंशदलाकाशविभागः असमवायिकारणम्, वंशदलद्वयविभागः

निमित्तकारणम् । वर्णात्मकाद्यशब्दं प्रति तु कण्ठताल्वादिना आकाशसंयोगः असमवायिकारणम्, कण्ठताल्वादिना वाय्वादिसंयोगः निमित्तकारणम् ।।

द्वितीयादिशब्दं प्रति तु आद्यशब्दः असमवायिकारणम् ।।

न च – भेर्याकाशसंयोगकण्ठाद्याकाशसंयोगादीनां शब्दं प्रति कारणत्वे मानाभाव इति – वाच्यम् । भावकार्यस्य असमवायिकारणजन्यत्वनियमेन तत्कारणत्वस्वीकारात् । तादृशनियमे मानाभावे तु मास्तु तेषां कारणत्वम्, भेरीदण्डसंयोगादिनिमित्तकारणसहकृतेन आकाशेनैव शब्दोत्पत्तिसंभवात् इति ।।

प्रथमादिशब्दानां च स्वकार्यशब्देनैव नाशः, चरमस्य तु उपान्त्यशब्देन उपान्त्यशब्दनाशेन वा नाश इति ।।

राजीवोल्लासः

ननु "उत्पन्नः ककारः" इत्यादिप्रतीतिः विद्यमानोत्पत्तिविषयकतया प्रमा, "सोऽयं कः " इति बुद्धिः साजात्यविषयकतया प्रमा इति वर्णोत्पत्तिवादिभिः नैयायिकैः यथा निरुह्यते, तथा वर्णनित्यत्ववादिभिः मीमांसकैरपि "सोऽयं कः" इति बुद्धिः अभेदविषयकतया प्रमा, "उत्पन्नः कः" इति प्रतीतिः व्यञ्जकध्वनिविषयकतया प्रमा इति निर्वोढुं शक्यते इत्याशयकं मीमांसकाक्षेपम् अनुवदति – **अत्र मीमांसकाः** इत्यादिना । श्रुतस्य गकारस्य पश्चात् श्रवणानन्तरं "स एवायं गकारः" इति प्रत्यभिज्ञया तावत्कालपर्यन्तं स्थितेः विषयीकरणात् मध्योत्पन्नशब्दादिना नाशे तावत्कालमवस्थितेः विषयीकर्तुम् अशक्यत्वात् वर्णनित्यत्वसिद्धिः । न च – इयं प्रत्यभिज्ञा न ऐक्यविषयिणी, अपि तु

साजात्यविषयिणी, ''स एव'' इत्यस्य ''तत्सजातीय'' इत्यर्थात् इति – वाच्यम् । ऐक्यविषयकत्वे बाधकाभावात् । अन्यथा ''स एवायं घटः'' इत्यादिप्रतीतेरपि साजात्यविषयकत्वे सति घटादेरपि ऐक्यं न स्यात् । न च – ''अयं ककारो मन्दः, अयं ककारः तारः'' इति मन्दत्वतारत्वरूपविरुद्ध-धर्मप्रतीतेः ककारभेदसिद्ध्या अनित्यत्वसिद्धिः इति – वाच्यम् । मन्दत्वतारत्वादेः वर्णव्यञ्जकवायुधर्मत्वेन वर्णधर्मत्वाभावात् । अपि च ''य एव ककारो मन्दः स एव अन्यापेक्षया तारः'' इति प्रतीतेः तारत्वमन्दत्वयोः एकाधिकरणवृत्तित्वावगमेन तयोः विरोधाभावात् इति भावः । **विरुद्धधर्माध्यासः** – असमानाधिकरण-धर्मप्रकारकप्रत्ययः । **न च बाधक** इत्यन्वयः । नैव अभेदबाधक इत्यर्थः । बाधकत्वाभावे हेतुं दर्शयति – **प्रत्यभिज्ञानबलेन** इति । ननु तारत्वादेः वायुधर्मत्वे श्रोत्रेण ग्रहणं न स्यात् इति शङ्कां परिहरति – **श्रोत्रेण** इति । ननु वायुधर्मस्य तारत्वादेरिव स्पर्शादेरपि श्रोत्रेण ग्रहणापत्तिः इति वाच्यम् । तत्तत्पदार्थानां तत्तदिन्द्रियग्रहणयोग्यतायाम् अदृष्टविशेषस्यैव नियामकत्वात् इत्याशयात् । तारत्वादीनां शब्दधर्मत्वेऽपि न दोष इति दर्शयति – **य एव तार** इति । तथा च एकावधिकमन्दत्वतारत्वयोरेव विरोध इति भावः ।।

उक्तं **मीमांसकमतं** दूषयति – **तन्न** इत्यादिना । **वर्णैक्यापत्तेः** इति । भिन्नत्वेन त्वयापि अभिमतानां ककारगकारादीनां वर्णानामपि ऐक्यापत्तेः इत्यर्थः ।।

ननु ''य एव तार'' इत्यादिना तारत्वमन्दत्वयोः अविरोधस्य पूर्वम् उपवर्णितत्वेन तयोः शब्दधर्मत्वमेव, न वायुधर्मत्वम् इति, अत आह –

वस्तुतस्तु इति । वर्णानित्यत्वपक्षे कण्ठताल्वाद्यभिघातैः वर्णा उत्पद्यन्त इति स्वीकारात् कत्वाद्यवच्छिन्नं प्रति कण्ठताल्वाद्यभिघाताः कारणम् इति कार्यकारण-भावः । तत्र कत्वादिकं कण्ठताल्वाद्यभिघातस्य कार्यतावच्छेदकम् । वर्णाः विद्यमाना एव कण्ठताल्वाद्यभिघातैः व्यज्यन्ते इति वर्णनित्यत्वपक्षे ककारादि-वर्णसाक्षात्कारं प्रति कण्ठताल्वाद्यभिघाताः कारणम् इति कार्यकारणभावः । तत्र च ककारादिसाक्षात्कारत्वं कार्यतावच्छेदकम् । इदं च कत्वाद्यपेक्षया गुरु इति लघोः कत्वादेरेव कार्यतावच्छेदकत्वं युक्तमिति वर्णोत्पत्तिवाद एव युक्त इति भावः ।।

शङ्कते – **न च नित्यत्वपक्षेऽपि** इति । वर्णनित्यत्वपक्षेऽपि लौकिकविषयितासंबन्धेन ककारादिकं प्रति कण्ठताल्वाद्यभिघातः कारणम् इत्येव कार्यकारणभावः । तत्र च कार्यतावच्छेदकं कत्वादिकम् एव इति न गौरवम् इति शङ्का ।।

समाधत्ते – **कोलाहलप्रत्यक्षस्य** इति । कोलाहलः अव्यक्तवर्ण-समूहः । अव्यक्तवर्णसमूहप्रत्यक्षे कत्वगत्वादिरूपेण वर्णानाम् अभावात् कादिनिरूपितलौकिकविषयिता तत्र नास्ति । परं तु कण्ठताल्वाद्यभिघातेनैव तत् प्रत्यक्षं भवति । अतः तस्य संग्रहो न स्यात् । तथा च कण्ठताल्वाद्यभिघात-सत्त्वेऽपि लौकिकविषयितासंबन्धेन ककारादिरूपकार्याभावेन अन्वयव्यभिचार इति भावः । ननु वर्णत्वेन कण्ठताल्वाद्यन्यतमाभिघातत्वेन अभिघातत्वव्याप्य-जातिविशेषेण वा कार्यकारणभावस्य नैयायिकैरपि स्वीकारात् लौकिकविषयितया

वर्णत्वं कण्ठताल्वाद्यभिघातजन्यतावच्छेदकम् इति **मीमांसकानां** सुवचम् । इत्थं च कोलाहलप्रत्यक्षस्य वर्णत्वविषयकत्वान्न तत्प्रत्यक्षानुपपत्तिः इत्यत आह – **अन्यथा तुल्ययुक्त्या** इति । **तदपि** – घटादिकमपि ।।

ध्वन्यात्मक इति । इदं शब्दविशेषणम् । ध्वन्यात्मकः यः भेर्याकाशसंयोगादिजन्यः आद्यः शब्दः तं प्रति इत्यर्थः । **विभागजन्य** इति । वंशदलद्वयविभागजन्यः ध्वन्यात्मकः यः आद्यः शब्दः तं प्रति गगनं समवायिकारणम्, वंशदलाकाशविभागः असमवायिकारणम्, वंशदलद्वयविभागः निमित्तकारणम् ।।

अथ ध्वन्यात्मकस्य वर्णात्मकस्य च द्वितीयादिशब्दस्य कारणत्रयं दर्शयति – **द्वितीयादिशब्दं प्रति तु** इत्यादिना ।।

ननु अन्त्यशब्दस्य उपान्त्यशब्देन नाशस्वीकारे अन्त्यशब्दस्य क्षणिकत्वम् आपद्येत, तन्मास्तु इत्याशयेन आह – **उपान्त्यशब्दनाशेन वा** इति ।।

यद्वा – ननु अन्त्यशब्दस्य उपान्त्यशब्देन नाशाङ्गीकारे योग्यविभुविशेषगुणनाशत्वेन स्वोत्तरवृत्तिविशेषगुणत्वेन कार्यकारणभावस्य व्यभिचारः इति, अत आह – **अन्त्यशब्देन वा** इति । तथा च उत्तरक्षणवृत्तित्वविशिष्टस्य स्वस्यैव स्वनाशकतया न उक्तकार्यकारणभावे व्यभिचार इति भावः । इदं द्वितीयं व्याख्यानं **उपान्त्यशब्दनाशेन वा** इत्यस्य स्थाने **अन्त्यशब्देन वा** इति पाठमाश्रित्य ।।

कारिकावली

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ।। १६८ ।।

मुक्तावली

ननु सजातीये ''सोऽयम्'' इति प्रत्यभिज्ञा कुत्र दृष्टा? इति, अत आह – **तदेव** इति । यदौषधं मया कृतं तदौषधम् अन्येनापि कृतम् इत्यादिदर्शनात् इति भावः ।।

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्यपुत्र-
श्रीयुतविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्यां गुणखण्डः ।।

दिनकरी

मूले **''तदेव औषधम्''** इत्यादिना ''सैव इयं दीपकलिका'' इत्यादेः परिग्रहः ।

ननु तत्रापि व्यक्त्यभेद एव विषयः अस्तु, अतः भावार्थं प्रकाशयति – **यदौषधं मया कृतम्** इत्यादिना । अत्र च **स्वकर्तृकत्व** – स्वभिन्नकर्तृकत्वरूप-विरुद्धधर्माध्यासाहितभेदप्रत्ययस्य प्रतिबन्धकस्य सत्त्वात् न व्यक्त्यभेदः विषयः, किन्तु तत्सजातीयाभेदो विषयः इति भावः ।।

भानुं प्रणम्य परिभाव्य च शास्त्रसारं
मुक्तावलीकिरण एष पितृप्रदिष्टः ।
सद्युक्तिभिः दिनकरेण करेण सोऽयं
नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु ।।

मुक्तावलीप्रकाशो यः स्वाज्ञानतिमिरापहः ।
तेन सन्तोषमायातु नीलकण्ठः सतीप्रियः ।।

इति श्रीभरद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मज-
महादेवभट्टतनूजश्रीमद्दिनकरभट्टविरचिते
न्यायसिद्धान्तमुक्तावलीप्रकाशे गुणखण्डः
।। समाप्तश्च अयं ग्रन्थः ।।

राजीवोल्लासः

स्वकर्तृकत्व इत्यादि । तद्भेदव्याप्यतदवृत्तिधर्मवत्तापरामर्शजन्यायाः तद्भेदानुमितेः तद्व्यक्त्यभेदज्ञानं प्रति प्रतिबन्धिकायाः सत्त्वात् इत्यर्थः । ''इदमौषधं तदौषधात् भिन्नं, तदवृत्तिमत्कर्तृकत्ववत्त्वात्, यो यदवृत्तिधर्मवान् स ततो भिन्नः, यथा घटः पटावृत्तिधर्मवत्त्वात् पटात् भिन्नः'' । तथा च उक्ताकारा अनुमितिः औषधयोः अभेदबुद्धिं प्रतिबध्नाति इति ''तदेव औषधम् इदम्'' इति प्रतीतिः न ऐक्यविषया, अपि तु साजात्यविषया इति भावः ।।

अत्र आहुः – एककालीनस्वकर्तृकत्वस्वभिन्नकर्तृकत्वयोः अविरोधेऽपि भिन्नकालीनयोः तयोः विरोधेन स्वकर्तृकत्वविशिष्टो धर्मी स्वभिन्नकर्तृकत्वविशिष्टात्

धर्मिणः भिन्न इति भेदावगाहिप्रत्ययस्य अभेदावगाहिप्रत्ययप्रतिबन्धकस्य सत्त्वात् न व्यक्त्यभेदो विषयः, किं तु तत्सजातीयाभेदो विषय इति ।।

।। शुभं भूयात् ।।

इत्थं रामानुजार्येण राजीवोल्लासनामिका ।
व्याख्या दिनकरीयस्य प्रकाशस्य व्यलिख्यत ।।

व्याख्येयं नरसिंहदेशिककृपावीक्षाभिरुल्लासिता
विद्वत्तल्लजदेवनाथकरुणापाङ्गेन संलालिता ।
कृष्णस्वाम्यभिधस्वतातकरुणासंवर्धिता राजतां
श्रीमद्वेङ्कटनायकाङ्घ्रियुगले भक्त्यार्पिता शाश्वतम् ।।

इति श्रीरामानुजताताचार्यविरचिते
दिनकरीयव्याख्याने राजीवोल्लासे गुणखण्डः ।।
।। समाप्तश्च अयं ग्रन्थः ।।

ABBREVIATIONS

AA	–	*Aṣṭādhyāyī*
AK	–	*Amarakośa*
ĀŚS	–	*Āpastamba-śrauta-sūtra*
ATV	–	*Ātmatattva-Viveka*
BG	–	*Bhagavad-Gītā*
BU	–	*Bṛhadāraṇyaka Upaniṣad*
Bh.S.	–	*Bhūṣaṇa-sāra*
BVP	–	*Brahma-Vaivarta-Purāṇa*
CU	–	*Chāndogya Upaniṣad*
JS	–	*Pūrvamīmāṁsā-sūtras of Jaimini*
Kh.Kh.	–	*Khaṇḍana-khaṇḍakhādya*
KP	–	*Kāvya-prakāśa*
KV	–	*Kiraṇāvalī*
KS	–	*Kumāra-saṁbhava*
M.Bh.	–	*Mahābhāratā*
MS	–	*Manusmṛti*
Mahā.Bh.	–	*Mahābhāṣya*
Mai.Saṁ.	–	*Maitrāyaṇī-Saṁhita*
Mā.Pu.	–	*Mārkaṇḍeya-Purāṇa*
MU	–	*Muṇḍaka Upaniṣad*
Nai.Ca.	–	*Naiṣadīya-Carita*
NKL.	–	*Nyāya-Kandalī*
NL.	–	*Nyāyalīlāvatī*
NS.	–	*Nyāya-Sūtra*

Ny.ku.	–	*Nyāya-Kusumāñjali*
PP.	–	*Prakaraṇa-pañcikā*
PPB	–	*Praśastapāda-bhāṣya*
PS	–	*Puruṣa-Sūkta*
PTN.	–	*Padārthatattva-niriūpaṇa*
PTVP.	–	*Padārtha-tattva-vivecana-prakāśa*
RV	–	*Raghuvaṁśa*
ŚB	–	*Śābara-bhāṣya*
ŚK	–	*Śabda-kaustubha*
ŚŚP	–	*Śabda-Śakti-Prakāśikā*
ŚU	–	*Śvetāśvatara Upaniṣad*
ŚV	–	*Śaktīvāda*
Taitt.Ār.	–	*Taittirīya-Āraṇyaka*
Taitt.Saṁ.	–	*Taittirīya-Saṁhitā*
TC	–	*Taltvacintāmaṇi*
TU	–	*Taittirīya Upaniṣad*
TV	–	*Tantra-Vārttika*
Vāj.Saṁ.	–	*Vājasaneyī-Saṁhitā*
VP	–	*Vākyapadīya*
VS	–	*Vaiśeṣika-sūtra*
VV	–	*Vyutpattivāda*
Vi.Vi.	–	*Vidhi-Viveka*

—***—

Index of References
To
The Views of other Authors
In The Text
Kārikāvalī-Muktāvalī-Dinakarī
with the Commentary Rājīvollāsa
(Parts I and II)

।। प्रत्यक्षखण्डः ।।

।। मङ्गलवादः ।।

1. विघ्नध्वंसस्तु मङ्गलस्य द्वारम् इत्याहुः प्राञ्चः (p.18).

Vide: *KV*, p.3.

2. नव्यास्तु - मङ्गलस्य विघ्नध्वंस एव फलम्, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्.... इति आहुः (p.27).

Vide: *TC*, Vol.-I., Part I, p. 88.

।। ईश्वरवादः ।।

3. अत्र केचित् - सामानाधिकरण्यसंबन्धेनैव ज्ञानादौ आश्रयगतम् एकत्वं भासते इति - आहुः (pp.53-54).

4. तदुक्तम् आचार्यैः - एकाम् असिद्धिं परिहरतः द्वितीयापत्तिः (p.59).

Vide: *ATV*, p. 213.

5. केचित्तु - मास्तु कार्यत्वं कृतेः कार्यतावच्छेदकम् .... इति - आहुः (p.63).

6. दीधितिकृतस्तु-कार्यत्वावच्छिन्नं प्रति ..... ईश्वरसिद्धिम् आहुः (p.63).

7. आचार्यमतानुयायिनस्तु - अस्तु चेष्टात्वेन तत्र हेतुत्वम्...... इति आहुः इति अलं पल्लवैः इति (p.64).

Vide: *Ny.Ku.*, pp. 494-496.

Vide also *Dīdhiti on ATV*, Vol.II p. 293.

8. यत्तु - पूर्वोक्तस्थापनानुमाने शरीरजन्यत्वम् उपाधिः ...... ग्रन्थकृतां सङ्गच्छते इति (p.66).

9. तदुक्तं - कार्यायोजनधृत्यादेः ..... विश्वजिदव्ययः (p.69).

Vide: *Ny.Ku.*, p.479.

10. "अग्नेः ऊर्ध्वज्वलनम् ..... अणुमनसोश्च आद्यं कर्म इति अदृष्टकारितानि" इति कणादेन उक्तम् (p.69).

Vide: *VS*, 5.2.13.

॥ पदार्थविभागः ॥

11. अत एव चिन्तामणौ सप्तपदार्थ-भिन्नतया ..... आशङ्कितम् (p.72).

Vide: *TC*, Vol.III., p. 12.

12. संयोगापेक्षया कर्मणः अतिरिक्तत्वं नास्ति इति भूषणकारमतं निराकर्तुम्.... उक्तम् (p.72).

13. अभावः अधिकरणात्मकः इति प्राभाकरमतं दूषयितुं ... उक्तम् (p.72).

Vide: *PP*, p. 289.

14. नव्यास्तु - योग्यविभुविशेषगुणनाशं प्रति...... तत्त्वज्ञानसाध्यत्वमेव इति - आहुः (p.76).

॥ शक्तिसादृश्यपरीक्षा ॥

15. केचित्तु - वन्हिं प्रति तृणकूत्कारसंयोगादीनां ..... न्याय्यत्वात् इति आहुः (p.89).

16. परे तु - तृणादिसंबन्धकालीनवायुसंयोगादीनां...... न शक्तिसिद्धिः इति आहुः (p.90).

17. नव्यास्तु - सादृश्यम् अतिरिक्तमेव ...... एवं प्रतियोगित्वमपि इति - आहुः (p.102).

Vide: *TC*, Vol.III. p.7;

Vide also: *Siddhāntalakṣaṇam-Dīdhiti*, p.304; and *NL*, p.27

।। द्रव्यविभागः ।।

18. पृथिव्यप्तेजोवाय्वात्मानः इति पञ्चैव द्रव्याणि ... इति आहुः **नवीनाः** (p.106).

Vide: *PNT*, pp. 4,8,17.

।। तमोनिरूपणम् ।।

19. तदुक्तम्-"तमः खलु चलं नीलं ...... भेत्तुमर्हति"-इति (p.117).

20. आरोपितं नीलरूपं तमः इति **कन्दलीकारमतम्** (p.118).

Vide: *NKL*, p.23.

।। सामान्यनिरूपणम् ।।

21. **तथा च उक्तम्** - व्यक्तेरभेदः तुल्यत्वं..... जातिबाधकसङ्ग्रहः (p.127).

Vide: *KV*, p.23.

22. अत्राहुः **मञ्जूषाकाराः** - असंबन्धस्य जातिबाधकत्वं च .... जात्यभावव्याप्यत्वम् इति (p.136).

Vide: *Mañjūṣā*, pp.112-113.

23. **प्राभाकारास्तु**-असंबन्धः जातित्वे जातिमत्त्वे च बाधकः .. इत्याहुः (p.136).

Vide: *Prabhā*, pp.112-113.

24. अत्र **नव्याः** - "सन्" इति प्रतीतिविषयः भावत्वमेव ..... वैशेषिकविभागः निर्युक्तिकत्वात् अनादेयः इति आहुः (p.137).

Vide: *PTN*, p.96.

।। विशेषनिरूपणम् ।।

25. **नवीनास्तु** - विशेषेऽतिरिक्ते मानाभावः । ...... नित्यद्रव्याणामपि इति - आहुः (p.142).

Vide: *PTN*, p.55.

।। समवायनिरूपणम् ।।

26. पृथिव्यां गन्धसमवायः, न जले...... समवायस्य नानात्वं इति तु नव्याः (p.148).

Vide: *PTN*, p.149.

।। वैशिष्ट्यविचारः ।।

27. नव्यास्तु - वैशिष्ट्यं पदार्थान्तरमेव ...... विनिगमनाविरहः इति - आहुः (p.154).

Vide: *PTN*, p.153.

।। अभावनिरूपणम् ।।

28. अत्र केचित् - भावभिन्नत्वस्य अभावत्वे भावत्वरूपविशेषण ज्ञानशून्यकाले "घटो नास्ति" इति प्रतीत्यनापत्तिः ...... अखण्डोपाधित्वं अनुयोगिताविशेषो वा अभावत्वम् इति - वदन्ति (p.157).

Vide: *Siddhāntalakṣaṇam-Gādādharī*, p.305, and *Vivṛti thenon.*

29. अत्र नव्याः - अभावत्वस्य अखण्डोपाधित्वे प्रमाणाभावः । .... फलानुरोधित्वात् कल्पनायाः इति - प्राहुः (p.152-158).

Vide: *Siddhāntalakṣaṇam-Gādādharī*, p.305.

30. ननु प्रागभावसत्त्वे किं मानम् इति चेत् ...... उत्पादभिया तत्सिद्धिः इति प्राञ्चः (p.164).

31. केचित् तु - "जातः घटः" इतिवत् "उत्पन्नः घटध्वंसः" इति प्रत्यक्षबलेन नाशः अतिरिच्यते, न तु प्रागगावः..... (p.164).

32. अत्र वदन्ति - ...... तथा च स्वानधिकरणेषु तन्तुषु अपि ..... पटोत्पत्तिवारणाय प्रागभावहेतुत्वस्य आवश्यकत्वात् इति (p.164-165).

33. एवमपि अस्तु कश्चित् अतिरिक्तः पदार्थः । तथापि तस्य सप्रतियोगिकत्वे प्रमाणाभावः इति तु तत्त्वम् (p.165).

34. अत्र ध्वंसप्रागभावाधिकरणे न अत्यन्ताभावः इति **प्राचां मतम्** (p.170).

नव्यास्तु - तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनापि अत्यन्ताभावः वर्तते इति - आहुः (p.170).

Vide: *CL*, p164.

।। साधर्म्यनिरूपणम् ।।

35. अभिधा च शक्त्याख्यः..... इति **मीमांसकाः** (p.179).

"अस्मात् पदात् अयम् अर्थः बोद्धव्यः" इति ईश्वरेच्छारूपः सङ्केत एव अभिधा इति **नैयायिकाः** (p.179).

36. **अत एव भाष्ये** पञ्चानाम् इत्युक्तम्, न तु पञ्चभावानाम् इति (p.180).

भावपदस्य उद्देश्यपरत्वाभावे, **प्रशस्तपादभाष्यं** प्रमाणयति - **अत एव** इति (p.181).

Vide: *PPB*, p.42.

37. आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात्..... (p.192).

यद्यपि स्वप्रत्यक्षे इत्येव वक्तुम् उचितम्, तथापि **टीकाकृन्मते** आत्मैकत्वमहत्त्वयोः अयोग्यत्वात्...... आत्ममानस इत्युक्तम् (p.193).

38. तस्यापि न कारणत्वम् इति **आचार्याणाम्** आशयः इति **अन्ये** । तन्न । .... **आचार्यैः** उक्तत्वात् (p.194).

तस्यापि - आत्मपरममहत्परिमाणस्यापि ..... कारणत्वं च ज्ञातृधर्मेतरकार्यापेक्षया इति **आचार्यग्रन्थः** (p.195).

Vide: *KV*, pp.20-21.

।। कारणत्वनिरूपणम् ।।

39. असमवायिकारणत्वं पदार्थान्तरम् इति... अखण्डोपाधिरेव वा इति (p.214).

40. ननु निवन्धान्तरेषु (चिन्तामण्यादिग्रन्थेषु) ''अन्यत्र क्लृप्त'' इति दृश्यते, तत्कथम् अत्र ''अवश्यक्लृप्त'' इति कृतम् (p.230).

Vide: *TC*, Vol.II. Part II, p.154.

41. नव्यास्तु - कारणत्वस्य .... तस्मात् कारणत्वं पदार्थान्तरमेव इति - आहुः (p.235-36).

Vide: *PTN*, p.144.

42. परे तु - कार्यान्वयव्यतिरेक .... शालित्वम् इति - ऊचुः (p.236).

कालाकाशात्मदिशां पृथिव्यप्तेजोवाय्वाकाशानां च साधर्म्यवर्णनम्

43. .... परममहत्त्वत्वस्य ...... जातित्वसंभवेऽपि आत्मपरिमाणम् अयोग्यम् इति टीकाकृन्मतम् अनुसृत्य आह (p.251).

।। आकाशात्मनोः साधर्म्यवर्णनम् ।।

44. केचित्तु - स्वत्वस्य ...... द्वित्वप्रत्यक्षम् इति - आहुः (p.258).

45. परे तु - एतत्क्षणोत्पन्नयोग्यविभुविशेषगुणत्वेन नाश्यता ..... चरमज्ञानादिकं तु ...... स्वयमेव नाशकम्...... आहुः (p.258).

।। सामान्यतः द्रव्यगुणवर्णनम् ।।

46. ''वायोर्नवैकादश.....'' इति प्राचीनश्लोकम् अनुसृत्य वायोः तावद्गुणान् आह (p.272).

47. अत्र नव्याः - ईश्वरस्य परिमाणवत्त्वे प्रमाणाभावः ...... पञ्चैव ईश्वरस्य गुणाः इति - आहुः (pp.272-273).

Vide: *PTN*, p.30; *PTVP*, p.32

।। पृथिवीनिरूपणम् ।।

48. आचार्यमते (उदयनाचार्याणां मते) व्यतिरेकसहचारेणापि अन्वयव्याप्तिरेव गृह्यते (p.293).

उभयसहचारगृहीतव्याप्तिकत्वं अन्वयव्यतिरेकित्वम् इति आचार्यमतम् (p.295).

Vide: *Ny.Ku.*, p.419.

49. उभयव्याप्तिज्ञानस्य अनुमितिकारणतावादिमणिकारमत एव ..... केवलान्वयित्वादिकम् इति बोध्यम् (p.295).

Vide: *TC*, Vol.II. Part 1. p.580.

52. त्र्यणुक एव अवयवधाराया विश्रान्तिः इति दीधितिकारमते ..... सूचितम् (p.299).

Vide: *PTN*, p.22.

।। जलनिरूपणम् ।।

51. केचित्तु - धूमादिकं प्रति .... जलत्वेन्धनत्वयोः पार्थक्येन कारणतावच्छेदकतया जलत्वजातिसिद्धिः इति - आहुः (p.320).

52. परे तु - स्थूलजलवृत्ति...... दोषाभावाच्च - इति आहुः (p.320).

।। तेजोनिरूपणम् ।।

53. अत्र केचित् आहुः - चक्षुः विषयासम्बद्धमेव ग्राहकम् ..... गोलकमेव चक्षुः, तच्च न तैजसम् इति (pp.339-340).

54. यत्तु आहुः शालिकाचार्याः - चक्षुर्बा ह्यालोकाभ्याम् आरब्धेन चक्षुषा..... तुल्यकालग्रहणम् उपपद्यते एव (p.340).

Vide: *PP*, p.130.

55. अपरे तु - पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि .... पृथिवीजलभिन्नस्य तेजस्त्वनियमात् (p.346).

Vide: *TC*, Vol I. p.750.

56. नवीनास्तु - सुवर्णं पार्थिवमेव ..... इति - वदन्ति (p.347).

॥ वायुनिरूपणम् ॥

57. यद्यपि अनित्यः वायुः चतुर्विधः ,तस्य चतुर्थी विधा प्राणादिः इत्युक्तम् आकरे (p.357).

शरीरम् इन्द्रियं विषयः प्राणः इति प्राणस्य आकरे - प्रशस्तपादभाष्ये पृथगुक्तिः (p.357).

Vide: *PPB*, p.113.

॥ आकाशनिरूपणम् ॥

58. नवीनास्तु - शब्दकारणत्वेन क्लृप्तस्य ईश्वरस्य शब्दसमवायिकारणत्वम् । ..... ईश्वरस्यैव श्रोत्रत्वोपपत्तेः–इति आहुः (p.367).

Vide: *PTN*, p.8.

59. स्वतन्त्रास्तु - मृदङ्गादीनामेव गुणः शढदः । शब्दं प्रति मृदङ्गत्वादिना समवायिकारणतायाः स्वीकारात् इति - वदन्ति इति (p.367).

॥ दिङ्निरूपणम् ॥

60. दीधितिकृतस्तु - दिक्कालौ न ईश्वरात् अतिरिच्येते, मानाभावात् इति - आहुः (p.389).

Vide: *PTN*, p.4.

61. अत्र नव्याः - ईश्वरस्य दिक्कालरूपत्वं तत्तज्जीवस्य वा इति विनिगमना-विरहेण अतिरिक्तयोः तयोः स्वीकारः.... परत्वापरत्वयोः गुणत्वे एव मानाभावः.... इति वदन्ति (p.390).

।। त्वङ्मनस्संयोगस्य ज्ञानकारणत्वविचारः ।।

62. अत्र केचित् - पूर्वोक्तयुक्त्या त्वङ्मनस्संयोगस्य हेतुत्वे सिद्धे ..... कल्प्यते इति (p.469).

63. अन्ये तु ...... चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते .... इति वदन्ति (p.469).

(अन्ये तु इति मिश्रमतम्)

64. अत्र नव्याः - ..... अत एव (मनःक्रियाजन्यमनः पुरीतत्संयोगस्यैव सुषुप्तित्वादेव) ''यदा त्वचं त्यक्त्वा.....'' इति ग्रन्थकाराणां लेखः सङ्गच्छत इति वदन्ति (p.473).

।। इन्द्रियनिरूपणम् ।।

65. प्राचां मते ..... शन्दियावयववारणाप, नवीनमते ..... कालादेः वारणाय वा मनः पदम् (p.483).

।। लौकिकसन्निकर्षनिरूपणम् ।।

66. वैशेषिकमते तु समवायः न प्रत्यक्षः । (p.493).

67. अन्यथा षोढा सन्निकर्षः इति प्राचां प्रवादः व्याहन्येत (p.493).

।। अनुपलब्धिनिरूपणम् ।।

68. मणिकृन्मतानुसारेण योग्यतां निर्वक्ति – सा च इति (p.495).

Vide: *TC*, Vol. II, Part II, p.608.

।। अलौकिकसन्निकर्षनिरूपणम् ।।

69. ज्ञायमानं सामान्यम् प्रत्यासत्तिः इति प्राचीनानां मते..... (p.527).

70. सामान्यविषयकज्ञानं प्रत्यासत्तिः इति नवीनानां मते.... (p.527).

71. न च-साङ्कर्यं न जातित्वबाधकम् इति वाच्यम् । भाष्यविवरणकारैः..... तस्य तथात्वस्य स्पष्टम् अभिधानात् (p.534).

Vide: *KV*, p.23.

।। अनुमानखण्डः ।।

।। अनुमितिकारणनिरूपणम् ।।

72. .... प्राचीनास्तु - व्याप्यत्वेन ज्ञायमानं लिङ्गम् अनुमितिकारणम् इति - वदन्ति (p.535).

73. .... नव्याः - ..... अनुमितिं प्रति मनस्त्वेनैव कारणत्वम् इति आहुः (p.536).

।। परामर्शनिरूपणम् ।।

74. अत एव ''वन्हिव्याप्यधूमवान् च अयम्'' इत्याकारकः .... उपनयः सर्वसंमतः इति ध्येयम् (p.542).

।। सिद्धान्तव्याप्तिनिरूपणम् ।।

75. साध्यादिभेदेन व्याप्तेर्भेदात् ..... इत्यपि वदन्ति (p.556).

Vide: *Siddhāntalakṣaṇa-Dīdhiti*, p.142.

76. अत्र केचित् - महाकालभेदविशिष्टघटाभावः तत्र प्रतियोगिव्यधिकरणः ..... महाकाले महाकालभेदाभावात् (p.584).

।। पक्षतानिरूपणम् ।।

77. मणिकाराणामपि बाधग्रन्थे ..... ''बाधः असिद्ध्याद्यसङ्कीर्णः'' इति उपपादयताम् अनुमितौ स्वरूपसंबन्धावच्छेदकभानम् अनुमतम् (p.604).

78. मणिकृतामपि (पक्षातावच्छेदकसाध्ययोः) व्याप्यव्यापकभावभानं संमतम् । केवलव्यतिरेकिग्रन्थे ..... मणिकारैः व्याप्यव्यापकभावभानं स्वीकृतमेव (p.604-605).

Vide: *TC*, Vol.II. Part I. pp.612-614.

79. पर्वतत्वसामानाधिकरण्येन अनुमितिं प्रति ..... पर्वतत्वाश्रययत्किञ्चित्पर्वतविशेष्यकवन्हिप्रकारकनिश्चयश्च प्रतिबन्धकः इति प्राचीनाः (p.604).

80. उपाध्यायास्तु - सिषाधयिषाविरहविशिष्टसिद्धिप्रत्यक्षसामग्र्योः अन्यतरस्य अभावः पक्षता.... इति आहुः (p.606).

Vide: *Pakṣatā*, p.350.

हेत्वाभाससामान्यनिरूपणम्

81. ''कर्मधारयोत्तरभावप्रत्ययस्य .....'' इति दीधित्युक्तेः (pp.620).

82. इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं दोषः । तद्वत्त्वं च हेतौ येन केनापि संबन्धेन इति नव्याः (p.621).

Vide: *Sāmānyarirukti-Dīdhiti*, p.30.

83. परे तु - यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम् ...... इत्याहुः (p.625).

Vide: *Sāmānyarirukti-Cintāmani*, p.4.

84. अन्ये तु - सपक्षावृत्तिः असाधारणः...... इति वदन्ति (p.634).

Vide: *TC*, Vol.II. Part I. pp.825-826.

85. तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे प्रमाणाभावात् इति वदतां **रत्नकोशकाराणां** मतं .... अनुवदति - **अत्र केचित्** इत्यादिना । (p.644).

86. एवं ''वह्निमान् नीलधूमात्'' इत्यादौ ..... नीलधूमत्वस्य .... व्याप्यत्वासिद्धिः इत्यपि वदन्ति (p.646).

87. पक्षविशेष्यकसाध्याभावज्ञाने प्रमात्वनिश्चयः अनुमितिप्रतिबन्धकः तदभावः कारणम् । अतः तादृशप्रमात्वमेव बाधः इति **प्राचीनमतम्** (p.664).

।। हेत्वाभासविशेषनिरूपणम् ।।

88. ''शब्दोऽनित्यः शब्दत्वात्'' इत्यादौ ..... तदा तत् असाधारणम् । यदा तु शब्दे अनित्यत्वनिश्चयः तदा न असाधरणम् । इदं च **प्राचां मतम्** (p.673).

89. ''विरुद्धयोः हेत्वोः परामर्शे'' इत्यर्थे तु ''पर्वतो वन्हिमान् धूमात्'' इत्यादि सद्धेतौ ''वन्ह्यभावव्याप्यपाषाणमयत्ववान् पर्वतः'' इति परामर्शदशायां सत्प्रतिपक्षानुपपत्तिः ।...... **प्राचीनैस्तु** ..... इष्टापत्तिः वक्तुं न शक्यते (p.685).

PART - II

।। उपमानखण्डः ।।

90. तत् – सादृश्यज्ञानं उपमितिकरणम् इति । नवीनमतेन एतत् (p.2).

91. अतिदेशवाक्यार्थशाब्दबोधः करणम् ..... इति सांप्रदायिकमतं तु .... उपेक्षितम् (p.2).

92. .... सादृश्यज्ञानमात्रं करणम् ..... तज्जन्यम् अतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्टपिण्डदर्शनं च द्वयं व्यापारः इति कस्यचिन्मतं प्रत्युक्तम् (p.4).

।। शब्दखण्डः ।।

।। पदशक्तिविचारः ।।

93. आधुनिकसङ्केतिते तु न शक्तिः इति संप्रदायः (p.19).

94. नव्यास्तु - ईश्वरेच्छा न शक्तिः, किन्तु इच्छैव । तेन आधुनिकसङ्केतितेऽपि शक्तिः अस्त्येव इति आहुः (p.19).

95. आधुनिकसङ्केतः परिभाषा इति शक्तिवादे .... परिभाषायाः अपि वृत्तित्वं स्वीकृतम् (p.24).

Vide: *ŚV*, p.5.

96. संसर्गस्य तु पदानुपस्थितस्यापि ..... आकाङ्क्षावशात् शब्दबोधे भानं संभवति इति नैयायिकानां मतम् (p.51).

Vide: *VV*, Part-I, p.1.

97. अत एव अपूर्ववादे अपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रहः इति आशङ्क्य कार्यत्वेन घटादिषु शक्तिग्रहात् योग्यतया शाब्दबोधे अपूर्वभानम् इत्युक्तं तैः (pp.62,64).

Vide: *TC*, Vol.IV. Part II, pp.342-44.

98. नव्यास्तु - संस्थानानुपस्थितावपि गोत्वादिना .... एकशक्तिलाभायैव इति - आहुः (p.66).

99. .... त्रिषु एकैव शक्तिः .... एतद्बोधनायैव .... पदार्थः इति एकवचनम् इति संप्रदायः (p.66).

Vide: *TC*, Vol.IV. Part II, p.591.

।। पदविभागः ।।

100. रूढिज्ञानस्य केवलयौगिकार्थबुद्धौ प्रतिबन्धकत्वात् इति प्राञ्चः (p.79).

Vide: *TC*, Vol.IV. Part II, p.592.

101. वस्तुतस्तु समुदायशक्त्युपस्थितपद्मे अवयवार्थपङ्कजनिकर्तुः अन्वयः भवति, सान्निध्यात् । यत्र तु .... तत्र च अवयवशक्तिमात्रेण निर्वाहः इति आहुः (pp.79,80).

Vide: *TC*, Vol.IV. Part II, pp.695-97.

102. गौडप्रधानैः जगदीशतर्कालङ्कारैः मण्डपपदस्यैव गृहार्थकत्वं स्पष्टम् उक्तं शब्दशक्तिप्रकाशिकायाम् (p.81).

Vide: *ŚŚP*, p.162.

।। लक्षणानिरूपणम् ।।

103. "कुमतिः पशुः" इत्यादि सर्वलाक्षणिकस्थले .... अनुभावकत्वम् इति नव्याः (p.93).

Vide: *TC*, Vol.IV. Part II, p.699.

104. परे तु-"राजपुरुष" इत्यादौ तत्पुरुषे न लक्षणा, व्युत्पत्तिवैचित्र्येण स्वत्वादि संसर्गेणैव राज्ञः पुरुषादौ अन्वयस्वीकारात् ..... इति - आहुः (p.109).

Vide: *VV*, Part I, p.84.

105. .... विनैव साहित्यस्य उद्देश्यतावच्छेदकत्वं .... ''धवखदिरौ'' इत्यादिप्रयोगोपपत्तेः, साहित्याश्रये नास्ति लक्षणायाः आवश्यकता । अधिकं व्युत्पत्तिवादे द्रष्टव्यम् (p.118).

Vide: *VV*, Part II, pp.158-160.

106. परे तु - ''अहिनकुलम्'' इत्यादौ अहिः नकुलश्च बुध्यते । .... इति - वदन्ति (p.124).

107. विरूपैकशेषत्वेऽपि तत्र (पितरौ श्वशुरौ इत्यादौ) लुप्तमात्रादि-शब्दस्मरणेनैव शाब्दबोधात् न लक्षणा इति - अन्ये (p.125).

108. केचित्तु - उपपदार्थः सामीप्यम् ... कुम्भसमीपम् इति अन्वयबोधः इति - आहुः (p.133).

।। शाव्दवोधकारणकथनम् ।।

।। आसत्तिनिरूपणम् ।।

109. नव्यास्तु - .... वृत्त्या पदजन्यपदार्थोपस्थितिः आसत्तिः इति - आहुः (p.138).

110. अपरे तु यद्यदाकाङ्क्षितं योग्यं ... महावाक्यार्थबोधः इत्यपि आहुः (p.145).

Vide: *PP*, p.384.

।। योग्यतानिरूपणम् ।।

111. संशयनिश्चयसाधारणं योग्यताज्ञानं शाब्दबोधकारणम् इति प्राचीनाः (p.160).

Vide: *TC*, Vol.IV. Part I, p.285.

112. अयोग्यतानिश्चयः प्रतिबन्धकः, तदभावः शाब्दबोधकारणम् इति नवीनाः (p.160).

Vide: *TC*, Vol.IV. Part I, p.285.

113. ... न केवलं प्रकृतिप्रत्ययोः पौर्वापर्यम् आकाङ्क्षा । ... विस्तरः व्युत्पत्तिवादादौ द्रष्टव्यः (p.173).

Vide: *VV*, Part II, p.163.

114. ''यत्संशयव्यतिरेकनिश्चयौ यदुत्पत्तिप्रतिबन्धकौ तन्निश्चयः तद्धेतुः'' इति व्याप्तेः चिन्तामणौ उक्तत्वात् (p.177).

Vide: *TC*, Vol.I. p.118-119.

।। गुणखण्डः ।।

।। गुणनिरूपणम् ।।

115. प्राभाकरास्तु - गुणत्वविशिष्टवैशिष्ट्यं .... जातिरूपत्वञ्च सिद्ध्यति इति - आहुः (p.197).

116. स्वाश्रयप्रतियोगिकान्योन्याभाव ... न तत्र अव्याप्तिः इति केचित् (p.201).

117. तद्रुपाः गुणाः सामान्यगुणाः .... इति किरणावली (p.212).

Vide: *KV*, p.107.

118. संख्यादीनां विशेषत्वं तु .... इति कन्दलीकाराः (p.212).

Vide: *NKL*, p.271.

119. नव्यास्तु - तत्र अव्याप्यवृत्त्येव नानारूपम्, ... इति वदन्ति (p.231).

Vide: *PTN*, p.57.

।। पाकप्रक्रिया ।।

।। पीलुपाकवादनिरूपणम् ।।

120. अत्र य एव अग्निसंयोगः द्व्यणुकनाशकः ... इति केषांचिन्मतं ''पुनः

(अन्यस्मात् अग्निसंयोगात्) (अग्न्यन्तरसंयोगात्)'' इति भाष्यविरुद्धं न आदरणीयम्.... (p.248-250).

Vide: *PPB.* p.119.

।। पिठरपाकवादनिरूपणम् ।।

121. अत्र केचित् - रूपादिगतशुक्लत्वादिना वैजात्यस्य ..... न्यायनये दुरुद्धरः दोषः इत्याहुः (p.256).

।। संख्यानिरूपणम् ।।

122. अत्र केचित् - अपेक्षाबुद्धेः उत्पत्तिसंबन्धेन हेतुत्वात् ... न .... द्वित्वाद्युत्पत्तिः इति (p.259).

123. अत्र एकत्वे द्वित्वादिसंख्याभावात् .... अपेक्षाबुद्धिः कारणम् इति समाहितम् उदयनाचार्यैः (p.260).

Vide: *KV*, p.131.

124. अत्र आहुः - ''आकाशौ'' इति वाक्यस्य प्रामाण्यापत्त्या .... इति अन्यत्र विस्तरः (pp.262-3).

Vide: *VV*, Part I. pp.148-161.

125. ''आकाशः द्वित्ववान्'' इति वाक्ये मतुपा समवायोल्लेखात् .... इत्यादिकं व्युत्पत्तिवादादौ द्रष्टव्यम् (p.265).

Vide: *VV*, Part I, p.152.

126. त्रिक्षणावस्थायित्वम् अपेक्षाबुद्धेः इति वैशेषिकाणाम् आशयः (p.268).

127. नव्यास्तु - उत्पत्स्यमानद्वित्वस्य.... अलं अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वेन । .... इति प्राहुः (p.269).

128. दर्शितं च उदयनाचार्यैः अत्र प्रयोगः - ... चरमज्ञानवत् इति (p.272).

Vide: *KV*, p.129.

129. यत्र अवयवक्रियाजन्यविभागः अपेक्षाबुद्धिश्च युगपज्जायेते ..... इति भाष्यादौ स्पष्टम् (pp.277-278).

Vide: *PPB*, pp.285-286.

130. यत्र अनियतैकत्वज्ञानं तत्र .... उत्पद्यते, तथा सेनावनादौ इति कन्दलीकाराः (p.278).

Vide: *KV*, p.131.

131. आचार्यास्तु - त्रित्वादिकमेव बहुत्वं मन्यन्ते (p.278).

Vide: *KV*, p.131.

132. उक्तं च आचार्यैः - नियमतः तदप्रतीतिस्तु नियतापेक्षाबुद्धेः व्यञ्जिकायाः अभावात् (p.281).

Vide: *KV*, p.131.

॥ परिमाणनिरुपणम् ॥

133. अणुत्वह्रस्वत्वयोः .... सामानाधिकरण्यमेव भाष्यादौ उक्तम् (p.283).

Vide: *PPB*, pp. 324, 331.

134. केचित्तु - ''दीर्घम्'' इति प्रतीतेः अवयवसंयोगविशेषेणैव उपपत्तेः .... इति आहुः (p.286).

Referred to in *NKL*, p.317.

135. अवयवसंस्थानानुपलम्भेऽपि ''दूरात् दीर्घात्'' इत्यादि प्रत्ययस्य दर्शनात् च दीर्घत्वादिः परिमाणम् । चतुरश्रादिश्च अवयवसंस्थानविशेषः इति युक्तिमपि प्रादर्शयन् कन्दलीकाराः (p.288).

Vide: *NKL*, p.317.

।। पृथक्त्वनिरूपणम् ।।

136. एकपृथक्त्वादेः भाष्ये निराकरणात् आह - एकपृथक्त्वम् एकसमवेतपृथक्त्वम् इति (p.292).

Vide: *PPB*, p.333 and *NKL* thereon.

137. **अत्र नव्याः** - अन्योन्याभाव एव पृथक्त्वम्, न तु गुणान्तरम् (p.295).

Vide: *PNT*, p.44.

138. नञस्तु न अन्योन्याभावविशिष्टार्थकत्वम्, परन्तु अन्योन्याभावार्थकत्वम् इति अन्यत्र - **नञ्वाददीधितौ** - **सिद्धान्तितत्वात्** (pp.295,298).

Vide: *TC*, Vol. IV, Part II, pp. 1010, 1049.

।। संयोगनिरूपणम् ।।

139. **अत्र केचित्** - कथं संयोगस्य त्रैविध्यम्? अन्यतरकर्मजन्यसंयोगस्य अप्रसिद्धेः (p.301, 303).

140. नित्यः संयोगः नास्ति इति **भाष्यादितः** अवगन्तव्यम् (p.305).

Vide: *PPB*, pp.358-360.

Vide also *NKL*, pp.359-360.

।। विभागनिरूपणम् ।।

141. उक्तं च **न्यायकन्दलीकारैः** - पूर्वदेशावस्थितस्य द्रव्यस्य देशान्तरप्राप्तेः असंभवात् (p.309).

Vide: *NKL*, pp. 371-372.

142. संयोगः चिरस्थायी ..... विभागस्तु उत्तरसंयोगनाशः । स्पष्टश्च इदं **भाष्यादौ** (p.311).

Vide: *PPB*, pp.382-383

Vide also *NKL*, pp.382-383

।। परत्वापरत्वनिरूपणम् ।।

143. नव्याः पुनः .... न तयोः (परत्वापरत्वयोः) गुणान्तरत्वम् ..... इति वदन्ति (p.313).

Vide: *PTN*, p.52.

144. आचार्यास्तु - ..... परत्वापरत्वे न विप्रकृष्टत्वसन्निकृष्टत्वरूपे, किन्तु गुणन्तरे (p.313).

Vide: *KV*, p.164.

145. अथ द्विपृथक्त्वादिवत् द्विपरत्वादयोऽपि किं न स्युः इति चेत्, न । ..... उक्तं चेदं पृथक्त्वकिरणावल्याम् (p.314).

Vide: *KV*, pp.142-143.

।। भ्रमप्रमा-निश्चयनिरूपणम् ।।

146. ज्ञानभेदेन प्रकारतारूपविषयतानभ्युपगमात् ..... निश्चयवृत्तिप्रतिबन्ध-कतावच्छेदकत्वोपपत्तिः । विस्तरः संशयपक्षतागदाधरीये द्रष्टव्यः (p.322).

Vide: *Pakṣatā-Gādādharī*, p.27-29.

।। अप्रमाजनकदोषनिरूपणम् ।।

147. अत्र मथुरानाथतर्कवागीशाः - .... प्रमात्वावच्छिन्नं प्रति गुणस्यैव हेतुत्वम् इति प्राहुः (p.331).

Vide: *TC*, Vol.I. p.331.

।। प्रामाण्यग्रहनिरूपणम् ।।

148. मीमांसकाः हि प्रमात्वं स्वतो ग्राह्यम् इति वदन्ति ।

तत्र गुरुणां मते ज्ञानस्य स्वप्रकाशत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते ।

भट्टानां मते ...... तया च ज्ञानम् अनुमीयते ।

मुरारिमिश्राणां मते अनुव्यवसायेन ज्ञानं गृह्यते (pp.337-338).

149. निरूपणं साक्षात्कारः, एवं वित्तिरपि इति दीधित्युक्तेः (p.342).

150. ''अनभ्यासदशापन्न'' इत्यस्य प्रामाण्यव्याप्यवत्तानिश्चयाकालीनः इत्यर्थः'' इति तर्कवागीशाः (p.345).

Vide: *TC*., Vol. I., p.189.

151. उक्तं च दीधितिकृता - पुरोवर्तिनि रजतत्वप्रकारकम् इति ग्रहेऽपि रजते रजतत्वप्रकारकम्'' इति न ग्रहः (p.345).

॥ तर्कनिरूपणम् ॥

152. अत्र केचित् - .... तर्ककारणीभूतव्याप्तिज्ञानेन ..... आहार्यशङ्कायाः .... निवृत्तिः न संभवति ।...... किन्तु तर्केणैव (p.367).

153. केचितु - ...... उत्तेजकाभावविशिष्टव्यभिचारशङ्काविरहसंपादकत्वम् अक्षुण्णमेव तर्कस्य इति - आहुः (p.367).

154. परे तु - तदापादकापत्तित्वेन ..... तर्कस्य व्यभिचारशङ्कानिवर्तकत्वम् इति - आहुः (p.368).

॥ उपाधिनिरूपणम् ॥

155. नव्यास्तु - यदभावेन यद्वदन्यत्वेन वा ..... स उपाधिः लाघवात् । अत एव जलत्वतेजस्त्वयोः .... न क्वचिदपि उपधित्वम् इति - आहुः (p.383).

156. ''यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वम् उन्नीयते'' इति मणिकारदर्शितप्रकारापेक्षया लाघवात् इत्यर्थः (p.385).

Vide: *TC.*, Vol. II., Part I, p.336.

157. केचित्तु-सत्प्रतिपक्षोद्भावनम् उपाधेः फलम् ..... इति-आहुः (p.391).

Vide: *TC.*, Vol. II., Part I, p.383.

।। शब्दोपमानयोः पृथक्प्रामाण्यनिरूपणम् ।।

158. मणिकृतस्तु - ''एते पदार्थाः मिथः संसर्गवन्तः, योग्यतादिमत्पदोपस्थापितत्वात्'' इत्यनुमाने ..... पृथगेव शब्दो मानम् इति - वदन्ति (p.397).

Vide: *TC.*, Vol. IV., Part I, p.59-79.

159. मिश्रास्तु - अनुमानमुद्रया ..... न तादृशशब्दस्य बोधकत्वम् इति - आहुः (p.397-98).

160. परे तु - ''घटात् पृथक्'' इत्यादौ ..... पृथक्त्वाश्रयस्य शाब्दबोधः सर्वानुभवसिद्धः ..... तादृशान्वयबोधं प्रति हेतुत्वात् उपपद्यते (p.398).

161. वैशेषिकाणां तु ''पृथक्त्वं घटावधिकम्'' इत्यनुमानेन न तन्निर्वाहः ...... अभानात् (p.398).

162. आचार्यादिमते अन्वयप्रयोजकरूपवत्त्वस्यैव योग्यत्वात् (p.398).

।। अनुमानत्रैविध्यनिरूपणम् ।।

163. चिन्तामणावपि ..... प्रमेयत्वस्यैव साध्यता दर्शिता .... (p.402).

Vide: *TC.*, Vol. II., Part I, p.375.

।। व्यतिरेकव्याप्तिनिरुपणम् ।।

164. केचित्तु - व्यतिरेकसहचारेण अन्वयव्याप्तिरेव गृह्यते ..... इति - वदन्ति (p.408).

आचार्यमतम् आह - केचित्तु इति (p.408).

Vide: *Ny.Ku.*, p.419.

।। इच्छानिरूपणम् ।।

165. तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते (p.418).

बलवद्द्वेषः तत्र प्रतिबन्धः इति अन्ये (p.419).

।। प्रयत्ननिरूपणम् ।।

166. कार्यताज्ञानं प्रवर्तकम् इति गुरवः (p.429).

Vide: *TC.*, Vol. IV., Part II, p.6.

167. अत्र केचित् - सुखमात्रजनके कर्मणि ..... अप्रसिद्धम् इति तत्र प्रवृत्त्यभावप्रसङ्ग इति (p.433).

168. मिश्रास्तु - इष्टोत्पत्त्यनान्तरीयकनरकदुःखाजनकत्वम् उक्तस्यार्थ इति न अप्रसिद्धिः इति - आहुः (p.433).

169. नव्यास्तु - ''मम इदं कृतिसाध्यम्'' इति ज्ञानं न प्रवर्तकम् ..... इति - आहुः (p.443).

170. प्राभाकरानुयायिनवीनमतम् आह - नव्यास्तु इति (p.444).

Vide: *TC.*, Vol. IV, Part I, p.166.

171. स्वेच्छाधीनकृतिसाध्यताज्ञानस्य हेतुत्ववादिमणिकृन्मतेऽपि .... प्रवृत्तिरूपकृतिलाभायैव इति भावः (p.445).

172\. ..... प्राणसञ्चारस्य प्रवृत्त्ययोग्यत्वादेव न तत्र प्रवृत्तिः इति **मिश्रैः** अभिहितम् (p.447).

"कृतौ च .... जीवनयोनिकृतिसाध्ये न प्रवृत्तिः" इति **मणिव्याख्या-**नावसरे - कृतौ चिकीर्षाधीनत्वविशेषणवैयर्थ्यप्रतिपादनावसरे इति शेषः (p.454).

Vide: *TC.*, Vol. IV, Part II, p.43.

172\. पण्डापूर्वं स्वतः प्रयोजनं नित्यंस्य कर्मणः इति **प्राभाकरमतम्** (p.465).

173\. **केचित्तु** – श्येनस्य हिंसाफलम्, न तु मरणम् ... इति - आहुः (p.474).

Vide: *VV*, Vol. II. pp.35-38.

174\. अत्र **नव्याः** - मास्तु श्येनस्य "मा हिंस्यात्" इति निषेधविषयत्वम्, तथापि अभिचारतया पापजनकत्वं सर्वसंमतम् (p.475).

Vide: *VV*, Vol. II., p.343.

175\. विध्यर्थश्च आप्ताभिप्रायः ..... इति **उदयनाचार्यमतम्** (p.481).

Vide: *Ny.Ku.*, 5.15.

176\. अत्र ..... स्वर्गधर्मत्वस्य व्यापकताशरीरे उपलक्षणतयैव प्रवेशात् न .... अप्रसिद्धिः । अधिकं **व्युत्पत्तिवादे लिङर्थविचारे** द्रष्टव्यम् (p.487).

Vide: *VV*, Part II., p.315.

177\. एवं **प्राचीनप्राभाकराः** - ...... पाकत्वेन रूपेण अनागतपाकेऽपि कृतिसाध्यत्वानुमितिः .... (p.448).

178\. .... "घटो घटः" इत्यत्रापि .... न घटत्वे घटत्वावच्छिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकता-

संबन्धेन शाब्दबोधापत्तिः इति व्युत्पत्तिवादे **गदाधरभट्टाचार्यैः** न्यरुपि (p.452).

Vide: *VV*, Part I, p.70

179. अत्र **भट्टपादाः**-लोके प्रवृत्तिः द्वेधा-स्वेच्छाधीना परप्रेरणाजन्या च (p.456).

180. अत एव **कुसुमाञ्जलौ** - ...... ''गुरुमतम् एतत्, न गुरोर्मतम्'' इति अभिधायैव उपेक्षितम् **आचार्यैः** (p.462).

Vide: *Ny.Ku.*, p.98.

181. अत्र ''सदेहस्य आत्मनः ...... मनसा सह संयोगः जीवनम्'' इति **कन्दलीग्रन्थः** (p.490).

Vide: *NKL*, p.638.

182. एतादृशजीवनपूर्वकत्वं **प्राचीनाः** यत्नविशेषे स्वीकुर्वन्ति (p.490).

Vide: *KV*, p.252.

183. प्राणक्रियायामेव तत्त्वं सुवचम् इति यत्नविशेषे मानाभाव इति **नवीनानाम् अभिसन्धिः** (p.490).

।। संस्कारनिरूपणम् ।।

184. चतुर्षु क्षित्यादिषु स्थितिस्थापकत्वं **केचित् मन्यन्ते** (p.496).

Vide: *PPB*, p.658.

185. अत्र **केचित्** - उत्तरसंयोगेनैव ..... संभवात् ..... अलं वेगेन । .... प्रत्यक्षमेव वेगे प्रमाणम् इति आहुः (p.497).

186. **परे तु** - अनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयात् उद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यते इति – आहुः (p.498).

मणिकृन्मतं प्रदर्शयति - **परे तु** इति (p.499).

187. परमापूर्वं प्रति स्वर्गं प्रति च .... दर्शपूर्णमासोभयसाधारणवैजात्येन कारणत्वम् इति एके (p.506).

188. दर्शत्वेन पूर्णमासत्वेन च कारणत्वं .... इति अपरे (p.506).

189. इदं च अपूर्वं ..... कर्तृनिष्ठम् उत्पद्यते इति एके । भोक्तृनिष्ठम् इति संप्रदायः (p.506).

190. प्राभाकरास्तु – यागक्रिया ..... सूक्ष्मरूपेण ..... यागकर्तरि आत्मनि वा अवस्थाय फलम् आरभते इति – प्राहुः (p.507).

* * *

Index of Citations in the Text

Parts I and II

Index of Citations in the Text
Parts I and II

—***—

SELECT BIBLIOGRAPHY

1. ĀTMATATTVA-VIVEKA of Udayanācārya. Edited with the Commentaries, *Kalpalatā* of Śaṅkara Miśra, *Prakāśikā* of Bhagīratha Ṭhakkur and *Dīdhiti* of Raghunātha Śiromaṇi, by Kiśoranāth Jhā. 2 Vols. Madhubani, Bihar: Published by the Editor, 2008.

2. BHŪṢAṆASĀRA of Kauṇḍa Bhaṭṭa with the Commentaries *Prabhā* and *Darpaṇa*. Varanasi: Kasi Sanskrit Series, 188. 1969.

3. CATURDAŚALAKṢAṆĪ - GADĀDHARĪ with the Commentary *Vivaraṇa* by Rāmānuja Tātācārya. Chennai,1999.

4. KHAṆṬHĀBHARAṆA — See *Nyāyalīlāvatī*.

5. KĀRIKĀVALĪ of Viśvanātha Pañcānana. Edited with *Muktāvalī*, *Prabhā*, *Mañjūṣā*, *Dinakarī*, *Rāmarudrīya (Taraṅgiṇī)* and *Gaṅgārāma-jaṭīya*. Chennai: Sri Ḅalamanorama Press, 1923.

6. KĀVYA-PRAKĀŚA of Mammaṭa with the Commentary *Bālabodhinī*. Ed. by R. D. Karmarkar. Poona: The Bhandarkar Oriental Research Institute. 1965.

7. KHAṆḌANA- KHAṆḌA-KHĀDYA of Śri Harṣa with the Commentary, *Khaṇḍana-bhūṣā-maṇi* of Raghunātha Śiromaṇi. Varanasi: Sampurnananda Visvavidyalaya, 1990.

8. KIRAṆĀVALĪ of Udayanācārya. Ed. by Jitendra S. Jetly, Baroda: The Oriental Research Institute. 1971.

9. MAHĀBHĀṢYA of Patañjali with the Commentaries *Pradīpa* and *Uddyota*. 5 Vols. Delhi: Chaukhamba Sanskrit Pratishthan.1988.

10. MAÑJUṢĀ— See *Kārikāvalī*.

11. MĪMĀṂSĀDARŚANAM of Jaimini with the *Bhāṣya* of Śabara and the *Tantravārttika* and *Ṭupṭikā* of Kumārila

Bhaṭṭa. Poona: Anandasrama Sanskrit Series, 97. 1970 and 1973.

12. NYĀYABHŪṢAṆAM of Bhāsarvajñā. Ed. by Swami Yogendrananda. Varanasi: Ṣaḍ-Darśana-Prakāśana-Pratiṣṭhānam,1968.

13. NYĀYAKANDALĪ - See *Praśastapāda-bhāṣya.*

14. NYĀYAKUSUMĀNJALI of Udayanācārya with the Commentaries, *Bodhinī, Prakāśa, Prakāśikā,* and *Makaranda.* Varanasi: Chaukhambha Sanskrit Sansthan, 2002.

15. NYĀYA-LĪLĀVATĪ of Vallabhācārya with the Commentaries *Prakāśa* of Vardhamānopādhyāya, *Khaṇṭhābharaṇa* of Śaṅkara Miśra and *Vivṛti* of Bhagīratha Ṭhakkur. Varanasi: Chaukhamba Sanskrit Series office, 1991.

16. NYĀYA-SIDDHĀNTA-MAÑJARĪ of Jānakīnātha Bhaṭṭācārya. Ed. by Baliram Sukla: Delhi: Eastern Book Links. 1995.

17. NYĀYA-SŪTRA with the *Bhāṣya* of Vātsyāyana, the *Nyāya-Vārttika* of Uddyotakara, the *Tātparyaṭīkā* of Vācaspatimiśra, and the *Nyāya-sūtra-vṛtti* of Viśvanāthapañcānana. Delhi: Munshiram Manoharlal Publishers Pvt. Ltd., 2003.

18. PADĀRTHA-TATTVA-NIRŪPAṆAM of Raghunātha Śiromaṇi. 2 Parts. Ed. with three Commentaries, *Padārtha-khaṇḍana-Vyākhyā* of Raghudeva Nyāyālaṅkāra, *Padārtha-tattva-vivecana-prakāśa* of Rāmabhadra Sārvabhauma, and *Padārtha-tattvāvaloka* by Viśvanātha-pañcānana by Anītā Rājapal. Delhi: Amar Granth Publications. 2008.

19. PAKṢATĀ-GĀDĀDHARĪ with the Commentary, *Bhāva-bodhinī* by Rāmānuja Tātācārya. Tirupati: Kendrīya-Saṁskṛta-Vidyāpīṭha, 1988.

20. PRABHĀ - See *Kārikāvalī*

21. PRAKARAṆAPAÑCIKĀ of Śalikānātha. Ed. by A. Subrahmanya Sastri. Varanasi: Benares Hindu University,1961.

22. PRAŚASTAPĀDABHĀṢYA with the Commentary *Nyāyakandalī* of Śridhara. Ed. by Śrī Durgādhar Jhā Śarma. Varanasi: Sampurnananda Sanskrit Visvavidyalaya,1997.

23. ŚABDA-KAUSTUBHA of Bhaṭṭoji Dīkṣita. Vol.I. Benares: Chaukhamba-Saṁskṛta-Granthamālā, 2. Chaukhamba Sanskrit Series Office,1990.

24. ŚABDA-ŚAKTI-PRAKĀŚIKĀ of Jagadīśa Tarkālaṅkāra. Kāśī Saṁskṛta Granthamālā, No.109. Varanasi: Chaukhamba Sanskrit Sansthan,1973.

25. ŚAKTIVĀDA of Gadādhara with the Commentary *Vivṛti*. Benares: The Kasi Sanskrit Series (Haridās Sanskrit Granthamālā), No. 77., 1929.

26. SĀMĀNYANIRUKTI-TATTVACINTĀMAṆI with *Dīdhiti* and *Gādādharī*. Kāñcī: Śāstramuktāvalī Series. 44. 1916.

27. SIDDHĀNTALAKṢANAM of Gaṅgeśa with *Dīdhiti* and *Gādādharī*. Published with the Commentary *Vivṛti* of Śri Kṛṣṇaswāmi Tātācārya. Tirupati. Rashtriya Sanskrit Vidyāpīṭha. 2002.

28. ŚĀBARA- BHĀṢYA - See *Mīmāṁsādarśanam*.

29. SUBODHINĪ — A Commentary on the *Kārikāvalī*, *Muktāvalī*, *Dinakarīya* and *Rāmarudrīya* by H. H. The Mahārājā Parīkṣit Rāma Varma. Tiruppunithura. 1956.

30. TANTRAVĀRTTIKA of Kumārila Bhaṭṭa. - See *Mīmāṁsādarśanam*.

31. TARAṄGIṆĪ *(Rāmarudrīya)* — See *Kārikāvalī*.

32. TARKA-SAṄGRAHA-DĪPIKĀ-PRAKĀŚIKĀ with the Commentary *Bālapriyā* of Rāmānuja Tātācārya and the Commentary *Prasāraṇa* of Kṛṣṇa Tātācārya of

Tirupputkuli. Chennai: Śrī Śrī Śrī Mahalakshmi Mathrubhutheswarar Trust. 2008.

33. TATTVACINTĀMAṆI of Gaṅgeśa Upādhyāya. 4 Vols.

Vol I. *Pratyakṣakhaṇḍa* with extracts from the Commentaries of Mathurānātha and Jayadeva Miśra.

Vol II. Part-I. *Anumānakhaṇḍa* with the Commentary of Mathurānātha.

Part-II. *Anumānakhaṇḍa-Īśvarānumāna* with the Commentary of Jayadevamiśra.

Vol III. *Upamānakhaṇḍā* with the Commentary of Kṛṣṇakānta-Vidyā-Vāgiśa.

Vol IV. *Śabdakhaṇḍa.*

Part-I. *Śabdaprāmāṇyavādadi-Ucchannapracchanna-Vādānta* with the Commentary of Mathurānatha.

Part-II. *Vidhivādādi-Pramāṇacatuṣṭaya-Prāmāṇya-Vādānta* with the Commentaries of Mathurānātha and Jayadevamiśra; and, *Ākhyātavāda* and *Nañvāda* of Raghunātha Śiromaṇi.

Edited by Kamakhyanatha Tarkavāgīśa. Delhi: Chaukhamba Sanskrit Pratishthan. 1990.

34. VĀKYAPADĪYA of Bhartṛhari. Ed. by K.V. Abhyankar and V.P Limaye. Poona: Sanskrit and Prākṛt Series, Vol.2., 1965.

35. VIDHIVIVEKA of Maṇḍaṇa Miśra. Ed. by Mahaprabhulal Goswami. Varanasi: Tara Printing Works,1986.

36. VAIŚEṢIKA DARŚANAM of Kaṇāda with the Commentary *Rasāyana* by Uttamur Vīrarāghavācārya, Chennai, 1958.

37. VYUTPATTIVĀDA of Gadādhara Bhaṭṭācārya with the Commentary *Vidvanmanoramā* of Rāmānuja Tātācārya. 2 Vols. Tirupati: Rashtriya Sanskrit Vidyapitha. 2011.

◊◊◊

